52

॥ श्रीः ॥

न्यायदर्शनम् ।

पूज्यपादमहर्षिगोतम[illegible]कृतम् ।

NYAYADARSHA[illegible]

Of

SRI GOTAMA MUNI

Edited by

SHDDARS'ANACHARYA, TARKARATNA

NYAYARATNA

GOSWAMI DAMODAR S'ASTRI

प्रकाशकः—

जयकृष्णदास—हरिदासगुप्तः——

चौखम्बा संस्कृत सीरिज आफिस, विद्याविलास प्रेस,

गोपालमन्दिरके उत्तर फाटक, बनारस सिटी ।

[illegible]

श्रीगणेशाय नमः ।

महर्षिगोतमापराख्य-

श्रीमदक्षपादप्रणीतम् ।

न्यायदर्शनम् ।

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १ ॥ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ॥ २ ॥ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ ३ ॥ इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥ अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामा-

न्यतो दृष्टञ्च ॥ ५ ॥ प्रसिद्धसाधर्म्यात् साध्य-साधनमुपमानम् ॥ ६ ॥ आप्तोपदेशः शब्दः ॥ ७ ॥ स द्विविधो दृष्टादृष्टार्थत्वात् ॥ ८ ॥ आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ ९ ॥ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति ॥ १० ॥ चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ ११ ॥ घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ १२ ॥ पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥ १३ ॥ गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥ १४ ॥ बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १५ ॥ युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १६ ॥ प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥ १७ ॥ प्रवर्त्तनालक्षणा दोषाः ॥ १८ ॥ पुनरुत्पत्तिः प्रेत्यभावः ॥ १९ ॥ प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ २० ॥ बाधना-

लक्षणं दुःखम् ॥ २१ ॥ तदत्यन्तविमोक्षोऽपवर्गः ॥ २२ ॥ समानानेकधर्म्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ २३ ॥ यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम् ॥ २४ ॥ लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ २५ ॥ तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥ २६ ॥ सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥२७॥ सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ २८ ॥ समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥ २९ ॥ यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥ ३० ॥ अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥३१॥ प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः

॥ ३२ ॥ साध्यनिर्देशः प्रतिज्ञा ॥ ३३ ॥ उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ॥३४॥ तथा वैधर्म्यात् ॥ ३५ ॥ साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ॥ ३६ ॥ तद्विपर्य्ययाद्वा विपरीतम् ॥ ३७ ॥ उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ ३८ ॥ हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ ३९ ॥ अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥४०॥ विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ ४१ ॥

इति न्यायदर्शने प्रथमाध्यायस्य प्रथमाह्निकम् ॥

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ १ ॥ यथोक्तोपपन्नश्छलजातिनि-

ग्रहस्थानसाधनोपालम्भो जल्पः ॥ २॥ स-
प्रतिपक्षस्थापनाहीनो वितण्डा ॥ ३ ॥ स-
व्यभिचारविरुद्धप्रकरणसमसाध्यसमातीत-
काला हेत्वाभासाः ॥ ४ ॥ अनैकान्तिकः
सव्यभिचारः ॥ ५॥ सिद्धान्तमभ्युपेत्य त-
द्विरोधी विरुद्धः ॥ ६ ॥ यस्मात्प्रकरणचिन्ता
स निर्णयार्थमपदिष्टः प्रकरणसमः ॥ ७ ॥
साध्याविशिष्टः साध्यत्वात् साध्यसमः ॥८॥
कालात्ययापदिष्टः कालातीतः ॥ ९ ॥ वच-
नविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ १० ॥
तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचा-
रच्छलञ्चेति ॥ ११ ॥ अविशेषाभिहितेऽर्थे व-
क्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥१२॥
सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूता-
र्थकल्पना सामान्यच्छलम् ॥ १३ ॥ धर्म्मवि-
कल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम्

॥१४॥ वाक्छलमेवोपचारच्छलं तदविशेषात् ॥१५॥ न तदर्थान्तरभावात् ॥१६॥ अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः ॥१७॥ साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥१८॥ विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥१९॥ तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥२०॥

इति न्यायदर्शने प्रथमाध्यायस्य द्वितीयमाह्निकं प्रथमोऽध्यायश्च ॥

समानानेकधर्म्माध्यवसायादन्यतरधर्म्माध्यवसायाद्वा न संशयः ॥१॥ विप्रतिपत्त्यव्यवस्थाऽध्यवसायाच्च ॥२॥ विप्रतिपत्तौ च सम्प्रतिपत्तेः ॥३॥ अव्यवस्थाऽऽत्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥४॥ तथाऽत्यन्तसंशयस्तद्धर्म्मसातत्योपपत्तेः ॥५॥ यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासं-

शयो नात्यन्तसंशयो वा ॥६॥ यत्र संशयस्त-त्रैवमुत्तरोत्तरप्रसङ्गः ॥७॥ प्रत्यक्षादीनामप्रा-माण्यं त्रैकाल्यासिद्धेः॥ ८॥ पूर्वं हि प्रमाण-सिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ॥ ९ ॥ पश्चात् सिद्धौ न प्रमाणेभ्यः प्रमेय-सिद्धिः ॥ १० ॥ युगपत्सिद्धौ प्रत्यर्थनियत-त्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ ११ ॥ त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥ सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः॥१३॥ तत्प्रामाण्ये वा न सर्वप्रामाण्यविप्रतिषेधः॥१४॥ त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्त-त्सिद्धेः ॥ १५॥ प्रमेयता च तुलाप्रामाण्यवत् ॥१६॥ प्रमाणतः सिद्धेः प्रमाणानां प्रमाणा-न्तरसिद्धिप्रसङ्गः ॥ १७॥ तद्विनिवृत्तेर्वा प्र-माणान्तरसिद्धिवत् प्रमेयसिद्धिः ॥ १८ ॥ न प्रदीपप्रकाशवत् तत्सिद्धेः ॥१९॥ प्रत्यक्षा-

क्षणानुपपत्तिरसमग्रवचनात् ॥ २० ॥ नात्म-
मनसोः संनिकर्षाभावे प्रत्यक्षोत्पत्तिः ॥२१॥
दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ॥ २२ ॥
ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २३ ॥
तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २४ ॥ प्र-
त्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः संनिकर्षस्य
स्वशब्देन वचनम् ॥२५॥ सुप्तव्यासक्तमनसां
चेन्द्रियार्थयोः संनिकर्षनिमित्तत्वात् ॥२६॥
तैश्चापदेशो ज्ञानविशेषाणाम् ॥ २७ ॥ व्या-
हतत्वादहेतुः ॥ २८ ॥ नार्थविशेषप्राबल्यात्
॥ २९ ॥ प्रत्यक्षमनुमानमेकदेशग्रहणादुपल-
ब्धेः ॥ ३० ॥ न प्रत्यक्षेण यावत्तावदप्युपल-
म्भात् ॥ ३१ ॥ न चैकदेशोपलब्धिरवयविस-
द्भावात् ॥ ३० ॥ साध्यत्वादवयविनि सन्देहः
॥ ३३ ॥ सर्वाग्रहणमवयव्यसिद्धेः ॥ ३४ ॥ धा-
रणाकर्षणोपपत्तेश्च ॥ ३५ ॥ सेनावनवद् ग्र

हणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ ३६ ॥ रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥ ३७॥ नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ॥ ३८ ॥ वर्त्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥ ३९ ॥ तयोरप्यभावो वर्त्तमानाभावे तदपेक्षत्वात्॥४०॥ नातीतानागतयोरितरेतरापेक्षा सिद्धिः॥४१॥ वर्त्तमानाभावे सर्वाग्रहणम्प्रत्यक्षानुपपत्तेः ॥ ४२ ॥ कृतताकर्तव्यतोपपत्तेस्तूभयथा ग्रहणम् ॥४३॥ अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥४४॥ प्रसिद्धसाधर्म्यादुपमानासिद्धिः ॥ ४४ ॥ प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ ४५ ॥ प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४६ ॥ नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति ॥ ४७ ॥ तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः॥४८॥

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ ॥ ४६ ॥ उपलब्धेरद्विप्रवृत्तित्वात् ॥ ५० ॥ सम्बन्धाच्च ॥ ५१ ॥ आप्तोपदेशसामर्थ्याच्छब्दार्थसंप्रत्ययः ॥ ५२ ॥ पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः ॥ ५३ ॥ शब्दार्थव्यवस्थानादप्रतिषेधः ॥ ५४ ॥ न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य ॥ ५५ ॥ जातिविशेषे चानियमात् ॥ ५६ ॥ तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥ ५७ ॥ न कर्म्मकर्तृसाधनवैगुण्यात् ॥ ५८ ॥ अभ्युपेत्य कालभेदे दोषवचनात् ॥ ५९ ॥ अनुवादोपपत्तेश्च ॥ ६० ॥ वाक्यविभागस्य चार्थग्रहणात् ॥ ६१ ॥ विध्यर्थवादानुवादवचनविनियोगात् ॥ ६२ ॥ विधिर्विधायकः ॥ ६३ ॥ स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥ ६४ ॥ विधिविहितस्यानुवचनमनुवादः ॥ ६५ ॥ ना-

नुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥ ६६ ॥ शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ ६७ ॥ मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥ ६८ ॥

इति न्यायदर्शने द्वितीयाध्यायस्य प्रथममाह्निकम् ॥

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ॥१॥ शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः ॥२॥ अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥ ३ ॥ अनर्थापत्तावर्थापत्त्यभिमानात् ॥४॥ प्रतिषेधाप्रामाण्यञ्चानैकान्तिकत्वात् ॥ ५ ॥ तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६ ॥ नाभावप्रामाण्यम्प्रमेयासिद्धेः ॥७॥ लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः ॥ ८ ॥ असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥ ९ ॥

तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥ न लक्षणावस्थितापेक्षासिद्धेः ॥ ११ ॥ प्रागुत्पत्तेरभावोपपत्तेश्च ॥ १२ ॥ आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ॥ १३ ॥ न घटाभावसामान्यनित्यत्वाद् नित्येष्वप्यनित्यवदुपचाराच्च ॥ १४ ॥ तत्त्वभाक्तयोर्नानात्वविभागादव्यभिचारः ॥ १५ ॥ सन्तानानुमानविशेषणात् ॥ १६ ॥ कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वप्यव्यभिचार इति ॥१७॥ प्रागुच्चारणाद्यनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥ १८ ॥ तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥ १९ ॥ अनुपलम्भादप्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भात् ॥ २० ॥ अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ २१ ॥ अस्पर्शत्वात् ॥ २२ ॥ न कर्म्मानित्यत्वात् ॥ २३ ॥ नाणुनित्यत्वात्

॥ २४ ॥ सम्प्रदानात् ॥ २५ ॥ तदनुपलब्धेर-
हेतुः ॥ २६ ॥ अध्यापनादप्रतिषेधः ॥ २७ ॥
अभ्यासात् ॥ २८ ॥ नान्यत्वेऽप्यभ्यासस्यो-
पचारात् ॥ २९ ॥ अन्यदन्यस्मादनन्यदि-
त्यन्यताऽभावः ॥ ३० ॥ तदभावे नास्त्यन-
न्यता तयोरितरेतरापेक्षसिद्धेः ॥ ३१ ॥ वि-
नाशकारणानुपलब्धेः ॥ ३२ ॥ अश्रवणका-
रणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ ३३ ॥ उ-
पलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ३४
पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपल-
ब्धिः ॥ ३५ ॥ विनाशकारणानुपलब्धेश्चाव-
स्थाने तन्नित्यत्वप्रसङ्गः ॥ ३६ ॥ अस्पर्शत्वा-
दप्रतिषेधः ॥ ३७ ॥ विभक्त्यन्तरोपपत्तेश्चा-
समासे ॥ ३८ ॥ विकारादेशोपदेशात् संशयः
॥ ३९ ॥ प्रकृतिविवृद्धौ विकारवृद्धेः ॥ ४० ॥
न्यूनसमधिकोपलब्धेर्विकाराणामहेतुः ॥ ४१ ॥
नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४२ ॥

द्रव्यविकारे वैषम्यवद्वर्णविकारविकल्पः ॥४३॥ न विकारधर्मानुपपत्तेः ॥ ४४ ॥ विकारप्राप्तानामपुनरापत्तेः ॥ ४५ ॥ सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४६ ॥ नित्यत्वे विकारादनित्यत्वे चानवस्थानात् ॥ ४७ ॥ नित्यानामतीन्द्रियत्वात्तद्धर्म्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ ४८ ॥ अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ॥ ४९ ॥विकारधर्म्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ ५० ॥ प्रकृत्यनियमाद्वर्णविकाराणाम् ॥ ५१ ॥ अनियमे नियमान्नानियमः ॥ ५२ ॥ नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥५३॥ गुणान्तरापत्त्युपमर्दह्रासबृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकाराः ॥ ५४ ॥ ते विभक्त्यन्ताः पदम् ॥ ५५ ॥ तदर्थे व्यक्त्याकृतिजातिसंनिधावुपचारात् संशयः ॥५६॥ याशब्दस-

मूहत्यागपरिग्रहसंख्यावृद्ध्युपचयवर्णसमा-सानुबन्धानां व्यक्तावुपचाराद् व्यक्तिः ॥५७॥ न तदनवस्थानात् ॥५८॥ सहचरणस्थान-तादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दन-गङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः ॥ ५९ ॥ आकृतिस्तदपेक्षत्वात् सत्त्वव्यव-स्थानसिद्धेः ॥ ६० ॥ व्यक्त्याकृतियुक्तेऽप्य-प्रसङ्गात्प्रोक्षणादीनां मृद्गवके जातिः ॥६१॥ नाकृति व्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥६२॥ व्यक्त्याकृतिर्जातयस्तु पदार्थः ॥ ६३ ॥ व्य-क्तिर्गुणविशेषाश्रयो मूर्तिः ॥ ६४ ॥ आकृति-र्जातिलिङ्गाख्या ॥ ६५ ॥ समानप्रसवात्मि-का जातिः ॥ ६६ ॥

इति न्यायदर्शने द्वितीयाध्याये द्वितीयाह्निकं-
द्वितीयोऽध्यायश्च ॥

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥१॥ न विषयव्यवस्थानात् ॥२॥ तदव्यवस्थानादेवात्मसद्भावादप्रतिषेधः ॥३॥ शरीरदाहे पातकाभावात् ॥४॥ तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥५॥ न कार्य्याश्रयकर्तृवधात् ॥६॥ सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥७॥ नैकस्मिन् नासास्थिव्यवहिते द्वित्वाभिमानात् ॥८॥ एकविनाशे द्वितीयाविनाशाद् नैकत्वम् ॥९॥ अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥१०॥ दृष्टान्तविरोधादप्रतिषेधः ॥११॥ इन्द्रियान्तरविकारात् ॥१२॥ न स्मृतेः स्मर्त्तव्यविषयत्वात् ॥१३॥ तदात्मगुणसद्भावादप्रतिषेधः ॥१४॥ अपरिसङ्ख्यानाच्च स्मृतिविषयस्य ॥१५॥ नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥१६॥ ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥१७॥ नियमश्च निरनुमानः ॥

१८॥ पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्ष-
भयशोकसम्प्रतिपत्तेः ॥ १६ ॥ पद्मादिषु प्र-
बोधसंमीलनविकारवत्तद्विकारः ॥ २० ॥ नो-
ष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकवि-
काराणाम् ॥ २१ ॥ प्रेत्याहाराभ्यासकृतात्
स्तन्याभिलाषात् ॥ २२ ॥ अयसोऽयस्का-
न्ताभिगमनवत्तदुपसर्पणम् ॥ २३ ॥ नान्यत्र
प्रवृत्त्यभावात् ॥ २४ ॥ वीतरागजन्मादर्श-
नात् ॥ २५ ॥ सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः
॥ २६ ॥ न सङ्कल्पनिमित्तत्वाद् रागादीनाम्
॥ २७ ॥ पार्थिवं गुणान्तरोपलब्धेः ॥ २८ ॥
श्रुतिप्रामाण्याच्च ॥ २६ ॥ कृष्णसारे सत्युप-
लम्भाद् व्यतिरिच्य चानुपलम्भात् संशयः ॥ ३० ॥
महदणुग्रहणात् ॥ ३१ ॥ रश्म्यर्थसंनिकर्ष-
विशेषात् तद्ग्रहणम् ॥ ३२ ॥ तदनुपलब्धेर-
हेतुः ॥ ३३ ॥ नानुमीयमानस्य प्रत्यक्षतोऽ-

नुपलब्धिरभावहेतुः ॥ ३४ ॥ द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ ३५ ॥ अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ॥ ३६ ॥ कर्म्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ ३७ ॥ अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः ॥ ३८ ॥ मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥ ३९ ॥ न रात्रावप्यनुपलब्धेः ॥ ४० ॥ बाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ४१ ॥ अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥ नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ४३ ॥ अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥ ४४ ॥ न कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ४५ ॥ अप्रतिघातात् संनिकर्षोपपत्तिः ॥ ४६ ॥ आदित्यरश्मेः स्फटिकान्तरेऽपि दाह्येऽविघातात् ॥ ४७ ॥ नेतरेतरधर्मप्रसङ्गात् ॥ ४८ ॥

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ॥ ४९ ॥ दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः ॥ ५० ॥ स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ५१ ॥ त्वगव्यतिरेकात् ॥ ५२ ॥ न युगपदर्थानुपलब्धेः ॥ ५३ ॥ विप्रतिषेधाच्च न त्वगेका ॥ ५४ ॥ इन्द्रियार्थपञ्चत्वात् ॥ ५५ ॥ न तदर्थबहुत्वात् ॥ ५६ ॥ गन्धत्वाद्यव्यतिरेकाद्गन्धादीनामप्रतिषेधः ॥ ५७ ॥ विषयत्वाव्यतिरेकादेकत्वम् ॥ ५८ ॥ न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥ ५९ ॥ भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ६० ॥ गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्य्यन्ताः पृथिव्या अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥ ६२ ॥ न सर्वगुणानुपलब्धेः ॥६३॥ एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरा-

णां तदनुपलब्धिः ॥६४॥ संसर्गाच्चानेकगुणग्रहणम् ॥६६॥ न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥६७॥ पूर्वपूर्वगुणोत्कर्षात्तत्तत्प्रधानम् ॥६८॥ तद्व्यवस्थानन्तु भूयस्त्वात् ॥६९॥ सगुणानामिन्द्रियभावात् ॥ ७० ॥ तेनैव तस्याग्रहणाच्च ॥ ७१ ॥ न शब्दगुणोपलब्धेः ॥ ७२ ॥ तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७३ ॥

इति न्यायदर्शने तृतीयाध्यायस्य प्रथमाह्निकम् ॥

कर्माकाशसाधर्म्यात् संशयः ॥ १ ॥ विषयप्रत्यभिज्ञानात् ॥ २ ॥ साध्यसमत्वादहेतुः ॥ ३ ॥ न युगपदग्रहणात् ॥ ४ ॥ अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥ ५ ॥ क्रमवृत्तित्वादयुगपद् ग्रहणम् ॥६॥ अप्रत्यभिज्ञानञ्च विषयान्तरव्यासङ्गात् ॥ ७ ॥ न गत्यभावात् ॥ ८ ॥ स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः

॥ ९ ॥ स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वा-द् व्यक्तीनामहेतुः ॥ १० ॥ नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा ॥ ११ ॥ नोत्पत्तिविना-शकारणोपलब्धेः ॥ १२ ॥ क्षीरविनाशे कार-णानुपलब्धिवद्दध्युत्पत्तिवच्च तदुपपत्तिः ॥ १३ ॥ लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ १४ ॥ न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥ १५ ॥ व्यू-हान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनि-वृत्तेरनुमानम् ॥ १६ ॥ क्वचिद्विनाशकारणा-नुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥ १७ ॥ नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥ १८ ॥ युगपज्ज्ञेयानुपलब्धेश्च न मनसः ॥ १९ ॥ तदात्मगुणत्वेऽपि तुल्यम् ॥ २० ॥ इन्द्रियैर्म-नसः सन्निकर्षाभावात् तदनुत्पत्तिः ॥ २१ ॥ नोत्पत्तिकारणानपदेशात् ॥ २२ ॥ विनाश-कारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः

॥ २३ ॥ अनित्यत्वग्रहाद् बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् ॥ २४ ॥ ज्ञानसमवेतात्मप्रदेशसंनिकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ॥ २५ ॥ नान्तःशरीरवृत्तित्वान्मनसः ॥ २६ ॥ साध्यत्वादहेतुः ॥२७॥ स्मरतःशरीरधारणोपपत्तेरप्रतिषेधः ॥ २८ ॥ न तदाशुगतित्वान्मनसः ॥ २९ ॥ न स्मरणकालानियमात् ॥ ३० ॥ आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ॥ ३१ ॥ व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥३२॥ प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् युगपदस्मरणम् ॥ ३३ ॥ प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते यौगपद्यप्रसङ्गः॥ ३४ ॥ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥ ३५ ॥ तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः॥ ३६॥ परश्वादावारम्भनिवृत्तिदर्शनात्

॥ ३७ ॥ कुम्भादिष्वनुपलब्धेरहेतुः ॥ ३८ ॥ नियमानियमौ तु तद्विशेषकौ ॥ ३९ ॥ यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ ४० ॥ परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥४१॥ स्मरणन्त्वात्मनो ज्ञस्वाभाव्यात् ॥४२॥ प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्य्यवियोगैककार्य्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्म्माधर्म्मनिमित्तेभ्यः ॥ ४३ ॥ कर्म्मानवस्थायिग्रहणात् ॥ ४४ ॥ अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्सम्पाते रूपाद्यव्यक्तग्रहणवत् ॥ ४५ ॥ हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा ॥४६॥ ग्रहणे हेतुविकल्पाद् ग्रहणविकल्पो न बुद्धिविकल्पात् ॥४७॥ प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥४८॥ द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ ४९ ॥

यावच्छरीरभावित्वाद्रूपादीनाम् ॥ ५० ॥ न पाकजगुणान्तरोत्पत्तेः ॥ ५१ ॥ प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ५२ ॥ शरीरव्यापित्वात् ॥ ५३ ॥ केशनखादिष्वनुपलब्धेः ॥ ५४ ॥ त्वक्पर्य्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ॥ ५५ ॥ शरीरगुणवैधर्म्यात् ॥ ५६ ॥ न रूपादीनामितरेतरवैधर्म्यात् ॥ ५७ ॥ ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥ ५८ ॥ ज्ञानायौगपद्यादेकं मनः ॥ ५९ ॥ न युगपदनेकक्रियोपलब्धेः ॥ ६० ॥ अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात् ॥ ६१ ॥ यथोक्तहेतुत्वाच्चाणु ॥ ६२ ॥ पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ६३ ॥ भूतेभ्यो मूर्त्त्युपादानवत् तदुपादानम् ॥ ६४ ॥ न साध्यसमत्वात् ॥ ६५ ॥ नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६६ ॥ तथाऽऽहारस्य ॥ ६७ ॥ प्राप्तौ चानियमात् ॥ ६८ ॥

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमि-त्तं कर्म्म ॥६९॥ एतेनानियमः प्रत्युक्तः ॥७०॥ उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः ॥ ७१ ॥ तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे ॥ ७२ ॥ न करणाकरणयोरारम्भदर्शनात् ॥७३ ॥ मनःकर्म्मनिमित्तत्वाच्च संयोगानु-च्छेदः ॥ ७४ ॥ नित्यत्वप्रसङ्गश्च प्रायणानु-पपत्तेः ॥ ७५ ॥ अणुश्यामतानित्यत्ववदेतत् स्यात् ॥७६॥ नाकृताभ्यागमप्रसङ्गात् ॥७७॥

इति न्यायदर्शने तृतीयाध्याये द्वितीयाह्निकं-तृतीयोऽध्यायश्च ॥ ३ ॥

प्रवृत्तिर्यथोक्ता ॥१॥ तथा दोषाः ॥२॥ तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥ ३ ॥ नैकप्रत्यनीकभावात् ॥ ४ ॥ व्यभिचारादहेतुः ॥ ५ ॥ तेषां मोहः पापीयान्नामूढस्येत-रोत्पत्तेः ॥६॥ निमित्तनैमित्तिकभावादर्थान्त-

रभावो दोषेभ्यः ॥७॥ न दोषलक्षणावरोधा-न्मोहस्य ॥८॥ निमित्तनैमित्तिकोपपत्तेश्च तु-ल्यजातीयानामप्रतिषेधः ॥ ९ ॥ आत्मनि-त्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥ व्यक्ताद् व्य-क्तानां प्रत्यक्षप्रामाण्यात् ॥ ११ ॥ न घटाद् घटानिष्पत्तेः ॥ १२ ॥ व्यक्ताद् घटनिष्पत्ते-रप्रतिषेधः ॥ १३ ॥ अभावाद्भावोत्पत्तिर्नानुप-मृद्य प्रादुर्भावात् ॥ १४ ॥ व्याघातादप्रयो-गः ॥ १५ ॥ नातीतानागतयोः कारकशब्द-प्रयोगात् ॥१६॥ न विनष्टेभ्योऽनिष्पत्तेः ॥१७॥ क्रमनिर्देशादप्रतिषेधः ॥ १८ ॥ ईश्वरः का-रणं पुरुषकर्म्माफल्यदर्शनात् ॥१९॥ न पुरु-षकर्म्माभावे फलानिष्पत्तेः ॥ २० ॥ तत्कारि-तत्वादहेतुः ॥२१॥ अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ॥ २२ ॥ अनिमि-त्तनिमित्तत्वान्नानिमित्ततः ॥ २३ ॥ निमि-

चानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥२४॥ सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥२५॥ नानित्यता नित्यत्वात् ॥ २६ ॥ तदनित्यत्वमग्नेर्दाह्यविनाश्यानुविनाशवत् ॥ २७॥ नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात् ॥ २८ ॥ सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥२९॥ नोत्पत्तिविनाशकारणोपलब्धेः ॥३०॥ तल्लक्षणावरोधादप्रतिषेधः ॥ ३१ ॥ नोत्पत्तितत्कारणोपलब्धेः ॥३२॥ न व्यवस्थाऽनुपपत्तेः ॥ ३३ ॥ सर्वं पृथग्भावलक्षणपृथक्त्वात् ॥३४॥ नानेकलक्षणैरेकभावनिष्पत्तेः ॥३५॥ लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ ३६॥ सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ३७॥ न स्वभावसिद्धेर्भावानाम् ॥ ३८ ॥ न स्वभावसिद्धिरापेक्षिकत्वात् ॥ ३९ ॥ व्याहतत्वादयुक्तम् ॥ ४० संख्यैकान्तासिद्धिः कारणा-

नुपपत्त्युपपत्तिभ्याम् ॥ ४१ ॥ न कारणावयवभावात् ॥४२॥ निरवयवत्वादहेतुः ॥ ४३ ॥ सद्यः कालान्तरे च निष्पत्तेः संशयः ॥ ४४ ॥ न सद्यः कालान्तरोपभोग्यत्वात् ॥४५॥ कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ॥ ४६ ॥ प्राङ्निष्पत्तेर्वृक्षफलवत्तत् स्यात् ॥४७॥ नासन्न सन्न सदसदसत्सदसतोर्वैधर्म्यात् ॥ ४८ ॥ उत्पादव्ययदर्शनात् ॥ ४९ ॥ बुद्धिसिद्धन्तु तदसत् ॥५०॥ आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः ॥५१॥ प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥५२॥ न पुत्रपशुस्त्रीपरिच्छेदहिरण्यान्नादिफलनिर्देशात् ॥ ५३ ॥ तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ॥५४॥ विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ॥ ५५ ॥ न सुखस्यान्तरालनिष्पत्तेः ॥ ५६ ॥ बाधनाऽनिवृत्तेर्वेदयतः पर्य्येषणदोषाद-

प्रतिषेधः ॥५७॥ दुःखविकल्पे सुखाभिमा-
नाच्च ॥ ५८ ॥ ऋणक्लेशप्रवृत्त्यनुबन्धादप-
वर्गाभावः ॥ ५९ ॥ प्रधानशब्दानुपपत्तेर्गु-
णशब्देनानुवादो निन्दाप्रशंसोपपत्तेः॥६०॥
समारोपणादात्मन्यप्रतिषेधः ॥ ६१ ॥ पा-
त्रचयान्तानुपपत्तेश्च फलाभावः ॥ ६२ ॥ सु-
षुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः॥६३॥
न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥६४॥
न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६५ ॥
प्रागुत्पत्तेरभावान् नित्यत्ववत् स्वाभाविकेऽ-
प्यनित्यत्वम् ॥६६॥ अणुश्यामताऽनित्यत्व-
वद्वा ॥ ६७ ॥ न सङ्कल्पनिमित्तत्वाच्च रागा-
दीनाम् ॥ ६८ ॥

इति न्यायदर्शने चतुर्थाध्यायस्य प्रथमाह्निकम् ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनि-
वृत्तिः ॥ १ ॥ दोषनिमित्तं रूपादयो विषयाः

सङ्कल्पकृताः ॥२॥ तन्निमित्तं त्ववयव्यभिमानः ॥ ३ ॥ विद्याऽविद्याद्वैविध्यात् संशयः ॥४॥ तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥ वृत्त्यनुपपत्तेरपि तर्हि न संशयः ॥ ६ ॥ कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥ ७ ॥ तेषु चावृत्तेरवयव्यभावः ॥ ८ ॥ पृथक् चावयवेभ्योऽवृत्तेः ॥ ९ ॥ न चावयव्यवयवाः ॥ १० ॥ एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११ ॥ अवयवान्तराभावेऽप्यवृत्तेरहेतुः ॥१२॥ केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः ॥ १३ ॥ स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः॥१४॥ अवयवावयविप्रसङ्गश्चैवमा प्रलयात् ॥१५॥ न प्रलयोऽणुसद्भावात् ॥१६॥ परं वा त्रुटेः ॥१७॥ आकाशव्यतिभेदात् तदनुपपत्तिः ॥१८॥ आकाशास-

वेगतत्वं वा॥१९॥ अन्तर्बहिश्च कार्य्यद्रव्यस्य कारणान्तरवचनादकार्य्ये तदभावः ॥ २०॥ शब्दसंयोगविभागाच्च सर्वगतम्॥२१॥ अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥२२॥ मूर्त्तिमताञ्च संस्थानोपपत्तेरवयवसद्भावः॥२३॥ संयोगोपपत्तेश्च ॥ २४॥ अनवस्थाकारित्वादनवस्थाऽनुपपत्तेश्चाप्रतिषेधः॥२५॥ बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुलब्धिः॥२६॥ व्याहतत्वादहेतुः॥२७॥तदाश्रयत्वादपृथग् ग्रहणम् ॥ २८॥ प्रमाणतश्चार्थप्रतिपत्तेः ॥ २९ ॥ प्रमाणानुपपत्त्युपपत्तिभ्याम्॥३०॥ स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः॥ ३१ ॥ मायागन्धर्वनगरमृगतृष्णिकावद्वा॥ ३२॥ हेत्वभावादसिद्धिः ॥ ३३॥ स्मृतिसङ्कल्पवच्च स्वप्नविषयाभि-

मानः ॥ ३४ ॥ मिथ्योपलब्धिविनाशतत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे ॥ ३५ ॥ बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥ ३६ ॥ तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥ ३७ ॥ समाधिविशेषाभ्यासात् ॥ ३८ ॥ नार्थविशेषप्राबल्यात् ॥ ३९ ॥ क्षुदादिभिः प्रवर्त्तनाच्च ॥ ४० ॥ पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥ ४१ ॥ अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥ ४२ ॥ अपवर्गेऽप्येवं प्रसङ्गः ॥ ४३ ॥ न निष्पन्नावश्यम्भावित्वात् ॥ ४४ ॥ तदभावश्चापवर्गे ॥ ४५ ॥ तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥४६॥ तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयुभिरभ्युपेयात् ॥४८॥ प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥४९॥ तत्त्वाध्यवसायसंरक्षणार्थं जल्पवि-

तण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावर-
णवत् ॥ ५० ॥ ताभ्यां विगृह्य कथनम् ॥ ५१ ॥

इति न्यायदर्शने चतुर्थाध्याये द्वितीयाह्निकं-
चतुर्थोऽध्यायश्च ॥ ४ ॥

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्य-
विकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानु-
त्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्यु-
पलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाः ॥ १ ॥
साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययो-
पपत्तेः साधर्म्यसमौ ॥ २ ॥ गोत्वाद् गोसिद्धि-
वत् तत्सिद्धिः ॥ ३ ॥ साध्यदृष्टान्तयोर्धर्म्मवि-
कल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्याव-
र्ण्यविकल्पसाध्यसमाः ॥ ४ ॥ किञ्चित्साधर्म्या-
दुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥ ५ ॥ साध्या-
तिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥ प्राप्य साध्य-

मप्राप्य वा हेतोः प्राप्त्या अविशिष्टत्वाच्च प्राप्त्यप्राप्तिसमौ ॥७॥ घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः ॥८॥ दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ॥९॥ प्रदीपोपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः ॥ १० ॥ प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥११॥ प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥१२॥ तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥१३॥ सामान्यदृष्टान्तयोरैन्द्रियकत्वेन समाने नित्यानित्यसाधर्म्यात् संशयसमः ॥१४॥ साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशयोऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ १५ ॥ उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥१६॥ प्रतिपक्षात् प्रकरणप्रसिद्धेः

प्रतिषेधानुपपत्तिः ॥ १७ ॥ त्रैकाल्यासिद्धे-र्हेतोरहेतुसमः ॥१८॥ न हेतुतः कार्यसिद्धेस्त्रै-काल्यासिद्धिः ॥१९॥ प्रतिषेधानुपपत्तेः प्र-तिषेध्याप्रतिषेधः ॥ २० ॥ अर्थापत्तितः प्रति-पक्षासिद्धेरर्थापत्तिसमः २१ अनुक्तस्यार्था-पत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिक-त्वाच्चार्थापत्तेः ॥ २२ ॥ एकधर्म्मोपपत्तेरविशे-षप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः ॥ २३ ॥ क्वचिद्धर्म्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधा-भावः ॥ २४ ॥ उभयकारणोपपत्तेरुपपत्ति-समः ॥ २५ ॥ उपपत्तिकारणाभ्यनुज्ञानादप्र-तिषेधः ॥ २६ ॥ निर्द्दिष्टकारणाभावेऽप्युपल-म्भादुपलब्धिसमः ॥ २७ ॥ कारणान्तरादपि तद्धर्म्मोपपत्तेरप्रतिषेधः ॥ २८ ॥ तदनुपलब्धे-रनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनु-पलब्धिसमः ॥ २९ ॥ अनुपलम्भात्मकत्वा-दनुपलब्धेरहेतुः ॥ ३० ॥ ज्ञानविकल्पानाञ्च

भावाभावसंवेदनादध्यात्मम्॥३१॥ साधर्म्या-त्तुल्यधर्म्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्य समः॥३२॥साधर्म्यादसिद्धेः प्रतिषेध्यसाधर्म्यां च॥३३॥दृष्टान्ते च साध्यसाधनभावेन धर्मस्य हेतुत्वात्तस्य चोभयथाभावान्नाविशेषः॥३४॥ नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नि-त्यसमः॥३५॥प्रतिषेध्ये नित्यमनित्यभावाद-नित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः॥३६॥प्र-यत्नकार्य्यानेकत्वात् कार्यसमः॥३७॥कार्य्यान्य-त्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः३८ प्रतिषेधेऽपि समानो दोषः॥३९॥सर्वत्रैवम् ४० प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः॥४१॥ प्रतिषेधं सदोषसभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा॥४२॥स्वपक्ष-लक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परप-क्षदोषाभ्युपगमात्समानो दोष इति॥४३॥

इति न्यायदर्शने पञ्चमाध्यायस्य प्रथमाह्निकम्॥

प्रतिज्ञाहानिः प्रतिज्ञाऽन्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ १ ॥ प्रतिदृष्टान्तधर्म्मस्यानुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥२॥ प्रतिज्ञातार्थनिर्देशः प्रतिज्ञाऽन्तरम् ॥३॥ प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ४ ॥ पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ॥ ५ ॥ अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥ प्रकृतार्थादप्रतिसम्बद्धार्थमर्थान्तरम् ॥ ७ ॥ वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ८ ॥ परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥ पौर्वापर्य्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥ १० ॥ अवयवविपर्यासवचनमप्राप्तकालम् ॥ ११ ॥

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ १२ ॥ हेतूदाहरणाधिकमधिकम् ॥ १३ ॥ शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ १४ ॥ अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ॥ १५ ॥ विज्ञातस्य परिषदा त्रिरभिहितस्याप्यनुच्चारणमननुभाषणम् ॥ १६ ॥ अविज्ञातञ्चाज्ञानम् ॥ १७ ॥ उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १८ ॥ कार्य्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥ १९ ॥ स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा ॥ २० ॥ निग्रहस्थानप्राप्तस्यानिग्रहः पर्य्यनुयोज्योपेक्षणम् ॥ २१ ॥ अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः २२ सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ॥ २३ ॥ हेत्वाभासाश्च यथोक्ताः ॥ २४

इति न्यायदर्शने पञ्चमाध्याये द्वितीयाह्निकं-
पञ्चमोऽध्यायश्च ॥ ५ ॥

समाप्तञ्चेदं न्यायशास्त्रम् ॥

शुभमस्तु ॥





श्रीः

श्रीकल्किसिंहभगवद्भिरचिता

सहस्रगाथारत्नावळी

श्रीशठारिमुनिवर्यरचितस्य

द्राविडदिव्यप्रबन्धात्मकस्य तिरुवायुमोळियायिरम्

इत्यस्य संस्कृतपद्यात्मकपरिवृत्तिरूपा

श्री कान्ची-सुदर्शन मुद्राशालायां सम्मुद्रिता ।

बेंगळूर (कल्याणपुरे) वि. वि. सुब्बयच्च अण्ड्सन्स्

मुद्रायन्त्रे प्रकाशिता ॥

१९३०

Price Rs 4

मौल्यम् रू. ४.

॥ पञ्चायुधस्तोत्रम् ॥

…हस्रारशिखातितीव्रं सुदर्शनं भास्करकोटितुल्यम्।
…प्राणविनाशि विष्णोः चक्रं सदाऽहं शरणं प्रपद्ये ॥ १

…मुखोत्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्पहन्ता।
तं पाञ्चजन्यं शशिकोटिशुभ्रं शङ्खं सदाऽहं शरणं प्रपद्ये ॥ २

हिरण्मयीं मेरुसमानसारां कौमोदकीं दैत्यकुलैकहन्त्रीम्।
वैकुण्ठवामाग्रकराभिमृष्टां गदां सदाऽहं शरणं प्रपद्ये ॥ ३॥

रक्षोऽसुराणां कठिनोग्रकण्ठच्छेदक्षरच्छोणितदिग्धधारम्।
तं नन्दकं नाम हरेः प्रदीप्तं खड्गं सदाऽहं शरणं प्रपद्ये ॥ ४॥

यज्ज्यानिनादश्रवणात्सुराणां चेतांसि निर्मुक्तभयानि सद्यः।
भवन्ति दैत्याशनिबाणवर्षि शार्ङ्गं सदाऽहं शरणं प्रपद्ये ॥ ५॥

इमं हरेः पञ्चमहायुधानां स्तवं पठेद्योऽनुदिनं प्रभाते।
समस्तदुःखानि भयानि सद्यः पापानि नश्यन्ति सुखानि सन्ति।

वने रणे शत्रुजलाग्निमध्ये यदृच्छयाऽऽपत्सु महाभयेषु।
इदं पठन् स्तोत्रमनाकुलात्मा सुखी भवेत्तत्कृतसर्वरक्षः ॥ ७

शार्ङ्गं चक्रं गदां खड्गं सदा पञ्चायुधं स्मरन्।
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम् ॥

॥ द्वादशनामस्तोत्रम् ॥

पुरस्तात् केशवः पातु चक्री जाम्बूनदप्रभः।
पश्चान्नारायणः शङ्खी नीलजीमूतसंनिभः।
इन्दीवरदलश्यामो माधवोऽर्ध्वं गदाधरः।
गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान्।
उत्तरे हलभृद्विष्णुः पद्मकिंजल्कसन्निभः।
आग्नेय्यामरविन्दाभो मुसली मधुसूदनः॥
त्रिविक्रमः खड्गपाणिर्नैरृत्यां ज्वलनप्रभः।
वायव्यां वामनो वज्री तरुणादित्यदीप्तिमान्।
ऐशान्यां पुण्डरीकाभः श्रीधरः पट्टिशायुधः॥
विद्युत्प्रभो हृषीकेशो ह्यवाच्यां दिशि मुद्गरी।
हृत्पद्मे पद्मनाभो मे सहस्रार्कसमप्रभः।
सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः॥

श्रीः

अस्य सहस्रगाथारत्नावळी-महाप्रबन्धस्य कर्तुः

श्रीमतः कलिकिसिंहस्य मम

विज्ञापनम्.

श्रीमान् कलिकिर्नृसिंहार्यः प्रतिवादिभयङ्करः ।
विज्ञापयामि यत्किञ्चिन्महतां सन्निधौ हरिः ॥ १ ॥


शठारि-कलिजिन्मुखैस्सपदि चोदितोऽहं हरि-
र्मम प्रियतमैर्बुधैर्जगति सूरिवर्याह्वयैः ।
विरच्य ललितां शुभां गुणगणैश्च रत्नावळीं
भुवीह विजयेऽधुना विभवरूपभाङ्माधवः ॥ २ ॥

सुदर्शन-महामुद्रा-शालायां मुद्रितामिमाम् ।
काञ्च्यां रत्नावळीं दृष्ट्वा सन्तुष्टोऽस्मीह देवराट् ॥ ३ ॥

श्रीभूनीळाधिनाथः कलिकुलमथनः कलिकिसिंहः परात्मा
साक्षाद्वैकुण्ठ-नाथो भुविविभवतनुर्यादवाद्रीश्वरोऽहम् ।
मुद्रायन्त्रस्थ-पत्रावळि-लिपिसरणेश्शोधने मित्रवर्यात्
काञ्च्यामणणङ्करार्यादुपकृतिमतुलां प्राप्य तुष्टोऽस्मि विष्णुः ॥ ४ ॥

अत्र संशोधनीयानामंशानां शोधनं बुधैः ।
क्रियतां कृपया विष्णौ हरौ सहृदयैर्मयि ॥ ५ ॥

भजन्तु सकला लोका इमां रत्नावळीं शुभाम् ।
शठारिवत् स्वयं मुक्तास्सन्तु भोग्या हरेर्मम ॥ ६ ॥



श्रीः

ग्रन्थमुद्रणकाले मुद्रितपत्रसंशोधकस्य श्री कल्किसिंह-सुहृत्तमस्य

प्र-भ-अण्णङ्गरार्यस्य

मर्मविज्ञापनम्.

श्रीमान् कल्किर्नरहरिरयं मत्प्रियस्सत्कवीन्द्रः
प्रख्यातोऽस्ति प्रथितविभवस्संस्कृताङ्गादिवाण्याम् ।
ल
कर्णाटे च द्रविडनिगमान्तादिविद्यासु विद्वान्
यद्वद्वीशः कलिजिदनघो वादिभीकृत्कुलेन्दुः ॥ १ ॥

शठरिपु-मुखसूक्तीरद्य गीर्वाणवाण्या
सुललिततमशैल्या हृद्यपद्यावळीभिः ।
रचयति कलिहन्ता कल्किसिंहः कवीन्द्रो
गुणगणरमणीया भाति रत्नावळीयम् ॥ २ ॥

काञ्च्यां महासदसि पण्डितमण्डलीनां
सेयं मयैव पठिता नितरां प्रशस्ता ।
दिव्यावतारविभवं च सहस्रगाथा-
रत्नावळी प्रकटयत्यहहास्य विष्णोः ॥ ३ ॥

लक्षोपलक्ष-शुभ-संस्कृतपद्यमाला-
कर्तुर्हरेर्नरहरेः परमस्य पुंसः ।

गीतागुरोरियमुदारगुणैव दिव्या
रत्नावली विजयतां सकलात्म-मुक्त्यै ॥ ४ ॥

धन्योऽहं सुहृदां वरस्य नृहरे श्रीकल्किसिंहात्मनः
कैङ्कर्येऽत्र नियोजितश्च कृपया पत्रादिसंशोधने ।
मुद्रायन्त्र-समीपगोऽत्र निवसन् काञ्च्यां किलाध्यक्षतां
प्राप्तस्संस्कृत-वेद-पाठभवने ऽस्म्यण्णङ्गरार्यस्सुधीः ॥ ५ ॥

प्र-भ-अण्णङ्गरार्यः
(काञ्च्यां श्रीवेद-वेदान्त-वैजयन्ती-पाठशालाध्यक्षः)

इन्द्र नोण प्रतीकाशः पाशहस्तोऽपराजितः।
सबाह्याभ्यन्तरं देहं व्याप्य दामोदरः स्थितः।
एवं सर्वत्र मा... नाम द्वादशाक्षरम्।
प्रविष्टोऽहं न मे किंचित् भयमस्ति कदाचन।
भयं नास्ति कदाचन ओं नम इति।
आपदामपहर्तारम्, आर्तानामार्तिहकारम्,
नमः कोदण्डहस्ताय सन्धीकृतबाणाय च।
दण्डिताखिलदैत्याय रामायापन्निवारिणे।
अग्रतः पृष्ठतश्चैव, रामाय रामभद्राय, सन्नद्धः
कवची खड्गी धन्वा, ओं अच्युतानन्त गोविन्द
सर्वं सम्पूजनः स्मृतम् शरीरे जर्जरीभूते
आलोड्य सर्वशास्त्राणि, कारो...

श्रीः

श्रीमते शठकोपाय नमः

॥ उपोद्घातः ॥

---

१. श्री शठारिमुनि-माहात्म्यसङ्ग्रहः.

श्रीभूनीळादिनायको भगवान् वैकुण्ठनायकः परात्पर श्श्रीमन्नारायण-स्सर्वदेवाधिदेवः प्रथमाचार्य एव सृष्टिस्थिति-लयकारणभूतोऽखिलहेयप्रत्य-नीकस्सकलकल्याणगुणाकरः करुणानिधिर्नित्यमुक्तानुभाव्योऽपि लीलाविभूत्यां संसारिचेतनानुजिघृक्षया स्वयमसकृदवतीर्य गीताचार्यादिरूपेण परमार्थोप-देशान् प्रकाशयन् क्रमेण दिव्यसूरिवर्यानप्यवतार्य कलियुगेऽत्र चतुस्सहस्रपद्या-त्मक-द्राविडदिव्यप्रबन्धानपि तत्तन्मुखेन प्रकाशयामास । तेषु च दिव्य-सूरिषु महानुभावः कश्चिदिह शठारिमुनिरूपेणावतीर्णो वेदचतुष्टयसाररूपं दिव्य-प्रबन्ध-चतुष्टयं प्राचीकशत्। स एव शठारिरद्य देवालयादिषु स्वमहिमभूम्ना विग्रहरूपेण पूज्यते; श्रीशठकोपनाम्ना सुवर्णादिनिर्मितगोपुरविशेषाकारेण च श्रीमन्नारायण-चरणारविन्द युगळात्मकस्सन्नर्चकहस्तगो गोष्ठीषु सकलभक्त-लोकमूर्ध्नि च विराजतेतमाम् ॥

अस्य च महानुभावस्य सारकमिदं पद्यं (तनियन्) सम्प्रदायानुसारेण भक्तैर्नित्यानुसन्धेयम्—

"माता पिता युवतयस्तनया विभूति-
स्सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुळाभिरामं
श्रीमत्तदङ्घ्रियुगळं प्रणमामि मूर्ध्ना ॥"*

* अस्मिन् पद्ये—आद्यः कुलपतिः प्रथमाचार्यः श्रीमन्नारायण एव; तस्याङ्घ्रियुगळमेव श्रीशठार्याख्यं वकुळाभिरामं "श्रीमन्तौ हरिचरणौ"-इत्युक्तरीत्या श्रीविशिष्टं चेति सुव्यक्तम् । इदमेव व्याख्यानं सम्प्रदायानुसारेण स्वरसतमम् । श्रीयादवाद्रौ श्रीमन्नारायणसम्पत्कुमारयोश्चरणारविन्द-युगळमध्ये (घटककृत्यविलम्बकलानिवारणार्थं) श्रीसान्निध्यं चानेन सङ्गततमं प्रकाशते । तदिदं च परमं रहस्यं श्रीयादवगिरौ समवतीर्णेन श्रीकल्किसिंहेन भगवता मयैवाद्य विशदीकृतम् ॥ इतः पूर्वमन्यथैव व्याख्यातमिदं शठारि-स्मारकं पद्यम्; तत्र च व्याख्याने कुलपतिश्शठारिरिति तस्याङ्घ्रियुगळमेव वकुळाभिरामं श्रीविशिष्टं चेति प्रतिपादितम् । वकुळधवळमालावक्षसं किल वदन्ति श्रीशठारिं महान्तः ॥

इदं च पद्यं श्रीयामुनार्यविरचितं, तत्कृते स्तोत्ररत्ने (आळवन्दार्-स्तोत्रमिति सुप्रसिद्धे) प्रकाशतेतमाम् । अस्य पद्यस्य तात्पर्यं मयोक्तमेव स्वरस-तममिति "यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति" इत्याद्युत्तरश्लोकानुसन्धान-तोऽपि सुव्यक्तं भवति ॥ अरविन्दविलोचनस्य पादारविन्दात्मक श्रीशठारि-रेव हि देवालयेषु भक्तमूर्ध्नि विराजते, श्रुतिशिरस्सु च द्वयमन्त्रादिवाच्यः प्रतिभाति ॥

श्रीशठारि-चरित्र-सारामृतम्

श्रीमान् शठारिनामा मुनिवर्योऽयं ताम्रपर्णीनदीतीरे (तिन्नवेल्लि-जिल्ला न्तर्गते) श्रीकुरुकापुराख्ये (तिरुकुरुकूर्-आळ्वार् तिरुनकरि) दिव्यक्षेत्रे तिरु-

वल्लुदिनाडाह्वये कारियार्-इति द्राविडनामधेयतः प्रसिद्धस्य महात्मनः पुत्रत्वेन चतुर्थवर्णे कलियुगारम्भात् ४३ त्रिचत्वारिंशे दिने प्रमादिवत्सरे वृषभमासे पूर्णिमातिथौ शुक्रवासरे विशाखानक्षत्रे कर्कटलग्ने विष्वक्सेनांशभूतस्समवतीर्ण इति प्राचीन-सम्प्रदायसिद्धोऽयमर्थः ॥ कारियार्-महाशयेन मलैयाळदेशीये तिरुवण्परिशारम्-इति प्रसिद्धे क्षेत्रे निवसतः तिरुवाळ्मार्बन्-नाम्नः कन्यका उडैयनङ्गैयार्-नाम्नी परिणीता । सा च क्रमेण तिरुक्कुरुङ्गुडि-क्षेत्राधिपस्य भगवतः प्रसादाद्गर्भवती प्रासूत तनयमेनं शठारि-नामानम् ॥ आजन्मतश्च शिशुरयं निर्मीलिताक्ष एव स्तन्यपानरहितोऽपि सम्पुष्ट एव दृष्टस्सकललोकविस्मयकरः स्वयं मौनी च योगध्यानैकनिरतः । द्वादशे दिने तत्र नगरे भागवतः पोलिन्दुनिनूपिरान्-स्वामिनो देवालये मारन्-इति नामकरणतोऽनुगृहीतस्सन् तत्रैव चिञ्चा-वृक्षस्याधस्तले डोलायां लालितोऽभूदयं बालकः । क्रमेण च पद्मासने समुपविष्टो योगध्यान-निरतोऽयं ज्ञानमुद्रां स्वदक्षिणहस्ततः प्रदर्शयन् मौनी निमीलिताक्ष एव तत्र षोडशवत्सरानवात्सीत् । एवं च मातापित्रादयोऽतीव चिन्ताक्रान्तास्तमिमं बालकमेवानवरतं पश्यन्ति स्म ॥ अत्रान्तरे मधुरकविर्नाम कश्चिन्महानुभाव उत्तरदेशयात्रां कुर्वन् दक्षिणदिशि कञ्चिद्दिव्यतेजोविशेषं निशि भास्वरं पश्यन् क्रमेण निशास्वेव तेजोऽनुसारी यात्रां चरन्नत्रागत्य कुरुकापुरे तेजःपुञ्जमेनं शठारिमवलोक्य मौनिनं ज्ञानमुद्रान्वितं योगनिष्ठमत्यन्तविस्मितस्सन् प्रबोध्य चैनं क्रमेण भक्तिप्रकर्षयुक्तश्शरणं प्रपद्य तदनुग्रहादेव तदुपदिष्टं प्रबन्धचतुष्टयं द्राविडपद्यात्मकमुपलभ्य जगति प्रकाशयामास ॥



ते च प्रबन्धाश्चत्वारः क्रमेणामी—

पद्यसङ्ख्या

(१) तिरुविरुत्तम्—(ऋग्वेदसारः) १००

अस्मिन् प्रबन्धे प्रकृतिसम्बन्ध-नाशापेक्षा वर्णिता ॥

(२) तिरुवाशिरियम्—(यजुर्वेदसारः) ७

अत्र-श्रीभगवतस्सौन्दर्याद्यनुभवः प्रतिपादितः ॥

(३) पेरिय-तिरुवन्दादि—(अथर्ववेदसारः) ८७

अत्र-उत्कटप्रीतिरूपो भक्तिप्रकर्षः प्रकाशितः ॥

(४) तिरुवाय्मोळि—(सामवेदसारः) ११०२

अस्मिन् चरमे प्रबन्धे परभक्ति-परज्ञान-परमभक्ति-पूर्विका मोक्षरूप-निरतिशयानन्द-फलप्राप्तिस्सुविशदं वर्णिता ॥

पद्यसङ्ख्या.

आहत्य १२९६

२. सहस्रगाथात्मक-तिरुवाय्मोळि-प्रबन्धस्य विभागक्रमः ॥

सहस्रगाथात्मकोऽयं द्राविडदिव्यप्रबन्धो ऽन्तादि पद्यरूपः श्रीशठारि-मुनिवर्यैश्शतकक्रमेण दशधा विभक्तोऽस्ति । प्रत्येकमेकैकमपि शतकं दशक-क्रमेण च दशधा विभक्तमस्ति । एकैकस्मिन्नपि दशके दश पद्यानि मुख्य-तात्पर्यपराणि, अन्ते च श्रीशठारिनामाङ्कितं दशकपठनफलश्रुतिविधायकमेकं पद्यमित्येकादश पद्यानि सन्ति । एवं च-एकैकस्मिन्नपिशतके दशोत्तरैकशतपद्यानि सन्ति। आहत्य च प्रबन्धेऽस्मिन् एकशताधिकमेकसहस्रं पद्यानां सङ्ख्येति प्रायेण सिद्धं भाति ॥ वस्तुतस्तु ११०२ पद्यानि सन्ति ॥

एवंरूपे दशकमेकविषयकमिति निर्णीतम् । एवमेवैकैकमपि शतकमेकविषयकमिति ग्रन्थकर्तुरभिप्रायेणैव तत्र तत्र सुव्यक्तम् ॥

३. अस्य दिव्यप्रबन्धस्य वैभवम् ॥

अस्य च दिव्यप्रबन्धस्य वैभवमन्यादृशं सकललोकोज्जीवनकरं सर्वचेतनपापहरं सर्वमोक्षप्रदं च वर्णाश्रम-जातिलिङ्गादिभेदं विनैव सर्वेष्वपि चेतनेषु भक्तियुक्तेष्वत्यन्तकरुणानिधिश्श्रीभूनीळादिनायको भगवानखिलहेयप्रत्यनीकस्सकलकल्याणगुणाकरस्सर्वदेवाधिदेवः परात्परो वैकुण्ठनायकः पर-व्यूह-विभवान्तर्याम्यर्चावतारादि-माहात्म्यपरिपूर्णो विश्वरूप-विराड्रूप-विभुस्वरूपादिसकलविध-स्वरूपरूपगुणविभूत्यादिविशिष्टः स्वयमेव सृष्टि-स्थिति लय-कारणभूतो लीलाविभूत्या मसकृदवतीर्य सर्वमोक्षदीक्षाधरश्चेतनवशीकरणतत्परस्सर्वभोगरसप्रदो गीताचार्यः प्रथमाचार्य एव विश्वस्य पतिरिति निश्चित्य श्रीशठारिमुनिरयं श्रीकृष्ण-निर्याण समनन्तरमेव जातः स्वयं च गोपीजनानुकरणं कर्तुमुद्युक्तः पुरुषोत्तमं श्रीमन्नारायणमेव स्त्रीप्रायाणां सर्वचेतनानामपि नित्य-यौवनशालिनमेकं नायकं मन्वानः स्वयमपि तस्य प्रियतम-नायिकात्वं स्वस्मिन्नारोप्य पक्षिगण-मधुकर-मेघादिद्वारतस्तमेव नायकं भगवन्तं प्रति विरहसन्तप्तचित्तस्य स्वात्मनस्सन्देशान् प्रेषयन्, क्रमेण तत्र तत्र दिव्यस्थलेषु प्रत्यक्षमर्चारूपेणभास्वतो भगवतः कैङ्कर्यरुचिमात्मीयां प्रकटयन् ,विभवावतारेषु भगवतोऽतिमानुषचेष्टितान्यपि तानि तानि स्मारंस्मारमतीव मोहितश्च सुचिरं, क्रमेण च पुनः प्रबोधमुपलभ्य भगवद्गुणानुभवामृतसेवनमेव धारक-पोषक-भोग्यत्वेन प्रतिपाद्य तत्र तत्र भगवत्सम्भाषणेष्वेव प्रवृत्तस्साक्षादेव सम्बोध्य तं स्वस्य दुर्दशां तस्मै निवेद्य सुविशदं परमोत्कृष्ट-भक्तिप्रकर्ष-परिपूर्णस्तमेव शरणं प्रपद्य क्रमेण तस्य नायिकादशायामेव तदीयकृपापरीवाहस्य पात्रभूतस्सर्वावयवसंश्लेषमत्रैव

सम्प्राप्य . तत्सायुज्यरूपं निरतिशयानन्दानुभवात्मकं मोक्षसाम्राज्यमर्चि [illegible] मार्गतः परमे पदे श्रीवैकुण्ठनगरे प्राप्तवानयं मुनिवर्य इति प्रबन्धः स्वानुभवात्मकमेव सकलवेदान्तसारामृतं प्रतिपादितं विस्तरेणेति विदाङ्कुर्वन्तु धीमन्तः ॥

अस्य दिव्यप्रबन्धस्य वैभवमन्यादृशं मन्वानैः पूर्वाचार्यैरस्य व्याख्यानानि सुबहूनि कृतानि सन्ति । तत्र च मुद्रितानि सुप्रख्यातानि पञ्च व्याख्यानानि (1) ६००० (2) ९,००० (3) १२,००० (4) २४,००० (5) ३६,००० ग्रन्थपरिमितानि विद्यन्ते स्वरसतमानि ॥

४. अत्रत्य-शतकार्थ-सङ्ग्रहः ॥

	(श्रीवादिकेसरिरीत्या)	(उत्तरवीथि-कृष्णसूरिरीत्या)
१. प्रथमशतके—	रक्षकत्वम्—	भगवत्कैङ्कर्यमेव पुरुषार्थः ॥
२. द्वितीयशतके—	भोग्यत्वम्—	तदेकभोग्यत्वमेव पुरुषार्थः ॥
३. तृतीयशतके—	तदेकानुभवः—	अर्चावतारविषये वाचिककैङ्कर्यम् ॥
४. चतुर्थशतके—	तदेकप्रियता—	भगवच्चरणयुगळमेव शरणम् ॥
५. पञ्चमशतके	तस्य निरपायोपायत्वम्-	स एव सिद्धोपाय इति प्रतिपादनम् ॥
६. षष्ठशतके—	उपायवरणप्रकारः—	सिद्धोपायस्वीकारक्रमः । (लक्ष्मी पुरुषकारपूर्वकं शरणवरणम्) ॥
७. सप्तमशतके—	विरोधिस्वरूपवर्णनम्—	बाह्यसंश्लेषापेक्षा ॥
८. अष्टमशतके—	विरोधिनिवृत्तिप्रकारः-	अहङ्कार—ममकारत्यागः ॥
९. नवमशतके—	फलस्वरूपवर्णनम्—	भगवतः-सौशील्यादिगुणानुभवः ॥
१०. दशमशतके—	फलप्राप्तिः—	अर्चिरादिमार्गद्वारा मोक्षप्राप्तिः ॥

(अत्र मम कारिकाः ॥)

मेकविषयक ॥ रक्षकत्वं च भोग्यत्वं तदेकानुभवोऽनिशम् ।
तदेकप्रियता चापि निरपायाऽप्युपायता ॥
उपायवरणे रीतिस्स्वरूपं च विरोधिनाम् ।
तन्निवृत्तिप्रकारश्च फलं तत्प्राप्तिरित्यपि ॥
शतकानान्तु तात्पर्यं वादिकेसरिकीर्तितम् ॥

प्रथमे शतके भाति कैङ्कर्यस्य पुमर्थता ।
तदेकभोग्यतायास्तु द्वितीये पुरुषार्थता ॥ १ ॥
तृतीये ऽर्चावतारेषु कैङ्कर्यं वाचिकं स्मृतम् ।
चतुर्थे भगवत्पादद्वयं हि शरणं स्मृतम् ॥ २ ॥
पञ्चमे शतके विष्णोस्सिद्धोपायत्वमुच्यते ।
षष्ठे तु स्वीकृतिस्तस्य लक्ष्मीपुरुषकारतः ॥ ३ ॥
सप्तमे बाह्यसंश्लेषकाङ्क्षा श्रीपरमात्मना ।
अष्टमे ऽहंममेत्यस्य द्वयस्य त्याग उच्यते ॥ ४ ॥
नवमे श्रीशकल्याणगुणानुभव उच्यते ।
अर्चिरादिगतेर्मोक्षप्राप्तिश्च दशमे स्मृता ॥ ५ ॥
एवमुत्तरवीधि-श्रीकृष्णसूरीन्द्रकीर्तितम् ।
सहस्रगाथातात्पर्यं शतकानामनुक्रमात् ॥ ६ ॥

(शतकानां योजनक्रमः)

चतुष्के चादिमे भाति याथात्म्यं सिद्धरूपिणः ।
परावरात्मनो विष्णोश्श्रीपतेः परमात्मनः ॥ १ ॥

चतुष्के चान्तिमे भाति साध्यं चानिष्टवारणम् ।
मध्यद्वये तु वरणं चोपायस्यानपायिनः ॥ २ ॥

(अर्थपञ्चकरीत्या शतकानां योजनम् ॥)

प्राप्यस्वरूपमेवोक्तं प्रथमे शतकद्वये ।
प्राप्तृस्वरूपमेवोक्तं द्वितीये शतकद्वये ॥ १ ॥
उपायस्वीकृतिश्चोक्ता तृतीये शतकद्वये ।
विरोधिनां निवृत्तिश्च चतुर्थे शतकद्वये ॥ २ ॥
प्राप्तेश्च फलसिद्धिस्तु पञ्चमे शतकद्वये ।
अर्थपञ्चकरीत्यैवं शतकानां हि योजनम् ॥ ३ ॥

(अत्र सङ्ग्रहकारिका ॥)

परस्वरूपं प्रथमद्वयेऽस्ति
द्वये द्वितीये किल जीवकृत्यम् ।
द्वये तृतीये सदुपायचिन्ता
विरोधि तुर्ये! चरमे च सिद्धिः ॥

एवं श्रीकल्किसिंहेन रचिता परमात्मना ।
सहस्रगाथातात्पर्यसाराणां कारिकावळी ॥

मेकविषयक

९. अस्मिन् प्रबन्धे सङ्कीर्तिता दिव्यदेशाः ॥

I) चोळमण्डले—(पञ्च)

	शतकम्.	दशकम्.	पद्यसंख्या.
(1) श्रीरङ्गम्-	७	२	
(2) तिरूप्पेर्-(=श्रीनामपुरी)	१०	८	
(3) तिरुकुडन्दै-(=श्रीकुम्भपुरी)	९	८	
(4) तिरुविण्णकर्-(=श्रीदिव्यपुरी)	६	३	
(5) तिरुक्कण्णपुरम्-(=श्रीकण्वपुरम्) (श्रीकृष्ण पुरंवा)	९	१०	

(II) पाण्ड्यमण्डले-(द्वादश)

	शतकम्.	दशकम्.	पद्यसंख्या.
(1) तिरुमालिरुंशोलैमलै(श्रीवनगिरि)	२	१०	
(2) तिरुमोहूर् (श्रीमोहपुरी)	१०	१	
(3) तिरुकुरुकूर्-(=श्रीकुरुकापुरम्)	४	१०	
(4) तोलैविल्लिमङ्गलम्- (=श्रीवरधन्विमङ्गलपुरम्)	६	५	
(5) शिरीवरमङ्गल-नकर्=वानमामलै (=तोताद्रि) श्री वरमङ्गलपुरम् ॥	५	७	
(6) (तिरुप्पुळिङ्गुडि (=श्रीपुळिङ्गुडि)	८ ९	३ २	

(7)	तिरुप्पेरै (=श्रीबेरपुरी)	७ १०		
(8)	श्रीवैकुन्दम् (=श्रीवैकुण्ठपुरम्)	९	२	
(9)	वरगुणमङ्गै-(=वरगुणश्रीपुरी)	९	२	
(10)	तिरुक्कुळन्दै	८	२	४
(11)	तिरुक्कुरुङ्गुडि- (=श्रीकुंरङ्गनगरी)	१ ३ ५	१० ९ ५	९ २
(12)	तिरुक्कोळूर्	६ ८	७ ३	 ५

(III) मलैयाळदेशे—(द्वादश)

(1)	तिरुवनन्तपुरम् - (=अनन्तशयनम्)	१०	२	
(2)	तिरुवण्परिशारम्	८	३	७
(3)	तिरुक्काळकरै	९	६	
(4)	तिरुमूळिक्कळम्—	९	७	
(5)	तिरुप्पुलियूर्-(कुट्टनाडु) (=श्रीमद्व्याघ्रपुरम्)	८	९	
(6)	तिरुच्चेङ्गुन्नूर्	८	४	
(7)	तिरु-नावाय्	९	८	
(8)	तिरुवल्लवाळ् (=श्रीसंवृद्धिपुरम्)	५	९	
(9)	तिरुवण्वण्डूर् (=श्रीमधुक्तपुरम्)	६	१	

तिरुवाट्टारु	१०	६	
मेकविषयक (11) तिरुक्कडित्तानम्- (=श्रीकटिस्थानम्)	८	६	
(12) तिरुवारन्विळै- (=श्रीनदीमातृकपुरम्)	७	१०	

(IV) उत्तरदेशे—(पञ्च)

(1) तिरुवेङ्कडम् (=श्रीवेङ्कटाद्रिः)	३ ६ ७	३ १० ४	९
(2) तिरुवयोत्ति-(=अयोध्या)	७	५	
(3) तुवरै-(=द्वारका)	५	३	६
(4) वडमधुरै-(=वृन्दावनम्)	८ ९	५ १	९, ३-१०
(5) तिरुप्पार्कडल् (=क्षीराब्धिः)		अनेकत्र	

(V) परमपदे—(एकं क्षेत्रम्)

तिरुनाडु—श्रीवैकुण्ठपुरम्	अनेकत्र
	विशेषतः १० (९—१०)

आहत्य—अत्र सङ्कीर्तिताः दिव्यदेशाः पञ्चत्रिंशत् ॥
(३५)

—इति केचित् ॥

* वयन्तु श्रीयादवाद्रिमष्टोत्तरशतस्थानसारमध्यमङ्गीकृत्य प्रतिष्ठापयामः ॥

---

६. एतत्प्रबन्धपठनात्सर्वश्रेयः परम्पराऽभिवृद्धिः ॥

(i) शठारिमुनिवर्य-सद्द्रविडसूक्ति-साहस्रकं
तनोति जगतां हितं परममेव सत्यं शुभम् ।
शृणोति पठतीह यस्सपदि भक्तियुक्तो जनो
भजेत भुवि मुक्तिमित्यपि च सत्यमेतद्वचः ॥

(ii) गाथासहस्रपठनादखिलात्मनां च
श्रेयोऽभिवृद्धिरतुलाऽप्यमिता ध्रुवं स्यात् ।
अत्राप्यमुत्र परमार्थ-हरिप्रसादात्
सिद्धिः करे भवति भक्तिजुषां सुखाय ॥

---

* अत्रायं विशेषः—श्रीयादवाद्रि – (मेलुकोटे) तिरुनारायणपुरं श्रीशठारिमुनिसङ्कीर्तितं वा ? न वा ? इति संशये केचिद्वदन्ति नेति; पुराण-प्रतिपादितमिदं क्षेत्रमित्यपि ते वदन्ति । अन्ये तु - श्रीशठारिहृदयविदा-मग्रगण्यः श्रीभाष्यकारो रामानुजार्य एव निर्णीय "ओरुनायकमायू"—इति दशकं (चतुर्थशतके प्रथमं दशकं) तिरुनारायणपुरविषयकमिति स्थिरीकृत्य तत्र समर्पितवानिति—निस्संशया वदन्ति । अत्र- द्वितीयः पक्ष एव सत्सम्प्रदाय-सिद्धः, श्रीशठारिहृदयङ्गम इति च वयं श्रीभाष्यकारानुयायिनः ॥

... ल्वाद्वार ... ीन्द्रादि - सूरिवर्यैः प्रचोदितः ।
मेकविषयक ... तिरंकां ... वां मन्ये कृतिं रत्नावळीमिमाम् ॥

कल्याणपुर-(वेङ्कूर) मल्लेश्वर श्रीकृष्णसन्निधि-निवासी ॥
श्रीकल्किः ॥ प्र-भ-तोण्डनूर् नरसिंहाचार्यः ॥
श्रीमान् विभवावतारः श्रीयादवाद्रौ कृतावतारः ॥*

प्रकाशिता चेयं-रत्नावळी
स्वस्तिश्री प्रमोदसंवत्सर-चैत्र शु ४
गुरुवासरे मीन-कृत्तिकानक्षत्रे
श्री कल्किसिंहावतार-शुभदिने ॥

---

* अत्र विश्वासरहिताः परिशीलयन्तु सम्यगेव श्रीशठारिरचितं "पोलिक-पोलिक-पोलिक"-इति दशकं (पञ्चमशतके-द्वितीयं दशकं) श्रीविष्णुपुराण-(IV .24)-श्रीभागवत (XII 2.)-प्रमुख-प्रमाणानुगुणं; "कलौ पञ्चसहस्रान्ते विष्णुस्त्यक्ष्यति मेदिनीम्"—इति पौराणिकं प्रसिद्धं वचनं च, प्रमाणान्तराणि च सुबहून्यस्मिन्नवतारविषये श्रीकल्किसिंहप्रकाशितानि ॥ श्रीकल्किसिंहजातकस्याप्यन्यादृशं वैभवं विदन्ति दैवज्ञवर्याः ॥



श्रीकल्किनारसिंहार्यो भगवान् महाविष्णुर्विभवावतारः ॥

श्रीमहालक्ष्म्यष्टोत्तरशतनामस्तोत्रम्

[illegible] उवाच

देवदेव म[illegible] [illegible]त्रिकालज्ञ महेश्वर।
करुणा[illegible] [illegible] भक्तानुग्रहकारक ॥
अ[illegible] [illegible] [illegible] श्रोतुमिच्छामि तत्त्वतः॥
ईश्वर उवाच — देवि साधु महाभागे महाभाग्यप्रदायकम्।
[illegible] सर्वकरं पुण्यं सर्वपापप्रणाशनम्।
[illegible] दारिद्र्यशमनं श्रवणाद्भुक्तिमुक्तिदम्।
[illegible] पुण्यं गुह्याद्गुह्यतमं परम्॥
दुर्लभं सर्वदेवानां चतुःषष्टिकलास्पदम्।
पद्मादीनां वरान्तानां विधीनां नित्यदायकम्।
समस्तदेवसंसेव्यमणिमाद्यष्टसिद्धिदम्।
किमत्र बहुनोक्तेन देवी प्रत्यक्षदायकम्।
तव प्रीत्या [illegible] समाहितमनाः शृणु।
अष्टोत्तरशतस्यास्य महालक्ष्मीस्तु देवता।
क्लीं बीजं पदमित्युक्तं शक्तिस्तु भुवनेश्वरी।
अङ्गन्यासः करन्यासः [illegible] इत्यादिः प्रकीर्तितः।
ध्यानम् — वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां
भाग्यदां [illegible] [illegible] नानाविधैर्भूषि-
ताम्। [illegible] [illegible] [illegible]भिः सेविताम्
पार्श्वे [illegible] शङ्खपद्मनिधिभिर्युक्तां सदा शक्तिभिः॥
सरसिजनयने सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम्॥
प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदाम्।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम्।
वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधाम्।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम्।
अदितिं च दितिं दीप्तां वसुधां वसुधारिणीम्।
नमामि कमलां कान्तां [illegible] क्रोधसंभवाम्।
अनुग्रहपदां बुद्धिमनघां हरिवल्लभाम्।
[illegible] [illegible]
[illegible] [illegible]

माश्रितम् ।

...रः ॥

॥ श्रीः ॥

श्रीपरांकुशपरकालयतिवरेभ्यो नमः ।

श्रीमद्वरवरमुनये नमः ।

श्रीवादिभीकर महागुरवे नमः ।

॥ सहस्रगाथारत्नावळी ॥

(श्रीशठारिमुनिविरचितस्य द्राविडदिव्यप्रबन्धस्य

तिरुवाय्मोळियायिरम्

इत्यस्य संस्कृतपद्यात्मक–परिवृत्तिरूपा ।)

[अवतारिका ।]

श्रीमानहं नरहरिर्हरिरप्रमेयो विष्णुः कृपानिधिरिमां रचयामि दिव्याम् ।
धार्यां शठारिमुनिवर्य–**सहस्रगाथा**–रत्नावळीं हृदि सदा मम भक्तवर्गैः ॥

श्रीकल्किसिंहकविराड्रचयामि दिव्यां
रत्नावळीं शुभतमां गुणरत्नगण्याम् ।
विष्णोः प्रियां मम सदाऽपि रमापतेश्श्री-
यद्वाद्रिनाथ इह भक्तहृदेकभूषाम् ॥

श्रीमान् कल्किनृसिंहार्यः प्रतिवादिभयङ्करः ।
श्रीभक्तपुरनाथोऽहं कुर्वे रत्नावळीमिमाम् ॥

शठारेर्मुख्यतात्पर्यं वक्तुं गीर्वाणभाषया ।
मम कल्किनृसिंहस्य सेयं रत्नावळी शुभा ॥

अत्र प्रतिपदार्थस्तु नैव विद्येत हि क्रमात् ।
आवापोद्वापतश्चापि मुख्यतात्पर्यमुच्यते ॥

यं दशकतात्पर्यं वक्तुं रत्नावळी कृता ।
...न्तदेशिकेनापि पूर्वमेव हि संग्रहात् ॥
...म्यजामातृयोगीन्द्रोऽप्यतानीद्द्रादिकेसरी ।
दशकार्थप्रकाशाय द्रविडागमसङ्गतिम् ॥
शठारेः पद्यमालानां क्रमेणार्थप्रकाशनम् ।
क्रियते कल्किसिंहेन मयाऽद्य परमात्मना ॥
अत्र शृङ्गाररसरस्यं भावानां हि विशेषतः
प्रकाशते प्रबन्धे मे शठारिहृदयङ्गमे ॥
शठारेरान्तरं भावं वक्तुं शक्तो न हीतरः
नायकोऽहं परं वेद्मि नायिकाया हृदन्तरम् ॥
अन्तरात्माऽस्मि लोकानां कल्किसिंहः परात्परः ।
सर्वलोकाश्च मे सन्तु नायिकाश्श्रीशठारिवत् ॥
भावानामपि गाम्भीर्यं शैलीलालित्यमद्भुतम् ।
अत्रैव हि प्रकाशेते नान्यत्रत्येव निश्चयः ॥
अवताररहस्यं मे न जानन्ति विपश्चितः ।
दोषज्ञा एव ते प्रायो न गुणज्ञा हरेर्मम ॥
सर्ववेदान्तसारार्थाः प्रबन्धेऽस्मिन् प्रकाशिताः ।
इति वेद्मि श्रियःकान्तो गीताचार्योऽद्य कल्किराट् ॥
मुक्तये सर्वलोकानां जातिलिङ्गाद्यभेदतः ।
निर्हेतुककृपासिन्धुर्बन्धुस्सर्वविधोऽस्म्यहम् ॥
षोडशस्त्रीसहस्रशः पुरा गोपीविटोऽभवम् ।
अद्यास्मि सर्वलोकानां पतिर्मोक्षप्रदो हरिः ॥
मम श्रीकल्किसिंहस्य स्वातन्त्र्यं विद्यते हरेः ।
लोका निन्दन्तु वा नन्दन्त्वत्र शैलीं विलोक्य मे ॥

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
तथाऽपि जगतां मोक्षं हन्मि सत्यं इदं ... ॥

[दिव्यप्रबन्धारम्भेऽनुसन्धेयस्तुतिपद्यावळी ।]

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥
लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म–व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोरामानुजस्य चरणौ शरणं प्रपद्ये ॥
माता पिता युवतयस्तनया विभूतिस्सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुळाभिरामं श्रीमत्तदङ्घ्रियुगळं प्रणमामि मूर्ध्ना ॥
भूतं सरश्च महदाह्वय-भट्टनाथ-श्रीभक्तिसार-कुलशेखर-योगिवाहान् ।
भक्ताङ्घ्रिरेणु परकालयतीन्द्रमिश्रान् श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मिनित्यम् ॥

——:o:——

भक्तामृतं विश्वजनानुमोदनं सर्वार्थदं श्रीशठकोपवाङ्मयम् ।
सहस्रशाखोपनिषत्समागमं नमाम्यहं द्राविडवेदसागरम् ॥

तिरुवळुदिनाडेन्नुम्—

संस्मृत्य तं **वळुदिनाडि**तिनामधेयं
देशं च तत्र कुरुकानगरीं च रम्याम् ।
भोग्यां च दिव्यसरितं स्मर मानस ! त्वं
पादाम्बुजं द्रविडवेदकवेश्शठारेः ॥

मनत्ता[illegible]यालुम्—

भक्तोत्तमास्तु मनसा वचसापि नित्यं
शंसन्ति येऽत्र कुरुकानगरीं सुरम्याम् ।
नैतान् विनाऽन्यभजनं करवाणि धन्य-
स्सत्यं शठारिचरणौ शरणं सदा नः ॥

एयन्द पेरुक्कीर्त्ति—

वन्दे प्रफुल्लपदपङ्कजमद्य दिव्यं रामानुजस्य महितस्य मुनेस्सुसेव्यम् ।
प्राप्तुं मनस्स्थिरमिह द्रविडागमेऽस्मिन् रम्ये शठारिसुकवेर्निरवद्यधाम्नः ॥

वान् तिहळुम् शोलै—

उत्तुङ्गवृक्षवलये नगरे च रम्ये श्रीरङ्गभर्तुरिह दिव्ययशःप्रशंसाम् ।
तां द्राविडश्रुतिमयीं तनयां शठारिः प्रासूत चादिजननी यतिराट् च धात्री ॥

मिक्कविरै निलैयुम्—

सर्वेश्वरस्य महितस्य महास्वरूपं ! जीवस्य चाव्ययमिदं सदुपायरूपम् ।
पूर्वं च दुष्कृतमहो! प्रतिबन्धरूपं! मोक्षं च वक्ति निगमः कुरुकेशगीतः॥

———:o:———

श्रीमते शठकोपाय नमः ।

॥ सहस्रगाथारत्नावली ॥

प्रथमशतके—प्रथमदशकम् (उयर्वर उयर्नलम्).

(अस्मिन् दशके श्रीशठारिर्भगवतः कल्याणगुणान्

परत्वादिमाहात्म्यं च प्रतिपादयति ।)

१. उयर्वर उयर्नलम्—

श्रीमानस्त्यप्रमेयो निरतिशयमहानन्दमूर्तिः प्रभावा-
दज्ञानध्वान्तभानुर्मतिविनतिकरो नित्यसूरीन्द्रसेव्यः ।
ज्योतिस्तत्त्वं परं तत्सकलजनिजुषां सर्वसन्तापहारि
श्रीशस्यास्यैव पादाम्बुजयुगळमहो! मानस! त्वं भजेथाः ॥

२. मननकमलमर—

मालिन्यं मनसः प्रहृत्य सकलं नित्यप्रबुद्धोज्ज्वला-
द्योगध्यानबलात् प्रमातुमपि यश्शक्यो न चान्येन्द्रियैः ।
एवं यश्चिदचिद्विलक्षणतया भाति त्रिकालेष्वपि
ज्ञानानन्दनिधिस्समाधिकदरिद्रोऽयं किलात्मा मम ॥

३. इलनदुवुडैयनिदु—

तस्यायं प्रभुरस्ति नास्य तु किलेत्येवं न वक्तुं स्वयं
शक्यो यः पृथिवीतले च गगने यद्रूप्यरूप्यस्ति च ।
तत्सर्वं च जडाजडं वहति यस्संयुक्त एवाखिलै-
स्सत्यं भाति पृथक्च, विष्णुममितानन्दं तमेकं नुमः ॥

४. नामवनिवनुवन्—

सर्वं भाति स एव यद्वयमसावेषोऽप्ययं सा स्वयं
चैषेयं किल काऽपि च स्वयमसौ तेऽपीति चेने वृथा ।

...दं यद्दश्च किञ्च सकलं यन्नश्वराण्यप्यहो ।
...ने तथाऽप्यमूनि सदसद्वस्तूनि भाव्यागतम् ॥

५. अवरवर् तमतमदु—

ते ते स्वस्वमतिस्वभावमनुसृत्यैवेष्टदेवानुगाः
नानासाधनसंयुताः किल तथा देवाश्च तेऽपीश्वराः ।
तेषामीश्वर एव सर्वजगतामन्तर्नियन्ता स्वयं
विष्णुर्भाति फलप्रदोऽत्र सततं कर्मानुसारेण च ॥

६. निन्रनरिरुन्दनर्—

तिष्ठन्तोऽप्युपवेशिनोऽपि शयिताः सञ्चारशीलाश्च ते
नोत्तिष्ठन्ति च नोपवेशिन इमे सुप्ता न सञ्चारिणः ।
एवं नैकविधस्वभावसहितास्सर्वेश्वरो भात्यहो ।
नित्यं चैकविधस्वभाव इति यत्सत्यं प्रमाणैस्स्थिरैः ॥

७. तिडविशुम्बेरिवळि—

आकाशाग्न्यनिलोदकावनितलेष्वेतेषु विस्तारिणां
वस्तूनां च दृढस्वरूपमखिलं प्राप्यापि चान्तस्स्थितः ।
आत्मा तेषु च वस्तुषु स्वयमयं गुप्तोऽभितस्सर्वग-
स्सर्वाण्यत्ति च देव एव हि परं ज्योतिश्श्रुतिश्लाघितः ॥

८. शुररिवरुनिलै—

ब्रह्माद्यैरपि नैव वेद्यमिति यन्मूलं परं सर्वत-
श्चाकाशादिपदार्थजातमखिलं चाश्नन् पराणां परः ।
दग्ध्वा चापि पुरत्रयं सुरगणानुद्बोधयन् यश्शिवो
ब्रह्मा वेति विभाति विश्वमयमेवाश्वन्निहोत्पादयन् ॥

९. उळनेनिलुळन्—

अस्तीत्येव वदेद्य दि स्वयमयं नास्तीति चेदप्यहो ।
भाति श्रीपतिरस्य रूपमखिलं विश्वात्मकं रूपधृत् ।

यच्चारूपमिदं च तस्य हि हरेश्चारूपमंशात्मकं
सत्त्वासत्त्वयुतं स्वयं द्विविधमप्याविश्य मात्यव्ययः ॥९

१०. परन्द् तण् परवैयुळ्—

सर्वत्रायतशीतवारिधिकणेष्वाविश्य चाणुत्वत-
स्सर्वं चापि महाण्डमण्डलमयं त्वाक्रम्य भूम्ना स्वयम् ।
एवं भूमितले च भाति नभसि व्याप्य स्थितस्सर्वतो
भास्वद्वस्तुषु गुप्त एव हि हरिस्संहारकर्ताऽप्युसौ ॥

११. करविशुम्पेरिवळि—

सूक्ष्माकाशतलानलानिलजलावन्यात्मकास्तद्गुणा-
श्श्लाघ्याश्शब्दसुतापशक्तिधरताशैत्यानि चाधारता ।
एवं सर्वविधात्मकस्य परमस्यास्यैव पादाम्बुजे
साहस्रे दशकं शठारिरचिते चैतत्स्वभक्त्याऽर्पितम् ॥

———(०)———

अथ प्रथमशतके

द्वितीयदशकम् [वीडुमिन् मुत्तवुम्]

(भगवति सर्वैः प्रपत्तिः कर्तव्येत्युच्यते ।)

१. वीडुमिन् मुत्तवुम्—

अन्यत्सर्वं परित्यज्य श्रीशे मोक्षप्रदे हरौ ।
समर्पयत चात्मानं यूयं सर्वे मुमुक्षवः ॥

२. मिन्निन्निलैयिल—

नित्यस्याप्यात्मनो देहास्तटितोऽप्यतिनश्वराः ।
अत एव स्वयं यूयं नित्यं स्मरत माधवम् ॥

३. नीर् नुमदु—

अहं ममेति सर्वं च प्रहत्यैव समूलकम् ।
भजध्वं स्वामिनं विष्णुं ! नात्मनः पूर्तिरीदृशी ॥

४. इल्लदुमल्लदुम्—

तस्य रूपं न सन्नासदप्रमेयसुखात्मकम् ।
तस्माद्विषयसम्बन्धं परित्यज्य भजाच तम् ॥

५. अत्तदु पत्तेनिल्—

त्यक्ते विषयसम्बन्धे मुक्तिस्स्वात्मानुभूतये ।
मुक्तिं तां च परित्यज्य कैङ्कर्यार्थं भजाच्युतम् ॥

६. पत्तिलनीशनुम्—

नाथोऽपि सर्वलोकानां निस्सङ्गो भाति माधवः ।
एकरूपोऽस्ति सर्वत्र ! निस्सङ्गस्तं भजानिशम् ॥

७. अडंगेळिल् सम्पत्तु—

ऐश्वर्यं सर्वमालोक्य रम्यं तस्य विभूतिगम् ।
ईशस्येत्येव मत्वा त्वं तत्र चैकीभवानिशम् ॥

८. उळ्ळमुरै शेयल्—

मनोवाक्कायरूपं च सार्थकं करणत्रयम् ।
मत्वा त्वं भव निस्सङ्गस्सक्तस्सर्वेश्वरे भव ॥

९. ओडुंगवचन् कण्—

आश्रिते च त्वया तस्मिन्नश्यन्ति प्रतिवन्धकाः ।
शरीरत्यागकालन्तु प्रतीक्षस्व ततः परम् ॥

१०. एण् पेरुक्कन्नलत्तु—

अमितानन्द–सद्वस्तु–कल्याणगुणवारिधेः ।
श्रीमन्नारायणस्यैव पादाब्जं दृढमाश्रय ॥

११. शेर्त्तडत्तेन् कुरुकूर्—

रम्ये तटाकभूयिष्ठे कुरुकानगरे प्रभोः ।
शठकोपस्य दिव्योक्तिसाहस्रे दशकं त्विदम् ॥

अथ प्रथमशतके

३. तृतीयदशकम् [पत्तुडैयडियवर्कुं]

(सर्वेश्वरं भगवन्तं नीचतमश्चेतनः कथं प्राप्नुयादिति स्वयं-
माशङ्क्य स्वभक्तानां विषये भगवतस्सौलभ्यकाष्ठां
प्रतिपादयति ।)

१. पत्तुडैयडियवर्कु—

भक्तानां सुलभोऽस्ति दुर्लभतमस्त्वन्यात्मनामद्भुत-
श्श्रीकान्तः परमः प्रभुश्च किल नः प्राप्यो न चान्यैरसौ ।
मन्थोद्यन्नवनीतचौर्यविधया चोलूखले बन्धभा-
ग्वक्षःपार्श्वतले, भयाद्विलपतस्सौलभ्यकाष्ठाऽस्य का ? ॥

२. एळिवरुमियल्विनन्—

नानाजन्मसु च स्वयं किल विशन्नैयत्यहीनोऽस्थिरः
कल्याणाम्बुधिरप्यनादिनिधनः प्रत्यक्षतेजोनिधिः ।
मोक्षज्ञानफलप्रदश्च सततं साकल्यतश्चेश्वरो
लोकानामुपकारकोऽस्ति दयया स्वीयोऽपि बाह्योऽस्त्यसौ ॥

३. अमैवुडैयरनेरि—

पूर्णं धर्ममवाप्तुमुत्तमगतिं प्राप्ताश्च सर्गं लयं
कर्तुं च प्रभवोऽमरास्तदितरे ये चेतनाचेतनाः ।
ते सर्वेऽपि स एव भाति भगवान्नारायणश्श्रीधरः
पूर्णस्सिद्ध इहास्य जन्मचरिते मायान्तु को वेत्ति वा ? ॥

४. यारुमोर्निलैमैयन्—

नाथोऽयं मम नामरूपशतसाहस्रावळीभृत्स्वयं
भात्येकस्सुविलक्षणस्त्विति विदुर्नैवं बुधा नास्तिकाः ।
जानन्त्येव किलास्तिकास्तु तमिमं विद्याविहीना अहो !
रूपं नाम च नास्य भाति किल भातीत्येव वादो महान् ॥

५. पिर् दकेरवस्वकै—

एवं ~ समयैश्च वादसरणिर्निश्चयेदिति श्रीधरो
वेदांन्तार्थसुधारसं हि भगवान् कल्याणशीलोऽब्रवीत् ।
आदिश्चान्तविवर्जितः किल हरिस्तद्भक्तिमार्गं शुभं
प्राप्यानन्यपरायणाश्च भवत प्रध्वस्तकर्माशयाः ॥

६. उणन्दुणन्दु—

ज्ञातृत्वात्सततं च चिन्तनपरास्सर्वासु दिक्षु स्वयं
ज्ञानस्य प्रसरं विरच्य च जडाद्व्यावृत्तिमेतां निजाम् ।
निश्चित्य श्रवणात्पुनश्च मननाद्योगाच्च मध्यस्थितिं
विष्णोर्वित्थ जनास्त्रिमूर्तिषु हृदा वाचा भजध्वं परम् ॥

७. ओनेनप्पलवेच—

एकानेकतयाऽपि संशयकरान् नारायणं तं चतु-
र्वक्त्रं रुद्रमिमान् विचिन्त्य बहुधा यूयं हृदि श्रीधरम् ।
तं प्राप्तुं सहसाऽप्यनन्यहृदया नारायणं स्वामिनं
यावच्चायुरिदं न नश्यति तदा भक्तिं कुरुध्वं पराम् ॥

८. मालु विग्रडु नमपलमै—

चेतोदोषहरा वयं यदि हरेश्श्रीशस्य पादद्वयं
प्राप्तास्सन्ततताप कारिदुरितावल्यास्तु नाशो भवेत् ।
इष्टार्थेषु न रिक्तता किल भवेत् ! कायस्य विश्लेषतो
निर्याणेऽन्तिमकालतोऽपि भजनं विष्णोर्भवेत्सार्थकम् ॥

९. वलत्तनन् तिरिपुरमेरित्तवन्—

ब्रह्मा चापि चतुर्मुखस्स्वजगता नाभीपुटे वर्तते
रुद्रश्च त्रिपुरान्तकः किल हरेः पार्श्वं श्रितो दक्षिणम् ।
प्रत्यक्षोऽपि भवेन्निजे तु जगति स्वस्यावतारादसौ !
यद्युच्येत हरेः प्रभावजलधिर्भूयानगाधोऽद्भुतः ॥

१०. तुयक्करुमतियिल् ननूशानतुळ्

दिव्यज्ञानयुतान् सुरानपि च यस्सम्मोहयत्यञ्जसा
मायाभिर्दिवि चासिताम्बुदनिभस्त्रैलोक्यमानप्रभुः ।
तस्यैवाङ्घ्रिसरोजयुग्ममनिशं भक्त्या स्मरन् कीर्तयन्
संश्लिष्यापि नमेयमित्यहह! मे वाञ्छा स्वयं वर्धते ॥

११. अमरर्कळ् तोळुदेळ—

देवानामपि सेव्यमच्युतमिमं पाथोधिमन्थप्रभुं
स्तोतुं श्रीहरिमेव दिव्यकुरुकापुर्यां शठारिर्मुनिः ॥
कैङ्कर्यं किल वाचिकं व्यतनुत श्रीसूक्तिसाहस्रत-
स्तत्रेदं दशकं तनोति पठतां मुक्तिं च सूरीन्द्रताम् ॥

——:o:——

प्रथमशतके

४. चतुर्थदशकम् (अञ्चिरैय मडनाराय्—)

(अत्र श्रीशठारिर्भगवतो नायिका स्वयमिति मत्वा तदीयं क्षमागुणं परिशील्य पक्षिगणद्वारा स्वसन्देशान् प्रेष्यति ।)

१. अञ्चिरैय मडनाराय्—

नित्यं चोपकृतिप्रसक्तहृदया त्वं हे ! बलाकाह्वये!
मत्ता नायकसङ्गमात्किल कृपां त्वं हन्त ! कृत्वा मयि ॥
दूतीभूय सनायकाऽद्य गरुडारूढं प्रभुं याहि मे
बन्धे तत्र धृताऽसि चेन्न हि भयं, साह्यन्तु मे त्वं कुरु ॥

२. एन्नैश्य तामरैक्कण् पेरुमानार्क्कु—

यूयं वाग्मिन एव कोकिलगणा दूता भवन्तो मम
श्रीकान्तं प्रभुमम्बुजाक्षमुचितामुक्तिं वदेतैव चेत् ।

---

(१) बलाका—नारै ।

हानिः का मम पापतो यदि पुरा तत्पादसेवामहं
न प्रा.. किमिहाधुनाऽपि च तथा विश्लेषवान् दुर्विधैः ॥

३. विदियिनाल् पेडैसणक्कुम्—

कान्तासङ्गमभाग्यवैभवयुता हंसाः स्वयं मन्दगा
यूयं वामनमेव वञ्चकममुं दृष्ट्वा मदीयां दशाम् ।
ब्रूत–स्त्री किल का चिदद्य दुरितं किं मे महद्दुस्सहं
हा ! हा ! हन्त ! न नश्यतीति नितरां चित्तेऽस्ति सम्मोहिता ॥

४. एन्नीमैं कण्डिरङ्गि—

विश्लेषासहतां विलोक्य च मम स्वैरं कृपावानसौ
नासीत्किं मयि नीलमेघसुतनुश्चेत्येव वाचं मम ।
यूयं केचन पक्षिणोऽद्य मम सद्भावोऽपि तस्मिन् विभौ
कान्ते नैव हि तिष्ठतीति वचनं ब्रूथैव वा? नैव वा? ॥

५. नल्किताद् कात्तलिक्कुम्—

रक्षित्वा स्वयमेव सप्त भुवनान्यास्ते जगन्नायकः
किं मह्यं वत नैव भाति कृपया नारायणः पापतः ।
दृष्ट्वा तं वद सुन्दराकृतिवरे! क्षेत्रेषु सञ्चारिणि
प्रीत्या त्वं कुरुकाख्यपक्षिणि वचः किञ्चित्सवाप्पान्तु माम् ॥

६. नरुळाद् वीररुलि—

रम्यस्वोचितपत्रझंकृतियुतस्त्वं भृङ्ग! दृष्ट्वा हरिं
नाथं भक्तकृपालुचक्रधरमेवेदं वचो मे वद ।
निष्कारुण्यगुणोऽसि जातु कृपया तस्यास्तु जीवावधौ
तद्वीथ्यां गरुडं च ते गमय भो! देवेति, किं मेऽस्त्यघम्? ॥

७. एन् पिळै कोप्पुदुपोल—

मत्संवर्धित! हे शुक ! त्वमधुना श्रीकान्तमेवं वद
क्लेशो मेऽस्ति हि दुस्सहोऽयमधुना! बाष्पार्द्रवक्त्राऽस्म्यहम् ।

---

(१) केचन पक्षिणः— मकन्त्रिल्कळ् ।

आगांस्येव मम स्मरेत्किमु हरिः? कारुण्यसिन्धुर्न किं?
किं तादृङ्मम वर्धतेऽद्य दुरितं? पात्रं दयाया न किम्? ॥

८. नीयलैये शिरुपूवाय्—

दूतीभूय मम त्वमद्य पतंग! प्राप्तो न तं मूढधी-
र्विष्णुं मे प्रभुमिन्दिरेशमनघं नावेदयो मे दशाम् ।
अत्यन्तार्तिकरीमिमां किल! ततो वर्णोऽद्य देहे मम
क्षीणोऽस्त्यन्तिमकाल एवमितरांस्त्वं पोषकान्मार्गय ॥

९. नाडाद मलर् नाडि—

मध्ये सञ्चरसि त्वमद्य सहसा गत्वाऽद्य भो मारुते !
श्रीशं तं वद किञ्चिदेव वचनं नारायणं मे प्रभुम् ।
तत्पादाब्जयुगे प्रसूनरचने भाग्यं न मे पाप्मतो!
विश्लेषेऽत्र विषण्णताऽस्ति हि ततस्त्वं मे वपुर्नाशय ॥

१०. उडलालि प्पिरप्पु वीडुयिर्—

भो भो! मानस! मे गभीर! बहुधा संसारचक्रस्य वै
मोक्षस्यात्मगणस्य भोग्यकरणावल्याश्च निर्वाहकम् ।
तं क्षीरार्णवशायिनं यदि हरिं पश्येस्स्वयं चक्रिणं
त्वं ब्रूह्यद्य दशां मम प्रियसमागत्यै च! मां मा त्यज ॥

११. अलवियन्र वेळुलकत्तवर्—

उत्तुङ्गामितसप्तलोकसरणेर्नाथं च कृष्णं हरिं
दिव्यज्ञानबलाद्भजन् हि कुरुकापुर्याश्शठारिः प्रभुः ।
साहस्रं व्यतनोच्च वृत्तरचनैरन्तादिपद्यावलीं
तत्रेदं दशकं तु भक्तपठितं दिव्यं पदं प्रापयेत् ॥

———:०:———

(१) पूवै—पक्षिविशेषः ।

प्रथमशतके

५. पञ्चमदशकम् (वळवेंळुलकिन्मुदलाय-)

(ईश्वरस्स्वसौशील्यात्—शठारिविश्लेषमसहमानस्तं स्वसान्निधिं प्रापयतिस्मेति वदति ।)

१. वळवेळुलकिन्मुदलाय—

मूलं सप्तजगत्ततेश्च मनसा सूरीन्द्रनाथं स्मरन्
देहेऽहं शिथिलेन्द्रियश्च वचसा पापी वदाम्येव हि ।
धूर्त त्वं नवनीतचोर इति च स्मेराननां तां प्रियां
नीळां प्राप्तुमहो वृषानपि विभो सप्तावधीश्चेत्यपि ॥

२. तिनैन्दु नैन्दुळ् करैन्दुरुकि—

देवास्ते मुनयोऽपि हन्त बहवस्सर्वे स्वयं चेतसा
स्मृत्वा त्वद्गुणसन्ततिं शिथिलितस्वाङ्गा द्रवीभूय च ।
मालातीर्थसुगन्धधूपसहितास्त्वां चेन्नमन्त्यच्युतं
मायिन्! सर्वपदार्थमूल! मलिनं किं स्यान्न ते वैभवम्? ॥

३. मायोनिकळाय् नडैकत्त—

देवादींश्च मुनीन् बहूनपि सृज त्वं सर्वजन्तूनपी
त्येवं तं चतुराननं प्रथमतस्सृष्ट्वाऽप्यगम्यो मतेः ।
लोकानप्यखिलान् स्वपादतलतस्सृष्ट्वा स्वयं मातृव-
द्वात्सल्याम्बुधिरेव सर्वजगतामत्यद्भुतस्वाकृतिः ॥

४. तानोरुवे तनिवित्ताय्—

मूलं सर्वजगत्ततेरपि हरिर्यस्त्वेकमूर्तिः प्रभु-
स्सङ्कल्पाद्बहुधा भवन् विजयते देवाश्च मूर्तित्रयम् ।
एवं ते मुनयोऽपि मानवगणास्तिर्यङ्मुखास्स्थावरा-
स्सर्वं च स्वयमेव चाब्धिशयनो वैकुण्ठराण्मे प्रभुः ॥

५. मानेयूनोक्कि मडवाळे—

लक्ष्मीं तां मृगलोचनां शुभगुणां धृत्वा स्वयं वक्षसि
श्रीमन्! चापमिव स्वयं किल हरे! कुब्जामृजूकृत्य ताम् ।
गोविन्दो मधुसूदनो मणिनिभस्त्वं ज्योतिषां भास्वर-
स्त्वत्पादाब्जयुगं कथं बत! सुधास्यन्दि त्वघी प्राप्नुयाम्? ॥

६. विनैयेन् विनै तीर्मरुन्दानाय्—

पापिष्ठस्य च पापशान्तिविधये दिव्यौषधात्माऽसि भो!
देवानामपि सर्वतः परिवृढस्त्वं केशवोऽसि प्रभो! ।
गोपानां कुलमूलनायक! विभो! मायामयो माधव!
त्वं वै सप्ततरुच्छिदेव बहुधा त्वामाश्रये श्रीधर! ॥

७. अडियेन् शिरिय ञानत्तन्—

अल्पज्ञोऽस्मि हि दास एष महतां तं ज्ञानिनां दुर्लभं
श्रीकृष्णं तुलसीस्रगञ्चितमपि श्रीशं भवार्तिच्छिदम् ।
द्रष्टुं हा! बत! कामयेऽद्य मनसा मूढोऽस्मि पापी स्वयं!
किं चेतः परमस्ति मौढ्यमधिकं दृष्टं श्रुतं वा क्वचित्? ॥

८. उण्डायुलकेळ् सुन्नमे—

मायाचेष्टित! पूर्वमेव हि भवान् भुङ्क्ते स्म लोकानिमान्
सप्तापि स्वयमुद्गिरन्नपि पुनर्जातो मनुष्यात्मना ।
एवं किं नवनीतभुक्पुनरभूः? पूर्वोक्तमृद्भक्षणा
च्छेषं किं द्रवयेस्सितत्वहतये दिव्यौषधं किं घृतम्? ॥

९. मायोम् तीय वलवलै—

मायां तामपि पूतनां विषमयीं हन्तुं स्वयं निर्मलो
बालोऽसौ विषमिश्रमप्यमृतवत्स्तन्यं महात्माऽपिबत् ।
देवानामपि देवमेव कमलाकान्तञ्च सर्वात्मनां
वात्सल्याम्बुनिधिं प्रभुं मम विभुं संश्रित्य जीवाम तम् ॥

१०. शान्दै विरुवल्विनैकलुम्—

पूर्णज्योतिर्मयोऽसौ हरिरिह परितश्चोपरिष्टादधश्च
व्याप्यास्ते चाप्रमेयस्सकलचिदचितामन्तरात्मा परात्मा ।
मन्नाथो द्वन्द्वकर्मप्रतिहतिमुखतो मेऽत्र सङ्गं प्रहृत्य
स्वस्मिंश्चित्तं मदीयं भुवि दिवि च सदा स्थापयन्मां वृणोति ॥

११. माले मायप्पेरुमाने—

सर्वोत्कृष्टोऽसि मायिन्! परमपुरुष! हे माधवेत्येव मुग्ध-
स्तस्येशस्य प्रसादादवहितहृदयश्श्रीशठारिर्महात्मा ।
साहस्रं चाह शस्यं द्रविडबुधवरैर्गानलोलैश्च भक्तै-
स्तत्रेदं रत्नरूपं दशकमपि विदन् वीतदुःखस्सुखी स्यात् ॥

प्रथमशतके

६. षष्ठदशकम् (परिवदिलीशनैप्पाडि–)

(ईश्वरस्य कल्याणगुणानीदृशानजानानाश्चेतना नरकं प्राप्नु-
वन्तीति करुणया श्रीशठारिः—'नायं दुराराधस्सर्वेषा
मुज्जीवनाय सुलभः'—इति चेतनान् बोधयति ॥

१. परिवदिलीशनैप्पाडि—

सञ्ज्ञाय पूर्णविभवं निरवद्यमीशं
ज्ञानादिपूर्तिमपि चेत्परिलब्धुकामाः ।
यूयं त्वनन्यशरणा भजताद्य नाथं
धूपं च पुष्पमपि तत्र समर्प्य तीर्थैः ॥

२. मदुवार्तॆण्णन्तुळायान्—

सुस्वादुगन्धतुलसीधरमप्रमेयं
वेदैश्च वेद्यमनघं पुरुषं पुराणम् ।
आराधयामि कथमित्यपि माऽस्तु चिन्ता!
सर्वं करोम्यहमितीह हि दास्यकृत्यम् ॥

३. ईड्डमेड्डप्पुमिलीशन्—

त्यागे परिग्रहविधौ च नृणां समानं
नैव त्यजेन्मम मनः किल तं प्रभुं मे ।
गानं न हि त्यजति मे रसना च तस्य
प्रेम्णा ममाद्य किल नृत्यति देहयष्टिः ॥

४. अणङ्गेनवाड्डमेनङ्गम्—

आविष्टवत्किल वपुर्मम नृत्यतीदं
सम्यक्प्रणम्य मम नाथमयं हि देवैः ।
स्तव्योऽस्ति सूरितिलकैरपि सम्भ्रमेण
श्रीशस्य सद्गुणगणावळिरीदृशी हि ॥

५. कोळ्कै कोळामैयिलादान्—

स्वीकारधिक्कृतिविहीनमरागवैरं
सुस्वादु चेदममृतं किल नित्यभोग्यम् ।
वस्तु प्रयोजनपरानपि चाप्यनन्यान्
सम्यग्विविच्य सुलभं परभक्तिभाजाम् ॥

६. अमुदममरर्कळ्कीन्द—

यश्चामृतं तु वितरन्नमरान् प्रतुष्टान्
कुर्वन्महोज्ज्वलसुदर्शनभृत्परात्मा ।
कल्लोलवैभवविशालसुधाब्धिशायी
तत्रामृताच्च मधुरान्नितरां हि भोग्यः ॥

७. नीळ् कडल्शूळ्—

विस्तीर्णवारिधिवृतां नगरीं च लङ्कां
शास्तुर्भुजानपि शिरांसि च यश्चकर्त ।

तत्पादपद्मयुगळं शिरसा प्रणम्य
प्रेम्णा स्वयं तरत कालमहाम्बुराशिम् ॥

८. कलिमिन्द्र तोण्डीर्कळ्—

भक्ता अनन्यशरणा भवताद्य यूयं
त्यक्त्वाऽन्यसक्तिमसुमेव हरिं भजध्वम् ।
तस्मादनादिदुरितावळिविघ्नमालां
हत्वा स एव तनुते परमां गतिं वः ॥

९. तरुमवरुम् पयनाय—

यश्चाद्वितीयविभवः प्रभुरप्रमेयो
विष्णुश्श्रियःपतिरुदारफलप्रदोऽस्ति ।
सत्यं समस्तदुरितानि च युग्मरूपा-
ण्युच्छेदयेत्स्वयमयं प्रतिबन्धकानि ॥

१०. कडिवार् तीयविनैकळ्—

एवं महादुरितवारिधिशोषणं य-
श्श्रीमान् करोति च स एव हरिः परात्मा ।
नित्यं चकास्ति हि महोज्ज्वलताक्ष्र्यकेतु-
श्श्रीदिव्यमङ्गळशुभाश्रयदिव्यमूर्तिः ॥

११. मादवन् पाल् शडकोपन् —

श्रीमाधवस्तुतिपरं किल दोषहीनं
साहस्रमाह शुभमेव शठारिसूरिः ।
तत्रापि दिव्यदशकं तदिदं तु भक्त्या
ये ये पठन्ति ननु ते भवबन्धमुक्ताः ॥

—:o:—

प्रथमशतके

७. सप्तमदशकम् (पिरवित्तुयरर्–)

(स्वाराध्यस्य भगवत आराधनं सुखरूपमिति प्रतिपादयति ।)

१. पिरवित्तुयरर्—

आत्मावलोकनपरा भवबन्धमुक्त्यै
तेजः प्रभावभरिता अपि धार्मिकाग्र्यम् ।
श्रीचक्रपाणिमनघं परमं पवित्रं
प्राप्यं च हन्त ! ननु साधनमामनन्ति ॥

२. वैप्पाम् मरुन्दामडियरै—

भक्तान्न पापसरणिष्वपि चेन्द्रियाणां
प्रच्यावयेदयमिहाच्युत इन्दिरेशः ।
दिव्यौषधं च निधिरस्ति समस्तलोका–
नानन्दयन् प्रभुरहो मम गोपबालः ॥

३. आयर् कोळुन्दाय्—

गोपालबालमपि गोपवशं निबद्धं
माणिक्यभासमिह मायिसुधारसं मे ।
आपीय सन्ततमहं हृतवान् प्रमोहं
मायाभवं प्रकृतिजं मम दुस्सहं तम् ॥

४. मयर्वरवेन्मनत्ते—

मोहं प्रणाश्य मम यो हृदि नित्यवासी
ज्ञानादिवृद्धिकृदसौ महसां च राशिः ।
देवाधिदेवमपि मेऽनुमतिं दधानं
चेतोहरं मम कथं बत ! सन्त्यजेयम् ?

५. विडुवेनो एन्नु विळक्कै—

ज्ञानप्रदीपमिह मे हृदि सम्प्रविश्य
सञ्जीवयन्तमपि मे प्रभुमद्भुतैस्तैः ।
वृत्तैश्च हन्त ! तरुणीरपि गोपिकास्ताः
जित्वा विटायितममुं तु कथं त्यजेयम् ॥

६. पिरान् पेरुनिलङ्कीण्डवन्—

स्वामी धरोद्धरणकृत्तुलसीवृतश्री-
मौलिप्रभूषितशिरा मम नायकोऽसौ ।
मायामयो यदि भवेद्धत ! गन्तुकाम-
स्तालच्छिदं कथमहं तमिहानुमन्ये ? ॥

७. यानोट्टि येन्नुळिरुत्तुवमेन्नूलन्—

नाहं स्वयं तमिह मय्यनुमत्य कुर्वे !
सोऽयं स्वयं मम मनोऽपि च वञ्चयित्वा ।
देहे प्रविश्य मम चात्मनि सङ्गतस्सन्
किं मां च दूरमनुमन्यत एव गन्तुम् ? ॥

८. एन्नै नेकिल्किलुम्—

मां दूरतस्स्वयमसौ यदि सन्त्यजेन्मे
चित्तं तथाऽपि न वियोजयितुं क्षमस्स्यात् ।
नीळां सुदीर्घशुभवृत्तभुजां प्रहृष्ट-
स्संश्लिष्य भाति यदसौ दिवि सूरिनाथः ॥

९. अमरर् मुलुमुदलाकिय—

सूरीन्द्रनाथमपि चादिविभुं सुराणां
दिव्यामृतप्रदममुं किल गोपबालम् ।
आत्मा मम स्वयमुपेत्य च सम्प्रविश्य
स्वैरं विहृत्य मिळितोऽस्ति ! कथं त्यजेत्तम् ? ॥

१०. अकलिलकलुम् अणुकिलणुकम्—

विश्लेषिणं किल वियोजयति स्वयं य—
स्संश्लेषिसङ्गविरतोऽसुलभोऽस्ति वीरः ।
मन्नायकोऽप्रतिभटस्स्वगुणैरनन्तै-
स्सङ्कीर्त्य तं ननु दिवानिशमस्म्यतृप्तः ॥

११. कुडैन्दु वण्डुण्णुम् तुळाय्मुडियानै—

भृङ्गावृतार्द्रतुलसीधरमौळिदीप्रं
स्तुत्वा शठारिमुनिराह शुभं सहस्रम् ।
तत्रेदमस्ति दशकं शुभमार्तिमालां
सर्वां च हन्ति जगतां सहसैव दिव्यम् ॥

प्रथमशतके

८. अष्टमदशकम् (ओडुम् पुळ्ळेरि)

(आर्जवगुणोपेतो भगवानाश्रितसंश्लेषं स्वयमेव करोतीति निरूपयति ।)

१. ओडुम् पुळ्ळेरि—

आरुह्य गरुडं भाति दिव्यां च तुलसीं वहन् ।
नित्यसूरिवरैर्नित्यं सेव्योऽस्ति दिवि माधवः ॥

२. अम्मानाय्—

सर्वेश्वरोऽप्यसौ केशिहन्ता कृष्णोऽब्जलोचनः ।
आश्रितार्थं स्वयं जातस्सर्वमाहात्म्यशोभितः ॥

३. कण्णावान्—

देवानामपि मर्त्यानां चक्षुर्यो वेङ्कटाचले ।
सूरीणामपि सेव्योऽसौ भाति रम्ये सुशीतले ॥

४. वेय्यैयोनेडु—

धृत्वा महाद्रिमप्येष निरायासोऽस्ति वीर्यवान् ।
आपद्बन्धुर्मम स्वामी ! स्मराम्यस्य यशस्सदा ॥

५. वैकलुम् वेण्णेय्—

नवनीतं सदा भुङ्क्ते स्वयं बाहू प्रसार्य यः ।
स मे वपुषि संसक्तो भाति सत्योऽनृतं त्यजन् ॥

६. कलन्देन्नावि—

संश्लिष्य मम चात्मानं कृत्वा स्वीयं मम प्रभुः ।
सर्वेन्द्रियहरो भाति वामनो धरणीं भजन् ॥

७. कोण्डानेळ्विडै—

सप्तर्षभप्रहर्ताऽसौ सप्तलोकीं च भक्षयन् ।
परमे धाम्नि च स्थित्वा मम चित्तानुगः प्रभुः ॥

८. आनानानायन्—

गोपवेषधरोऽप्येष स्वयं मत्स्यवराहवत् ।
अवतीर्णोऽभवन्मह्यमवतारा असङ्ख्यकाः ॥

९. शङ्गुशक्करम्—

शङ्खचक्रधरो भाति रम्ये भुजयुगे स्वयम् ।
मम प्रभुरसौ दीप्रस्सर्वतोऽप्यवतारतः ॥

१०. नादन् ञालङ्गोळ्—

ईश्वरस्सर्वलोकांश्च पादेनाक्रम्य रक्षिता ।
सुशीलो भाति मन्नाथो वेदसागरकीर्तितः ॥

११. नीर् पुरै वण्णन्—

रक्षितुर्निम्नगान् विष्णोरार्जवं कीर्तयन्मुनिः ।
शठारिराह साहस्रं ! तत्रेदं दशकं शुभम् ॥

———0———

प्रथमशतके

९. नवमदशकम् (इवैयुमवैयुमुवैयुम्-)

(अत्र शठारिस्स्वविषये भगवता कृतं सर्वावयवसंश्लेषं वर्णयति ।)

१. इवैयुमवैयुमुवैयुम्—

सर्वाचेतनसन्ततिं निकटतोऽदूरेऽपि दूरे स्थिता-
मेवं चेतनसन्ततिं च सकलां स्वस्मिन् विधायापि यः ।
सृष्ट्वा चापि पुनस्स रक्षणपरस्सर्वान्तरात्मा स्वयं
स्वामी कृष्णविभुर्ममामृतरसश्श्रीशोऽस्ति चाग्रे मम ॥

२. शूळल् पलपल वल्लान्—

कुर्वंस्तामवतारसन्ततिमपि स्वेच्छाबलात्प्राक्तने
काले दिव्यवराहमूर्तिरवनीमुद्धृत्य यः केशवः ।
मन्नाथः किल हस्तिशृङ्गभिदसौ देवैरवेद्यस्स्वयं
गम्भीरामृतवारिधौ महति यश्शेते स पार्श्वेऽस्ति मे ॥

३. अरुकलिलाय पेरुश्शीर्—

नित्यानन्तसुनिर्मलात्मविभवस्सूरीन्द्रनाथस्स्वयं
चादिर्नीलमणिप्रभस्सुरुचिराम्भोजाक्षियुग्मो हरिः ।
दीव्यत्पक्षगरुत्मदाश्रय इह श्रीदेव्युपेतस्स्वयं
सांश्लिष्याद्य मया सहाद्भुतरसं दत्वा न मान्तु त्यजेत् ॥

४. उडनमर् कादल् मकळिर्—

संश्लेषैकरसाश्च यस्य कमला भूमिश्च नीळा स्वयं !
यस्यासीदुदरे जगत्त्रयमपि ! स्वामी शयानोऽम्बुधौ ।
मायी यो वटवृक्षपत्रशयितः कृष्णः प्रभुश्श्रीधर-
स्सोऽयं भाति हि पार्श्वतो मम तनौ नित्यं यशोदासुतः ॥

५. ओक्कलै वैत्तु मुलैप्पाल्—

रुद्रश्चापि चतुर्मुखश्शतमुखस्सर्वेऽपि चोत्पादिता
येनेशेन स एव मायिहृदयां तां स्तन्यदां चावधीत् ।

तद्दुर्भावहरो हरिर्विषमयं स्तन्यं निपीय स्वयं
स्वामी चाद्भुतवैभवस्स भगवानास्ते हृदब्जे मम ॥

६. मायनेन्नेञ्जिनुळ्ळान्—

मायी मे हृदयस्थितः किमितरैरेवंविधस्स्यादसौ ?
देहे चात्मनि मे शरीर्यनिलवद्ध्यात्माऽपि दूरेऽसताम् ।
भक्तानां सुलभश्च दृप्तमनसां चिन्ताद्यतीतस्स्वयं
शुद्धस्संशयमोहकृच्च जगतां बाहूपरिष्ठो मम ॥

७. तोळिणै मेलुम् नन्मार्पिन्मेलुम्—

बाहूनामुपरि प्रियोरसि शुभे मौळिस्थले चोज्ज्वले
पादाम्भोजयुगे च रम्यतुलसीमालाञ्चितश्श्रीधरः ।
स्वामी निस्समवैभवस्स्वमहसा दीप्तस्वमूर्तिस्सदा
संश्लिष्यापि मया सहानवरतं जिह्वां प्रविष्टो मम ॥

८. नाविनुळ् निन्ऱुमलरुम्—

विद्यास्वप्यखिलासु चात्मतनुरूपोऽयं स्वयं तज्जनि-
ध्वंसादेरपि कारणं च कुसुमावळ्या चतुर्बाहुधृत् ।
वैरिध्वंसकचक्रशङ्खभृदसौ नीलोत्पलश्यामलः
पद्माक्षोऽद्य चकास्ति चोज्ज्वलतमो मन्नेत्रयुग्मे हरिः ॥

९. कमलक्कण्णनेन् कण्णिनुळ्ळान्—

पद्माक्षो मम नेत्रगोचरतया भाति स्वयं ! यश्च मां
कृत्वा दिव्यकटाक्षपात्रमपि मे पञ्चेन्द्रियाणां प्रभुः ।
आविर्भाव्य सरोजसम्भवमजं फालाक्षयुक्तं विधिं
देवानप्यमलांश्च लोकसरणिं सृष्ट्वा ललाटेऽस्ति मे ॥

१०. नेत्तियुळ् निनॆन्नैयाळुम्—

भक्तानां शिरसि प्रयुक्तचरणं मौळौ तुळस्याऽञ्चितं
कृष्णं देवमिमं भजन्ति हि सुरास्सर्वेऽपि भक्त्या स्वयम् ।

रुद्रश्चन्द्रकलाधरोऽपि च चतुर्वक्त्रोऽपि चेन्द्रादयः !
प्रत्यक्षो मम मस्तकेऽद्य नितरां भाति स्वयं तादृशः ॥

११. उच्चियुळ्ळे निक्कुंम् देवदेवक्कुं—

एवं मस्तकसुप्रतिष्ठितमिमं देवाधिदेवं हरिं
कृष्णं प्रेमभरेण शंसितुमयं भक्तश्शठारिर्मुनिः ।
साहसं कुरुकेश्वरस्समतनोद्भक्त्या निवेद्य स्वयं
तत्रेदं दशकं वहन्ति शिरसा तत्पादयुग्मं सदा ॥

———0———

अथ प्रथमशतके

१०. दशमदशकम् (पोरुमानीळ्पडै)

(तादृशसंश्लेषहेतुं विचार्य स्वस्याऽकिंञ्चनत्वादीश्वरस्य
निर्हेतुकमुपकर्तृत्वं प्रतिपादयति ।)

१. पोरुमानीळ्पडै—

दिव्यायुधात्मकसुचक्रसुशङ्खधारी
श्रीमत्पदाम्बुजयुगं जगतां सुसेव्यम् ।
कर्तुं निजं किल विलक्षणवामनात्मा
संवृद्धनीलमणिरस्ति ममाक्षियुग्मे ॥

२. कण्णुळ्ळे निक्कुंम् कादन्मैयाल्—

यः पञ्चभूतजगदात्मक एव नाथ-
स्तं प्राप्य भक्तिभरिता यदि सोऽस्ति दृश्यः ।
सञ्चिन्तयन्ति यदि तं स तदाऽपि वश्य-
स्स्याद्भक्तियुक्तमनसां ! किमितोऽस्ति कृत्यम् ? ॥

३. एम्बिरानै—

हे ! भव्य ! मानस ! भजाद्य मम प्रभुं तं
नाथं च मत्पितृपितामहतत्पितृणाम् ।
पद्माक्षमेव मयि दिव्यकटाक्षयुक्तं
लक्ष्मीञ्च वक्षसि दधानमुदात्तरूपाम् ॥

४. नेञ्जमे नल्लै नल्लै—

मन्मानस ! त्वमिह भासि सुसाधु ! साधु !
त्वां प्राप्य किं न तु भजाम ? किमस्त्यसाध्यम् ? ।
लक्ष्मीपतिं सततयौवनशालिनं तं
देवं भज त्वमनिशं मम यावदायुः ॥

५. कण्डाये नेञ्जे—

हे मानस ! त्वमिह पश्यसि सिद्धिमेतां
मत्कर्मणान्तु परितोऽपि विनैव चिन्ताम् ।
भुक्त्वा च सप्तभुवनानि पदत्रयेण
त्रातारमेव जगतां त्वमपश्य एवम् ॥

६. नीयुम् नानुम्—

हे ! चित्त ! मातृवदसौ पितृवच्च नाथो
लोकेऽपि नीलमणिवर्ण इहावतीर्णः ।
स्वामी ममास्ति हि ! विलोक्य दशां किलैता-
मद्यावयोर्न किल दुःखलवं च कुर्यात् ॥

७. एन्दैये येन्नुम्—

यं सूरिवर्यनिवहाः परमं भजन्ते
स्वस्वामिनं स्वपितरं दिवि चिन्तयन्तः ।
तं मानसे मम कथं बत ! पापशील-
स्स्वस्वामिनं स्वपितरं च वृथाऽत्र मन्ये? ॥

८. शेल्वनारणनेन् शोकेैट्टलुम्—

बाष्पावळिर्मम किल प्रवहत्यहो ! श्री-
नारायणेति वचनं तु निशम्य नेत्रात् ।
चित्रं ! कथं न्विदमसौ मयि सादरोऽस्ति
श्रीमान् दिवानिशमतो न निजं त्यजेन्माम् ॥

९. नम्बियै त्तेन्कुरुङ्गुडिनिन्नू—

श्रीमत्कुरङ्गनगरस्थितमच्युतं तं
सम्पूर्णवैभवमुदारसुवर्णमूर्तिम् ।
सूरीन्द्रनाथमपि चादि परं च तेजः
किं वा वदन्मम विभुं बत विस्मरेयम् ॥

१०. मरप्पुम् ज्ञानमुम्—

विस्मर्तुमप्यहह वेत्तुमहं न शक्तो
यद्विस्मरेदयमिति स्वयमेव मत्वा ।
श्रीपुण्डरीकनयनो मम भाति चित्ते !
रत्नं कथं मणिनिभं मम विस्मरेयम् ! ॥

११. मणियै वानवर् कण्णनै—

माणिक्यवर्णमपि सूरिवरेन्द्रनाथं
कृष्णं तमप्रतिमसुन्दरमूर्तिमीशम् ।
स्तोतुं शठारिरत्नोत्सुरसं सहस्रं !
तत्रेदमेव दशकं पठतां हि सिद्धिः ॥

इति श्रीपरमात्मना श्रीमत्कल्किसिंहमहाकवीन्द्रेण
विरचितायां सहस्रगाथारत्नावळ्यां
॥ प्रथमशतकं सम्पूर्णम् ॥

——(*)——

अथ द्वितीयशतके

प्रथमदशकम् (वायुन्तिरैयुकलुम्)

(अत्र शठारिर्भगवतो बाह्यसंश्लेषमभिलषन् तदलाभाद-
त्यन्तमार्तस्सन् स्वयं नायिकावस्थां प्राप्य-
स्थावरतिर्यगादिभिस्सह
प्रलपति ।

१. वायुन्तिरैयुकलुम् —

उद्यत्तरङ्गजलधौ बक ! सम्प्लवान !
क्लिष्टोऽसि किं ? किमहहामरनिद्रयाऽपि ।
निर्निद्र एव हि भवान् ! किमु पीडितोऽसि ?
किं पाण्डरोऽस्यहमिवाद्य हरेर्वियोगात् ? ॥

२. कोळपट्ट शिन्दैयैयाय्—

हे ! सुन्दरद्विज महार्तरवोऽसि दीनो
यामेषु सन्ततमहो ! विलपन् किल त्वम् ।
अस्मादृशोऽस्ति विरहार्तिवशो भवान् किं
श्रीशेषशायिपदसत्तुलसीस्पृहार्द्रः ? ॥

३. कामुत्तकैयरवोडु—

भोगैर्विहीन इव हन्त ! दिवानिशं त्वं
निर्निद्र एव विलपस्यहहार्द्रचित्तः ।
लङ्काप्रदाहिपदसक्तिदशां मदीयां
किं प्राप्तवानसि समुद्र! तवास्तु भद्रम् ॥

---

(१) नाराय्—पक्षिविशेषः ।
(२) अनिल्—पक्षिविशेषः ।

४. कडलुम् मलैयुम्—

शीताङ्ग वात जलधावचलेऽन्तरिक्षे
सर्वत्र तं किल विचित्यतु मादृशोऽसि ।
निर्निद्र एव च दिवानिशमच्युतं तं
द्रष्टुं हि चक्रिणमहो सततं स्पृहार्तः ॥

५. ऊळिदोरूळि—

हे वारिद ! त्वमपि भासि महाश्रुपातै-
रस्मादृशः किल सदाऽपि च वर्षवाहिन् ।
किं वा विचिन्त्य मधुसूदनपौरुषं तत्
खिन्नोऽसि तत्परवशो बत तेऽस्तु भद्रम् ॥

६. नैवायवेम्मेपोल्—

हे चन्द्र ! किं क्षयवशोऽसि कलावशेष-
स्त्वं मादृशोऽद्य गगने न तमोऽपहारी ।
किं त्वं द्विजिह्वशयनस्य सुचक्रिणस्तत्
सत्यं वचो बत ! निशम्य कलाविहीनः ॥

७. तोत्तोम् मडनेञ्जम्—

नारायणाय विभवे वयमद्य चित्तं
भव्यं समर्प्य नितरां विरहातुरा हि ।
क्रन्दाम एव महह त्वमहो निशे! किं
क्रूराऽसि वैरिवदनारतमस्तु भद्रम् ॥

८. इरुळिन् तिणिवण्णम्—

कुंल्ये! निशेव सततं बहुनीलवर्णे
निद्रासि नैवहि दिवानिशमुग्रसान्धा ।
देवस्य तस्य शकटासुरमर्दनस्य
त्वं किं कृपागुणजिता हृदि कर्शिताऽसि ॥

९. नोन्दाराक्कादल् नोय्—

हे दीपिके! सततमुज्ज्वलविग्रहे! त्वं
सन्तप्तचित्तविकला नितरां हि खिन्ना ।
किं पुण्डरीकनयनस्य तु मत्प्रभोस्त्वं
बिम्बाधरस्य तुलसीमभिलष्य तप्ता ॥

१०. वेवारावेल्कैनोय्—

आशा हि तापजननी नितरां कृशां मां
नक्तन्दिवं च तुदति त्वमहो हयं तम् ।
हत्वा च केशिनमतीव हठात्प्रविश्य
द्वन्द्वासुरघ्न! पृथिवीहर! मां न मुञ्चेः ॥

११. शोरादवेप्पोरुळ्कुम्—

सर्वात्मनामपि च मूलमनादि तेजः
प्राप्तुं परं शठरिपुः कुरुकापुरेशः ।
साहस्रमाह तदिदं दशकं पठन्त-
स्तत्र प्रयान्ति परमं पदमेव धन्याः ॥

अथ द्वितीयशतके

२. द्वितीयदशकम् (तिण्णन् वीडु)

(तादृशार्तिनिरसनाय सन्निहितमीश्वरं दृष्ट्वा तस्य परत्व मवतारेष्वपि प्रकाशत इति परोपदेशं करोति ।)

१. तिण्णन् वीडु—

दिव्यामृतात्मकमुदारफलं च मुक्ति-
स्सर्वं स्वयं प्रभुरसौ मनसोऽप्यतीतः ।
भूमिं द्युलोकमखिलं जठरे निवेश्य
कृष्णश्चकास्ति परतत्त्वमितोऽपि नान्यत् ।

२. एपावस्परमे—

रुद्रस्य तस्य गुरुपातकमोचकोऽयं
भिक्षाप्रदानकर एव च[illegible]गोपसिंहः ।
योऽसौ कृपालुरतनोदपि सप्तलोकीं
धन्यां स एव फलदोऽस्ति परःपुमान्नः ॥

३. एरनैष्पूवनै—

रुद्रं सरोजभवमप्ययमच्युतस्स्व-
स्याङ्गे यतश्श्रियमिव स्वयमेव धृत्वा ।
सौशील्यवानर्तिगतो हरिरूर्ध्वलोकान्
भूमिं जिगाय किमितः परमस्ति दैवम् ॥

४. तेवुमेप्पोरुळुम्—

देवाद्यशेषजगतामपि सृष्टिहेतो-
स्तं नाभिपद्मभवमादियुगे तु सृष्ट्वा ।
देवश्चकास्ति परमः प्रभुरिन्दिरेशः
किं वेतरोऽर्हति सुमाद्युपहारमालाम् ॥

५. तकुंशीर्त्तन् तनिमुदलिनुळळे—

नित्योचितस्वमहिमान्वित एव चादौ
देवादिसृष्टिमपि तां परमां चकार ।
श्रीपुण्डरीकनयनः परमाच्च तस्मा-
ज्ज्योतिः परं किमपरं बत वेत्ति को वा ! ॥

६. यवरुम् यावैयुमेल्लाप्पोरुळुम्—

सर्वेऽपि चेतनगणा यदचेतनाश्च
स्वस्मिन् किलांशशकला इव दर्शितास्ते ।
सोऽयं हि विश्वतनुरस्ति परं च तेजः
क्षीराब्धिशाय्यमितधीः परमः प्रभुर्नः ॥

७. पळ्ळियालिलै—

धृत्वा निजोदरतले किल सप्तलोकीं
धीरश्शिशुर्वटदळे शयितः प्रभुर्नः ।
गोप्यं च तस्य गहनं च विचित्रमाया-
सङ्कल्पवैभवमिदन्तु विदुस्स्वयं के ? ॥

८. करुत्तिल् तेवुमेल्लाप्पोरुळुम्—

सङ्कल्पतस्सुरनरादि समस्तलोकान्
संवर्ध्य भाति परमः प्रभुरेष मायी ।
एवं विना किमपरो जगतां स्थितिं त-
द्रक्षां च कर्तुमुचितः प्रभुरस्ति कश्चित् ॥

९. काक्कुमियल्विनन्—

संरक्षणाय जगतां प्रभुरेष कृष्ण-
स्सर्वानपि स्वजठरे कृतवान् हि लोकान् ।
तं नाभिसम्भवमजं चतुराननं तं
देवेन्द्रमप्यमरबृन्दमुखानसूत ॥

१०. कळवावेस्मैयुमेळ्ळुलकुम्—

मायामयोऽसि भगवन्नखिलान् किलास्मान्
त्वय्येव दर्शयसि सर्वजगत्ततीश्च ।
इत्येव रुद्रचतुराननशर्वमुख्या
देवा भजन्ति गरुडध्वजपादयुग्मम् ॥

११. एत्तवेळ्ळुलकुम्—

स्तव्यं समस्तजगतामपि मानमूलं
रम्याकृतिं शठरिपुः कुरुकापुरीशः ।
स्तोतुं सहस्रमवदद्दशकं च दिव्यं
तत्रेदमत्र पठतां न हि दोषगन्धः ॥

अथ द्वितीयशतके

३. तृतीयदशकम् (ऊनिल्वाळ्)

(तादृशपरत्वोपेतस्य भगवतोऽनुभवाय संसारिचेतना
न सहायभूता इति नित्यसूरिभिस्सह सङ्गमं
प्रार्थयतेऽत्र शठारिः ।)

१. ऊनिल् वाळुयिरे—

हे चित्त ! स्वयमत्रभासि वपुषि ! स्वस्त्यस्तु ते साध्वखि
त्वां प्राप्यैव हि सूरिराणमधुरिपुस्स्वामी ममायं हरिः ।
सोऽहश्चैकरसात्मकं हि युगळं क्षीरं घृतं सन्मधु
स्वादुश्चेक्षुरसो घनश्च सकलं दिव्यामृतं सङ्गतम् ॥

२. ओत्तार् मिक्कारै—

स्वामिन् ! नैव समोऽधिकोपि च तव श्रीशासि मायामयो
जातश्चासि सजातिरेव सकलैरात्माऽसि सर्वात्मनाम् ।
माता मेऽसि पिताच मे गुरुरसावज्ञातसंशिक्षक-
स्त्वं नाथासि महोपकारनिरतो ! नो वेद्मि कृत्यानि ते ॥

३. अरियाक्कालत्तुकळे—

वेषाद्वामन एव सुन्दरवटुस्त्वं भूर्बले ! त्रिक्रमे-
त्येवं वञ्चक एव मोहजनको विष्णो ! मया सङ्गतः ।
मायासंसृतिवार्धिमग्नमपि मां जित्वा हठाच्चे हरे !
दास्ये नित्यरतं किलाद्यकृतवान् ! भातीदमत्यद्भुतम् ॥

४. एनवाविधुळ् कळन्द—

नाथ ! त्वं जठरे समस्तभुवनान्यादौ प्रवेश्य स्वयम्
त्राता मामपि रक्षसीति कृतवित्स्वात्मार्पणं चाचरम् ।
न स्यादस्य निवृत्तिरात्मन इह त्वं भासि चात्मा मम !
स्वात्मा को मम? कोऽस्म्यहं? स्वयमिहस्वीयं हि दाताऽवृणोः ॥

५. इनियाद् आनङ्गळाल्—

ज्ञानाधिक्ययुतैरनाश्रितगणैर्न प्राप्यसे त्वं विभो !
भक्तानां स्वयमेव मोक्षसुखरूपोऽसीह दिव्यामृत ! ।
व्यावृत्तो भववारिधेरहमहो ! त्वच्चादिरुत्तारको !
वाराहोऽसि जगद्धरस्त्वदशनेनाहं त्वदङ्घ्री श्रितः ॥

६. शेन्दांर्तीविनैकल्कु—

पापध्वंसकरोऽसि संश्रितवतां दिव्यां मतिं प्रापयन्
त्वं विश्लेषविवर्जितः किल सदाऽनन्यान् करोष्येव तान् ।
तेजोरूपधरश्च तामसरुचिं सर्वां प्रहृत्य स्वयं
क्रूरां शूर्पणखामिवासि भगवन् ! प्राक्त्वामहं संश्रितः ॥

७. मुन्नल्याळ्पयिल्नूल्—

पूर्वं साधु सुगीतवाद्यरसिकै र्गानामृतं दापयन्
भक्तानां परमोऽस्ति सेव्यतम एवाहो ! पवित्रो भवान् ।
त्वं भासीक्षुरसोऽमृतश्च जलदो नीलो ममासि प्रभुः !
कृष्ण ! त्वान्तु विना न जीवितधरस्स्यां ! त्वं वृणु श्रीश माम् ॥

८. कुरिक्कोळ् आनङ्गळाल्—

शिक्यस्थां नवनीतदुग्धसरणिं सर्वां च भुक्त्वा रह-
स्येव त्वं मम नायकोऽसि भगवन् ! पापान्यहं खण्डयन् ।
दिव्यज्ञानयुतैस्तपोबल महाभाग्येन लभ्यां गतिं
दिव्यां तां चिरकालतोऽपि सहसैवाहं गतोऽस्यां जनौ ॥

९. कडिवार् तण्णन्तुळाय्—

विभ्राणस्य सुगन्धवाहितुलसीमालां च कृष्णस्य वै
सूरीणामपि नायकस्य परमस्याहं पवित्रस्य च ।
कल्याणेषु गुणेषु मग्नहृदयः पापाब्धिसंशोषकः
सर्वत्रापि भृशं प्रविश्य सुगुणानापीय मोदेत माम् ॥

१०. कलिप्पुम् कवर्उमत्तु—

उत्साहं च विषादमप्यहमहो ! दूरे विहाय त्यजन्
जन्मव्याधिजरामृतीश्च महसां ज्योतिःपरं शाश्वतम् ।
स्वर्लोकं धरणीं च पातुमनिशं श्रीशङ्खचक्रान्वितं
देवं तं भजतां कदानु महतां गोष्ठीमुपैमि स्वयम् ? ॥

११. कुळाङ्गोळ् पेररक्कन्—

सङ्घीभूतनिशाचराधिपकुलच्छेदाय रोषान्वितं
देवं सज्जनबृन्दवन्द्यकुरुकाधीशश्शठारिर्मुनिः ।
स्तोतुं चाह सहस्रपद्यसरणिं दिव्यां सुबन्धावळीं
तत्रेदं दशकन्तु भक्तनिवहैस्सङ्कीर्त्य भो ! नृत्यत ॥

अथ द्वितीयशतके

४. चतुर्थदशकम् (आडियाडियकङ्करैन्दु)

(तादृशप्रार्थनस्य निष्फलत्वात् नायिकावस्थां प्राप्य मुग्ध-
स्सन् शठारिरत्र नायिकाजननीवचनमनु-
वर्णयति ।)

१. आडियाडियकङ्करैन्दु—

भास्वल्ललाटलतिका तनया ममेयं
भ्रान्ता चरत्यहह ! विद्रुतचित्तभित्तिः ।
गीतानि गायति ततो गळिताश्रुधारा
ऽप्यन्विष्य शुष्यति विभो ! नृहरे ! ममेति ॥

२. वाणुदलिम्मडवरल्—

सेयं लसन्मुखतला मम कोमलाङ्गी
त्वद्दर्शनाय विरहादिह भाति खिन्ना ।
बाणासुरस्य तु सहस्रभुजच्छिदेवं
किं निर्दयोऽसि ? तव दर्शनकामिनीयम् ॥

३. इरक्कमनत्तोडु—

क्लेशादियं मनसि हन्त ! विभाति चाग्नौ
लाक्षादिवद्द्रुततनुर्बत ! निर्दयोऽसि ।
लङ्कान्तु राक्षसपुरीं नितरां प्रणाश्य
प्रख्यातिमान् किलभवान् ! किमु तेऽद्य कुर्याम् ? ॥

४. इलङ्कैशेत्तवनेयेन्नुम्—

लङ्कापुरप्रमथनेति वदेत्पुनश्च
तार्क्ष्यध्वजेति च वदेदियमुच्छ्वसन्ती ।
सन्तप्तमानसतया किल साश्रुधारा
भ्रान्तिं गता भवति सञ्जलिबन्धहस्ता ॥

५. इचकिराप्पकल्वायूवेरीइ—

नक्तन्दिवं भ्रमवचांसि हठाद्वदन्ती
नीलोत्पलाक्ष्यभवदेव हि साश्रुधारा ।
भृङ्गावृतां च सरसां तुलसीं न दद्याः !
किं वेदृशी तव कृपा बत ! शुद्धशील ? ॥

६. तकवुडैयवनेयेन्नुम्—

सेयं द्रवीकृततनुर्विगतस्वचित्ता
हा ! हन्त ! जल्पति सुशील ! दयापरेति ।
संवर्धितामिलषितोऽसि ममेश्वरेति
स्वात्मान्तरोऽसि च ममामृतसागरेति ॥

७. उळ्ळुलावियुलन्दुंलन्दुं—

सेयं हि वञ्चनपरा हृदयं न वक्ति
व्यक्तं ! स्वयं स्वविटवञ्चनकृत्यखिन्ना ।
संशोषितात्मकतया वदतीह कृष्णे-
त्यौदार्यवन्निति च वार्धिशयेति मूम्ना ॥

८. वक्षमेयेन्नुम्—

हे ! वञ्चकेति वदति स्वयमञ्जलिं च
स्वैरं करोति बत ! दग्धनिजान्तरङ्गा ।
सेयं हि निश्श्वसितिति हा ! शरणं प्रपन्ना
त्वां कंसवञ्चक ! कथं बत ! वाऽनुभूयात् ? ॥

९. पङ्गपोदेळ्ळुपोदरियाळ्—

अस्तं न वेत्ति ! न च वेत्ति किल प्रभातं
सेयं सदाऽपि तुलसीं तव वक्ति रम्याम् ।
ज्वालाकुलातिनिशिताननचक्रपाणे !
दीनामिमां प्रति किमस्ति तवाद्य चित्ते ? ॥

१०. एलै पेदै—

दीनात्वियं भ्रमवशा हि दिवानिशं चा-
प्यश्रुप्रवाहभारिताऽस्त्यसितायताक्षी ।
लज्जां प्रणाश्य किल कण्टकदुष्प्रभुत्वं
प्राध्वंसयोऽद्य परिपाहि कटाक्षमस्याः ॥

११. वाहमिळ्पुकळ् वामननै—

नित्यामुदारगुणवामनदिव्यकीर्तिं
स्तोतुं मुनिश्शठरिपुः कुरुकापुरीशः ।
छन्दोनिबद्धमिह पद्यसहस्रमाह !
स्यात्तत्पदाब्जयुगळे दशकंत्विदं स्रक् ॥

—————0—————

अथ द्वितीयशतके

५. पञ्चमदशकम् (अन्दामत्तन्बु शेय्दु)

(अत्र भगवत्संश्लेष सन्तुष्टस्तदीय दिव्यभूषण–दिव्यायुध
दिव्यावयव सौन्दर्यादिकं नित्यसूरिसेव्यत्वं
चानुसन्दधाति शठारिः ।)

१. अन्दामत्तन्बु शेय्दु—

स्थित्वाऽसौ परमेपदे मम हृदि स्वैरं प्रविष्टोऽधुना ।
दिव्यस्रग्विकिरीटचक्रजलजा यज्ञोपवीत स्रजौ ।
एता भान्ति किलास्य नेत्रयुगळं बिम्बाधरं चाङ्घ्रियुक्
सर्वं चाम्बुजसन्निभं ! तनुरहो दिव्या सुवर्णात्मिका ॥

२. तिरुवुडम्बुवान् शुडर्—

त्यक्त्वाऽसौ सकलं मया सह हरिस्साक्षात् स्वयं सङ्गतो !
नाथस्यास्य तनुर्विभाति दिनकृद्वर्णा च पद्मे दृशौ ।
हस्तौ चाम्बुरुहौ ! श्रियोऽस्ति वसतिर्वक्षस्स्थली ! ब्रह्मणो
नाभिर्भाति च जन्मभूरहह ! तल्लिङ्गं हरस्याप्यहो ! ॥

३. एन्नुळ् कलन्दवन्—

सम्यग्भाति महोज्ज्वलः किल मया सङ्गत्य नाथो मम
श्रीशस्यास्य महाचलस्य वदनं नेत्राङ्घ्रिहस्तात्मकम् ।
सर्वं भाति सरोजमेव ! जगतां स्थानं किलास्योदरं !
नैव स्यात्किल किञ्चिदप्यहह ! हा ! तस्मिन्न यत्सङ्गतम् ॥

४. एप्पोरुळुम् तानाय्—

सोऽयं सर्वकलासु सर्वदिवसेष्वप्यस्ति मासेष्वहो !
सर्वेष्वेव समस्तवत्सरगणेष्वेवं हि कल्पेष्वपि ।

सङ्गत्यैव मया सहामृतनिधिश्चाशोष्य एव स्वयं
सर्वात्माऽसितपर्वतोऽम्बुजमिदं नेत्राङ्घ्रिहस्तं नवम् ॥

५. आरावमुदमाय्—

सम्पूर्णामृतवारिधिर्हृदि ममाप्यन्तः प्रविश्यासतो
नाथो मेऽस्ति हि नीलमेघसदृशः कृष्णः प्रभुर्निस्समः ।
चक्षुःपादकरे न पद्ममुपमा ! नैव प्रवाळोऽधरे
भूयादस्य लसन्ति हारमकुटौ काञ्च्यादिभूषागणाः ॥

६. पलपलवेयाभरणम्—

दिव्यान्याभरणानिचाप्यगणितान्यस्यास्तिनामावळि-
र्दिव्याचाप्यमिताऽस्ति रूपसरणिर्दिव्याऽप्यनन्ता हरेः ।
दिव्यं दृष्टिरुचिश्रुतिस्पृगुदितं घ्राणेन्द्रियस्थं सुखं
सर्वं चामितमेत्र शेषशयितुर्ज्ञानं च दिव्यं बहु ॥

७. पाम्बणैमेल् पार्कडलुळ्—

क्षीराब्धौ शयनं च शेषशयने नीळार्थमेवाद्भुतः
ख्यातस्ससवृषप्रहार इह योऽभूत्ससप्तसालाहतिः ।
तत्सर्वं कृतवान्मदर्थमयमेवात्यन्तरम्याकृतिः
विष्णुश्श्रीवृषवीर्यभाक् च तुलसीमालाकिरीटोज्वलः ॥

८. पोन्मुडियम्पोरेत्तै—

दीप्रोत्तुङ्गकिरीटधारिणममुं वीरञ्च मे नायकं
रम्याजानुचतुर्भुजं निरवधिश्रीकं तुलस्यञ्चितम् ।
नीचेनापि मयाऽद्य सङ्गतमहं किं वर्णयामि स्वयं
वाचा ? हन्त ! न गोचरोऽस्ति वचसः किं ब्रूथ यूयं स्वयम् ? ॥

९. शोल्लीरेन्नम्मानै—

यूयं कीर्तयताच्युतं ममविभुं चात्मानमप्यात्मनो
निस्सीमाखिलसद्गुणं मणिनिभं ज्योतिश्च दिव्यामृतम् ।

मोक्षस्यापि परंपदं त्वसुलभं तं योगिनामप्यहो
पद्मान्तश्च सुगन्धिवीजममलं नारीनरेभ्यःपरम् ॥

१०. आणल्लन् पेण्णल्लन्—

न स्त्री नापि पुमान्नषण्ड इति च प्रामाण्यवश्यो न हि
स्वामी मे न हि चास्त्यसन्न खलु सन् भक्तात्मनां सुप्रियः ।
तेषां चाभिमतोरुदेह इतरोऽप्यास्ते स्वयं श्रीहरि-
स्तं चैनं न हि शक्तिरस्ति वचसा वक्तुं ! न वक्तुं च मे ॥

११. कुरुकूरवारा—

एकं चापि गुणन्तु यस्य वचसा वक्तुं न शक्तिर्भवे
तं स्तोतुं प्रभुमच्युतं घटविहारादिप्रियं श्रीधरम् ।
साहस्रं कुरुकापुरप्रभुरयं मौनी शठारिर्जगा-
वन्ताद्यं दशकं च तत्र तदिदं दिव्यं पदं प्रापयेत् ॥

अथ द्वितीयशतके

६. षष्ठदशकम् (वैकुन्दामणिवण्णने)

(अत्र श्रीशठारेरतिनैच्यं विलोक्य भगवतोऽतिशङ्का सञ्जा-
तेति तत्परिहारार्थं " नाहं त्वां कदापि
त्यजेयम् "—इति प्रतिजानीते ।)

१. वैकुन्दामणिवण्णने—

वैकुण्ठासि मणिप्रभः किल मम श्रीवामन ! त्वं प्रिय-
स्संश्लेषं मयि सन्दधासि सततं दिव्यामृतात्मा महान् ।
सम्पूर्णोऽसि फलप्रदश्च नमतां घोराघहन्ता हरे !
दुष्टारामसि कुन्तवक्त्रमथनस्त्वां संश्रितोऽस्मि स्थिरम् ॥

२. शिक्केनच्चिरिदोरिडमुम्—

हीयद्वाऽपि नहि त्यजेद्बहिरहो ! लोकानशेषान् वहन्
स्वस्मिन्नेव किल स्वयं मयि विशन् ज्ञानप्रभाभास्वरः ।
तेजोराशिरुदारसद्गुणानिधिर्दिव्यामृतात्मा हरिः
पद्माक्षो मम नायको ऽन्यपरतां सन्त्यज्य मय्यास्थितः ॥

३. तासरैक्कण्णनै विण्णोर्परवुम्

पद्माक्षं दिवि नित्यसूरिनिवहैस्स्तव्यं ममैव प्रभुं
पुष्पोद्यत्तुलसीस्रजं च कनकाद्रिं श्रीधरं सादरम् ।
स्तुत्वा तं मनसा विचिन्त्य वपुषा चानम्य हृष्टा वयं
नृत्यामोऽद्य ! स एव पद्यरचने शक्तिं च मेऽदात्स्वयम् ॥

४. वळ्ळले मधुसूदना एन्मरकतमलैये—

नित्योदार ! ममप्रभुं मरकताद्रिं त्वां मधुध्वंसिनं
स्मृत्वाऽन्यत्सकलं विसृज्य सुगुणाम्भोधौ निमग्नोऽस्मि ते ।
नृत्यन् गानपुरस्सरं प्रमुदितः प्रध्वस्तदुःखोऽधुना
धन्योऽहं तव सन्निधावनुभवं प्राप्य त्यजाम्येव किम् ? ॥

५. उय्न्दु पोन्दु—

क्षीराब्धौ शयितोऽसि शेषशयने तां योगनिद्रां भजन्
मन्नाथ ! त्वदुदाररूपगुणभूत्यादिस्मृतेर्धन्यताम् ।
लब्ध्वाऽहं सकलाघसन्ततिहतिं कृत्वाऽधुना श्रीहरे !
त्वद्दास्यं परमं शुभं निरवधि प्राप्तस्त्यजाम्येव किम् ? ॥

६. उन्नैच्चिन्दै शेय्दु शेय्दु—

वक्षस्तस्य हिरण्यकस्य मनसाऽपि त्वां तु धिक्कुर्वत-
स्सम्भिद्यासि पुरा नृसिंह ! जगतां त्राता ! स्मरंस्त्वामहम् ।
दिव्यां पद्यततिं विरच्य वचसा गायंश्च नृत्यन्नहो !
निर्मूल्याप्यघसन्ततिं मम सुखी ! किं वाऽस्त्यसाध्यं मम ? ॥

७. मुडियाद्दुदेवेनक्केलिनि—

सर्वेषां जगतां च भक्षणकरस्सम्यक् प्रविष्टो मयि
श्रीशो नैव हि मां त्यजे त्पुनरसौ ! मद्बान्धवाश्चाखिलाः ।
तेऽमी सप्त च पूरुषाः कुलभवाः प्रध्वस्तपापास्त्वयं
हत्वा नारकदुर्गतिं प्रमुदिताः ! किंवाऽस्त्यसाध्यं मम ? ॥

८. मारि मारि प्पलपिरप्पुम्पिरन्दु—

जन्मान्यत्र पुनःपुनश्च सुबहून्याश्रित्य चाद्यास्म्यहं
त्वत्पादाम्बुजसंश्रयो हृदि महानन्दामृताब्धौ स्वयम् ।
मग्नोऽस्मीह! भवान् किलासुरगणप्रध्वंसकं वाहनं
तार्क्ष्यं भात्यधिरूढ एव ! मयि नाथात्रैव नित्यं भव ॥

९. एन्दाय् तण् तिरुवेङ्कडत्तुळ्—

स्थित्वा वेङ्कटभूधरे विजयसे मन्नाथ! लङ्कान्तक !
त्वं सालानपि सप्त चैकहतितश्छित्वाऽसि धन्वी महान् ।
भासि त्वं किल दिव्यरम्यतुलसीमालोऽद्य दिव्यामृत!
त्वां सम्मिश्रय मयीह नायक! कथं देवेश ! यास्यन्यतः? ॥

१०. पोकिन्नकालङ्गळ् पोयकालङ्गळ्—

कालेष्वद्यतनेष्वतीतसमयेष्वागामिकालेष्वपि
त्वं माता च पिता ममासि हि! ममाप्यात्मा जगन्नायकः ।
सौशील्याम्बुनिधिं च वेङ्कटपतिं त्वां दिव्यमालोज्ज्वलं
संश्रित्याद्य कथं त्यजामि तुलसीसौगन्ध्यसारान्वितम् ? ॥

११. कण्णित्तण्णन्तुळाय् मुडि—

मालाकारसुरम्यशीततुलसीभास्वत्किरीटं हरिं
स्तोतुं पद्मविशाललोचनममसौ सूरिश्शठारिर्मुनिः ।
साहस्रं कुरुकापुरप्रभुरहो ! माराभिधानोऽब्रवी-
त्तत्रेदं दशकं प्रगाय रसिकास्स्युः केशवस्य प्रियाः ॥

———0———

अथ द्वितीयशतके

७. सप्तमदशकम् (केशवन् तमर्)

(श्रीभगवतस्स्वविषये सञ्जाता प्रीतिस्स्वसम्बन्धिसम्बन्धि परम्पराविषयेऽपि जातेति शठारिरत्र केशवादि द्वादशनामप्रतिपाद्यं तं प्रपद्य स्ववंश्यास्सप्त सप्तजन्मोत्पन्ना अप्युज्जीविता इति निरूपयति ॥)

१. केशवन् तमर्—

श्रीमत्केशवसंश्रयाः किल मम प्राप्ताः कुलोत्पादिता—
स्ते पूर्वोत्तरसप्तसप्त ! महतीं दिव्यां गतिं वैष्णवीम् ।
ईशस्यास्य मम प्रभोरिह महामाणिक्यवर्णस्य च
श्रीसूरीन्द्रपतेः प्रसादभरतो नारायणस्याश्रयात् ॥

२. नारणन् मुलुवेलुलकुक्कुमनादन्—

श्रीनारायण एव सर्वजगतां नाथोऽस्ति वेदात्मको
मूलं कारणमस्ति कर्म च कृतिः पूर्वश्च सर्वात्मनाम् ।
स्तव्यस्सर्वगुणाकरो ऽमरगणैरन्यैश्च सर्वैरयं
स्वामी मत्तगजस्य दन्तभिदहो ! मे नायको माधवः ॥

३. मादवनेन्नदे कोण्डु—

सत्यं ! माधवनामकीर्तनबलात्स्वामी मम श्रीधरो
नानादोषततिं प्रहन्तुमपि मे चित्ते प्रविश्य स्वयम् ।
सर्वाघप्रशमप्रभुः किल सुधापूरोऽब्जनेत्रो महा—
नद्रिप्राय इहेक्षुखण्डशरधि र्गोविन्द एवाच्युतः ॥

४. गोविन्दन् कुडक्कूत्तन्—

गोविन्दो मम नायकः प्रभुरसौ जिष्णुर्घटैर्लीलया
गोपालो विहरन्महानिति पृथक् सङ्कीर्त्य नृत्तादिभिः ।
सोऽहं यामि च सञ्चरन् मम महापापावळिं ध्वंसयन्
मद्बन्धूंश्च स सप्तसप्त पुरुषान् विष्णुर्निजानातनोत् ॥

५. विट्टिलङ्गु शङ्जोदि—

विष्णोरस्य मम प्रभोस्सुरुचिरश्रीमौलिभूषाभृतो
दिव्यं भाति सरोजमेव चरणौ हस्तौ च नेत्रे हरेः ।
दीप्तो नीलमहाद्रिरेवहि तनु श्चन्द्रोऽस्ति शङ्खो महा-
नादित्यो मधुसूदनस्य रुचिरश्चक्रायुधात्मा विभोः ॥

६. मदुशूदनैयनि—

नान्यं श्रीमधुसूदनात्किल परं प्राप्यं भजेऽहं सदा
कार्यं मे न किलापरैरिति हरिं तं मेऽद्य पद्यैस्स्तुवन् ।
एवं कल्पसहस्रतोऽपि विविधां जन्मावळीं मे स्वयं
ज्ञात्वा मेऽभिमुखो दयाळुरवशो दत्तेऽखिलं त्रिक्रमः ॥

७. तिरिविक्किरमन् शेन्दामरैक्कण्—

श्रीश ! त्रिक्रम ! पुण्डरीकनयन ! स्वामिन् ! सुबिम्बाधर !
त्वं भास्येव शुचिस्मितस्त्विति पृथक् त्वत्सद्गुणां श्चिन्तयन् ।
शंसंश्च प्रणमन् पदाब्जयुगळं कल्पेष्वनकेषु ते
सम्प्राप्यास्मि हि दास्यसक्तहृदयस्त्वं वामनो मे प्रभुः ॥

८. वामननेन् मरतकवण्णन्—

हे ! श्रीवामन ! नीलरत्ननिभ ! मे पद्माक्ष ! कामोद्भवे-
त्येवं त्वत्पदपद्मकीर्तनपरो नत्वाऽस्मि शुद्धाशयः ।

जाड्यं जन्मभवं प्रणाश्य मनसो दोषान् प्रहृत्यापि मे
स्वामिन् पूर्णमहाश्रियः! किमुहरे! कुर्यान्तव श्रीधर ॥

९. शिरीदरन् शेय्यतामरैकण्णन्—

स्वामिन्! श्रीधर! रम्यपद्मनयनेत्येवं हि नक्तन्दिवं
जल्पन् भ्रान्त इवाश्रुपूर्णनयनस्सन्तप्तचित्तोऽभवम् ।
तामार्तिं मम नाशयन् प्रमुदितं कुर्वन् सदा मां हरे!
त्वं मे भासि हृदि स्वयं किल हृषीकेश! प्रतिष्ठापितः ॥

१०. इरुडीकेशनेम्बिरान्—

मन्नाथ! त्वमुदारसद्गुण! हृषीकेशासि लङ्केशितु—
र्हन्ता तस्य दशाननस्य हि हरिर्देवाधिदेवोऽच्युतः ।
इत्येवं मम मानस! त्वमनुसन्धाय प्रणामं कुरु!
क्षिप्रं विद्धि! यदि भ्रमोऽस्ति च पुनर्मा पद्मनाभं त्यज ॥

११. पर्पनापनुयर्वरवुयरुम्—

उत्तुङ्गोऽस्ति हि पद्मनाभ इह मे स्वामी परश्शक्तिमान्
स्वीकृत्यापि च मां ममापि विवशश्श्रीकल्पकश्चामृतम् ।
नीलाम्भोदसमश्च वेङ्कटगिरौ भाति स्वयं नायक—
स्सूरीणामधिपश्चकास्ति च हरिर्दामोदरो मे प्रभुः ॥

१२. दामोदरनैत्तनिमुदल्वनै—

श्रीदामोदरमादिमूलमखिलान् लोकान् स्वयं चोदरे
बिभ्राणं कथमप्रमेयविभवं ज्ञातुं वयं शक्नुमः ?
इत्येवं हि चतुर्मुखेश्वरमुखा देवाश्च दामोदर—
स्यांशास्स्तोतुमनर्हतां जगुरहो! नाथं न मे ते विदुः ॥

१२. वण्णमंमणिवोदियै—

नीलश्रीमणिवर्णमच्युतमिमं ज्योतिः परं सूरिणां
नाथं कृष्णमुदारमेव कुरुकानाथ श्शठारि र्मुनिः ।
प्राप्तुं चाह सहस्रमुत्तमकृतिं तत्रापि च द्वादश—
श्री नामप्रतिपादकन्तु तदिदं पादौ हरेः प्रापयेत् ॥

अथ द्वितीयशतके

८. अष्टमशतकम् (अणैवदरवणै मेल्)

(ईश्वरस्य संसारिणां विषयेऽपि कारुण्यं प्रतिपाद्य
तेषामुज्जीवनाय स्वमोक्षप्रदत्वोपदेश
प्रकारं वर्णयति ।)

१. अणैवदरवणै मेल्—

शेषे किलास्य शयनं प्रियमस्ति विष्णो—
र्लक्ष्मीतनो र्भवति सङ्गम एव भोग्यः ।
मूलं तयो र्विधिशिवात्मकयोस्स सर्वो
मोक्षप्रदोऽस्तिं च भवार्णवपोतरूपः ॥

२. नीन्दुम् तुयर्प्पिरवि—

शीतह्रदेऽम्बुजयुते गजदुःखहन्ता
मन्नायकोऽस्ति तुलसीशुभहारभूषः ।
सङ्गोऽस्य सर्वजगतां भवदुःखहन्ता
सर्वार्तिहृद्भवति मोक्षसुखस्य मूलम् ॥

३. पुणर्क्कुमयनामल्लिक्कुमरनाम्—

स्वोद्भूतिनाभितलपार्श्वनिवासशीलो
धाताऽपि सृष्टिकृदसौहि हरोऽपि हन्ता ।

युक्तश्श्रियोरसि निजाद्भुतशीलवृत्तै-
स्सर्वान्तरात्मकतयाऽस्त्यभितः प्रसिद्धः ॥

४. पुल्लैन्दु मेयुम्—

पञ्चेन्द्रियै विषयपञ्चकभुक्तिसक्तैः
मुक्ताः परं पदमनन्तसुखं विशन्तः ।
यूयं भवेत सकलासुरनाशकस्य
श्रीशस्य सन्ततबलादिगुणाब्धिमग्नाः ॥

५. ओवात्तुयरॢप्पिरवियुळपड—०

नानार्तिसन्ततिकरीमपि सृष्टिमेतां
रक्षां च संहृतिमनादिरयं हि कुर्वन् ।
देवाधिदेव इह मेऽस्ति च तीर्थरूपो
वाजी च मत्स्यकमठादिरहो ! नरात्मा ॥

६. तीर्तनुलकळन्द शेवडिमेल्—

तीर्थस्य यस्य पदयोः कुसुमावळीं तां
भक्त्या समर्प्य शिवमस्तक एव दृष्ट्वा ।
पार्थेन तेन विदितं प्रथितं परत्वं
तस्याद्य किं बत ! पृथक् प्रतिपाद्यमेव ? ॥

७. किडन्दिरुन्दु निन्नळन्दु—

शय्यां गतोऽप्युपविशन्नपि चात्र तिष्ठन्
पादेन चाक्रमणतोऽपि वराहवेषात् ।
उद्धृत्य चापि जठरे पृथिवीं दधानो-
ऽप्याश्लिष्य बाहुभिरसौ बहुधाऽस्ति मुग्धः ॥

८. काण्बारारेम्मीशन्—

को वेत्ति मे प्रभुमिमन्तु कथन्नु वेत्ति
श्रीकृष्णमस्य सकलं कबळं जगत्स्यात् ।
स्थानं परं पदमसौ सकलान्तरात्मा
व्याप्नोति सर्वमपि लेशमपि त्वमुञ्चन् ॥

९. पुङ्गुळन् कण्णन्—

सर्वत्र सन्निहित एव हरिः किलेति
प्रास्ते सुतेऽपि च रुषा स हिरण्यनामा ।
स्तम्भे न हीत्यवददस्य वधाय तत्रो–
द्भूतं नृसिंहमसमं बत ! वेत्ति कोवा ? ॥

१०. शीमैंकोळ् वीडु—

मोक्षप्रदश्च सुरनारकितां च कुर्वन्
देवाद्यशेषजगतामपि धारकोऽसौ ।
यन्ता च बीजमभितो विभुरब्दवर्णः
कृष्णो ममास्ति किल लोचनगोचरोऽद्य ॥

११. कण्डलङ्गळ् शेय्य—

श्रीपुण्डरीकनयनं प्रभुमब्दवर्णम्
स्तोतुं शठारिरवदत्कुरुकापुरीशः ।
साहस्रमुत्तममिदं दशकं च तत्र
ज्ञात्वा भजन्ति परमेच पदे स्वराज्यम् ॥

अथ द्वितीयशतके

९. नवमदशकम् (एम्मावीट्टुत्तिरमुम्)

(अत्र शठारिर्भगवन्तं सम्बोध्य " मम प्रीतये माऽस्तु मे मोक्षः, तवैव प्रीतयेऽस्तु " इति कैङ्कर्य निष्कर्षं करोति ।)

१. एम्मा वीट्टुत्तिरमुम्—

तत्तादृगुत्तमपदं न हि मोक्षभाग्यं
काङ्क्षे त्वदीयपदपङ्कजयुग्ममेव ।
त्वं मे निधेहि शिरसीह गजार्तिहारिन् !
मे वाञ्छितं हि सकलं त्विदमेव नाथ ! ॥

२. ईदे यानुन्नैक्कोळवदु—

मन्नाथ ! नीलमणिवर्ण ! भवन्तमेव-
मेतावदेव सततं किल हन्त ! याचे ।
त्वत्पादलाभशरणं मम भक्तियोगं
त्वं देहि मे ! न कुरु कालविलम्बमत्र ॥

३. शेय्येल् तीविनैयेन्रु—

मा भूस्तु पापकृदिति स्वयमेव चक्रं
धृत्वा च पाणितलतः कृपया ब्रवीषि ।
हे ! कृष्ण ! नाथ ! तव पादयुगस्तुतौ मे
कण्ठावरोधनविधावपि देहि शक्तिम् ॥

४. एनक्केयाळ्चेय्येक्कालत्तुमेन्रु—

त्वं सन्ततं च मम दास्यरतो भवेति
चित्ते मम स्थिरमसुं किल हन्त ! कृष्णम् ।
एतावदेव हि फलं परमन्तु याचे !
त्वं मां विधेहि सततं च तवैव दासम् ॥

५. शिरप्पिल् वीडुशुवर्क्कनरकम्—

देहावसानफलितं किल मुक्तिभाग्यं
स्वर्गादिनारकमपीह भवेत्तथाऽन्यत् ।
नानाजनिं च भगवन्तमजायमानं
नित्यं स्मरन्नहमपारमुदाऽन्वितस्स्याम् ॥

६. मकिल् कोळ् देय्वम्—

देवादिलोकनरलोकजडादिजन्तू-
नुत्पाद्य भास्वरमहाप्रभयाऽन्वितस्त्वम् ।
स्वामिन् ! मनोवचनकर्मसमन्वितं मां
प्राप्य प्रहर्षय समागमतः प्रणम्रम् ॥

७. वारायुन् तिरुप्पादमलरुक्कीळ्—

त्वां नित्यमेव हृदि मे विनिवेश्य हृद्यं
त्वत्पादपङ्कजमनारतमाश्रितस्सन् ।
धन्यो भवेयमिति मे मतिरस्ति पूर्णं !
त्वं मां वियोजयसि किं ? समुपेहि तूर्णम् ॥

८. एक्कालत्तेन्दैयाय्—

प्राज्ञैस्तु वैदिकवरैर्विमलैर्हि भोज्य-
स्स्वामी भवान् रसघनं मधुरं फलं मे ।
चित्ते सदाऽपि परमो यदि भासि नाथ !
त्वामर्थये न किल जातु चिदन्यमर्थम् ॥

९. यानेयेन्नै यरियकिलादे—

नाहन्त्ववेदिषमहो ! मम च स्वरूपं !
सोऽहं ममेदमिति च भ्रमवश्य आसम् ।
श्रीदिव्यसूरिनिवहैरपि सेव्यमान !
स्वामिन् ! ममेदमहमप्यहह ! त्वदीयम् ॥

१०. एरेलेलुम्वेन्रु—

सप्तर्षभानपि विजित्य हि दग्धवांस्त्वं
लङ्कापुरं सपदि रम्यतमं च वीरः ।
मां न त्यजेस्त्वमहहोज्ज्वलदिव्यमूर्ते !
क्षिप्रं च सङ्गमय मां तव पादपद्मे ॥

११. त्रिडलिल् शक्करत्तण्णलै—

नित्यापृथक्स्थितसुदर्शननायकं तं
त्यक्तुं न हि क्षम इतीह शठारिसूरिः ॥
साहस्रमाह परमं यदुदारभाव-
स्तत्रेदमेव दशकं पठतां हि मुक्तिः ॥

———0———

अथ द्वितीयशतके

१०. दशमदशकम् (किळरोळियिळमै)

(तादृशकैङ्कर्यसिद्धये शठारिश्श्रीवनाद्रिः (तिरुमालिरुं-
शोलैमलै) नाथस्य समाश्रयणमावश्यकमिति
प्रतिपादयति ॥)

१. किळरोळियिळमै—

प्राग्यौवनस्य विलयात्प्रचितौजसश्श्री-
मायाचरित्रवत एव गृहं प्रभोर्नः ।
नित्यप्रवृद्धतरुषण्डवृतं सुखाय
श्रीमद्वनाद्रितलमाश्रयितुं हि युक्तम् ॥

२. शदिरिळमडवार्—

चातुर्यशालितरुणीजनवश्यतां तु
त्यक्त्वा प्रतिध्वनिविभूषितशङ्खपाणेः ।
श्रीरम्यबाहुभृत एव गृहं सुधांशू-
त्तंसोल्लसद्वनगिरिस्थलमेव शस्यम् ॥

३. पयनल्लशेयूदु—

कृत्यं वृथैव वितथं किल चित्त ! वर्ष-
न्मेघायितस्य तु हरेः प्रियसन्निधानम् ।
सम्मोहनैस्तरुगणैश्च समीपशैले
रम्यं शुभं वनगिरेस्स्थलमाश्रितव्यम् ॥

४. करुमवन् पाशम्—

दुष्कर्मपाशसरणिं जगतां निहन्तुं
तन्मुक्तिसिद्धिविषयेऽपि महाचलं यत् ।
सन्धारयन् हरिरिहास्ति तरूपगूढे
मेघावृते वनगिरौ गिरिरेष सेव्यः ॥

५. तिरमुडैवलत्ताल्—

दुष्कृत्यनाशविषये जगतां बलैस्तैः
नानाविधैरुपकरोति हि चक्रपाणिः ।
तेनोषितस्य च वृतस्य शुभैः प्रवाहै-
र्बाह्याचले वनगिरेर्वसतिश्शरण्या ॥

६. किरियेननिनैमिन्—

त्यक्त्वा निहीनमपि कर्म शुभां गतिं तां
सञ्चिन्त्य चात्र तु सवत्समृगीसमेतम् ।
शिक्योपरिष्ठनवनीतभुजस्स्थलं तत्
स्मर्तुं च सद्वनगिरेः कुशलं शरण्यम् ॥

७. मलमैननिनैमिन्—

सञ्चिन्त्यतां शुभमिदं नरकापनुत्त्यै
पूर्वं धरोद्धरणकृद्वसतीह यस्मात् ।
दिव्यां मतिं वितरतीति च शेषभावा-
त्प्राप्तुं वनाद्रिमुचितं तरुषण्डरम्यम् ॥

८. वलम् शेयुदु वैकल्—

सम्प्राप्य चापि बलमत्र वृथैव कालं
नेतुं हि नोचितमहो ! कुशलावहस्य ।
गोपालकस्य वसतिम्सुरबृन्दवन्द्या
दिव्यस्थली वनगिरेस्सततं हि सेव्या ॥

९. वलक्केननिनैमिन्—

प्राप्यं स्वरूपमिति चिन्तयताद्य पापा-
न्युच्छिद्य दुष्टवनितांविनिहन्तुरेतत् ।
दिव्यस्थलं तरुणवारणसेव्यमाढ्यं
प्राप्तुं च सद्वनगिरेस्स्मरणंशरण्यम् ॥

१०. शूदेत्रु कळवुम् शूदुम् शेय्यादे—

द्रव्यार्जनाय विविधं च विहाय चौर्यं
वेदार्थवक्तुरिह सन्निधिमच्युतस्य ।
बर्हिप्रियं विकचसूनमिदं वनाद्रे-
स्स्थानं प्रवेष्टुमुचितं पुरुषार्थरूपम् ॥

११. पोरुळेनिल्लुलकम्—

भूयाच्च सार्थकमिति स्वयमेव लोक-
स्रष्टुर्हरेस्सकलदिव्यगुणान् विशुद्धान् ।
स्तोतुं शठारिरवदच्च सहस्रमेत-
द्दिव्यं कृपाळुचरणौ दशकं नयेद्वः ॥

अथ तृतीयशतके

१. प्रथमदशकम् (मुडिच्चोदियाय्)

(श्रीवनगिरिनाथस्य भगवतो दिव्यमङ्गळविग्रहदिव्या-
भरण दिव्यसौन्दर्याद्यनुभवोऽत्र
वर्ण्यते ।)

१. मुडिच्चोदियाय्—

ज्योतिस्ते मुखमण्डलस्य किमिदं मौळीन्द्रतेजोमयम् ?
पादाब्जस्य रुचिः किमेतदभवत्पद्मासनं ते हरे ।
रम्या ते कटिकान्तिरेव किमियं वस्त्रादिभूषात्मिका ?
श्रीश ! त्वं मम संशयान् परिहर ! त्वं वाच्यवाणीपतिः ॥

२. कट्टुरैक्किल्—

तत्त्वं चेत्परिशील्यते तव परज्योतिर्मयस्याम्बुजं
चक्षुःपादकरैस्समं न ! कनकं शुद्धं न ते वर्ष्मणा ।
औपम्यं जगताऽत्र कल्पितमिदं सर्वं च हीनोपमा
वाभात्येव तव स्तवेषु बहुशस्सत्यं निकर्षावहा ॥

३. परंशोदि—

सर्वस्मात्परमो भवान् हि भगवान् ! ज्योतिः परं त्वं हरे !
नास्त्येवोज्ज्वलमन्यदुत्तमगुणं ज्योतिर्विना त्वां क्वचित् ।
सङ्कल्पात्तव सर्वलोकसरणिं सृष्ट्वा स्वयं भ्राजसे !
गोविन्दाद्य परं महस्तव गिरा वक्तुं न शक्तिर्मम ॥

४. माट्टादेयाकिलुम्—

विश्वं नाभिसरोजमस्तकमिदं सत्यं विशालं तव
श्रीशस्याम्बुजकोमले वपुषि यच्चित्तं न बध्नात्यहो ! ॥
नानादुर्मतसम्प्रविष्टमपि यद्विश्वं तनोषि स्वयं
तस्मात्त्वां तुलसीप्रियं कथमिदं विश्वं समाराधयेत् ? ॥

५. वरुन्दाद्वरुन्तवत्त—

नैसर्गं हि तपःफलं त्विति महज्ज्योतिः परं ते तनु-
र्ज्ञानं चापि निसर्गसिद्धमपरिच्छिन्नं विभु श्रीहरे !
लोकान् पालयसि स्वयं हि सततं कालत्रयस्थोऽच्युतः
कल्याणानिह ते गुणान् कथमहं कार्त्स्न्येन सङ्कीर्तये ? ॥

६. ओदुवारोत्तेल्लाम्—

वेदा वेदविदां समस्तजगतां सर्वे वदन्त्यंशतः
पूर्णस्यापि गुणांस्तवैव तुलसीमालाकिरीटोज्ज्वल !
पद्मा च स्वयमस्ति नित्यवसतिर्वक्षस्स्थले ते हरे !
शब्दैः कैः कथयाम्यहं कथमहो ! तादृक् च ते वैभवम् ॥

७. वाल्तुवार्पलराक—

स्तोतारो बहवो भवन्त्विति भवानादौ स्वयं सृष्टवान्
ब्रह्माणं चतुराननं सृज जगन्मूलोदकादित्यहो ! ।
रुद्राद्या अमराश्च दिव्यमतयस्संघीभवन्तस्स्वयं
किं स्तोतुं प्रभवन्ति सद्गुणगणान्नित्योज्ज्वलांस्ते हरे ! ॥

८. माशूणाच्चुडरुडम्बाय्—

श्रीकान्तं निरवद्यनिर्मलमहातेजोनिधिं त्वां हरिं
दिव्यज्ञाननिधिं विकाररहितं सर्वाश्रयं सर्वतः ।
देवेशोऽपि चतुर्मुखश्शुभमतिस्स्तोतुं च सज्जो यदि
त्वत्पादाम्बुजयुग्मकान्तिरतुला किं नाप्नुयान्म्लानताम् ? ॥

९. मळुङ्गादवैनुदिय—

नित्यामोघसुतीक्ष्णचक्रधर ! ते कैङ्कर्यसक्तं गजं
त्रातुं त्वं गरुडं त्वरातिशयतो रूढस्स्वयं चागतः ।
सङ्कल्पैस्सफलैस्तवात्र जगतां रक्षासु दीक्षाऽस्ति चेत्
किं ज्योतिर्न तिरस्कृतं भवति ते वात्सल्यसीमाम्बुधेः ? ॥

१०. मरैयायनाल्वेदत्तुळ्निन्र—

गूढं वेदचतुष्टयेऽतिगहने ज्योतिः परं त्वं हरे !
पर्यायेण जगत्त्वमेव सकलं सृष्ट्वा स्वयं भक्षयन् ।
उद्गीर्यापि पुनः पदक्रमत एवोन्मातुमासीः प्रभुः !
किं चित्रं यदि सेव्यसे त्वमनिशं रुद्रेन्द्रधात्रादिभिः ॥

११. विरुप्पायवियप्पिल्ला—

चित्राणामपि चित्रमेव विशदज्ञानैकवेद्यं हरिं
नत्वा श्रीकुरुकापुरे शठरिपुस्तुष्टाव जिष्णवाश्रये ।
साहस्रे दशकं तदेतदपि चोद्घुष्टं समुद्रावृते
चास्मिन् भूमितले समुद्धतिकरं बाभाति जन्मापहम् ॥

अथ तृतीयशतके

२. द्वितीयदशकम् (मुन्नीर् ज्ञालम् पडैत्त)

(तादृशानुभवायाशक्ते शठारौ स्वकरणसङ्कोचात् व्यामुग्धे सति सर्वेश्वरश्श्रीवनगिरौ सर्वसुलभोऽयं तवानुभाव्य इति समाधत्ते इति प्रतिपादयति ।)

१. मुन्नीर् ज्ञालम् पडैत्त—

लोकं च त्रिविधाम्बुसंश्रयमिमं सृष्ट्वोपकर्ताऽसि नः
कारुण्याच्च पयोदवर्ण ! यदहं त्वद्दत्तकायानुगः ।
सन्तप्तोऽस्मि ! महार्तिपापसरणिं हत्वा समूलामिमां
त्वां सम्प्राप्य कदा भवामि भगवन् ! धन्यो न वेद्मि स्वयम् ॥

२. वन्मा वैयमळन्द—

मातुं त्वं पृथिवीं विशालकठिनां पादाब्जतो वामन-
श्श्रीशाभूः किल ! मायया तव हरे ! नानाविधाज्जन्मतः ।
क्लिन्नोऽहं बत ! दुर्निवारदुरितक्लेशानुबन्धावळी-
मूलच्छेदकरः कदा तव महत्पादाम्बुजं संश्रये ॥

३. कोल्लामाक्कोल्—

नेतुं वाजिगणं हि वेत्रभृदभूस्त्वं शस्त्रहीनोऽवधी-
र्दुष्टान् भारतसङ्गरे ! मम विभो ! त्वं सर्वसेनान्तकः ।
भूम्यामत्र न नंश्यति स्वयमयं दुर्देहबन्धो मम
स्वामिन् ! मे वद साधनं तव महासङ्गाय संरक्षितुः ॥

४. ञ्ञूळ्च्चिनानच्चुडरोलियाकि—

ज्ञानौज्ज्वल्यमहानिधे ! मम विभो ! सर्वत्र च व्याप्तित-
स्सम्पूर्णोऽसि सदाऽपि चाद्य दयया स्थित्वा मदग्रे वद ।
धन्योऽहन्तु कथं भवेयमनघस्सन्त्यक्तभावान्तर-
स्त्वत्पादाम्बुजयुग्ममात्रशरणश्श्रीमन् ! मुरारे ! हरे ॥

५. वन्दायॆ्पोलेवन्दुम्—

प्रादुर्भाववशात्समागतममुं चेतो न मे त्वां भजेत् !
त्वत्प्राप्तिर्यदि दुर्लभाऽस्ति सततं चैवं मम श्रीपते ।
कुत्राहन्तु कदाऽऽश्रयेयमतसीगुच्छाळिसच्छायमे-
वैनं त्वां मम नाथमच्युतमहो ! भाग्यं किमीदृङ्मम ॥

६. किर्पन् किल्लेनेनिलन्—

कृत्याकृत्यविवेकशून्यहृदयश्चासं पुरा सर्वदा
नानादुर्विषयप्रवर्तितमना दूरं गतोऽहं तव ।
सङ्ख्यातीतमनेकजन्तुनिवहं सङ्कल्पमात्राद्भवा-
नुत्पाद्यास्ति परः ! कदा बत ! भजे दिव्यं त्वदङ्घ्रिद्वयम् ॥

७. एव्वाम्नानामिलन्द्रिरुन्दु—

हे ! चित्त ! त्वदधीन एव सततं मोहाब्धिमग्नोऽस्म्यहं
दुःखी पापरतो भवाम्बुधिगतः किं मन्दभाग्यस्य मे ।
किञ्चित्साधनमस्ति तस्य परमज्योतिर्मयस्याश्रये
श्रीकृष्णस्य समस्तवस्तुनिवहव्याप्तिप्रतिष्ठाभृतः ॥

८. मेवुतुन्बविनैकळै—

नानादुःखकराघराशिसरणिध्वंसाय यत्नो न मे !
त्वत्पादाम्बुजसन्नतिश्च सततं नैवास्ति मे श्रीपते ।
सौशील्यादिनिधे ! ममापि च विभो ! श्रीकृष्ण ! तेजोनिधे!
पश्येयं तव दिव्यरूपमिति च क्रन्दामि ! कुत्राश्रये ।।

९. कूविक्कूवि—

घोराघाब्धिनिमग्न एव सुचिरं प्रभ्रष्टमार्गस्स्वयं
भ्रान्तोऽहं किल मन्दभाग्य इह हि ! त्वां नाश्रितोऽहं तदा ।
गोपालं जगतां च मानविधये त्रैविक्रमप्रक्रमम् !
क्रन्दन्नेवमनाथवद्भुवि कदा त्वत्सन्निधिं प्राप्नुयाम् ॥

१०. तलैप्पेयूकालम्—

काले चान्तकदूतपाशविततेस्तद्दुःखशान्त्यै स्वयं
वेदैर्वेद्यमुदारमत्र सुलभं त्वां कृष्णमस्म्याश्रितः ।
मच्चित्तं समभूत्स्थिरं किल ! तदा त्वात्माच मे नित्यतां
सम्प्राप्यैव कृतित्वमुत्तममगादित्येव मे निर्णयः ॥

११. उयिर्कळेल्लावुलकमुम्—

लोकानामपि चात्मनामधिपतिं श्रीशं हरिं कोकिलै-
राक्रान्ते कुरुकापुरे तरुगणैश्चेतोहरे संवसन् ।
स्तोतुं चाह सहस्रसूक्तिसरणिं गेयां शठारिर्मुनि-
स्तत्रेदं दशकं तनोति जगतां मुक्तिं वपुः पाशतः ॥

अथ तृतीयशतके

३. तृतीयदशकम् (ओळिविल्कालमेल्लाम्)

(श्रीवेङ्कटेश्वरचरण सन्निधौ सकलविधकैङ्कर्यं प्रार्थन मत्र क्रियते ।)

१. ओळिविल्कालमेल्लाम्—

सर्वत्र चाखिलदशास्वपि सर्वदाऽपि
प्राप्यात्र किङ्करदशां वयमाश्रयामः ।
गम्भीरनादगिरिनिर्झरवेङ्कटाद्रि-
ज्योतिः परं मम पितुश्च पितामहाख्यम् ॥

२. एन्दै तन्दै तन्दै—

मूलं पितुर्मम पितुश्च पितामहस्य
श्रीशः प्रभुर्लसति नीलपयोदमूर्तिः ।
कल्याणसद्गुणगणाम्बुनिधिस्समस्तै-
र्देवैस्स सूरितिलकैः कृतपुष्पवृष्टिः ॥

३. अण्णल्मायन्—

नाथः किलाद्भुतविचित्रचरित्र एष-
श्रीपुण्डरीकनयनोऽसितरत्नकान्तिः ।
बिम्बाधरोऽत्र विमलाम्भसि वेङ्कटाद्रौ
देवाधिदेव इह भात्यमितप्रभावः ॥

४. ईशन् वानवर्क्कु—

देवाधिदेव इति चेदहमद्य वच्मि
श्रीशस्य किं तदुचितं महिमातिसीम्नः ।
तेजोनिधेर्मयि च वेङ्कटनायकस्य
प्रेम्णाऽतिमोहितमतेरतिनीचवृत्ते ? ॥

५. श्रोदियाकि—

ज्योतिर्मयं सकललोकसमाश्रितं चा-
प्यादिं च सर्वजगतां यदि वच्मि मूर्तिम् ।
वेदान्तसारममृतं किमहं स्तवीमि
श्रीवेङ्कटेशमनघं शुभसद्गुणाब्धिम् ॥

६. वेङ्कडङ्गळ्—

श्रीवेङ्कटाद्रिपतये नम इत्यपीदं
मन्त्रं च जप्यमिह बिभ्रति ये महान्तः ।
तेषा मृणानि सकलानि हतानि हि स्युः !
पापानि चेति किल ! तेऽत्र विशुद्धवृत्ताः ॥

७. शुमन्दुमामलर्—

सन्धार्य दिव्यकुसुमानि जलं च दीपं
धूपं च भक्तिभरितास्तु भजन्ति देवाः ।
सूरीन्द्रवर्यसहिता इह ! वेङ्कटाद्रि-
स्सोऽयं ददाति किल नः परमं च साम्यम् ॥

८. कुन्रमेन्दिक्कुळिर् मळै—

उद्धृत्य चाद्रिमपि रक्षति शीतवर्षा-
द्विक्रान्तसर्वभुवनस्स्म परात्परोऽसौ ।
स्वामी विचित्य तमिमं किल वेङ्कटाद्रिं
प्राप्तोऽयमेव गिरिरस्मदघप्रहन्ता ॥

९. ओयुमूप्पु—

नश्यन्ति वार्धकजराजननं मृतिश्च
श्रीशस्य वेङ्कटपतेश्चरणारविन्दम् ।
संसारतापहरणस्य वहन्ति वाचा
चित्तेन चापि किल ये जगतीह तेषाम् ॥

१०. वैत्तमाळूवरै—

कलसेषु हन्त ! दिवसेष्ववसानकाले
सर्वेन्द्रियप्रळयतश्च पुरा भजध्वम् ।
श्रीशेषशायिवरवेङ्कटसानुदेशं
रम्यैर्विशालमिह वृक्षगणैः प्रसूनैः ॥

११. ताळूपरप्पि—

विस्तीर्य पादतलमप्यवनीं प्रमातु-
श्श्रीवेङ्कटाचलपतेश्शठकोपनाम्ना ।
स्तोत्रा कृते विदुरिदं दशकं सहस्रे
ये ते तु यान्ति पदवीं भुवनप्रशस्ताम् ॥

अथ तृतीयशतके

४. चतुर्थदशकम् (पुकलुनल्लोरुवनेन्गो)

(तादृशकैङ्कर्यकरणायाऽशक्तश्शठारिरत्र वाचिककैङ्कर्यमेक
करोति ।)

१. पुकलुनल्लोरुवनेन्गो—

स्तव्योऽयं परमोऽद्वितीय इति किं वच्मि ? स्वयं धारिणी
सेयं निस्समवैभवेति किमहो ? वारान्निधिश्शीतलः ।;
किं वाऽयं दहनोऽनिलः ? किमु नभस्सर्वत्रगं ? किं दिवि
ज्योतिर्द्वन्द्वमुताखिलं च तदिदं किं वेति कृष्णं ब्रुवे ? ॥

२. कवुमारियमाट्टेन्—

स्तोतुं नैव हि शक्नुयां मम विभुं कृष्णं सरोजाम्बकं !
किं वाऽमी गिरयः ? किमेतदखिलं वर्षं च सञ्जीवनम् ।
भास्वत्तारकमालिका किमथवा वेद्याः कलाश्चाखिलाः ;
किं ज्ञानाश्रयवाच्यराशिरथवा नैवास्मि वक्तुं प्रभुः ॥

३. पञ्चयक्कण्णनेन्गो—

किं वाऽयं वरपुण्डरीकनयनः? किं वा प्रवाळाधरः ?
किं वा रम्यलसत्पदाम्बुजयुगः ? किं नीलवर्णोऽच्युतः? ।
किं वाऽत्युज्ज्वलदिव्यमौळिरुरसि श्रीवत्सचिह्नाङ्कितः ?
किं माणिक्यमिदं वदामि विमलं श्रीशङ्खचक्रोज्ज्वलम् ॥

४. शादिमाणिक्कमेन्गौ—

किं माणिक्यमहो ! वदामि ? किमहो ! भास्वत्सुवर्णं च तं?
मुक्ताराशिमुत ब्रवीमि ? विमलं वज्रं ? प्रदीपं शुभम् ?
आद्यं ज्योतिरुदाहरामि पुरुषं किं वा पुराणं परं ?
मन्नाथं हरिमच्युतं तममलं संहारकालस्थितम् ॥

५. अच्चुतनमलनेन्गो—

किं वाऽयं त्वमलोऽच्युतश्श्रितजनक्लेशापहः किं हरिः ?
किं विश्वस्तमहौषधं ? किमु सुधावाराशिसारामृतम् ? ।
किं वा तं मधुरं ब्रुवे रसघनं ? किं षड्रसं वोदनं
किं वेदं मधु साज्यमेव ? किमहो ! पक्वं फलं वा पयः ॥

६. पालेन्गोनान्गुवेदप्पयनेन्गो—

शाखारूपमिदं चतुश्श्रुतिफलं किं नीतिसूत्रात्मकं ?
किं सङ्गीतमिदं मनोरममुत श्रेष्ठं च सर्वेष्वपि ।
सर्वातीतमिदं फलं किमसमं ? कृष्णं ब्रुवेऽहं पतिं
मायाचेष्टितमादिपूरुषमिमं देवाधिदेवं हरिम् ॥

७. वानवरादियेन्गो—

देवानामपि मूलमेव किमिमं तेषां च पूज्यं ब्रुवे
किं तेषामपि भोगमेव च फलं ! तेषां च किं रक्षणम् ।
किंवैश्वर्यमनश्वरं च कलये ! किं स्वर्गलोकं स्थिरं ।
नित्यासङ्कुचितं च मोक्षमथवा माणिक्यवर्णं ब्रुवे ॥

८- ओळिमणिवण्णनेन्गो—

लोकानामपि रक्षणाच्च मुदितं सृष्टैश्च तैस्संस्तुतं
कृष्णं मे प्रभुमेव मायिनमिमं दिव्यं हरिं स्रग्विणम् ।
किं वाऽहं मणिवर्णमुज्ज्वलमहो वच्मि स्वयं स्तव्यमे-
वाहोस्विज्जटिनं हिमांशुशिरसं ! किं वा विरिञ्चं ब्रुवे ॥

९. कण्णनैमायनूतन्नै—

सर्वाचेतनचेतनात्मकमिमं कृष्णन्तु मायामयं
हृत्वाऽम्भोनिधिमन्थनादमृतमेवास्मद्विभुं चाच्युतम् ।
स्तुत्वाऽनन्तमनन्तशायिनमहं लोकान् गिळन्तं पुन-
र्वात्सल्यादपि चोद्गिरन्तमधुना मातुं न वै शक्नुयाम् ॥

१०. यावैयुम् यवरुम् तानाय्—

सर्वाचेतनचेतनात्मकतयाऽप्यस्पृष्ट एव स्वयं
तत्तद्दोषगणैस्तदिन्द्रियगणातीतश्च मूर्तिमतेः ।
देहे जीव इव स्वयन्तु विमलस्सत्यं च नित्यं हरि-
स्तत्सम्भावितमेव चेत्तु तदिदं चास्त्येव सम्भावितम् ॥

११. कूडिवण्डरैयुम्—

भृङ्गोपेतसुमस्रजं हरिमिमं नीलाब्दवर्णं स्तुवन्
साहस्रं कुरुकेश्वरश्शठरिपुर्भव्यं त्वकार्षीच्छुभम् ।
तत्रेदं दशकं पठन्ति भुवि ये ते नित्यसूरिप्रियाः
नित्यं स्युः परमे पदे भगवतो नित्यानुभूत्या स्वयम् ॥

———

अथ तृतीयशतके

५. पञ्चमदशकम् (मोय्माम्पूम्पोळिल्)

(अत्र भगवत्कैङ्कर्यनिरतानां प्रशंसनं, तदितरेषां निन्दनं च क्रियते ।)

१. मोय्माप्पूम्पोळिल्—

रम्याम्भोजतटाकमध्यकलितं नक्रावृतं हस्तिनं
त्रातुः कालपयोदवर्णसरुचेः कृष्णस्य नाथस्य नः ।
स्तोत्रं नैव चरन्ति ये न च मुदा नृत्यन्ति ये सम्भ्रमात्
किं तेषां बत ! जीवितात् ? किमु फलं ब्रूताद्य भौमा नराः ॥

२. तण्कडल्वट्टत्तुळ्ळारै—

वाराश्यावृतभूतलस्थमनुजप्राणान्तकांश्चासुरान्
पापिष्ठान् बलवीर्यशौर्यभरितान् हन्तुं कृताविर्भवम् ।
श्रीकान्तं भुवि दिव्यगीतपठनैर्ये न स्तुवन्ति स्वयं
चोत्प्लुत्यापि चरन्ति नैव किल ते पापाः पतन्त्यप्यधः ॥

३. मलैयैयेडुत्तु—

गोसङ्घान् परिरक्षितुं गिरिधरं नाथं शिलावर्षतः
स्तावंस्तावमनारतं भुवि शिरो विन्यस्य चोर्ध्वाङ्घ्रयः ।
सम्भ्रान्ता न भवन्ति ये बत ! महाघोरार्तिकृन्नारके
ते सत्यं हि पतन्ति हन्त ! सततं क्लेशाकुलास्स्युः खलाः ॥

४. वन्मविळ्कोदैपोरुट्टा—

नीळादेव्यनुभूतये भुवि महासप्तर्षभध्वंसिनं
स्तुत्वा शीलगुणान्वितं मुरहरं बिम्बाधरं श्रीधरम् ।
नृत्यन्त्येव न चाक्रमाद्भुवि विपर्यस्तस्वमस्तास्तु ये
तेषां सम्भवतः फलं किमु भवेत्सन्मण्डले भूतले ? ॥

५. शाद्रुशनन्तैनलियुम् कञ्जनैच्चाशिप्पदर्क्कुं—

साधूनामपि चार्तिसन्ततिकरं कंसं निहन्तुं परं
ज्योतिश्चाद्यमुदारमाविरभवत्तत्रैव चात्रापि यत् ।
वेदानामपि चादिकारणमिदं तत्त्वं स्तुवन्तस्सदा
ये वीथीषु चरन्ति नैव किमु ते प्राज्ञाग्रतो ज्ञापकाः ॥

६. मनिशरुम् मत्तुम् मुत्तुमाय्—

मानुष्यात्सुरतिर्यगादिवपुषा मायातनुं निस्समं
ज्ञातं चाप्यजमुत्तमाम्बुधिशयं नाथं च रुच्यं फलम् ।
माधुर्येक्षुरसं घनं मधुसुधासारं हरिं निर्मदा-
स्स्तुत्वा सम्भ्रमनृत्त सक्तहृदयाः प्राज्ञास्सुशीलान्विताः ॥

७. नीमैयिल्नूत्तुववीय—

दुश्शीलात्मशतान्तकं च कृपया पञ्चात्मनां पालकं
बन्धुं सर्वचमूविनाशमसमं ज्योतिः परं श्रीधरम् ।
स्मृत्वा नृत्तरतास्सबाष्पनयना नैवार्द्रचित्ताश्च ये
मेदोवृद्धिकरैस्सदोदरभरैः किं स्यात्फलं तैस्सताम् ॥

८. वापुंनलम् तण्णरुवि—

रम्याद्रौचरवेङ्कटाचलपतिं नाम्नां सहस्रैस्स्वयं
स्तुत्वा चाक्रमतश्चरन्ति नगरे ये कानने वा जनाः ।
उन्मत्ता इव नृत्तसक्तहृदया लोकैः परीहास्यतां
प्राप्तास्ते हि भवन्ति दिव्यनिलयैस्सेव्यास्स्वयं सूरिभिः ॥

९. अमरतौळप्पड्डुवानै—

दिव्यैस्सूरिवरैश्च सेव्यमखिलभ्राजज्जगन्नायकं
योगध्यानपरा विधाय हृदये ये सन्ति सायुज्यगाः ।
तानेतांस्तु विना समस्तजगतां कर्तव्यमेवानिशं
श्रीशप्राप्तिकृते हि नर्तनमिहोत्प्लुत्याप्यहो ! धावनम् ॥

१०. कल्मसुम् कल्मपलनुम्—

कर्मण्येव च सर्वकर्मफलमप्येषोऽयमाद्यं स्वयं
सर्वेषामपि कारणं च विलसन्माणिक्यवर्णो हरिः ।
पद्माक्षं हृदि देवदेवमिममेवाराध्यं नृत्तादिभि-
र्निर्लज्जा विहरन्तु भक्तिभरिताश्शंसन्तु तं चाक्रमात् ॥

११. तीर्न्दुवडियवर्तम्मै—

दास्ये भक्तगणान्नियोज्य सकलैः पूर्णं गुणैरच्युतं
देवानामधिदेवमीश्वरमयं श्रीशं शठारिर्मुनिः ।
अस्तावीत्कुरुकापुरस्य विलसत्सस्यावृतस्य प्रभु-
स्साहस्रे दशकं तदेतदखिलं हन्यान्महापातकम् ॥

———०———

अथ तृतीयशतके

६. षष्ठदशकम् (शेय्यतामरैक्कण्णनाय्)

[परव्यूह विभवान्तर्याम्यवतारापेक्षया अर्चावतारस्य सौलभ्यमुच्यते ।]

१. शेय्यतामरैक्कण्णनाय्—

पद्माक्षः परमं महः किल हरिस्सप्तापि लोकानयं
भुञ्जानः परमोऽद्वितीयविभवो मूर्तित्रयं च स्वयम् ।
रोदस्यौ मनुजास्सुरास्तदितरे चान्येऽपि चान्येऽपि चा-
प्यन्ये चेति समस्तकारणममूज्ज्ञानं जगत्सर्गकृत् ॥

२. मूवरागियमूर्तियै—

यो मूर्तित्रयरूप एव परमं मूलं त्रयस्यापि त-
च्छापघ्नश्च महोदधौ च शयितो देवाधिदेवोऽच्युतः ।
लङ्काध्वंसकरं तमेव शरणं कोदण्डपाणिं हरिं
पद्माक्षं कलुषापहं भजत भो लोकास्सतवैर्भक्तितः ॥

३. परविन्नानवरेत्तनिन्न—

देवैस्स्तव्यमहागुणं च परमं ज्योतिः परं तं हरिं
रासक्रीडितमच्युतं मणिनिभं कुम्भादिलीलाधरम् ।
कृष्णं शेषशयं प्रभुं च जगतीरक्षार्थनिद्राधरम्
स्तोतुं यूयमहर्निशं च सततं सक्तास्स्थ चित्ते निजे ॥

४. वैम्मिन्नुम्मनत्तेन्नु—

युष्माकं मनसि स्वयं कुरुत तन्माहात्म्यमन्यादृशं
मायाचेष्टितभास्वरस्य तु हरेरित्येव किं मादृशैः ।
वक्तव्यं भवतीदमस्तु तदिदं ! ब्रह्मेन्द्ररुद्रादयो
देवाश्च प्रणताः पदाब्जयुगळे शंसन्ति चैनं सदा ॥

५. तिरियुम्कात्तोडु—

आविर्भाव इहाच्युतस्य तु विभोः कृष्णस्य नीलाम्बुद-
श्यामस्याम्बुजलोचनस्य दिविषत्सेव्यः किरीटोज्ज्वलः ।
वाय्वाकाशधरार्णवाग्निरविचन्द्राद्याश्च देवास्स्वयं
भौमा मानुषतिर्यगादिजडवस्त्वाद्यं च सर्वं भवेत् ॥

६. तोत्तक्केडवैयिल्लवन्—

आविर्भूय च जन्मनाशरहितो भात्यद्वितीयो हरि-
मूर्तिश्श्रीनृहरिः क्रुधाकुलमतिर्भक्ताश्रिताङ्घ्रिद्वयः ।
वात्सल्यादनुरक्तलोचनमिमं सूरीन्द्रसेव्यं भजे !
नान्यं जातु हि गन्धरूपरसवाक्स्पर्शात्मकं तं विना ॥

७. एलुमैक्कुमेनदाविक्कुम्—

माधुर्यामृतमात्मनो मम सदा भास्वान् मया सङ्गतो
ज्योतिश्श्रीमणिवर्ण एष सततं कुम्भादिलीलापरः ।
भोज्यं सूरिवरैश्च मौनिनिवहैर्दिव्यं फलं श्रीधरं
यूयं संश्रयताद्य शुद्धमनसस्सर्वाघशान्तिर्भवेत् ॥

८. तुयरमे तरुतुन्बविन्बविनैकळाय्—

सर्वेषां सुखदुःखकारणमहाकर्मावळीशासिता
तत्संस्पर्शविवर्जितश्च परमो ज्योतिः परं शाश्वतम् ।
भुङ्क्ते चोद्गिरति स्वयं यमभटध्वंसी च लोकान् हरि-
श्श्रीशं दाशरथिं विनाच्युतमिमं नान्यं शरण्यं भजे ॥

९. तञ्ञमाकिय तन्दैतायोडु—

माता चापि पिता स्वयं हितपरस्त्वन्योऽपि बन्ध्वात्मक-
स्सूरीणामपि चाग्रणीस्त्रिविधमूर्त्यादिश्च यश्श्रीधरः ।
तं तादृक् स्वयमीदृगित्यपि भिया मा संशयं मानवा
लोकेऽस्मिन् कुरुत ! स्मृतस्तु भगवान् गम्भीर एवाब्धिवत् ॥

१०. कडल्वण्णन् कण्णन् विण्णवर्करुमाणिक्कम्—

सूरीणां मणिरत्नमुत्तमगुणं श्रीशेषशायी परं
ज्योतिश्चापि गुणाम्बुधिर्मम हरिः कृष्णोऽस्ति वै धारकः ।
पूर्वं यश्शतवीरसैन्यमखिलं हन्तुं स्वयं रक्षितुं
पश्चाजौ निरतोऽस्य सारथिविभोः पश्यानि पादौ कदा ?

११. कण्कळ्काण्डर्क्करियनाय्—

अक्षिद्वन्द्वपरोक्षमेव मनसस्साक्षात्पदं शीलतः
पृथ्व्यां प्राणिततेः कृपाजलनिधिं सूरीन्द्रनाथं हरिम् ।
स्तोतुं श्रीकुरुकेश्वरश्शठरिपुस्साहस्रमेवाकरो-
त्तत्रेदं दशकं तनोति परमां भक्तिं ! जनैः पठ्यताम् ॥

———०———

अथ तृतीयशतके

७. सप्तमदशकम् (पयिलुम् शुडरोळि)

(भगवत्कैङ्कर्यनिरता भागवता अस्माकं स्वामिन इति भागवतशेषत्वमुच्यते ।)

१. पयिलुम् शुडरोळि—

ज्योतिस्तत्परमं सरोजनयनं क्षीराम्बुधौ शायिनं
भक्तार्थं हरिमच्युतं श्रितवतां भाग्यं हि भोग्यं परम् ।
ये केचिच्च भजन्ति ते हि सततं सेव्या भवन्त्येव नः
प्राप्यास्सर्वजनिष्वपीह परमास्ते सन्ति नश्शेषिणः ॥

२. आलुम् परमनैक्कण्णनै—

सेव्यत्वे परमं च सर्वसुलभं कृष्णं च चक्रान्वितं
विष्णुं दिव्यचतुर्भुजं मणिनिभं नाथं च नश्श्रीधरम् ।
सेवन्ते भुवि ये कृताञ्जलिपुटास्साष्टाङ्गमेते सदा
ऽप्यस्माकं प्रतिजन्म सेव्यविभवा नाथा हरेस्सुप्रियाः ॥

३. नादनैञालमुम् वानमुमेत्तुम्—

नाथं भौमगणैश्च सूरिनिवहैस्स्तव्यं तुलस्याऽञ्चितं
दीव्यद्दिव्यसुदर्शनं मम विभुं पादावनम्रास्तु ये ।
सेवन्ते सततं च ते हि परमाश्शास्त्रोक्तरीत्या स्वयं
पूज्यास्सर्वजनिष्वपि प्रियतमा अस्माकमार्यास्सदा ॥

४. उडैयार्न्दवाडैयन्—

श्रीनारायणमुत्तरीयवसनं भूषान्वितं कण्ठिका-
काञ्चीदामसुवर्णमौळिविलसद्यज्ञोपवीताञ्चितम् ।
सेवन्ते सततं च ये भुवि हरिं भक्ताश्च तेषां सदा
ऽप्यस्माकं परमाश्च सर्वजनिषु प्राप्याश्च सेव्यास्स्वयम् ॥

५. पेरुमक्कळुळ्ळवर् तम्मै पेरुमानै—

नाथं सूरिवराधिपं सुरगणान् पूर्णामृतप्राशना-
द्रक्षित्वाऽप्युपकारिणं बहुतमां शंसन्ति ये त्वक्रमात् ।
तेषां स्तोत्रपरायणाः किल भवन्त्यस्माकमार्या भुवि
प्राज्ञास्सेव्यतमास्तथा दिवि च ते ह्युज्जीवयन्त्येव नः ॥

६. अळिक्कुम् परमनैक्कण्णनै—

दातारं परमं हरिं यदुपतिं कृष्णं च चक्राञ्चितं
सौगन्ध्यार्द्रसुमस्रजं मणिनिभं नाथं च मे श्रीधरम् ।
ज्योतिस्तत्परमुज्ज्वलं हृदि तु ये कुर्वन्ति नित्यं च ते
सत्यं नः परिपालयन्ति सततं चाजन्मजन्मान्तरम् ॥

७. शन्मशन्मान्तरम् कात्तडियारकळै—

नानाजन्मसु भक्तवर्गसरणिं नीत्वा च साक्षात्कृतिं
दत्वा स्वाङ्घ्रिसरोजयुग्मपदवीसेवां च कृत्वा स्वयम् ।
रक्षन्तं प्रभुमच्युतं स्तुतिपराश्शंसन्ति ये तत्स्तुतिं
कुर्वन्तः किल नश्चिरं प्रभुवरा विश्वासपात्रं परम् ॥

८. नम्बनैञालम् पडैत्तवनै—

पूर्णं चाखिलविश्वसृष्टिनिरतं श्रीवत्सवक्षस्स्थलं
देवानामपि दुर्गमं मतिमतां शंसन्ति चेन्नारके ।
ये केचित्किल तेऽपि जन्मसरणिष्वस्माकमीशास्स्वयं
सेव्या एव हि सत्यमेतदिति मे दिव्यं मतं पावनम् ॥

९. कुलम् ताङ्गु शातिकळ् नालिलुम्—

चातुर्वर्ण्यकुलापकृष्टचरिताश्चण्डालचण्डालका-
श्चापि श्रीहरिमच्युतं मणिनिभं चक्रान्वितं संश्रिताः ।
कैङ्कर्येषु रताश्च ये भुवि जनास्तेषां च दासात्मनां
दासास्स्युः परमाश्च शेषिविभवा अस्माकमार्यास्सदा ॥

१०. अडियान्दैवैयमुण्डु—

पादाक्रान्तजगत्ततिं च सकलां भुक्त्वा स्वयं तद्वशा-
द्बालं तं वटपत्रशायिनमपि श्रीशं हरिं निस्समम् ।
अस्माकं प्रभुमाश्रिता भुवि च ये तद्दासदासानुगा-
स्तद्दासाश्च तदीयदास्यनिरता नित्यं च नाथा हि नः ॥

११. अडियोङ्गनूत्तुवर्वीय—

दृप्यद्दुष्टशतं विनाश्य च तदा पञ्चाश्रितानां दया-
सिन्धुं बन्धुमुदारसद्गुणनिधिं स्तोतुं शठारिर्हरिम् ।
चक्रे श्रीकुरुकेश्वरः कृतिततिं साहस्रपद्यावळिं !
तत्रेदं दशकं तदीयपरमभ्यस्याश्रिता मोक्षगाः ॥



अथ तृतीयशतके

८. अष्टमदशकम् [मुडियाने]

(भगवद्गुणानुभव एकैकमपीन्द्रियं सर्वेन्द्रियकृत्यानि क-
र्तुमिच्छतीति प्रतिपाद्यते ।)

१. मुडियाने—

श्रीदिव्यमौळिधर ! सेव्य जगत्त्रयस्य !
स्तव्याङ्घ्रिपङ्कज ! पयोनिधिमन्थनोऽसि ।
तार्क्ष्यध्वजासितपयोधरवर्ण चित्तं
सूरीन्द्रनाथ ! परमेति ममास्ति मुग्धम् ॥

२. नेञ्जमे नीळ् नगराक—

जिह्वा हि वक्ति मम सन्ततमन्तरङ्ग-
वासिन् ! पुरे मम शरण्य दयापरेति ।
लङ्केश्वरप्रमथनेति जगत्त्रयस्यां-
प्याक्रान्तिकृत्यचण ! वञ्चक वामनेति ॥

३. वाय्कमेयेत्त—

जिह्वाप्रचोदक ! दयापर ! सूरिसेव्य !
नव्येन्दुभास्वर ! हरे नवनीतचोर ।
गोपेश्वरेति सततं च तवैव विष्णो!
मत्पाणियुग्ममिह मार्गणकृत्यसक्तम् ॥

४. कैकळालारत्तोळुदु—

पाणिद्वयेन सततं तव पादसेवां
कृत्वा क्षणादपि वियोगसहं न भाति ।
त्वामेव शेषशयनानिशमीक्षितुं मे
नेत्रद्वयं परम काङ्क्षत एव सत्यम् ॥

५. कण्कळाल्काणवरुङ्गोल्—

द्रष्टुं च लोचनयुगेन किमस्ति शक्ति-
रित्येव वामनमिहावनियाचकं त्वाम् ।
आरोह्य हृष्टविनतासुतपक्षघोषं
श्रोत्रद्वयं मम सदाऽपि च काङ्क्षते हि ॥

६. शेविकळालार निन् कीर्तिक्कनियेन्नुम्—

श्रोत्रेन्द्रियेण तव कीर्तिफलं सुपक्वं
दिव्यामृतं कविवरार्जितमेव भोक्तुम् ।
त्वामेव दिव्यकनकोज्ज्वलचक्रपाणिम्
पृथ्व्यां समाश्रयत एव सदा ममात्मा ॥

७. आवियै आरमुदे—

मत्प्राणभूत परिपूर्णरसामृत त्व-
त्सौन्दर्यमेव गरुडध्वज चक्रपाणे ।
पापी स्वमानसमनोरथवाक्यघोषै-
रुद्घोषयन्नपि न दृष्टिवशं भजेऽत्र ॥

८. कोलसे तासरैक्कण्णदोरञ्जननीलमे—

सौन्दर्यविग्रह ! सरोरुहनेत्रयुग्म !
नीलाञ्जनाभ ! मम धारकशीलमूर्ते !
भूतं भविष्यमपि चाद्यतनं भवन्तं
पश्यामि कुत्र च कदेति विचिन्तयामि ॥

९. कोळवन् नान् मावलि मूवडिता—

याचे पदत्रयतलं हि महाबले त्वं
देहीति वञ्चक ! वटो खलकंसनाशिन् ।
बाणासुरस्य दृढबाहुसहस्रभेदिन् !
प्राप्स्ये कदा गरुडवाहन ! माधव त्वाम् ॥

१०. पोरुन्दियमामरुदिनिडैपोय—

संवृद्धपीनयमळार्जुनभञ्जक ! त्वं
नाथोऽसि मे! पदयुगं ननु ते दिदृक्षुः ।
खिन्नोऽहमच्युत ! तव स्तुतिमालिकान्तु
प्राप्योत्सुकोऽस्मि समयं च कियन्तमेवम् ॥

११. पुलम्बुशीर्पूमियलन्दपेरुमानै—

स्तव्यं त्रिविक्रममुदारगुणं महात्मा
स्तोतुं मुनिस्तु कुरुकाधिपतिश्शठारिः ।
साहस्रमाह परमं दशकं तदेत-
द्धन्याः पठन्ति यदि यान्ति परं पदं तत् ॥

अथ तृतीयशतके

९. नवमदशकम् (शोन्नाल् विरोदमिदु)

(अत्र श्रीशठारिर्लौकिकान् प्रत्युपदिशति इतरस्तोत्रवैफल्यं श्रीपतिस्तोत्रसाफल्यञ्च विस्तरेण ।)

१. शोन्नाल् विरोदमिदु—

उक्तं चेत्तदिदं विरुद्धमिह वस्सत्यं तथाप्युच्यते
यूयं संशृणुताद्य! भृङ्गविहृतेर्झङ्कारशब्दान्विते ।
शेषाद्रौ मम लालनीयविषयस्स्वामी मम स्तव्यतां
प्राप्याऽऽस्ते ! रसनाभिरामकवितां दद्यां न मेऽन्येष्वहम् ॥

२. उळनाकवेयेण्णिच्चन्वैयोन्राक—

किं वा स्यात्फलमत्र मानुषततेः स्तोत्रेण या भूतले
सत्तां स्वामभिनन्द्य फल्गुधनमप्यास्ते च मत्ता वृथा ।
तीर्थैस्सस्यसमृद्धिभिः परिवृते रम्ये कुरुङ्गापुरे
भास्वन्तं कुलनायकं मम विभुं सर्वेश्वरं तं विना ॥

३. ओलिवोनिल्लादपल्लुलिदोरुलि—

नित्यं सन्ततकिङ्करत्वविभवं भोग्यं परं पावनं
भक्तेभ्यो वितरन्तमच्युतममुं सूरीन्द्रनाथं विना ।
अन्यत्र स्वयमद्य यूयमहह ! ! श्लाघ्याः कवीन्द्रा अपि
भ्रान्ताः क्षुद्रनरस्तुतौ हि निरताः किं स्यात्फलं वस्ततः ? ॥

४. एन्नावदेत्तनैनाळैक्कुप्पोदुम्—

प्राज्ञाः ! किं फलमद्य हे ! कविवरास्स्तुत्वा नरानस्थिरान्
प्राप्यं वः ? किमिदं चिराय भवतां भोग्यं भवेदल्पकम् ।
भास्वद्रत्नकिरीटमच्युतममुं सूरीन्द्रनाथं हरिं
स्तुत्वा स्याद्भवतामनन्यसुलभं मुक्तेः पदं शाश्वतम् ॥

५. कोल्लुम् पयनिल्लै—

प्राप्यं नैव हि किञ्चिदस्ति भवतां प्राज्ञाः कवीन्द्रा वृथा
स्तुत्वा क्षुद्रधनाश्रयानिह नरान् मिथ्याऽप्युदारानिव ।
स्तव्यं पूर्णगुणं त्वभीष्टवरदं निर्दोषमेवाच्युतं
नित्यौदार्यनिधिं हरिं मणिनिभं स्तोतुं समागच्छत ॥

६. वम्मिन् पुलवीर् नुम्मेय्वरुत्ति—

आयातार्याः कवीन्द्राः करकृतिततिभिर्देहयात्रां कुरुध्वं ।
लोकेऽस्मिन्नद्य नैव प्रभुवरधनिकास्सन्ति दृष्टं तदेतत् ।
युष्माकं सत्कवित्वं त्वभिमतविषये देवबृन्दे प्रयुक्तं
सर्वं स्तोत्रं भवेन्मे मणिमकुटभृतश्श्रीपतेरेव सत्यम् ॥

७. शेरुङ्कोडै पुकळेल्लैयिलानै—

दाने चाप्रतिमं महागुणनिधिं निस्सीममेवाच्युतं
देवं नामसहस्रयुक्तमतुलं विष्णुं विनाऽन्यान् भुवि ।
क्षुद्रान् दानपराः पयोदसदृशा हस्ताश्च वो बाहवो-
ऽप्येते पर्वतसन्निभा इति भृशं मिथ्यावचो न ब्रुवे ॥

८. वेयिन्मलिपुरैतोळि—

नीळायाः पतिमच्युतं सुविलसद्बाहोर्गुणानां गणै-
स्स्तुत्वाऽनन्तशतैश्चिराय बहुधा मे देहयात्रां चरन् ।
तत्पादाम्बुजसंश्रयोत्सुकतमः किं क्षुद्रमर्त्यान् भुवि
स्तोतुं मे वचसा ब्रवीमि किमपि प्राज्ञोऽद्य मायावशात् ॥

९. वायकोण्डुमानिडम् पाडवन्द—

नाहं मानुषवर्गशंसनपरो वाचा कविश्श्रीधरं
वेदान्तप्रतिपाद्यवैभवमुदाराग्र्यं प्रभुं चक्रिणम् ।
संश्रित्यास्मि कृती ! स एव परमो ज्योतिर्मयो यस्तु मा-
मर्चामूर्तिपरात्पराद्यनुभवैर्मुक्तं करोत्यच्युतः ॥

१०. नित्रु नित्रु पलनाळुयुक्कुम्—

पार्श्वे तिष्ठति नित्यमेव हि नृणां देहात्ययेऽपि स्वयं
तेषां भात्यनुगः प्रभुस्स्ववशगान् कर्तुं सदा तान् हरिः ।
हर्तुं जन्मपरम्परान्तु जगतां स्रष्टुः किलाहं कवि-
स्तस्यैव स्तुतये सदा । किमुचिता भूयान्ममान्यस्तुतिः ॥

११. एक्कुम् पेरुम्पुकळ्—

नित्योदारगुणोज्ज्वलं मुररिपुं सूरीन्द्रनाथं हरिं
कृष्णं स्तोतुमुदारसद्गुणनिधिः प्राज्ञश्शठारिर्मुनिः ।
रम्यं श्रीकुरुकेश्वरश्शुभगुणं साहस्रमेवाकरो-
त्तत्रेदं दशकं भुवीह पठतां जन्मैव न स्यान्नृणाम् ॥

अथ तृतीयशतके

१० दशमदशकम् (शन्मम् पलपलशेय्दु)

(इतरस्तुतिव्यापृतान् भग्नाशयान् दृष्ट्वा शठारिस्स्वस्य सर्वे-
श्वरस्तुत्या सर्वाभीष्टसिद्धिरासीदिति
प्रतिपादयति ।)

१. शन्मम् पलपलशेय्दु—

नानाजन्मसु जन्मभागिह भुवि प्रादुर्भवन् माधव-
श्शङ्खं चक्रमपि स्वशार्ङ्गमुसलौ श्रीनन्दकं तां गदाम् ।
बिभ्रद्गारुडवाहनोऽसुरगणान् रक्षोगणान् मर्दयन्
युद्धे भाति च भक्तवत्सल इमं स्तुत्वाऽस्मि पूर्णाशयः ॥

२. कुरैविल् तडङ्कडल्—

पूर्णाम्भोधितलेऽस्ति शेषशयनः पद्माम्बकस्सुन्दर-
श्श्रीमान् योगपतिर्हरिर्मणिनिभः कृष्णश्च तार्क्ष्यध्वजः ।
प्रध्वंस्यासुरवर्गमुत्तमगुणस्सर्वेश्वरो भात्ययं !
स्तुत्वैनं परिगाननृत्तसहितः पूर्णोऽस्म्यहं सन्ततम् ॥

३. मुट्टिल्पल्पोकत्तोरु तनिनायकन्—

त्रैलोक्याधिपतिं च भोगभरितं सर्वेश्वरं श्रीनिधिं
माधुर्याब्धिरसं घनं मधुरसं क्षीरं फलं चोत्तमम् ।
दिव्यं चामृतमिक्षुमेव तुलसीभास्वत्किरीटं हरिं
नत्वा तत्प्रवणाशयोऽनिशमहं ! चित्तार्तिलेशो न मे ॥

४. परिविनिवाणनैक्कातुमेन्रु—

रक्षाम्येव भवन्तमाश्रितमिति स्वैरं प्रतिश्रुत्य तं
बाणं च त्रिपुरान्तकस्तु समरे सेनासमेतश्शिवः ।
सूनुस्तस्य तथाऽनिलोऽपि च जिताः पक्षेण यस्याप्यमुं
तार्क्ष्यं चाप्यधिरुह्य चक्रधरमेवाहं श्रितो निर्भयः ॥

५. इडरिनिये ओरुनाळ्—

दुःखानां शमनाय हन्त ! जगतां पार्थश्च कृष्णाश्रय-
स्सुख्यातस्स च वैदिको निजरथे दिव्यं स्वयं रोपितौ ।
येनासौ परमे च धाम्नि हि विशंस्तस्यात्मजान् वैदिक-
स्यानीयार्पितवान् सदेहमिममाश्रित्यास्मि निर्दुःखभाक् ॥

६. तुयरिल्शुडरोलि—

पूर्णे चोज्ज्वलतेजसि स्वमहिमस्थेम्ना निजे भास्वति
प्रादुर्भूय च मानुषे व्यसनिनि प्रत्यक्ष एव प्रभुः ।
निर्दोषोऽद्भुतकृत्यकृत्किल महामाहात्म्यतोऽभूच्च तं
कृष्णं मायिनमाश्रितोऽस्मि सततं ! स्याद्दुःखगन्धो न मे ॥

७. तुन्बमुमिन्बमुमाकिय—

संसारं सुखदुःखमिश्रमखिलं विश्वं च तन्नारकं
नानादुःखमयं च नाकमपि तं भोग्यं स्वयं व्याप्य यः ।
नित्यानन्तचिदाश्रयो भवति तं नाथं हरिं श्रीधरं
मायामोहमयं विलासरसिकं प्राप्तस्य दुःखं न मे ॥

८. अल्लिलिन्बमळविरन्दु—

निर्दुःखं सुसुखं सदाऽपि परितस्सौन्दर्यतेजोमयं
भोगानन्दमयं श्रिया कमलया नाथं हरिं निस्समम् ।
दिव्यज्ञाननिधिं समस्तजगतां स्रष्टारमेवाच्युतं
कृष्णं मायिनमाश्रितः पदयुगे निर्दुःखगन्धोऽस्म्यहम् ॥

९. तुक्कमिल्लानच्चुडरोळिमूर्ति—

दुःखस्पर्शविहीनमुज्ज्वलमतिं तेजोनिधिं भूषितं
देवं मे तुलसीस्रजाऽप्यभिमतस्वेच्छात्तमायातनुम् ।
नानाचेष्टितमाश्रितं च सकलैर्ब्रह्मादिरुद्रादिभि-
स्स्वांशैर्विश्वभुजं श्रितोऽस्मि! न हि मे शक्त्यादिहानिः कचित् ॥

१०. तळर्विन्रियेयेन्रमेङ्गुम् परन्द—

सर्वत्रापि च सर्वदाऽपि च विभुं चक्रं परं कारणं
ज्योतिर्ज्ञाननिधिं त्वतीन्द्रियमहातेजोनिधिं स्वामिनम् ।
चन्द्रार्कात्मकपञ्चभूतमयमप्याश्रित्य मायाविनः
कृष्णस्याङ्घ्रियुगं प्रपद्य न हि मे हानिः कचिज्जातुचित् ॥

११. केडिलू विलुप्पुकलू केशवनै—

निर्दोषं शुभसद्गुणामृतनिधिं तं केशवं श्रीहरिं
स्तोतुं प्राह सहस्रमत्र कुरुकाधीशश्शठारिर्मुनिः ।
तत्रेदं दशकं पठन्ति भुवि ये तेषां हरिश्श्रीधर-
स्स्वाराज्यं च निरङ्कुशं वितनुते श्रेयांसि मुक्तिं पराम् ॥

इति श्रीपरमात्मना श्रीमस्करिकिसिंहमहाकवीन्द्रेण
विरचितायां सहस्रगाथारत्नावल्यां
॥ तृतीयशतकं सम्पूर्णम् ॥



अथ चतुर्थशतके

१. प्रथमदशकम् (ओरुनायकमाय्)

(अत्र शठारिरुपदिशति-ऐहिकैश्वर्यमस्थिरम्, स्वर्गादि
भोगोऽप्यस्थिरः, कैवल्यमल्पकलम्, श्रीभ-
गवदनुभव एव निरपायः परमः
पुरुषार्थ इति ।)

इदं दशकं श्रीयादवाद्रि-श्रीमन्नारायणपुरविषयकमिति
श्रीशठारेरनन्तरङ्गरहस्यविद्रामानुजार्यश्श्रीभाष्यकारो
निर्णीय तत्सन्निधौ समर्पितवानिति सम्प्र-
दायतत्त्वम् ।

१. ओरुनायकमाय्—

एकच्छत्राधिपत्यं विदधति किल ये भूतले तेऽपि काले
नीलश्वाकृष्टपादा श्च्युतघटशकला भिक्षुका एव हि स्युः ।
अस्मिन् देहेऽपि सर्वैर्जगति सुविदिता एव ! तस्मात्तु यूयं
श्रीमन्नारायणस्य स्मरत पदयुगं नित्यमुज्जीवनाय ॥

२. उय्मिन् तिरैकोणर्दु—

उज्जीव्यं हि करार्पणैरिति नृपानाज्ञाप्य राज्ञां वरा
भूम्यामत्र किल त्यजन्ति रमणीस्स्वीयाश्च भुक्ता अहो ।
अन्येषान्तु करेषु हन्त ! विपिनेऽप्यत्यन्ततीव्रातपे
सन्तप्ता इति दीप्रमौळिसहितं श्रीशं भजध्वं क्षणात् ॥

३. अडिशेर्न्दुडियिनराकि—

राजानो निजपादसक्तनृपमण्डल्यावळीमौळयो
नित्याकर्णितभेरिनादविजयास्स्वीयाङ्गणेषु स्वयम् ।
धूळीभूतकणाणवः किल गतास्तस्माद्भजध्वं क्षणात्
कृष्णस्यैव सुदिव्यगन्धतुलसीशीर्षस्य पादाम्बुजम् ॥

४. निनैप्पान् पुकिल्—

सञ्चिन्त्येत यदि स्वयं च तदिदं राज्ञां गणाः प्रायशो
ऽनन्तास्ते सिकताधिका हि जलधौ नष्टा युगेषु स्वयम् ।
किं तेषां भवनानि नैव सकलान्यत्यन्तनष्टान्यहो ?
दृष्टं सर्वमतो भजेत्पदयुगं मत्तद्विपध्वंसिनः ॥

५. पणिमिन् तिरुवरुळ्—

रम्यत्वान्वितशीतपुष्पशयने सीमन्तिनीभिस्स्वयं
रामाभिस्सह भोगसारमनुभूयैव प्रियाभिर्जनाः ।
ताभिस्स्त्रीभिरपि स्वयं परिभवं नानाविधं प्रापिता-
स्तस्मान्नीलमणिस्वरूपमनघं कृष्णं भजध्वं सदा ॥

६. वाळ्न्दार्कळ्—

श्रीमन्तो धनिकाश्च बुद्बुदसमा नश्यन्ति नश्यन्त्यहो !
सत्यं ! जन्मत एव नैकविधता ह्यद्यावधि स्यादहो! ।
तेषां सम्पदि नश्वरत्वमत एवास्तीति यूयं स्थिरां
प्राप्तुं सम्पदमप्यगाधजलधौ सुप्तं हरिं प्राप्नुत ॥

७. आमिन् शुवैयवै—

तत्वादृग्विधषड्सान्वितमहाश्लाघ्यान्नतृप्ता अपि
स्वैरं मुग्धवधूवचश्चतुरतावश्याः पुनर्भुञ्जते ।
याच्ञार्थं कवळं किलैकमपि च प्राप्तुं च तासामपि
द्वारि स्युस्तत एव दिव्यतुलसीशीर्ष महस्संस्तुत ॥

८. कुणङ्गोळनिरैपुकळमन्नर—

प्रख्याताश्शुभकीर्तयोऽपि च नृपा दानप्रशौण्डास्स्वयं
लोकानामधिपाश्च भोगरसिकास्सत्यं निवृत्ताः पुनः ।
श्रीशस्याश्रयणं विनैव हि ! ततश्श्रीशेषशय्याश्रयं
नाम्ना कीर्तयताच्युतम् ! न हि तदा वस्स्यान्निवृत्तिः पुनः ॥

९. पडिमन्नु पल्कलन्—

क्षेत्रं चाभरणादिकं च सकलं सन्त्यज्य जित्वेन्द्रिया-
ण्यत्यन्तं च विशोष्य कायमनिशं क्षीणाः कृशाङ्गा अपि ।
अन्ये सन्ततभोगसक्तहृदयास्स्वर्गस्थिताश्च च्युता-
स्तस्मात्तौ गरुडध्वजस्य चरणौ प्राप्य स्त नित्याच्युताः ॥

१०. कुरुक मिकवुणर्वत्तोडु—

ज्ञानादेव शुभाद्विचिन्त्य सकलान् सन्त्यज्य भोगानहो !
स्वात्मानन्दमहानुभूतिविभवं प्राप्ताश्च नो भुञ्जते ।
कैङ्कर्यानुभवामृतं भगवतस्तेषामपि ज्ञानिनां
कैवल्यं किल नित्यपाशनिरयश्श्रीशं श्रिता मोक्षगाः ॥

११. अऽंदेयुय्यप्पुकुमारेन्रु—

मुक्त्यै सोऽयमुपाय इत्यपि हरेः कृष्णस्य पादद्वये
रम्यश्रीकुरुकापुरीशशठजित्सूर्यर्पिते भक्तितः ।
साहस्रे च मनोरमेऽत्र दशकं कैङ्कर्यरूपे त्विदं
सर्वं ये तु विदन्ति ते भवभयं प्रध्वंस्य चोज्जीविताः ॥



अथ चतुर्थशतके

२. द्वितीयदशकम् (पालनायेलुलकुण्डु)

(अत्र श्रीशठारिर्नायिकावस्थां प्राप्य श्रीभगवतः पूर्वावतारान् द्रष्टुमिच्छया तत्पादतुलसीं कांक्षत इति-नायिकाजननी प्रतिपादयति ।)

१. पालनायेलुलकुण्डु—

बालस्य सप्तभुवनान्युपभुज्य तुष्ट्या
पत्रे वटस्य शयितस्य पदाब्जयुग्मे ।
दिव्या ममास्तु तुलसीह सुशीतलेति
क्रन्दत्यहो मम सुताऽद्य सुशीलवल्ली ॥

२. वल्लिशेर्नुण्णिडैयायूच्चियरू—

वल्लीसमास्तनुकटीः परिभुज्य गोपी-
र्यस्साहसादकृत रासविधानलीलाम् ।
दिव्यां च तस्य तु हरेस्तुलसीं पदस्थां
वाञ्छत्यहो ! मम सुता किल पापवत्याः ॥

३. पावियल्वेदनन्मालै—

छन्दांसि च श्रुतिमयानि च दिव्यमाला
आनीय देवनिवहैर्मुनिभिश्च पूज्यैः ।
आराधितस्य तुलसीं पदपद्मसक्तां
वाञ्छत्यहो ! मम सुता कुसुमस्रगाढ्या ॥

४. कोदिलवण् पुकळ्कोण्डु—

निर्दोषदिव्यगुणकीर्तनसक्तचित्तान्
विद्वद्वरानपि च मोहयतो मुरारेः ।
पादाब्जदिव्यतुलसीं सततं पठन्ती
सेयं सुता शुभभुजा मम पापवत्याः ॥

५. तोळिशेर्पिन्नै पोरुट्टु—

नीळां मनोरमभुजामुपभोक्तुकाम-
स्सप्तर्षभानपि च यो जितवांश्च गोपः ।
तस्याङ्घ्रिगा घटभृतस्तुलसी शुभेति
क्रन्दत्यहो ! प्रतिदिनं मम कन्यकैषा ॥

६. मादर्मामण्मडन्दै—

नारीजनोत्तममहापृथिवीं च भोक्तुं
वाराहरूपभृत एवं पुरा धरित्रीम् ।
अण्डात्समुद्धृतवतस्तुलसीं पदस्थां
संकीर्त्य मोहितमतिर्हि ममात्मजेयम् ॥

७. मडन्दैयैवण्कमलत्तिरुमादिन्नै—

पद्माश्रया च तरुणी रमणीमणिश्श्री-
र्यस्यास्ति वक्षसि धृता सुविशालरम्ये ।
तस्यैव दिव्यरचनां तुलसीं पदाब्जे
स्मृत्वाऽवसीदति सुता मम ! दीप्रफाला ! ॥

८. कोम्बुपोल्शीदैपोरुट्टु—

सीताभिरक्षणधिया नगरीं च लङ्कां
दग्ध्वा शराग्निभिरहो ! जगतां प्रशास्तुः ।
देवस्य दिव्यसुरभिं तुलसीं पदाब्जे
वाञ्छत्यसौ मम सुता ! किमिहाद्य कुर्याम् ? ॥

९. नङ्गैमीर्नीरुमोर्पेण्पेत्तुमल्किनीर्—

यूयं च पूर्णहृदयास्तनयां प्रसूय
प्राप्ताः प्रहर्षमहमद्य सुतां च दीनाम् ।
एनां किमित्यहह ! वच्मि ? तदीयशङ्खं
चक्रं च हन्त ! तुलसीं सततं प्रवक्ति ॥

१०. एन् शेयूकेन् एन्दुडैप्पेदै—

दीना ममाद्य तनुजा किल कोमलेयं !
वश्या न मेऽस्ति ! न हितं शृणुतेऽद्य पूर्णाः ! ।
कृष्णस्य पादतुलसी शुभवक्षसोऽद्य
स्वोच्चस्तनाभरणमेव हि वाञ्छतीयम् ॥

११. मेलियुम् नोय् तीर्क्कुम्—

विश्लेषदुःखशमनस्य पदाब्जसक्तः
कृष्णस्य चाह कुरुकाधिपतिश्शठारिः ।
साहस्रमुत्तमगुणं ! दशकं तदेत-
द्भक्ताः पठन्ति यदि यान्ति च सूरिगोष्ठीम् ॥

अथ चतुर्थशतके

३. तृतीयदशकम् (कोवैवायाळ्)

(अवताराणां दर्शनेन सुप्रीतश्शठारिरत्र स्वकरणादि सर्वं समर्पणं करोति ।)

१. कोवैवायाळ्—

बिम्बोष्ठीमुपलब्धुमेव वृषभध्वंसी च लङ्केशितु-
र्हन्ता त्वं किल मत्तहस्तिदशनध्वंसी हरिश्श्रीधरः ।
नाहं त्वां कुसुमैर्जलैरुपचरन्नाराध्य धन्योऽस्म्यहो !
चित्तं मेऽस्त्यतसीसुमायिततनोस्तेऽद्याङ्गरागायितम् ॥

२. पूशुं शान्देन्नेक्कमे—

ईशस्यापि जगत्त्रयावनकृतश्चाप्येकमूर्तेः प्रभो-
रस्माकं तव दिव्यगन्धमपि मे चित्तं स्रजं वाक्कृतिम् ।
वस्त्रं ते मम सूक्तिमेव किल तां भूषां च दिव्यां तव
श्रीशस्याञ्जलिबन्धमेव मम भो ! जानीहि भोग्यं त्रयम् ॥

३. एकमूर्ति यिरुमूर्ति—

मूर्तिश्चैकविधा द्विधाऽपि किल सा त्रेधाऽप्यनेकात्मिका
भूतानामपि पञ्चकं शशिरवी च त्वं हि सूक्ष्मान्तरः ।
दुग्धाब्धौ शयितश्च शेषशयनो नारायणोऽसि स्वयं
भुक्त्वेदं सकलं च तन्मम मनस्यात्माऽस्मि निर्दुःखभाक् ॥

४. माय्त्तलेण्णि वाय्मुलै तन्द—

हत्वा च स्तनदायिनीं किल भवान्मायाविनीं मायया
गोपालोऽपि च वामनोऽपि च भवानासीत्स्वयं माधवः ।
त्वां नाराध्य कृती किलास्मि भगवन्नद्यास्ति धन्या त्वियं
भूषा श्रीमकुटस्य ते मम विभो प्राणात्मिका मालिका ॥

५. कण्णियेनक्कुयिर्कोदल्—

आत्मा मे ननु मालिका मम विभोः कृष्णस्य कालेशितुः
विष्णोश्चक्रभृतोऽस्ति भक्तिरपि मे मौल्यादिभूषामयी ।
सैव स्याद्वसनात्मिका त्रिजगतां शस्यापि कीर्तिश्च सा
श्रीशस्यैव हरेस्समस्तमपि मे भात्येव भोग्यात्मकम् ॥

६. कालशक्करत्तोडु वेण्शङ्गम्—

कालाधीश्वरचक्रशङ्खविलसत्पाणे ! जगद्रक्षक !
त्वं नारायण एव सर्वजगतां स्रष्टाऽप्यहो रक्षकः ।
इत्येवं बहुधाऽपि घोषणरवैराहूय च त्वामहं
भग्नाशोऽस्मि तथाऽपि ते पदयुगं मन्मूर्ध्नि भूषायते ॥

७. कुरैकलल्कल् नीट्टि—

मातुं भूमितलं समस्तमपि यत्पादाब्जतो वामन!
त्वं जातोऽत्र तवाङ्घ्रिपङ्कजरतास्त्वां मायिनं संश्रिताः ।
नाहं त्वां हरिमर्चयन् कुसुमतो धन्योऽस्मि पाद्यादिभिः
दिव्यं तेऽस्ति तथापि चात्मनि हि मे वेदान्तगूढं वपुः ॥

८. एन्नदाविमेलैयाय्—

प्रीत्या चात्मनि मे त्वमुज्ज्वलतनुर्ज्ञानात्मकस्सर्वतो
लोकान् सप्त च सम्प्रविश्य सकलं भूत्वा स्वयं भ्राजसे ।
आत्मा मे तव वश्य एव च तवाप्यात्मा वशो मे हरे
दृष्ट्वा चाखिलमित्थमित्यपि च तद्वक्तुं न शक्यं हि मे ॥

९. उरैक्कवल्लेनल्लेन्—

वक्तुं नैव हि शक्तिरस्ति मम ते कीर्त्यब्धिपारं कदा
यामि श्रीधर भक्तिवश्यहृदयो मुग्धोऽस्मि तेजोनिधे ।
सर्वस्मात्पर दिव्यलक्षणगुण श्रीसूरिसंस्तव्य भो
देव श्रीपुरुषोत्तमाद्य करवै स्तोत्रं तवाज्ञोऽप्यहम् ॥

१०. यानुमेत्ति येल्लुलकुमुत्तुमेत्ति—

स्तोतुं चेत्प्रवणोऽस्म्यहं च सकला लोकास्स्वयं श्रीधर-
स्साक्षादच्युत एव च स्तुतिरियं किं वाऽस्ति शक्या क्वचित् ।
दिव्यं तन्मधु दुग्धमेव मधुरं किं शर्कराखण्ड ए-
वाहोस्वित्त्वमृतं किमित्यहमपि स्तौम्येनमुज्जीवितुम् ॥

११. उय्वुपायमत्तिन्मै तेरि—

नान्यत्साधनमस्ति सर्वजगतामुज्जीवनायेत्यसौ
श्रीकृष्णस्य पदाब्जयुग्मनुतये गाथासहस्रंमुनिः ।
दिव्यश्रीकुरुकेश्वरश्शठरिपुः प्राह स्वयं ये पुन-
स्तत्रेदं दशकं पठन्ति भुवि ते भूमेर्दिवश्चेश्वराः ॥

———0———

अथ चतुर्थशतके

४. चतुर्थदशकम् (मण्णैयिरुन्दु)

(अत्र नायिकावस्थां प्राप्तश्शठारिर्मोहात्तद्दशवस्तूनि दृष्ट्वा क्रन्दतीति जननी वदति ।)

१. मण्णैयिरुन्दु—

भूमिं स्पृष्ट्वा किलेयं वदति मम सुता वामनेनैव पूर्वम्
पादाक्रान्ता धरेयं त्विति गगनतलं वीक्ष्य तद्वासदेशम् ।
श्रीवैकुण्ठं हि वक्ति स्वकरयुगमुखाद्दर्शयन्ती च साश्रुः
प्राहैनं वार्धिवर्णं किमहह करवै मत्सुतोन्मादकर्तुः ? ॥

२. पेय्वळक्कैकळैक्कूप्पि—

कृत्वा चाञ्जलिबन्धमेव शिथिलीभूतस्वभूषात्कर-
द्वन्द्वाद्वारिनिधिं प्रदर्श्य च रविं श्रीशस्य वासस्थलम् ।
तेजोराशिनिधिं प्रदर्श्य च रविं श्रीशस्य बिम्बोऽयमि-
त्येवं मे तनुजाऽश्रुपूर्णनयना नारायणेत्याः कथम् ॥

३. अरियुम् शेन्दीयैत्तळुवि—

आलिङ्ग्याग्निमयं ममाच्युत इति प्रेम्णोज्ज्वलं मे सुता
चित्रं नैव हि दह्यते च पवनं स्पृष्ट्वाऽपि चाश्लिष्य च ।
गोविन्दो मम सोऽयमित्यपि वदेद्गन्धस्तुलस्या भवेत्
पापिन्याऽद्य न वेद्यते किल मया किं किं करोति भ्रमात् ॥

४. ओन्नियतिङ्गळैक्काट्टि—

चन्द्रं पूर्णकलं प्रदर्श्य मणिवर्णं श्रीहरिं तं वदे-
दद्रिं वीक्ष्य किल स्थिरं प्रणयिनं तं नायकं चाह्वयेत् ।
वर्षन्तं च विलोक्य वारिदमियं नारायणं त्वागतं
मत्वा नृत्यति कोमलं मम सुता भ्रान्ता कृता साम्प्रतम् ॥

५. कोमळवान् कनैप्पुल्किं—

वत्सानाश्लिष्य सेयं सुतरुणवयसस्ते च गोविन्दपाल्या
इत्येवाह स्वयं चाप्यनुसरति हठात्सर्पमेव प्रयान्तम् ।
तस्येयं भाति शय्येत्यहह मम सुतामीदृशीं भ्रान्तचित्तां
मायावी कोमलां किं बत बत कुरुते हन्त वल्लीं न जाने ॥

६. कूत्तुकुंडमेड्डुत्ताडिल्—

लीलासक्ता घटैश्चेन्मम किल तनया चानुयात्येव कृष्णो
गोविन्दोऽयं ममेति भ्रमवशहृदया वेणुनादे च मुग्धा ।
सोऽयं मायीति दृष्ट्वा सपदि च नवनीतं तु तद्भुक्तमाह
श्रीशः किं पूतनाया असुहरणपटुः कोमलां मेऽद्य कुर्यात् ॥

७. एरिय पिरितिनोडु—

विश्वं कृष्णेन सृष्टं वदति किल महामोहवश्या यदि स्या-
दूर्ध्वां रेखां विलोक्य भ्रमत इह तदीयत्वबुद्ध्याऽनुधावेत् ।
दृष्ट्वा सेयं तुलस्या दळमपि वदति स्रक् च नारायणस्ये-
त्येवं मुग्धाऽप्यमुग्धाऽपि च किल कमला मायिनस्तस्य वश्या॥

८. तिरुवुडैमन्नरैक्काणिल्—

भूपालान् वीक्ष्य पूर्णान् हरिरयमनघश्श्रीधरश्चेति वक्ति
भ्रान्ता नानापदार्थानपि वदति हरिं लोकमातारमेव ।
देवागाराणि वक्ति स्वयमपि सहितान् विग्रहैरालयादीन्
भीता वा हन्त मुग्धा सततमपि भवेत् कृष्णपादाब्जसक्ता ॥

९. विरुम्बिप्पकवरैक्काणिल्—

दृष्ट्वा सन्न्यासिवर्गान् विपुलतमजगद्रक्षकं वेत्ति विष्णुं
नीलान्मेघान्विलोक्य स्वयमपि च हरिः कृष्ण इत्युत्सरन्ती ।
सेयं दृष्ट्वा पशूनां निवहमपि स आगच्छतीत्येव गच्छे-
देवं बाला ममेयं सपदि बहुतमां मायिना मोहिताऽस्ति ॥

१०. अयक्कुम् शुत्तुम् पत्तिनोक्कुम्—

मुग्धा सादृश्यदृष्टौ ! परित इह तमेवानुचिन्त्यापि पश्येत्
दूरादागच्छतीत्यप्यहह ! ननु भवेत्स्वेदतश्च द्रुताङ्गी ।
उच्छ्वासैस्साश्रुनेत्रा भवति च नितरां सीदतीवाह्वयेत्तं
हे ! कृष्णेति ब्रुवन्ती मदवशहृदया मत्सुता किन्नु कुर्याम् ॥

११. वल्विनै तीर्क्कुम् कण्णनै—

पापध्वंसं शठारिर्मुनिरयमनघस्स्तोतुमेवात्र कृष्णं
सूक्तीस्साहस्रसङ्ख्या अवददिह शुभं ये पठन्त्येव तत्र ।
दिव्यानीमानि पद्यान्यपि दश किल ते दिव्यवैकुण्ठमेत्य
प्रध्वस्ताशेषपापा गुरुवरविनुता यान्ति साम्राज्यसिद्धिम् ॥

अथ चतुर्थशतके

५. पञ्चमदशकम् (वीत्तिरुन्देळुलकुम्)

(अत्र मोहशान्तिं प्राप्य श्रीशठारिर्नित्यसूरिसहितस्य सर्वेश्वरस्य मङ्गळाशासनं करोति ।)

१. वीत्तिरुन्देळुलकुम्—

दिव्यास्थानपदस्थितोऽपि भुवनान्येतानि सप्तापि य-
स्स्वामी शास्ति निरङ्कुशश्च सुगुणैश्शान्त्या च दुर्वाजिहा ।
तं स्वस्तीति पुनः पुनश्च करतो बद्ध्वाञ्जलिं स्तोत्रत-
श्चानन्द्यास्मि कृती ! न सप्तजनिषु क्वाप्यस्ति हानिस्तु मे ॥

२. मैयकण्णाळ्—

धत्ते यस्त्वसितेक्षणामुरसि तां पद्मालयां श्रीधरं
तं रक्ताम्बुजलोचनं मम कवेः पद्यैस्तु हृद्यैरहम् ।
सूरीणामधिदेवमच्युतमहो ! स्तुत्वा कृती भूतले
सर्वक्लेशविनाशकोऽस्मि च हरेर्विष्णोर्मुखोल्लासतः ॥

३. वीविलिन्बमिकवेल्लैनिकळन्द—

नित्यानन्दसमृद्धमच्युतमहो ! माहात्म्यसीमातिगं
पद्माक्षं सुरवृन्दसेव्यमनिशं स्तोतुं च गीतैर्मम ।
मालारूपधरैस्तु पद्यनिचयैर्हृद्यैरहं भाग्यवान् !
प्राप्यैनं परमां समृद्धिमभजं ह्यानन्दसिन्धोरहम् ॥

४. मेविनिन्रतोळुवार—

नित्यं ये दृढभक्तियुक्तहृदयास्तेषां समस्ताघहं
संश्लेषेण च तार्क्ष्यवाहनममुं श्रीचक्रपाणिं हरिम् ।
वाचा गातुमहं कृती विरचयन् मे पद्यमालामिमां !
किं किं वाऽद्यकरोति मां मम विभुश्श्रीशोऽन्तरात्मा स्वयम् ॥

५. आत्तनळ्ळवकैकाट्टुमस्मानै—

सन्मार्गान्मम दर्शयन्तमनघं देवाधिदेवं प्रभुं
दिव्यार्थान्मम बोधयन्तमपि तं गीतागुरुं श्रीधरम् ।
पापव्याधिततिप्रशान्तिविधये मे पद्यमालामिमां
कृत्वा स्तौमि हि सन्ततं च ! परमानन्दं भजेऽहं ततः ॥

६. करियमेनिमिशै—

मेघश्यामलमूर्तिमञ्जनविधौ चूर्णांशरम्याम्बकं
सूरीणामधिदेवमच्युतमहं स्तुत्वाऽद्य पद्यैर्मम ।
गीतैर्भोक्तुमयं कृती किल महान् धन्योऽस्मि ! किं वाऽधुना
हन्त ! प्राप्यमितः परं च मम यत्पूर्णोऽस्मि भाग्यैरहम् ॥

७. एन्नमोनाकि—

एकोऽसौ सततं समाधिकतरैर्हीनो हरिश्श्रीधरो
लोकानां प्रभुरच्युतो गिरिधरो वर्षात्स्वयं रक्षकः ।
नाथं तं मम हृद्यपद्यकुसुमस्रग्भिर्हरिं भूषितं
कर्तुं भाग्यमिदं च तस्य कृपया लब्धं ! न मेऽन्यस्पृहा ॥

८. नमक्कुम् पूविन्मिशैनङ्गैक्कुम्—

अस्माकं परमः प्रियश्च सततं लक्ष्म्याश्च योऽसौ पति-
र्भौमानां दिवि वासिनामपि हरिर्नाथश्च पद्मोढपात् ।
तं स्तोतुं मम सूक्तिहारततिभिर्भाग्यं हि मे वर्तते ।
न स्यान्मे परमे पदेऽपि च समःकश्चित् स्वयं भाग्यवान् ॥

९. वानत्तुम् वानत्तुळ्ळुम्वरुम्—

स्वर्लोके परमे पदेऽपि च भुवि स्थानेषु भूमेरधो-
देशेष्वष्टदिशासु चाच्युतममुं सर्वेश्वरं रक्षकम् ।
अन्तर्गर्भविशालशङ्खविलसद्बाहुं स्तुवन्माधवं
कुम्भोल्लासि परात्परं कवयिता सोऽहं कविर्निस्समः ॥

१०. उण्डुमुमिळ्न्दुम् कडन्दुमिडन्दुम्—

भुक्त्वा चापि समुद्गिरन्तमपि तं चाक्रम्य पादेन च
प्रोद्धृत्यापि शयानमेवमभिषिक्तालङ्कृतस्वासनम् ।
राज्ये चोत्सवसम्भ्रमान्वितममुं प्रत्यक्षचेष्टाकुलं
स्तौम्येवं जगदीश्वरं द्रविडसद्छन्दैर्बुधानां प्रियैः ॥

११. मारिमारादतण्णम्मलै—

वर्षैस्सन्ततशीतले सुरुचिरे श्रीवेङ्कटाद्रौ प्रभुं
सस्याद्यैस्सुसमृद्धदिव्यकुरुकापुर्याश्शठारिः प्रभुः ।
स्तोतुं चाह सहस्रपद्यसरणिं रम्यां महात्मा मुनि-
स्तत्रेदं दशकं भुवीह पठतां पद्मालयाऽघं हरेत् ॥

अथ चतुर्थशतके

६. षष्ठदशकम् (तीर्प्पारैयामिनि)

(अत्र पुनश्च मोहाविष्टश्शठारिर्नायिकावस्थां प्राप्त इति क्षुद्रदेवताराधनपरान् मातृजनान् प्रति सखी वदति श्रीभगवन्नामसङ्कीर्तनं, श्रीवैष्णवश्रीपादधूळिश्चास्य रोगस्य परिहाराय भवतीति ॥)

१. तीर्प्पारैयामिनि—

मातः पश्य निदानमेव हि रुजोप्यस्या न विद्मो वयं
किं पश्याम चिकित्सकान् ? कथमिदं चेत्येव चिन्त्येत चेत् ।
अस्या रोगनिदानमद्य हि वयं निर्णीय विद्मस्त्वियं
युद्धे पञ्चजयावहस्य रमणी श्रीपार्थसूतस्य हि ॥

२. तिरैकिन्नदेयिवळनोय्—

मोहोऽयं हि रुजैव सम्भवति ! यद्दैवं महच्चाद्भुतं
बत ! क्षुद्रा न हि देवतास्तु भवतामस्या रुजः कारणम् ।
भ्रान्तिर्मास्तु यथा शृणोति च तथा तच्छङ्खचक्रे स्वयं
यूयं कीर्तयताद्य तत्क्षणमियं मोहं त्यजेत् पश्यत ॥

३. इदुकाण्मिनन्नैमीर्—

यूयं पश्यत मद्वचोऽद्य शृणुत क्षुद्रात्वियं शाकुनी
मूढाऽस्या वचनानुगा बत सुरामांसादिदुष्टार्पणम् ।
यूयं मा कुरुताद्य मायिन इदं स्तोत्रं पदाब्जं हरे-
र्दिव्यं गायत दीप्रमौळिभृत एवास्याः परं चौषधम् ॥

४. सरुन्दाकुमेन्नङ्गोर मायवलवै—

दिव्यं भेषजमेतदित्यपि वृथा क्षुद्रान्तु यां काञ्चिद-
प्येनां भाऽनुगतास्स्त हेयचरिते क्षुद्रालये चार्पणात् ।
अन्नं नीलतमं च रक्तमपि तत्रानीय किं स्यात्फलं
सेयं जीवति सप्तलोकसवितुर्विष्णोस्तु सङ्कीर्तनात् ॥

५. इवलैप्पेलम् परिशु—

क्षुद्रोऽयं तु न हि क्षमो बत बत प्राप्तुं च बिम्बाधरा-
मेनामुत्पललोचनामिहह हा ! भीता त्वियं सीदति ।
देवं मत्तगजप्रणाशकममुं सङ्कीर्त्य नाम्ना हरिं
तत्पादाम्बुजरेणुभिश्च कुरुतार्चनान्तु सञ्जीविताम् ॥

६. तणियुम् पोलुदिनूनीर्—

यूयं हन्त ! वृथैव सन्ततमपि भ्रान्ताः किलास्या रुजं
संवर्ध्य श्रमवत्य एव न हि सन्तापोऽस्ति शान्तोऽधुना ।
दिव्यं तन्मणिवर्णमायिभगवत्पादाब्जभाजां सतां
पादाम्भोजरजः प्रयोजयत भो ! नान्यद्भवेदौषधम् ॥

७. अप्पङ्गुक्करुमरुन्देन्ऱु—

अस्या औषधमेतदित्यपि वृथा यूयं सुरां चाजम-
प्युद्दिश्यापि भुजादिचालनवशादावेशवश्या इव ।
नृत्यन्तः किमहो ? किमस्ति तु फलं दृष्ट्वाऽधरस्पन्दनं
भीहन्ते बत रासभस्य? भजत श्रीशं श्रितान् श्रोत्रियान् ॥

८. वेदम् वल्लार्कलैक्कोण्डु—

वेदार्थज्ञमुखात्प्रपद्य चरणाम्भोजद्वयं श्रीपते-
स्सूरीणामपि नायकस्य तु हरेद्रोगं किलास्याः क्षणात् ।
एवं हन्त ! न कुर्वते किल जना युष्मादृशा देवता
वाद्यैर्मद्ययुतार्पणैरुपचरन्त्येवेत्यवज्ञा हि वः ॥

९. कीळ्मैयिनालङ्गोर्—

क्षुद्रैः कल्पितमेव वाद्यनिचयं संशव्द्य च स्तोत्रतः
क्षुद्रावेशयुतास्तु यूयमिति यद्द्रष्टुं न शक्यं मया ।
क्षेमं सप्तकुलान्वयादपि परं दिव्यौषधं प्राक्तनं
तच्चेदं कुरुताङ्घ्रिपङ्कजयुगं कृष्णस्य नत्वा सदा ॥

१०. उन्नित्तु मत्तोरुदेय्वम् तोळाळ्—

नान्यद्दैवमियं स्मरेदुपचरेत्कृष्णात्परं श्रीपते-
र्यूयं स्वाभिमतं प्रजल्प्य च भुजान् स्वैरं प्रचाल्यापि वः ।
यत्नानेव वृथाश्रिताः किल परित्यज्येदमद्यागमै-
र्वेद्यं द्वारवतीपतिं स्तुत नुतेस्सेयं परं नृत्यति ॥

११. तोळुदाडित्तूमणिवण्णनुक्कु—

नत्वा श्रीमणिवर्णमेव सततं नृत्तेषु सक्तो हरिं
प्राप्य ध्वस्तसमस्तरोगसरणिः ख्यातश्शठारिर्मुनिः ।
दिव्यां चाह सहस्रपद्यसरणिं दुर्दैवतावेशनुत्
तत्रेदं दशकं पठन्ति यदि ते निर्दुःखगन्धास्स्वयम् ॥



अथ चतुर्थशतके

७. सप्तमदशकम् (शीलमिल्लाच्चिरियनेलुम्)

(अत्र शठारिर्मोहशान्तिं प्राप्य दिव्यमङ्गळविग्रहदर्शनार्थं महोरात्रं क्रन्दति ।)

१. शीलमिल्लाच्चिरियनेलुम्—

लोकानामसि रक्षकस्त्वमनिशं ज्ञानस्वरूपो हरि-
र्हे ! नारायण माधवेति सततं त्वामेव सङ्कीर्तयन् ।
द्रष्टुं सुन्दरमूर्तिमेव हि तव श्रीनाथ काङ्क्षे सदा
नायासि त्वमहो न मां नयसि चेत् क्षुद्रस्य मेऽघं महत् ॥

२. कोळळमाळाविन्ववेळळम्—

मातुं भूमितलं हि वामनवपुस्त्वं मामुदाराशय-
स्त्वानन्दामृतवारिधौ च कुरुषे मग्नं महानित्यहम् ।
एवं हन्त दिवानिशं च सततं त्वामेव सङ्कीर्तये
मायामूर्तिरहो न मे नयनयोर्द्रष्टुं हि पात्रं भवान् ॥

३. ईविलादतीविनैकळ्—

पादाभ्यां जगदाक्रमं रचयिता स्वामी च दामोदरो
विख्यातोऽस्ति भवानिति स्वयमहं तूद्घुष्य चार्द्राशयः ।
पूर्णाश्रुर्यदि चास्मि मां न हि भवान् पापी किलासीत्यहो
वाचं वक्ति ममास्ति पापसरणिर्नित्याविनाश्या ततः ॥

४. काणवन्देन् कण्मुकप्पे—

ब्रह्मेन्द्रादिसुरव्रजैरपि भवान् भक्तैर्न दृश्योऽस्त्यहो
माहात्म्यं तव तादृशं हि परमं स्वामिन् सुवर्णाकृते ।
पद्माक्ष त्वमिहैव मे नयनयोर्दृश्यो भवेत्यप्यहं
निर्लज्जो ननु वच्मि नीचहृदयः किं स्यात्फलं मेऽत्र वा ॥

५. अप्पने अडलालियाने—

स्वामिन्नाश्रितवत्सलोऽसि हि हरे श्रीचक्रपाणे भवान्
वीरो वारिधिमन्थनो ननु भुजैर्दिव्यैश्चतुर्भिस्तव ।
इत्येवं सततं सबाष्पनयनः प्राणैश्च शुष्कायितै-
राक्रन्दाम्यधुनैव सत्वरमहं द्रष्टुं हि मे चापलात् ॥

६. नोक्कि नोक्कि युन्नैक्काण्बान्—

अन्तर्मे हृदयेऽपि चात्मनि बहिश्चापि स्वयं सन्ततं
भास्वानेव भवानिति स्वयमहं ज्ञात्वाऽपि चान्तर्हृदि ।
द्रष्टुं त्वां बहुधाऽस्मि चापलवशो नेत्रद्वयेनेत्यहो
मौढ्यं मे महदस्ति दुस्सहमिदं किं दुर्निवारं भवेत् ॥

७. अरिन्दरिन्दुतेरित्तेरि—

स्वामिन् दिव्यसुगन्धरम्यतुलसीमालाढ्य सर्वेश्वर
त्वां दृष्ट्वाऽपि च चक्षुषा हृदि सदा निध्याय शान्तोऽन्तरा ।
एषोऽहं मम चान्तरात्मनि हरिं ज्ञानैकमूर्तिं परं
कृत्वा त्वां जनिमृत्युपाशसरणेर्मोहाच्च दूरीकृतः ॥

८. कण्डुकोण्डेन् कैकळार—

दृष्ट्वा त्वां तव पादपद्मयुगळे हस्तै स्समर्प्याप्यमी
भक्त्या सर्वदिशोपलभ्यकुसुमान्याराध्य च स्तोत्रतः ।
हृष्टास्सम्प्रति गीतनृत्यसहिता भक्ता वयं स्याम चे-
त्येवं त्वं तुलसीस्रजाऽञ्चित विभो लोकेऽत्र नागच्छसि ॥

९. इडकिलेनोन्रट्टकिल्लेन्—

अन्नं नैव ददामि जातु चिदहं पानीयमभ्यर्थिने
ज्ञातुं नैव जयामि पञ्चकरणग्रामं न भक्त्या सदा ।
पुष्पैरर्चयितुं यते स्तुतिपरः पापी किलाज्ञोऽस्म्यहं
द्रष्टुं चक्रधरं तथापि कुतुकी पश्याम्यहं क्वाच्युतम् ॥

१०. शङ्करत्तण्णलेयेन्रु—

स्वामिन् चक्रधरेति चार्तहृदयो नम्रश्च साश्रुस्सदा
त्वामन्विष्य विषादवानहमहो पापी न पश्यामि हि ।
दिव्यज्ञाननिधिं हरिं मुररिपुं वेदैकवेद्यं किल
त्वामालिङ्गय कृती भवामि मनसा मज्ज्ञानदृष्ट्या भजन् ॥

११. तकुविनिम्रकादत्तनाल्—

भक्त्याऽसौ दृढभावबन्धभरितस्स्तोतुं सरोजाम्बकं
रम्यश्रीकुरुकेश्वरश्शठरिपुः पद्यावळीं द्राविडीम् ।
दिव्यां हि व्यतनोत्सहस्रगणितां तत्रापि ये नर्तनै-
स्तद्वदं दशकं पठन्ति भुवि ते वैकुण्ठमेवाप्नुयुः ॥



अथ चतुर्थशतके

८. अष्टमदशकम् (एरालुमिरैयोनुम्)

(अत्रापि नायिकावस्थया सर्वेश्वरस्यानादरणीयं सर्वमप्यात्मीयं त्याज्यमिति प्रतिपाद्यते ।)

१. एरालुमिरैयोनुम्—

ईशानो वृषभध्वजोऽपि चतुरास्योऽपि स्वयं श्रीरपि
स्वस्वस्थानमिति प्रियं वपुरहो ! यस्याश्रितास्तस्य तु ।
रक्षोवृन्दविनाशकस्य च हरेर्नोचेत्प्रियं किं फलं
सौन्दर्येण महोज्ज्वलेन मणिवच्चास्माकमङ्गेषु वा ? ॥

२. मणिमामै कुरैविल्ला—

यस्योरस्यनिशं वसत्यहह ! सा नित्योज्ज्वलश्रीरपि
श्रीदेवी कमला तु यस्य च भुजौ वृत्तौ शुभौ पीवरौ ।
यश्चक्रं करतो बिभर्त्यरिहरं तेनास्मि सेवाविधौ
नित्यं चापि नियोजिता ! मम मनस्तस्याप्रियं निष्फलम् ॥

३. मडनेञ्जाल् कुरैविल्ला—

वत्सप्रीतियुतान्वु मातरमभूद्दुष्टाऽनुकृत्य स्वयं
मायापूतनिरूपिणी विषमयस्तन्या पुरा या तु ताम् ।
हन्तुर्ज्ञाननिधेश्शिशोर्दृढभुजस्यानन्तशय्याभृतः
कृष्णस्याप्रियमेव यत्किल ततः स्त्रीत्वात्फलं किं मम ॥

४. निरै विनाल् कुरैविल्ला—

स्त्रीसाद्गुण्ययुतां सुबाहुयुगळां नीळां शुभां सुस्तनीं
भोक्तुं यो वृषसप्तकं प्रमथयन् हृष्टो विवर्णाम्बरः ।
बिभ्राणोऽपि च दुग्धपात्रमपि यो दण्डं च घण्टामणिं
तस्येदं यदि न प्रियं मम तनोर्वर्णाच्छुभात्किं फलम् ॥

५. तलिर्निरत्ताल् कुरैविल्ला—

पूर्णां पल्लवशोभयाऽपि च पृथक्कारागृहस्थां च तां
विख्यातां शुकभाषितां पुनरपि प्राप्तुं च रक्षोऽधिपम् ।
हत्वा तन्नगरे प्रदह्य तुलसीसौगन्ध्यमौळेर्हरे-
र्भूसाम्राज्यभृतः प्रियं न यदि तज्ज्ञानं च मे निष्फलम् ॥

६. अरिविनाल् कुरैविल्ला—

ज्ञानापेक्षितहीनभूतलभुवां सर्वानुपायान् हरि-
र्दिव्यज्ञाननिधिश्शुभानुपदिशन् यो दिव्यमूर्तिः पुरा ।
आसीद्वामनरूपधृच्च धरणीं यो वञ्चनादग्रहीत्
तन्त्रज्ञस्यं न तस्य चेत् प्रियमहो लावण्यतः किं फलम् ॥

७. किळरोळियाल् कुरैविल्ला—

स्वाभाव्यान्मणिनीलवर्णसुतनुर्दीप्रोज्ज्वलश्रीधर-
स्सिंहोऽभूच्च हिरण्यकासुरमहावक्षो विदीर्य प्रियः ।
भक्तानामपि शङ्खचक्रभृदसौ रक्षार्थमेवाच्युत-
स्तस्येदं यदि न प्रियं वलयतः किं स्यात्फलं मे करे ॥

८. वरिवळैयाल् कुरैविल्ला—

दिव्यध्वानसुपाञ्चजन्यमुखतश्चासीद्रिपूणां हृदि
प्रज्वालोऽस्य भयानलः किल पुरा भूम्यास्तु भारापहम् ।
ब्रह्मेन्द्रादिशिवादयोऽपि तमिमं नत्वा स्वयं तुष्टुवु-
र्यद्यस्यास्ति न तु प्रिया सुरुचिरा काञ्ची च मे स्याद्वृथा ॥

९. मेकलैयाल् कुरैविल्ला—

काञ्चीदामलसच्चतुश्च तनुजा साऽभूदुषा च स्नुषा
कृष्णस्येति सुकीर्तिशौर्यशरधिर्बाणासुरो वीर्यवान् ।
छित्वा बाहुपरम्परामपि हरिस्तस्यास्त्यसौ योगभाङ्-
निद्रावानिव शेषतल्प इह मे कायो वृथाऽस्याप्रियः ॥

१०. उडम्बिनाल् कुरैविल्ला—

नित्यं ये तु शरीरपोषणपरास्तांश्चासुरान् खण्डयन्
भित्वा पर्वतसन्निभानपि हरिर्हृष्टोऽभवन्माधवः ।
तं पार्श्वे श्रितवान् हरश्च जटया गङ्गाधरो भक्तित-
स्तस्यायं यदि न प्रियोऽस्ति तु हरेरात्माऽपि मे स्याद्वृथा ॥

११. डयिरिनाल् कुरैविल्ला—

आत्मानस्सकलाश्च यस्य वपुषि श्रीशस्य सन्धारिता-
स्तं कृष्णं नवनीतदुग्धदधिभुक्त्यासक्तचित्तं हरिम् ।
स्तोतुं श्रीकुरुकेश्वरश्शठरिपुर्दिव्यं सहस्रं जगौ ।
तत्रेदं दशकं पठन्ति यदि ते धाम प्रयान्त्यव्ययम् ॥

अथ चतुर्थशतके

९. नवमदशकम् (नण्णादामुंरुवलिप्प)

(श्रीभगवद्विमुखानां दर्शनं दुस्सहमितिमत्वा शठारिस्स्व-
देहत्यागं कर्तुमिच्छन् भगवन्तं प्रार्थयते
तदीयस्वीकाराय ।)

१. नण्णादामुंरुवलिप्प—

प्रत्यर्थिस्मितपूर्वकाश्च विविधाः क्लेशा अमी भूतले
स्निग्धानां बहुदुःखहेतव इति ज्ञात्वा वयं त्वां श्रिताः ।
कारुण्याम्बुनिधे ! समुद्रमथन ! त्वत्पादपद्मद्वये
मामद्यैव नियोज्य मे कुरु तनोर्विश्लेषमात्यन्तिकम् ॥

२. शासारुम् केडुमारुम्—

मृत्युश्चापि हठाद्भवेदिह धनध्वंसोऽपि च ज्ञातयो
बन्धूनां निवहास्तलातलि पतन्त्येव प्रलापाकुलाः ।
हा ! हा ! हन्त ! जगत्किलेदृशमहो किं स्यान्न वेद्मि स्वयं
मां शेषं तव शेषनाथ कथमप्याहूय धन्यं कुरु ॥

३. कोण्डाट्टुम् कुलम् पुनैवुम्—

प्राशस्त्यं च कुलीनतामपि भुवि ज्ञात्यादिबन्धूनपि
श्रीसौभाग्यमपि स्त्रियं च तरुणीं प्रासादमप्युन्नतम् ।
त्यक्तुं ये विलपन्ति मृत्युसमये दृष्ट्वा न चैतान् सहे !
(त्यक्त्वा ये भुवि यान्ति मृत्युसमये दृष्ट्वा न चैतान् सहे !)
सौन्दर्याम्बुनिधे न मां त्यज पुरेवाहूय दास्ये कुरु ॥

४. कोळ्ळेन्नु किळरन्देळुन्द—

नित्यारूढसमृद्धिसम्पदमपि स्वस्याग्निकल्पां स्वयं
दृष्ट्वाऽप्यस्ति धनातुरोऽत्र तमसा किं लोकयात्रास्वियम् ।
औदार्याम्बुनिधे हरे मणिनिभस्वाङ्ग स्वपादद्वये
नित्यं योजयितुं च मान्तु कृपया दासं जनं स्वीकुरु ॥

५. वाळु नीर्मलरुलकिल्—

पृथ्वीं वारिधिसंवृतां हि मनुजा आश्रित्य तिष्ठन्त्यमी
सर्वेचात्र हि सञ्चरन्ति जननव्याध्याधिमृत्यार्तिभिः ।
क्रूरास्सन्ति च रौरवादिनरका एवं हि यात्रा नृणां
दास्ये मां मणिवर्ण! ते कुरु सदा मा मोहय श्रीधर ॥

६. मरुक्किवल् वलैप्पडुत्ति—

क्षुद्राः क्षोभमपीह बन्धनमपि भ्रष्टा नृणां पीडनं
हा हा हन्त वधं च कुर्वत इमे स्वस्वोदरार्थं खलाः ।
धर्मं नैव विदुर्जगत्यहह किं यात्रेदृशी? तेऽस्म्यहं
दासोऽघी तुलसीस्रगञ्चित! सुधासिन्धो! वृणुष्वाद्य माम् ॥

७. आयेयिञ्ुलकत्तु—

लोकेऽस्मिन्नखिलात्मकोऽस्ति हि भवानेव स्वयं सञ्चरन्
स्थित्वा चास्ति न किञ्चिदन्यदहहं त्वत्संश्रितं मां कुरु ।
आहूय स्वयमेव मां जनिजराव्याध्याधिहीनं कुरु
श्रीमन्! क्लेशभरार्दितेऽत्र जगति त्वं मां न तु स्थापयेः ॥

८. काट्टिनीकरन्दुमिलुम्—

विश्वं सर्वमपि प्रकाश्य जठरे कृत्वाऽपि चोद्गीर्य च
प्रोद्भाव्यापि पृथिव्यवह्निपवनाकाशान् बहिस्स्थापयन् ।
देवादीनपि तत्र चाण्डनिलयान् विभ्राजसे त्वं हरे!
प्राप्तुं ते परमं पदं पदयुगे ते मां कदा योजयेः? ॥

९. कूट्टुदिनिन् कुरैकलल्कल्—

भोग्ये त्वच्चरणारविन्दयुगळे त्वं योजयस्याश्रितान्
प्राज्ञैर्देवगणैरपि स्वयतनैर्गम्यो न हि त्वं हरिः ।
स्वामिन् नागशयाद्य वेद्मि हृदयं तेऽहं च दासो जनो
मां चानन्यपरं विधाय तव पादाब्जे किलायोजयः ॥

१०. कण्डु केट्टुत्तुमोन्दु—

दृष्ट्वाकर्ण्य परिस्पृशन्नपि किलाघ्रायापि भुक्त्वेन्द्रियै-
र्नानाभोग्यसुखं त्यजन्नपि च तामात्मानुभूतिं त्यजन् ।
श्रीदेवीं रमणीयभूषणयुतां त्वां चाप्रमेयं हरिं
दृष्ट्वा मे पुरुषार्थमप्रतिभटं प्राप्तोऽस्मि तेऽङ्घ्रिद्वयम् ॥

११. तिरुवडियै नारणनै—

सर्वेषां जगतां शरण्यमपि तं नारायणं केशवं
ज्योतिश्चापि परं स्तुवन्नपि च तत्पादाब्जसक्ताशयः ।
भक्तश्श्रीकुरुकेश्वरश्शठरिपुः प्रोचे सहस्रं शुभं
तत्रेदं दशकं च तत्पदयुगं सम्प्रापयेत् प्राप्नुत ॥

अथ चतुर्थशतके

१०. दशमदशकम् (ओनुं तेवुम्)

(देवतान्तरपरान् प्रति कारुण्यात् सर्वेश्वरस्य श्रीमन्नारायणस्य परत्वं शठारिरत्रोपदिशति ।)

१. ओनुं तेवुम्—

देवाश्चापि यदा न सन्ति भुवनान्यात्मान एवं तथा
सर्वं नास्ति तदा चतुर्मुखमुखान् देवांश्च लोकान् सृजन् ।
जीवांश्चाप्ययमादिनाथ इह हि श्रीरत्नसौधावृते
भात्येवं कुरुकापुरे किमितरद्दैवन्तु मृग्यं च वः ॥

२. नाडिनीर्वणङ्गुम्—

युष्माकं किल दैवतं च सकलं युष्मांश्च पूर्वं सृजन्
नित्यानन्तगुणाम्बुराशिरयमेवास्त्यादिनाथो हरिः ।
अस्येदं किल सन्निधानमखिलैर्लोकैर्भवद्भिस्सदा
स्तोतव्यं कुरुकापुरं मणिमयं गानैश्च नृत्तैश्शुभैः ॥

३. परन्ददेय्वसुम्—

देवानप्यखिलानशेषभुवनं सृष्ट्वा स्वयं भक्षयन्
गुप्त्वा चोद्गिरतीह माति च समुद्धर्ताऽस्ति लोकाः पुनः ।
एवं हन्त विलोक्य वित्थ न हि यद्देवैश्च वन्द्ये हरि-
स्स्वाम्यास्ते कुरुकापुरे किमपरं देवं भवेद्ब्रूत भोः ॥

४. पेशनिनू शिवनुक्कुम्—

ख्यातस्यापि शिवस्य तस्य च विधेरन्यात्मनां चाप्यहो
नाथोऽसौ हि कपालमोक्षचरिते दृश्यं किलैतत्तु वः ।
तेजोधाम्नि च रम्यवप्रकुरुकापुर्यां चकास्तीश्वर-
स्तस्मिन् दोषलवब्रुवामपि फलं किं वाऽस्त्यहो लिङ्गिनाम्? ॥

५. इलिङ्गत्तिट्टपुराणत्तीरुम्—

लैङ्गाश्चापि पुराणवादिन इमे यूयं च ते श्रामणा-
श्शाक्याद्यास्सहसा च वादनिरता या देवतास्ताश्च वः ।
सर्वात्माऽपि स एव विश्ववपुषाऽस्त्युद्गीहिकेदारतो
रम्येऽस्मिन् कुरुकापुरे गुणनिधिर्मिथ्या न हि स्तूयताम् ॥

६. पोत्ति मत्तोर्दैय्वम्—

स्तुत्वाऽन्यामपि देवतान्तु भजतो युष्मान् बहिष्कृत्य य-
स्त्वेवं तत्र च भक्तियुक्तहृदयान् कुर्यादिदं मायया ।
मुक्तिश्चेत्तु भवादृशां जगदहो शास्त्रातिगं स्यादिति
व्रीह्यब्जैः कुरुकापुरेऽतिभरिते भात्येष हि त्वर्यताम् ॥

७. ओडियोडिप्पलपिरप्पुम् ।पिरन्दु—

धावन्तोऽपि च भूय एव बहुधा नाना जनीः प्राप्य चा-
प्याश्रित्येतरदैवतं च विविधैर्गानैश्च नृत्यादिभिः ।
यूयं प्राप्तफलाः किलाद्य सुरबृन्देड्यस्य तार्क्ष्येशितु-
श्श्रीविष्णोः कुरुकापुरेऽत्र भजनं स्यादादिमूर्तेर्वरम् ॥

८. पुक्कडिमैयिनाल्—

दास्यात्तं शिवमाश्रितः किलमु निर्योऽसौ मृकण्ड्वात्मज-
स्तेनाभूत्परिरक्षितश्च तदिदं नारायणानुग्रहात् ।
फुल्लोत्फुल्लसुगन्धसूनविलसत्सत्केतकीभूषिते
भाति श्रीकुरुकापुरे प्रभुरसावाद्यः किमन्यैस्स्तुतैः ॥

९. विलंबुमारुशमयम्मुम्—

शब्दाडम्बरषण्मतादिसमयैर्दुष्टैः कुदृष्ट्यादिभि-
श्शक्यो नैव हि मातुमस्ति च हरिर्यस्त्वादिनाथाह्वयः ।
तस्येदं शुभसन्निधानमतुलं शीताम्बुधारावृतं
रम्यं श्रीकुरुकापुरं हृदि सदा ध्येयं हि मोक्षार्थिभिः ॥

१०. उरुवदावदु—

देवास्तेऽप्यखिलास्समस्तभुवनान्यन्यानि चास्य प्रभो-
र्दिव्या मूर्तिरिति प्रसिद्धविभवैर्भाति स्वयं सेव्यताम् ।
सोऽयं श्रीकुरुकापुरे सुरुचिरैर्व्रीहीक्षुकाण्डैरपि
क्षेत्रैरेव लसत्यहो वटुतनुर्यः कुम्भलीलाश्रयः ॥

११. आळचेय्दाळिप्पिरानै—

भाति श्रीकुरुकापुरेऽत्र वचसा तं चादिनाथं भजन्
नित्योद्यद्वकुळावळीं हृदि वहन् मारश्शठारिर्मुनिः ।
उत्साहात्किल तत्कृते तु दशकं चैतत्सहस्रे विदु-
र्ये तेषां न पुनर्भवोऽस्ति परमं हस्तेऽस्ति दिव्यं पदम् ॥

इति श्रीपरमात्मना श्रीमत्करिकिसिंहमहाकवीन्द्रेण
विरचितायां सहस्रगाथारत्नावळ्यां
॥ चतुर्थशतकं सम्पूर्णम् ॥



अथ पञ्चमशतके

१. प्रथमदशकम् (कैयार्शक्करत्तु)

(अत्र कृपानिधेर्भगवतोऽनुभवप्रकारः प्रकाश्यते ।)

१. कैयार्शक्करत्तु—

हस्तेनोद्धृतचक्र! नीलमणिवर्णेत्येव मिथ्योक्तिभि-
स्स्तुत्वा त्वामहमस्मि बाह्यविषयेष्वेवात्र सक्तस्सदा ।
एवं कृत्रिमबुद्धिरप्यहह ! सम्प्राप्तोऽस्मि सत्यं फलं
भाग्यं वारयितुं प्रभुः क इह ! किं कृष्णासि गन्तुं प्रभुः ॥

२. पोनाय् मामरुदिन्नडुवे—

हे ! युग्मार्जुनमध्यग प्रियमणे मे दिव्यमध्वात्मक
श्रीनाथामृतरूपभागिति बहुप्रेमोक्तिभिस्त्वं स्तुवन् ।
मिथ्याहं नटनैश्च हन्त ! फलभाङ्मय्येव नाथो मम
स्वैरं भाति धराद्युलोकपरमव्योमादिभिश्चाखिलैः ॥

३. वळ्ळलमत्तुळवा—

क्षुद्रेष्वेव किलेतरेषु विषयेष्वासीन्मतिर्मे हरे !
मिथ्याऽहं नटनैरुदार मणिवर्णेत्येव च त्वां स्तुवन् ।
सर्वज्ञस्य च वञ्चकोऽभवमहो तां दुर्दशां सन्त्यजन्
धन्योऽहं तव दर्शनेन हि सुधाम्भोधीन्द्र नान्यद्भजे ॥

४. एन् कौळवनुम् विट्टु—

किं काङ्क्षेऽद्य विना भवन्तमिति च स्तोत्रं मृषा ते स्वयं
कुर्वन् वञ्चक आसमद्य मनसि स्थैर्येण चाश्रुस्रवैः ।
नात्मानं हि निवारयामि विषयान्मद्दृष्टिमालिन्यहा
त्वं मामाह्वय कृष्ण नान्यशरणोऽस्मीत्येवं सत्यं ब्रुवे ॥

५. कण्णपिरानै—

कृष्णं त्वां प्रभुमच्युतं दिवि महासूरीन्द्रसेव्यं शुभं
माणिक्यं मधुरामृतं च मनसा प्राप्यापि न प्राप्नुयाम् ।
मध्ये मामिह देहबन्धकलितं कृत्वा महापातकैः
पाशैर्मां व्रणपीडितं च परितस्तिष्ठन् बहिर्मां न्यधाः ॥

६. पुरमरक्कट्टिक्कोण्डु—

सर्वत्रापि च मां निबद्धय हि बहिर्द्वन्द्वादिभिः पातकै-
स्सन्तप्तं च शरीरसन्ततिरहो हन्त ! व्यधात्तां दशाम् ।
अद्यातीत्य चतुर्भुजं मणिनिभं विम्बाधरं त्वां हरिं
पद्माक्षं शुभचक्रपाणिमतुलं दृष्ट्वाऽस्मि धन्यः पुमान् ॥

७. अम्मानाळिप्पिरानवन्—

चक्री स प्रभुरिन्दिरापतिरहो सूरीन्द्रनाथः क्व वा ?
काहं ? हस्तिमहार्तिनाशनकरेत्येवं किलोद्घोषयन् ।
तद्भक्तिं परमां गतोऽस्मि सुदृढां सत्यां स नाथो मयि
प्रीतश्चास्ति ! विधेरनुग्रहबलात्स्यात्सद्गतिश्चाधिनाम् ॥

८. मेलात्तेवर्कळुम् निलत्तेवरुम्—

दिव्यास्सूरिगणाश्च भक्तनिवहा भूम्यां यमेवाच्युतं
सम्प्राप्ताश्शरणं स भाति हृदये दासस्य मे सुस्थिरः ।
रम्या मे तरुणीगणाश्च सुमहद्भाग्यं सुतास्सद्गुणा
माता चापि पिता स एव च मम श्रीशः किलेतः परम् ॥

९. आवारार्तुणै—

को वा मेऽस्ति सहाय इत्यहमहो संसारपाथोनिधौ
मग्नः पोत इवाम्बुधौ च सुमहाकल्लोलमालाकुले ।
आसं कम्पित एव तत्र च मयि प्रीत्याऽऽविरासीद्धरि-
श्शाङ्गं चक्रमुदारदिव्यवपुषा बिभ्रद्दयावारिधिः ॥

१०. मीनानालुडैयान्—

मीनात्मा कमठाकृतिश्च नरसिंहात्मा स्वयं वामनो
भूत्वा चापि वने वराहवपुषा (१) भावी च कल्किः पुनः ।
एवं नीलपयोदवर्ण इह मां दास्ये तु धृत्वा हरि-
र्भास्वानित्यपि मद्वचोहृतमनास्सर्वात्मको मेऽभवत् ॥

११. कार्वण्णन् कण्णपिरान्—

कृष्णं नीलपयोदवर्णमपि तं नाथं सरोजाम्बकं
स्तोतुं श्रीकुरुकेश्वरश्शठरिपुस्साहस्रमाहाद्भुतम् ।
दिव्यं द्राविडमुत्तमं च दशकं तत्रेदमत्यादरा-
द्ये भक्त्या तु पठन्ति ते किल हरेः पादाम्बुजं प्राप्नुयुः ॥



अथ पञ्चमशतके

*२. द्वितीयदशकम् (पोलिक पोलिक पोलिक)

(अत्र कलिध्वंसपूर्वकः कृतयुगारम्भः प्रकाश्यते ।)

१. पोलिक पोलिक पोलिक—

स्वस्ति स्वस्ति भवत्वनारतमपि स्वस्त्यस्तु नित्यं सतां
विष्णोस्सद्गुणसागरस्य सुगुणान् गायन्ति नृत्यन्ति ते ।
भूम्यामत्र महाशयास्तु परितः पापं प्रणष्टं स्वयं
नैव स्यादिह नारकं न च यमो नश्येत्कलिः पश्यत ॥

---

(१) भावीकल्किरिति सूक्तिरियं पोलिक पोलिकेतिदशकं च श्रीकल्किसिंहावतारमिममेव मामकं सूचयति ।

(२)* श्रीकल्किसिंहावतारसूचकमिदं (मन्माहात्म्यपरं) दशकम् ।

२. कण्डोम् कण्डोम् कण्डोम्—

भक्ता भूमितलेऽत्र दिव्यतुलसीमालाञ्चितं माधवं
गायन्त्येव हि नर्तनैश्च परितस्सञ्चारशीला अपि ।
इष्टं इष्टमिदं हि इष्टमतुलं भोग्यं समृद्धं पदं
तं नन्तुं च पुनःपुनः प्रथयितुं भक्तास्समागच्छत ॥

३. तिरियुम् कलियुगम् नीङ्गि—

शीलव्यत्ययकारि तत् कलियुगं नष्टं स्वयं सूरय-
स्सर्वे चात्र भुवि प्रविश्य च महद्दिव्यं युगं संश्रिताः ॥
प्रख्यातं कृतमेव मोदभरिता नीलाब्दवर्णं हरिं
तं नाथं गुणसागरं हि परितो गायन्ति भक्ता भुवि ॥

४. इडङ्कोळ् शमयत्तै—

सर्वत्र प्रततां च दुर्मततिं चोन्मूलयन्तो यथा
तेऽमी भक्तगणास्तथाऽब्धिशयनं नाथं स्तुवन्तो हरिम् ।
सर्वत्रापि भवन्ति हन्त ! शयितास्तत्रोपविष्टास्स्थिता-
गीतैस्तैर्विविधैश्चरन्ति परितो नृत्तैश्च नाथ्यान्विताः ॥

५. शेयूकिन्नदेन् कण्णुक्कोने—

तत्त्वं भाति हि पश्यतो मम शुभं त्वेकं परं सर्वतो
वैकुण्ठस्य हरेस्तु भक्तनिवहा आश्चर्यवृत्तास्स्वयम् ।
हत्वा चाप्यसुरांस्तु वो भुविभवान् पापान् विपर्यासतः
कालं चात्र हि भेदयन्ति भवतां नात्र स्थितिस्स्याद्ध्रुवम् ॥

६. कोत्रयिरुण्णुम् विशादि—

हत्वा प्राणविनाशकाः किल महाव्याधिश्च वैरी क्षुधा
चेति क्रूरगणा भुवीति हि हरेश्श्रीचक्रपाणेर्विभोः ।
भक्तास्तद्गुणगाननृत्तसहितास्सर्वत्र सञ्चारिणो
दृश्यन्ते चपलास्तु यूयमपि तान्नत्वा स्त चोज्जीविताः ॥

७. निरुत्तिनुम्मुकलत्तुक्कोल्लुम्—

युष्माकं हृदयं प्रविश्य सुदृढा या देवतास्ता अपि
श्रीशं प्राप्य फलप्रदास्तदिह साक्ष्यास्ते मृकण्ड्वात्मजः ।
दृष्ट्वैवं वत निश्चिते हि मलिनं माऽस्त्वेव चित्तं तु वः
कृष्णान्नैव परन्तु दैवमखिलं तद्विग्रहेष्वर्प्यताम् ॥

८. इल्क्कुमिरैयिरुत्तुण्ण—

कर्तव्यामपि कृत्यसन्ततिममी देवा भजन्तु स्वयं
चाराध्या जगतीति मूर्तिसरणिं स्वीयां हरिस्स्थापयन् ।
देवानामधिदेव एव जयति श्रीवत्सवक्षाश्च तं
गीतैर्नृत्तयुता भजन्ति विमलास्तान् प्राप्य धन्यास्त भोः ॥

९. मेवित्तोळुदुयुमिनीकंळ्—

वेदस्थामपि सूक्तिसन्ततिममीं वाचा पठन्ति स्वयं
शुद्धां भक्तियुताश्च धूपकुसुमैर्दीपैश्च गन्धोदकैः ।
आराध्याच्युतमेव दास्यनिरताः केचिच्च योगान्विता-
दृश्यन्ते भुवि तान् प्रणम्य भवत प्राप्यानिहोज्जीविताः ॥

१०. मिक्कवुंलकुकळ्तोरुम्—

रुद्रश्चापि चतुर्मुखश्शतमखश्चान्येऽपि देवास्स्वयं
कृष्णं श्रीशमिमं प्रपद्य शरणं लोकेषु सर्वत्र च ।
प्राप्तास्सम्पदमुत्तमां किल तथा हे चञ्चलास्तं हरिं
यूयं च प्रणमेत चेत्कलियुगं नैवास्ति कुत्रापि वः ॥

११. कलियुगमोन्नमिनिक्कं—

भक्तानां न भवेद्यथा कलियुगं त्राता तथा श्रीहरिः
कृष्णो भाति दयानिधिश्च परमं ज्योतिश्च मायी प्रभुः ।
स्तोतुं तं शठजित्सहस्रमवदत्कारीशसूनुर्मुनि-
र्मारारव्यस्तदिदं च तत्र दशकं दोषच्छिदन्तर्हृदि ॥

अथ पञ्चमशतके

३. तृतीयदशकम् (माशरु शोदि)

(श्रीशठारेर्नायिकावस्था) (सखीसम्बोधनम्)

१. माशरु शोदि—

माणिक्याद्रिममुं प्रभुं मम हरिं बिम्बाधरं श्रीधरं
ज्योतिर्निर्मलमादिमूर्तिमनघं सौशील्यवारान्निधिम् ।
अन्विष्यानिशमस्मि हन्त नितरां श्रान्ता स्वयं कर्शिता
किं मे स्यात्सखि निन्दनैकमनसां जल्पैर्जनानां भुवि ॥

२. एन् शेय्युमूरवर्कळ्वै—

पद्माक्षः किल मां विजित्य नितरां भाति स्वयं चोज्ज्वल-
स्तत्संश्लेषविवर्जिताऽस्मि वपुषि ग्लान्या भृशं कर्शिता ।
वक्त्रे नेत्रयुगे च मे धवळता चास्त्येव वैवर्ण्यतः
किं वा स्यात्सखि नः प्रजल्पवचनैर्लोके नृणां मौढ्यतः ॥

३. ऊर्न्द शकडमुदैत्त पादत्तन्—

श्रीनाथश्शकटप्रभञ्जनपदो मायात्मिकां पूतनां
हन्तुं स्तन्यरसप्रयुक्तवदनो मामद्य हि क्रीतवान् ।
भूयो भूय इहोक्तिसन्ततिमहं वच्मि स्वयं तत्परां
नान्यां प्राणसखि प्रिये किमिह मे कुर्यान्नृणां निन्दनम् ॥

४. ऊरवर्कळ्वै—

लोकानां परिवाददोहदभरान्मातुर्वचश्चोदकं
धारारूपमिदं प्रकल्प्य नितरामुप्त्वा च कामात्मकम् ।
बीजं क्षेत्रसमे मनस्यतितरां संवर्ध्य नानाविधा-
माशां पूरयिताऽम्बुदः किमिह मे कृष्णोऽस्ति निन्द्यस्सखि ॥

५. कडियन् कोडियन् नेडियमाल्—

क्षिप्रं कार्यकरोऽस्त्ययं दृढमतिस्सर्वेश्वरश्श्रीधरो
लोकानां वशकृच्च वञ्चकतमस्सर्वात्मचेतोऽतिगः ।
सौन्दर्येण च मोहनोऽयमिति मे चित्तं तमेवाश्रितं
किं कुर्यां सखि सुन्दरीह जननीवाचाऽद्य किं मे भवेत् ॥

६. अन्नैयेन् शेय्यिलेन्—

हे सख्यः प्रथमस्य सूरिसरणेश्श्रीद्वारकाधीशितुः
पाशेऽहं कलितास्म्यहो मणिनिभश्रीवासुदेवात्मनः ।
आशा माऽस्तु ततोऽत्र मां प्रति तु वः किं मातृकृत्याद्भवेत्
किं स्यात्पौरजनप्रवादवचनात् सर्वं वृथा भाति मे ॥

७. वलैयुळकप्पडुत्तेन्नै—

पाशैर्मां च निबद्ध्य मेऽत्र हृदयं जित्वा स्वयं वारिधौ
यश्शेते स्म मम प्रभुस्तमतुलं श्रीचक्रपाणिं हरिम् ।
दृष्ट्वाऽऽत्वां सखि चक्षुषैव मुदितौ पश्यत्सु नारीजने
ष्वेवं निन्दनतत्परेषु शिरसा किं तं च वन्देवहि ॥

८. पेय्मुलैयुण्डु—

पीत्वा स्तन्यमहो निहत्य च महामायां तु तां पूतनां
चूर्णीकृत्य च तं खलन्तु शकटं निर्मूल्य वृक्षार्जुनौ ।
वक्त्रं चापि विदार्य हे सखि बकस्यासीद्व्रजं यो जयन्
तं पश्येम कदा वयन्तु जननीलज्जावहास्सस्मितम् ॥

९. नाणुम् नि रैयुम् कवन्दु—

हृत्वा मे सकलां त्रपां च विनतिं चेतोऽपि भव्यं मम
श्रीशस्सूरिवरप्रभुर्दिवि महानास्ते हि भव्यं सखि ।
सत्यं त्वां हि शपे समस्तजगतां प्रख्यापयामि स्वयं
तं मे वञ्चकमद्य सर्वविधिभिर्धृष्टा त्ववद्यावहा ॥

१०. यामडलन्दुम्—

लज्जां चापि विहाय वीथिसरणिष्वेनन्तु नारीजना-
स्सर्वे हन्त ! विनिन्द्य वञ्चकमहो कान्तं शपेयुर्यथा ।
सत्यं हन्त ! तथा भवेयमपि चावद्याश्रया निस्त्रपा
धर्तुं श्रीतुलसीस्रजं मम विभोः कान्तस्य वै चक्रिणः ॥

११. इरैक्कुम् करुक्कडलवण्णन्—

गम्भीराम्बुधिवर्णमच्युतममुं कृष्णं प्रभुं श्रीधरं
स्तोतुं श्रीकुरुकापुरंप्रभुरहो दिव्यां शठारिर्जगौ ।
साहस्रात्मकरम्यपद्यसरणिं त्वन्तादिरूपां शुभां
तत्रेदं दशकं पठन्ति भुवि ये तेषां पदं स्यात्परम् ॥

अथ पञ्चमशतके

४. चतुर्थदशकम् (ऊरेल्लाम् तुञ्जि)

नायिकावस्थायां विरहवेदना ।)

१. ऊरेल्लाम् तुञ्जि—

सुप्ताः पौरजनाः किलाद्य सकलास्सर्वत्र रात्रिस्त्वियं
गाढान्धं तम एव भाति सलिलान्यद्य प्रशान्तानि हि ।
दीर्घा रात्रिरियं दिवानिशमपि व्याप्ता जगद्रक्षको
विष्णुश्शेषशायी न मामयमुपैत्याः कोऽद्य मे रक्षकः ॥

२. आवि कप्पारिनि यार्—

अद्यैव भूमितलं किलाद्य गगनं सर्वं च रात्रिस्त्वियं
व्याप्यातीव तमोमयी च विकृता दीर्घाऽस्त्यहो सर्वतः ।
कृष्णो नीलमणिप्रभस्तु न हि मामायात्यहो पापिनीं
हे चित्त त्वमपीह तद्वशतया नैवानुकूलं मम ॥

३. नीयुम् पाङ्गल्ले काण् नेञ्जमे—

हे मच्चित्त! न मेऽनुकूलविधया भासि त्वमप्यद्य हा
रात्रिश्चाद्य युगायते निरवधिश्शार्ङ्गी तु नायाति माम् ।
काकुत्स्थो हरिरच्युतः प्रबलदुष्कर्मावृतां हन्त हा
नारीजन्मवशा त्वहं न किल मे पश्यामि रीतिं मृतेः ॥

४. पेण्पिरन्दारेय्दुम्—

द्रष्टुं नैव सहेऽद्य दुःखममितं नारीजनानामिति
क्वापि श्रीदिनकृच्च लीन इह मे दृश्यो न नीलाम्बुदः ।
पद्माक्षो हरिरच्युतोऽप्यवनिजिद्बिम्बाधरो वामनः
को वा हन्त मनोऽतिगां च महतीं चिन्तारुजं मे हरेत् ॥

५. आरेनैयाराय्वार्—

किं मे स्यादिति नैव हन्त जननीवर्गास्सखीनां गणाः
पृच्छन्त्यद्य निशासु दीर्घसमयास्वेते हि सुप्तास्स्वयम् ।
नीलाम्भोदतनुर्हरिर्मम विभुः कृष्णोऽद्य नायात्यहो
पापिन्या मम नाम शेषयति मां को वाऽद्य मामुद्धरेत् ॥

६. पिन्निन्न कादलनोय्—

पश्चान्मामनुयाति कामरुगियं चित्तं तु सम्पीड्य मे
रात्रिर्मे पुरतोऽस्ति कल्पसदृशी चक्षुस्तिरोधाय मे ।
चक्री मे प्रभुरद्य मां न समुपैत्याः कोऽद्य सर्वात्मना-
ऽप्येवं निर्गतिकं तु पालयति मे जीवं दशायामिह ॥

७. काप्पारारिङ्गिवडत्तु—

को वा स्यादिह रक्षिता मम निशा सेयं हि दीर्घा स्वयं
भात्येवाद्य तु कल्पवत्स तु हरिर्नायाति मां मत्प्रियः ।
दीप्रश्वेतसुशङ्खचक्रभृदहो पापानि मे दाहका-
न्येवं तापकराणि हन्त किमहो कुर्यामहं देवताः ॥

८. देय्वङ्गाळेन् शेय्केन्—

देवाः किं करवाणि रात्रिरधुना मे सप्तकल्पायते
प्राणान् मे कृशयत्यहो बहुतमामग्रे भवन्ती स्वयम् ।
नायात्येव मम प्रभुः प्रियतमः कृष्णस्तु चक्री हरि-
र्मामन्विष्य हि चन्द्रिकाऽपि दहति ज्वालामयी भाति मे ॥

९. येम् शुडरिल् तानडुमाल्—

सेयं हन्त निशा हि सान्द्रतमसा शीता हिमेनावृता-
ऽप्येवं मां दहति स्वयं दहनवन्नाद्यापि दृश्यो रथः ।
भानोरुत्तमतेजसा मम विभुः कृष्णस्तु नायात्यहो
पद्माक्षः किल भाग्यवानिह महत्को मेऽद्य दुःखं हरेत् ॥

१०. निम्रुल्कुकिनूने पोल—

सन्तप्ता यदहं द्रवीकृततनुस्सेयं च रात्रिस्तथा-
ह्याकाशे तुहिनद्रवैरुपगता भात्येव दीर्घा स्वयम् ।
लोकान् पादतलेन यः प्रभुरहो चक्राम पूर्वं हरि-
र्नायात्येव स इत्यपीह न वदत्येवं हि सुप्तं जगत् ॥

११. उरङ्गुवान् पोल्—

क्षीराब्धौ शयितं च योगशयनं नाथं हरिं श्रीधरं
स्तोतुं श्रीकुरकापुरप्रभुरयं चक्रे शठारिर्मुनिः ।
साहस्रं शुभमुत्तमं सुरुचिरं त्वन्तादिरूपं सुधी-
स्तत्रेदं दशकं शरीरविरहे दिव्यं पदं प्रापयेत् ॥

अथ पञ्चमशतके

५. पञ्चमदशकम् (एङ्गनेयो अन्नैमीर्काळ्)

(तिरुक्कुरुङ्गुडि स्वामिपरम् नायिकावचनम् ।)

१. एङ्गनेयो अन्नैमीर्काळ्—

मां किं निन्दथ यूयमद्य जननीवर्गाः! प्रियं सुन्दरं
दृष्ट्वा पूर्णममुं १ कुरङ्गनगरीनाथं कुलेन्द्रं च नः ।
चित्तं मे ननु शङ्खचक्रयुगळे बिम्बाधरे श्रीहरे-
र्नेत्राम्भोजयुगे च सक्तमनिशं तैरेव याति स्वयम् ॥

२. एन्नेञ्जिनाल् नोक्कि—

मन्निन्दान्तु विहाय मेऽद्य मनसा यूयं च भो पश्यत
श्रीशं पूर्णममुं कुरङ्गनगरीनाथं हि दृष्ट्वा मम ।
सर्वत्रापि पुरश्चकास्ति सततं यज्ञोपवीतं शुभं
विष्णोस्तस्य च कुण्डलं (२)भुजयुगे श्रीवत्सभूषादिकम् ॥

३. निन्निडुम् तिरैक्कुम्—

स्तब्धा तिष्ठति च भ्रमान्धहृदया शैथिल्यवश्या स्वयं
चेत्येवं किल मान्तु निन्दथ जनन्योऽद्रयायितैरुन्नतैः ।
प्रासादैर्भरितां कुरङ्गनगरीं शास्तुर्हरेर्दर्शनात्
पश्चाच्छार्ङ्गगदासिचक्रजलजान्येवाग्रतो मे सदा ॥

---

(१) " तिरुक्कुरुङ्गुडि " इति नामधेयमस्य नगरस्य व्युत्पत्ति-मन्यामेव प्रकाशयति । तथाऽपि संस्कृतशैलीसौकर्यार्थमत्र " कुरङ्गनगरी " इति नामधेयं कल्पितम्-शब्दसाम्यात् अनेन झडिति स्फूर्तिर्भवेदिति ।

(२) भुजचतुष्टयम् ।

४. नीळनिळाक्कण्णनीर्कॊळ्—

नैषा बाष्पवियुक्तनेत्रयुगळेत्येवं हि मां मातरो!
यूयं चापि विनिन्दथ प्रियममुं दृष्ट्वाऽस्मि मुग्धा हरिम् ।
श्रीशं दिव्यकुरङ्गरम्यनगरीनाथं हि तस्मादहो
दिव्यशङ्खकुटाङ्गपट्टवसनं दामादि पार्श्वे मम ॥

५. पक्कम् नोक्किनिर्कुम्—

पार्श्वं पश्यति चास्ति हन्त शिथिलेत्येवं हि मां मातरो!
यूयं निन्दथ दिव्यकीर्तिमनघं दृष्ट्वा हरिं श्रीधरम् ।
मुग्धाऽहं हि कुरङ्गरम्यनगरीनाथं ममात्मन्यहो
तस्याऽऽस्ते ह्यधरोऽपि बिम्बसदृशो ह्ययुग्मनेत्राम्बुजम् ॥

६. मेलुम् वन् पळिनङ्गुविक्कु—

अस्माकं कुलपांसनीयमिति मां माता स्वयं वारय-
त्येव श्रीहरिदर्शनादहमहो मुग्धाऽस्मि दृष्ट्वा च तम् ॥
श्रीशं दिव्यकुरङ्गरम्यनगरीनाथं ममास्ते हृदि
श्रीनासाऽक्षियुगाधराङ्गरुचिभिस्साकं चतुर्बाहुभिः ॥

७. नि रैन्दवन् पळि—

अस्माकं हि कुलस्य हन्त कुरुते सेयं कळङ्कं त्विति
द्रष्टुं तं किल नावकाशमधुना माता ददात्यत्र मे ।
धन्याऽहं हि कुरङ्गरम्यनगरीनाथस्य सन्दर्शना-
न्मय्येवास्ति स तेजसां निधिरहो दिव्याकृतिश्चक्रभृत् ॥

८. कैयुळ् नन्मुकम् वैक्कुम्—

हस्ते हन्त करोति वक्त्रममलं शैथिल्यवश्या त्वियं
चेत्येवं किल मान्तु निन्दथ जनन्योऽद्यापि यूयं वृथा ।
दृष्ट्वाहं हि कुरङ्गरम्यनगरीनाथं वशाऽस्यैव य-
द्दिव्यं लोचनपद्मकेशकटिबाह्वाद्यं पुरो भाति मे ॥

९. मुषिप्पायेनु तोळिमार्कॅंळुम्—

अग्रे त्वं कथमद्य भासि च नृणामित्येव निन्दन्ति मां
तेऽमी हन्त ! सखीजनांश्च जननीवर्गा भवन्तोऽधुना ।
दृष्ट्वा रम्यकुरङ्गदिव्यनगरीनाथं हि धन्याऽस्मि मे
चित्तं न त्यजतीक्षुदुग्धमधुरो भूषान्वितो मौळिभृत् ॥

१०. कळियसिन्कदोकॉदळक्किवळ्—

सेयं कामवशेति मान्तु जननी तद्दर्शनाद्वारय-
त्येवं हन्त कुरुङ्गदिव्यनगरीनाथं हि दृष्ट्वाऽस्म्यहम् ।
देवैस्सूरिवरैश्च सेव्यमतुलं तेजोमयं तद्वपु-
श्चित्ते मे सततं चकास्ति तदिदं वेद्यं हि नान्यैरहो ॥

११. भरिवरियपिरानै—

ज्ञातुं दुश्शकमच्युतं हि जगतां नाथं हरिं श्रीधरं
स्तोतुं चक्रधरं च दिव्यकुरुकापुर्याश्शठारिः प्रभुः ।
साहस्रं शुभदिव्यपद्यकुसुमावळ्यात्मकं व्यातनो-
त्तत्रेदं दशकं कुरङ्गपुरगं ज्ञात्वा जना वैष्णवाः ॥



अथ पञ्चमशतके

६. षष्ठदशकम् (कडल् ञालम्)

(अत्र नायिकाया अवस्था तन्मात्रा वर्ण्यते ।)

१. कडल् ञालम् शेय्देनुम्—

पृथ्वीं पयोनिधिवृतामहमेव कृत्वा
पृथ्वी पयोनिधिवृताऽप्यहमस्मि सत्यम् ।
पृथ्वीं पयोनिधिवृतां यदहं गृहीत्वा
पृथ्वीं पयोनिधिवृतां धृतवत्यहं हि ॥

पृथ्वीं पयोनिधिवृतामहमेव भुक्त्वा
वर्ते किलेति जगदीश्वरसम्प्रविष्टा ।
सेयं सुता मम कथं भवतीह लोके
युष्मान् वदानि कथमद्य चरित्रमस्याः ॥

२. कर्कुम् कल्विक्कु—

विद्यासु चास्म्यनवधिः किल सीमभूमि-
र्विद्यात्मिकाऽपि सकला त्वहमेव सत्यम् ।
विद्यां किलाहमखिलां स्वयमेव कृत्वा
विद्यामहार्षमखिलामहमेव चान्ते ॥
विद्यासु सारतममप्यहमस्मि सत्यं
चेत्येव वक्ति तनया मम सम्प्रविष्टा ।
विद्येश्वरेण हरिणा कथमद्य युष्मान्
विद्याश्रयान् किमिति वच्मि कथामिहास्याः ॥

३. काण्किनृ निलमेल्लाम्—

दृश्या किलास्मि पृथिवी सकलाऽहमेव
दृश्यं किलाहमखिलं गगनं स्वयं तत् ।
दृश्योऽपि हन्त दहनोऽप्यहमेव चोष्णो
दृश्योऽपि वायुरखिलोऽस्म्यहमेव सत्यम् ॥
दृश्योऽपि वारिनिधिरस्म्यहमेव सर्व-
श्चेत्येव वक्ति तनया मम सम्प्रविष्टा ।
दृश्येन चाम्बुनिभिवर्णयुतेन तेने-
त्येवं किमद्य चरितं तु वदानि वोऽस्याः ॥

४. शैय्किनू कितियेल्लाम्—

कृत्यं च सर्वमहमेव हि वर्तमानं
कृत्यं च भावि सकलं त्वहमेव सत्यम् ।
कृत्यं च भूतमखिलं त्वहमेव सत्यं
कृत्यावळेश्च फलभुक् स्वयमेवचास्मि ॥
कर्त्रीवळीं च सकलामहमेव कृत्वा
वर्ते किलेति तनया मम वक्ति मुग्धा ।
श्रीपुण्डरीकनयनेन हि सम्प्रविष्टा
वृत्तं कथं बत वदानि च कोमलाङ्ग्याः ॥

५. तिरम्बामल् मण्काक्किनेन्—

आज्ञां प्रचार्य पृथिवीं परिपालयामि
स्वैरं गिरिं तमचलं समधारयं प्राक् ।
सर्वासुरावळिमहं न्यहनं पुरा तां
तान् पाण्डवानपि च तन्त्रगिराऽप्यरक्षम् ॥
सङ्कल्पसिद्धिविधये जलधिं प्रमथ्य
स्वाभीष्टभागहमितीह सुताऽद्य वक्ति ।
सेयं ममाम्बुधिनिभेन हि सम्प्रविष्टा
किं वाऽद्य वच्मि तनयां प्रति वोऽम्बुजाक्षीम् ॥

६. इनवेय्मलैयेन्दिनेन्—

गोवर्धनोद्धरणकृत्स्वयमेव चाहं
सप्तर्षभानपि विनाश्य जगत्प्रसिद्धा ।
क्षेत्रेषु वत्सनिवहानपि घासयन्ती
सर्वानहं पशुगणानपि तानरक्षम् ॥
गोपालबालनिवहाधिपतां गताऽहं
त्वित्येव वक्ति तनया मम सम्प्रविष्टा ।

देवेश्वरेण खलु तेन कथं वदेयं
शीलन्तु वोऽद्य ललिताङ्ग्य इहोत्पलाक्ष्याः ॥

७. उत्ताकंळेनक्किल्लै यारुम्—

नैवात्र वान्धवजना मम सन्ति लोके
सर्वेऽत्र वान्धवजना मम सन्ति चेति ।
सर्वान् करोमि मम बन्धुजनान् किलाहं
मामाश्रितानपि फलैकरतांस्त्यजामि ॥
मामेवं संश्रितवतामहमस्मि वन्धु-
रित्येव वक्ति तनया मम सम्प्रविष्टा ।
मायामयेन हरिणा किल निस्समेन
किं वो वदामि वचसा वचनं कृशाङ्ग्याः ॥

८. ऊरैक्किन् मुक्कण्पिरान्—

सोऽपि त्रिणेत्र उदितस्स्वयमस्मि चेश-
स्सोऽपि स्वयं किल चतुर्मुख एव चास्मि ।
देवाश्च ते स्वयमहं जगति प्रसिद्धा-
देवेश्वरोऽपि विदितस्स्वयमेव चाहम् ॥
तेऽपि स्वयं च मुनयः प्रथिताः किलाहं
त्वित्येव वक्ति तनया मम सम्प्रविष्टा ।
नीलाम्बुदाभवपुषा हरिणाऽद्य किं वा
युष्मान् वदानि चरितं मम कोमलाङ्ग्याः ॥

९. कोशियविनै पाडुमिलने—

कर्मादिदोषरहिता स्वयमस्मि चाहं
सर्वात्मकर्मसरणिस्स्वयमस्मि चाहम् ।
दुष्कर्मराशिजननी स्वयमेव चाहं
दुष्कर्मबन्धततिमोक्षकरी च साऽहम् ॥

दुष्टाश्रितामहमनाशयमेव लङ्का-
मित्येव वक्ति तनया मम सम्प्रविष्टा ।
तार्क्ष्यध्वजेन हरिणा खलु किं वदेयं
वेषानिहाद्य भुवि वो बत मे लताङ्ग्याः ॥

१०. कोलक्कोलक्षुवक्कर्कसुम्—

भोग्यं स्वयं दिविषदां पदमप्यहं हि
क्लेशास्पदं च नरकं त्वहमेव चास्मि ।
मोक्षोऽप्यनन्तसुखदः परमोऽहमेव
स्वांशैरहं हि सकला अपि जीववर्गाः ॥

सर्वस्य मूलमपि चास्म्यहमेव चाद्यं
त्वित्येव वक्ति तनया मम सम्प्रविष्टा ।
दिव्याम्बुदाभवपुषा हरिणा किलाहं
किंवोऽद्य वच्मि तनयां प्रति मे सुकेशीम् ॥

११. कून्दल्मलमैङ्गैक्कुम्—

लक्ष्म्याः प्रियं च पतिमच्युतमत्र भूम्याः
नीळाप्रियं च हरिमेव हृदि प्रपद्य ।
स्तोतुं शठारिरतनोत्कुरुकापुरेशो
दिव्यां सहस्रशुभपद्यततिं हि हृद्याम् ॥

तत्रान्तरङ्गहरिकिङ्करवृत्तिबोधि
श्रेयः पठन्ति भुवि ये दशकं त्विदं ते ।
लोकेऽत्र भाग्यमपि भोग्यतमं प्रपन्ना-
श्श्रीशस्य भक्तनिवहानपि पूजयन्ति ॥

———०———

अथ पञ्चमशतके

७. सप्तमदशकम् (नोत्तनोम्बिलेन्)

(अत्र श्रीवरमङ्गलनगराधीश्वरविषये भक्तिपारवश्यं प्रकाश्यते)

१. नोत्त नोम्बिलेन्—

नाहं कर्मविदां वरो न च हरे श्रीज्ञानयोगान्वितो
विष्णो त्वद्विरहं तथाऽपि न सहे जातु स्वयं श्रीपते ।
स्वामिन् शेषशय प्रकाशिततनो श्रीपङ्कजव्रीहिभि-
र्दीप्रे श्रीवरमङ्गलाह्वयपुरे नैवास्मि तेऽहं बहिः ॥

२. अङ्गुत्तेनल्लेनिङ्गुत्तेनल्लेन्—

नाहं तत्र भवामि नात्र च भवाम्याशावशोऽहं तव
प्राप्त्यै नैव भवामि कुत्र चिदपि श्रीमन् हरे मे प्रभो ।
लङ्काध्वंसक चन्द्रसन्निमणिसौधावल्युपेते वसन्
दिव्ये श्रीवरमङ्गलाह्वयपुरे चक्रिन् प्रसन्नो भव ॥

३. करुळप्पुळकोडि—

हे तार्क्ष्यध्वज चक्रभृच्च परमव्योमेश्वर श्रीधर-
स्त्वं नीलाम्बुदसन्निभोऽसि कृतवान् सन्तं ह्यसन्तं हि माम् ।
कैङ्कर्यं परिगृह्य मे विजयसे दिव्ये चतुर्वेदवि-
द्वासे श्रीवरमङ्गलाह्वयपुरे नाहं कृतज्ञस्त्वयि ॥

४. माखोपंडैनूत्तुवमंङ्ग—

सङ्घीभूतशतारिसैन्यमथनस्त्वं पाण्डवान् पञ्च तान्
मायायोधनकृत्प्रपाल्य च रिपून् धूळीकृतांश्चाकरोः ।
स्वामिन् भूमिसमुद्धृतिं च कृतवां स्त्वं वैदिकाराधितो
दिव्ये श्रीवरमङ्गलाह्वयपुरे भासि क्व वा त्वां भजे ॥

५. पुयल्कूदुलावदे—

त्वत्प्राप्त्यै किमहं च साधनपरस्त्यां त्वं हि मायाविनां
मध्ये कृत्रिमचेष्टितोऽम्बुदनिभस्स्वामिन्नभूः ख्यातिमान् ।
लोकेऽस्मिन् कृतकृत्यतामुपगतैस्सेव्ये च दिव्ये वसन्
शेषी श्रीवरमङ्गलाह्वयपुरे दृष्टं मयाऽपि स्वयम् ॥

६. एनमाय् निलम् कीण्ड—

वाराहो धरणीसमुद्धरणकृत्त्वं मेऽसि नाथो हरे
कृष्ण त्वं मम दास्यमेतदखिलं माणिक्यवर्णावृणोः ।
सूरीन्द्राधिप सद्रसालमधुरे सेव्योऽस्यहो शीतले
दिव्ये श्रीवरमङ्गले निवसतां मां पश्य दिव्याचल ॥

७. पन्दुलवियेन्नोञिडक्कोण्ड—

आगत्यात्र हृदीह मे वससि भो देवाधिदेवाच्युत
श्रीशस्त्वं जगतां प्रसूरपि पिता लोकान् किलाभक्षयः ।
सेव्यस्त्वं किल वैदिकैस्सुचरितैर्निस्सीमकीर्तिर्हरे
दिव्ये श्रीवरमङ्गलाह्वयपुरे मां न त्यजेर्जातु चित् ॥

८. अकत्त नी वैत्त मायम्—

विश्लेषाय ममेन्द्रियाणि च सृजन् पञ्चापि मायामया-
न्येवं किं कुरुषे च मज्जयसि किं दुस्सङ्गमोहाम्बुधौ ।
भास्वच्छ्रीमणिसौधराजिरुचिरे दिव्ये स्वयं भ्राजसे
नाथ श्रीवरमंगलाह्वयपुरे गुप्तो बकध्वंसकः ॥

९. पुळ्ळिन् वाय्पिळन्दाय्—

श्रीमन् हे बकवक्त्रदारक विभो द्वन्द्वार्जुनध्वंसक
स्वामिन् सप्तवृषप्रभञ्जक तव प्रेक्ष्याऽस्मि मायिन् गुणान् ।
दुर्ज्ञेयानिह विस्मितोऽस्मि महसा माणिक्यनीलोऽस्यहो
दिव्ये श्रीवरमङ्गले श्रुतिविदां वासे कृपां मे कुरु ॥

१०. आरेनक्कु निन् पादमे शरणाक—

त्वत्पादाम्बुजयुग्ममेव शरणं कृत्वाऽसि मे रक्षक-
स्तेऽहं नास्मि किलोपचारकृदहो वश्यो ममात्माऽपि ते।
व्रीहीक्ष्वादिफलाश्रये च रुचिरे दिव्यं स्वयं शीतले
भास्वन् श्रीवरमङ्गले विजयसे देवेश मौळ्युज्ज्वल॥

११. देय्वनायकन्—

देवेशाच्युत हे त्रिविक्रम हरे नारायण श्रीधर
स्वामिन्नित्ययमुत्तमं हि कुरुकापुर्याश्शठारिः प्रभुः।
स्तोतुं चाह सहस्रमत्र दशकं चेदं विदुर्ये भुवि
प्राप्यं श्रीवरमङ्गलं मति पुरं ते सूरिभोग्या दिवि॥

अथ पञ्चमशतके

८. अष्टमदशकम् (आरावमुदे)

(अत्र फलसिद्धिमप्राप्तश्शठारिः श्रीकुम्भपुर्यां(तिरुक्कुडन्दै)
पूर्णामृतस्वामिसन्निधावार्तिसहितः प्रपत्तिं
करोति।)

१. आरावमुदे—

स्वामिन् पूर्णामृत त्वत्पदकमलयुगे भक्तिहर्षप्रकर्षा-
न्नित्यं सत्यं द्रुतं स्यान्मम वपुरखिलं संस्रवत्येवं दास्यात्।
श्रीमत्यां कुम्भपुर्यां सुरुचिरबहुलव्रीहिसंवाञ्छितायां
दिव्यालङ्कारशय्यामधिशयितमिदं तेऽद्य रूपं हि दृष्टम्॥

२. पुम्माने श्रेन् वेळ्ळैमूर्ति—

मन्नाथ त्वं शुभाङ्गो मम पतिरखिलानन्तरूपोऽसि दिव्य-
श्रीमद्रम्याकृति श्रीवृषभ शुभमहाम्भोजसौम्याम्बुराशौ ।
श्रीमत्यां कुम्भपुर्यां मधुभरितसरोजाक्ष निद्रासि नाथ
त्वद्भक्तोऽहं किमद्य स्वयमिह करवै ब्रूहि विष्णो दयाळो ॥

३. पुन्नान् शेय्केन्—

किं वा कुर्यां ममाद्य स्वयमवनरतः कोऽस्ति किं वा करोषि
त्वत्सान्निध्याद्विनाऽहं न किमपि च कुतोऽप्यर्थये वाञ्छितं मे ।
श्रीमत्यां कुम्भपुर्यामतिदृढवलयैरावृतायां शयान
त्वत्पादाब्जे तु भक्त्या कुरु मम भरितान् वासरानप्यशेषान् ॥

४. शेलक्काण्किपार —

माहात्म्यं तेऽस्त्यपारं विशदमतिजुषां दिव्यदृष्टेरतीतं
निस्सीमं सर्वलोकात्मकनिजवपुषा दिव्यमूर्ते विभासि ।
कुर्वेऽहं कुम्भपुर्यां सुमहितभगवद्भक्तवर्गाश्रितायां
सुप्तं त्वां द्रष्टुकामो गगनमपि विलोक्याञ्जलिं क्रन्दनं च ॥

५. अलुवन् तोलुवन्—

क्रन्दाम्येवार्चयामि स्वयमहमनिशं नर्तनैश्चापि गानै-
श्श्रान्तोऽस्मि त्वां दिदृक्षुर्मम कलुषभरात्पार्श्वतो लज्जितस्स्याम् ।
रम्यायां कुम्भपुर्यां सुरुचिरमहितक्षेत्रसस्यावृतायां
पद्माक्ष त्वां शयानं श्रितमिममधुना तारय त्वं हरे माम् ॥

६. शूलकण्डाय्—

सूरीन्द्रः कुम्भपुर्यां वसति किल भवान् भाग्यवद्भिस्सुसेव्य-
श्श्रोत्रस्यात्यन्तभोग्यामृतनिधिरुचितं सत्फलं मानसस्य ।
सिंह श्रेष्ठ त्वदीयं पदयुगळमहं प्राप्तुमप्यर्हं एवं
दुष्टाशाघोरकूपे निपतित इति यन्मे कदा वोद्धृतिस्स्यात् ॥

७. अरियैरेयेन्नम्—

सिंहेन्द्र त्वं सुरम्यं कनकमयमहाज्योतिरेवासि सत्यं
पद्माक्षो नीलमेघो रिपुकुलदहनस्त्वं प्रवाळाद्रिरेव ।
स्वामी मे त्वं चतुर्बाहुगुणविभवस्त्वत्कृपा मेऽस्ति दास्ये
श्रीश त्वं कुम्भपुर्यां विलससि न सहे हन्त मुक्तिं प्रदेहि ॥

८. कळैवाय्तुन्बम्—

मायी त्वं चक्रपाणिर्विलससि भगवन् कुम्भपुर्यां शयानः
किं दुःखं नाशयेर्मे किमुत न च तथा नास्ति चान्यागतिर्मे ।
देहान्मत्प्राणयाने न भवतु पतनं मे मुरारे पदाब्जं
भद्रं ते मे शरण्यं वितरतु च भवान् नित्यसेव्यं च भोग्यम् ॥

९. इवैयिरेन्नै—

त्वत्पादाब्जप्रणम्रं कुरु मयि कृपया मां च देवाधिदेव
श्रीमानस्यादिमूर्तिं स्फुरुचिरमणिभृत्कुम्भपुर्यां शयानः ।
निश्शङ्कं लोकशस्योऽस्यपि तव गमनं रम्यगम्भीरभावं
द्रष्टुं मेऽस्त्यद्य काङ्क्षा त्यज तव शयनं देहि मे दृष्टिभाग्यम् ॥

१०. वारावरुवाय्—

मायामूर्तिस्त्वदृश्योऽस्यपि मम हृदये भासि माधुर्यपूर्ण-
स्सत्यं पूर्णामृतात्मा सकलकलुषसन्तापहन्ताऽन्तरात्मा ।
मन्नाथः कुम्भपुर्यां विलसितविभवस्त्वं मुरारे कथं वा
त्वत्पादाब्जं प्रपन्नोऽप्यहह भवभयाम्भोधिमग्नो भवेयम् ॥

११. उळलैयेन्बिल्—

कृष्णस्यैवाङ्घ्रियुग्मं शरणमनुकलं पूतनाप्राणहन्तु-
स्सम्प्राप्यासौ शठारिर्मुनिरिह कुरुकापत्तनेशः कवीन्द्रः ।
वेणुक्वाणातिरम्ये दशकमिदमपि प्राह दिव्यं सहस्रे
ये जानन्तीदमार्याः प्रतिहतकलुषास्ते मृगाक्षी(१)प्रियास्स्युः ॥

---

(१) दिव्याप्सरसां प्रियास्स्युरर्चिरादिमार्गे ।

अथ पञ्चमशतके

९, नवमदशकम् (मानेय्नोक्कुनल्लीर)

(श्रीभगवद्दर्शनाय श्रीसंवृद्धिपुरं गन्तुमिच्छया नायिका वचनं सखीः प्रति ।)

१. मानेय्नोक्कुनल्लीर—

हे सख्यो मृगलोचनाः प्रियतमाः पापाऽस्म्यहं सन्ततं
व्योमव्यापकसत्फलक्रमुकतश्श्रीमल्लिकासौरभात् ।
(१) श्रीसंवृद्धिपुरं चकास्ति भरितं नित्यं मधुस्यन्दिभि-
र्वृक्षैस्तत्र हरेः पदाब्जयुगळं दास्यात्कदा प्राप्नुयाम् ॥

२. पुन्नकोल्तोळिमीर्काळ्—

हे सख्यो मम वारणात्किमिह वस्सिद्धं सुवर्णात्मकाः
पुन्नागा अपि माधवी च वकुळास्ते यत्र तत्सौरभैः ।
युक्तो दक्षिणमारुतस्तु परितो यत्रास्ति तत्र स्वयं
श्रीसंवृद्धिपुरेऽङ्घ्रिपङ्कजरजो विष्णोः कदा प्राप्नुमः ॥

३. शूडुमलर्क्कुळलीर—

हे सख्यः कुसुमार्द्रकेशभरिता विश्लेषदुःखार्दितां
मां वेदध्वनिरुच्चकैः प्रचलितो यत्र स्वयं कर्शयेत् ।
श्रीसंवृद्धिपुरे तु तत्र परितो होमादिधूमावृते
पादाब्जे मम नायकस्य कलये नित्यं कदाऽहं हरेः ॥

४. निचलुम् तोळिमीर्काळ्—

हे सख्यः किमिहाद्य मान्तु सततं खिन्नां निवार्य स्वयं
युष्माभिः क्रियते नवक्रमुकतरुश्रीनारिकेळादिभिः ।
संयुक्ते कदळीवनैश्च पनसैस्सौधोपरिच्छायया
श्रीसंवृद्धिपुरे तु शेषशयनो मां क्रीतवान् नायकः ॥

---

(१) इदं पुरं मलैयाळदेशे (तिरुवल्लवाळ्) इति प्रसिद्धम् ॥

५. नन्नलत्तोलिंमीकोळ्ळु—

हे सख्यो मम सुप्रियाः क्रतुततेर्धूमावळीभिर्नभो-
देशो यत्र विभाति संवृततमो नित्यं श्रमध्वंसिनि ।
श्रीसंवृद्धिपुरे तु तत्र रुचिरं दिव्यं फलं चेक्षुस-
त्सारं चापि घनं सुधारसमहो पश्यामि तेजः कदा ॥

६. काण्वदेन्नात्तु कोलो—

गायद्भृङ्गतरङ्गसङ्गविलसन्मन्दानिलोद्वीजितै-
र्वृक्षैर्नित्यमनोरमे बहुतमामत्युन्नतैश्शोभने ।
श्रीसंवृद्धिपुरे वटोर्मम हरेश्श्रीवामनस्याद्भुतं
पादाब्जद्वयमच्युतस्य तु कदा पश्यामि सख्यः कृशा ॥

७. पादकुलमेलणि—

कासारेषु समुद्रशोभिषु लसत्पाथोजनीलोत्पलै-
र्नारीणां वदनाक्षियुग्मसरणि र्यत्राभिभूता भवेत् ।
श्रीसंवृद्धिपुरे च तत्र जगतां नाथं हरिं रक्षकं
हे सख्यः किममी भजेम शरणं तत्पादपद्माश्रयाः ॥

८. नाल्तोदम् वीडिन्नूये—

सर्वत्रोच्चलितेक्षुकाण्डनिचयव्रीह्यादिसंशोभितैः
केदारै स्सरसीतटेषु भरिते दिव्ये महात्माश्रये ।
श्रीसंवृद्धिपुरे प्रभोः पदयुगं लोकाक्रमव्यापृतं
हे सख्यस्सततं भजेम किममी श्रान्ता वयं श्रीहरेः ॥

९. कळेल्वकैपूरिप्प—

शीतानोकहषण्डचारिमधुपश्रेणीरवैश्शोभने
श्रीसंवृद्धिपुरे तु वेणुनिनदैर्वीणारवैश्चक्रिणः ।
श्रीविष्णोः करुणा कदाऽतिशिथिलामास्माकहस्तावळी-
भूषां पूर्णतमां करोति सततं तत्पादसेवाभरात् ॥

१०. तोल्लरुळनल्विनैयाल्—

नित्यं चाप्युपकारकोऽस्त्ययमिति द्यावापृथिव्योरमुं
शंसन्त्येव हि तत्र दिव्यनगरे भक्तोत्तमास्सात्त्विकाः ।
साहस्रैः कृपया वसन्ति सततं श्रीभाग्यवृद्ध्याह्वये
दिष्ट्या तं तु भजेम नामशतकैस्सख्योऽद्य नारायणम् ॥

११. नामङ्गळायिरमुडैय—

नाथं नामसहस्रशोभितममुं पादाब्जभक्त्या स्वयं
स्तोतुं क्षेमकरश्शठारिरकरोत्साहस्रपद्यावळिम् ।
दिव्य श्रीकुरुकापुरप्रभुरसौ तत्राद्य धन्या विदु-
श्श्रीसंवृद्धिपुरं प्रतीह दशकं ये तेऽत्र जाता अपि ॥

———0———

अथ पञ्चमशतके

१०-दशमदशकम् (पिरन्दवारुम्)

(अर्चावतारं विहाय विभवावतारगुणानुभवं कर्तुं मन-स्स्थैर्यं प्रार्थयते ।)

१. पिरन्दवारुम्—

विष्णोर्जन्मचरित्रमत्र भुवि संवृद्धेः क्रमश्चाद्भुता
पञ्चभ्यो विजयप्रदानसरणिर्युद्धे च सा भारते ।
सर्वं मे हृदि सम्प्रविश्य सततं जीवं द्रवीकृत्य मे
भुङ्क्ते हन्त! कदा भजाम्युपगतं त्वां दिव्यतेजोनिधे ॥

२. वदुवै वार्त्तैयुळ्—

उद्वाहोक्तिमहो निशम्य वृषभध्वंसश्च ते श्रीहरे ।
मायाकेशिनिषूदनं च तरुणीसङ्गोऽपि शसे तव ।
नैवं ते चरितं तदेतदद इत्यप्यस्ति वाचोवशं
सर्वं मां शिथिलीकरोति जगतां मूलं कदा त्वां भजे ॥

३. पेय्युम् पूंकुलल्—

पुष्पालङ्कृतकेशपाशविलसन्मायास्तनापीतित
स्ते बाल्ये चरितं च दुष्टशकटध्वंसोऽपि पादेन ते ।
आज्यादेरपि चौर्यभुक्तिसमये मातुश्च दण्डं करे
दृष्ट्वा तेऽक्षियुगं भयाश्रुभरितं मान्तु द्रवीकुर्वते ॥

४. कळलवेरुत्ते क्कोण्डु पोय्—

धृत्वा कृत्रिमवेषमेव च पुरं तच्च प्रविश्य स्वयं
रुद्रस्य प्रबलासुरप्रमथनं तद्द्वारतस्तस्य च ।
ते देहे वसतिश्च सर्वविदिता गङ्गाधरस्याप्यहो
सर्वं ते चरितं प्रविश्य हृदयं मां च द्रुतं चाश्नुते ॥

५. उण्णवामवकोंुक्कु—

इन्द्रायेति च गोपवृद्धकलितं चान्नं स्वयं भुक्तवां-
स्त्वं वर्षाद्गिरिधारणेन कृतवान् गोगोपसंरक्षणम् ।
सृष्ट्वा भूमिमिमां स्वयं च सकलामश्नन् क्रमेणोद्गिर-
न्नाक्रम्योद्धृतवान् विवाहतं इदं स्मृत्वा द्रुतं मे मनः ॥

६. निम्नवाळमिल्न्दवाळम्—

शक्याश्चिन्तयितुं च न स्थितिसमावेशोपवेशाश्च ते
रूपं नैकविधं तवेह सकलां मायां स्मरेयं तव ।
त्वां स्मर्तुं बत शक्नुयां कथमहं तेजोनिधे पापिन-
स्साधूपायमहो वदाद्य कृपया मे लोकसंरक्षक ॥

७. ओण्णुडरोळिरुळुमाय्—

चित्ते मेऽत्र विभासि नैव तु बहिस्ते रूपसन्दर्शनं
तेजो भाति तमोयुतं किमहह त्वं दृष्टिवश्यो न मे ।
त्वद्व्यापारमिहाखिलं हृदि कथं वेद्मि स्वयं हे प्रभो
रूपं ते कृपयाऽद्य दर्शय मम श्रीनीलरत्नप्रभ ॥

८. तिरुवुरुवु किडन्दवारुम्—

दिव्यं ते शयनं च नाभिकमलात् सृष्टं चतुर्वक्त्रम-
प्यन्तर्यामितया प्रविश्य सकलं सृष्ट्यादिकर्मापि ते ।
निस्सीमं तव नायकत्वसमं श्रुत्वा द्रवीभूय मे
चेतो हन्त ममाश्रुपूरसरणेर्मूलं हि कुर्यां किमु ॥

९. अडियै मूनॢ यिरन्दवारुम्—

भूमिं च त्रिपदां तवार्थितवतश्चित्रं चरित्रं न तत्
सर्वाम्भोधिधराद्युलोकसरणिं चाक्रम्य पद्भ्यां तव ।
प्राधान्यं च निरङ्कुशं तव हरेराकर्ण्य चेतो मम
श्रीशाद्य द्रवरूपतत्स्रवति वै पापी कदा त्वां भजे ॥

१०. कूडिनी रैक्कडैन्दवारुम्—

त्वं देवासुरसङ्गतोऽब्धिमथनं कृत्वा सुधां देवता
भोज्यामेव कथं विचित्रचरितस्तत्रासुरान् वञ्चयन् ।
आसीर्हन्त तदेतदद्य सकलं चित्तं प्रविश्यात्र मे
स्वात्मानं द्रवयत्यहो कथमहं त्वां शेषशायिन् भजे ॥

११. नाकणैमिशै नम्पिरान्—

अस्मन्नायकमेव नागशयनं तत्पादपद्माश्रयः
प्राप्तुं श्रीशठजित्सहस्रगणितां पद्यावळीं चाकरोत् ।
हृद्यां श्रीकुरुकापुरप्रभुरसावन्तादिरूपां मुनि-
स्तत्रेदं दशकं विचिन्त्य मनुजा वैकुण्ठसौख्याश्रयाः ॥

इति श्रीकल्किसिंहभगवद्विरचितायां सहस्रगाधारत्नावळ्यां
पञ्चमशतकं सम्पूर्णम् ॥

अथ षष्ठशतके

१: प्रथमदशकम् (वैकल्पुक्कलिवाय्)

(श्रीशठारिरत्र श्रीमधुकृत्पुरेश्वरं प्रति पक्षिगणान् प्रेषयति अत्रापि नायिकावस्था ।)

१. वैकल्पुक्कलिवाय्—

यूयं हे (१)कुरुका उपेत्य सततं चाहारसम्मार्गणा-
स्सम्यग्व्रीहिसमृद्धसस्यनिचये श्रीचक्रपाणिं हरिम् ।
रम्ये (२)श्रीमधुकृत्पुरे मम विभुं दृष्ट्वा ममेमां दशां
पापिन्यास्तु मुहुः कृताञ्जलिपुटा आवेद्य धन्यास्स्थ भोः ॥

२. कादल्मेन् पेडैयोडु—

त्वं मे (३)श्यामल नारपक्षिवर ते कान्तामनु प्रेमत-
श्चाहारानुचर श्रुतिध्वनिमये यज्ञादिकोलाहलैः ।
रम्ये श्रीमधुकृत्पुरे मम विभुं श्रीशं जगद्रक्षकं
दृष्ट्वा साञ्जलिरङ्घ्रिपद्मयुगळे दीनां दशां मे वद ॥

३. तिरङ्कळोकियेङ्कम्—

यूयं पक्षिगणा उपेत्य परितः केदारसञ्चारिणो
रम्ये श्रीमधुकृत्पुरे मम विभुं श्रीचक्रपाणिं हरिम् ।
दृष्ट्वा तं परमं प्रणम्य कृपया बिम्बाधरं ब्रूत भो-
दीनाया-मम दुर्दशां भृशमिमां विश्लेषदुःखात्मिकाम् ॥

---

(१) कुरुका इति पक्षिविशेषाः—द्रविडभाषायां 'कुरुकु' इति ख्याताः ।

(२) तिरुवण्वण्डूरिति मलैयाळदेशे प्रसिद्धं पुरम् ।

(३) कुरुनाराय् ।

४. इडरिल्पोकम् मूलिक—

भो भो हंसगणाः प्रियासहचराः कान्तं मम श्रीधरं
रम्ये श्रीमधुकृत्पुरे श्रुतिरवैस्सौम्ये वसन्तं हरिम् ।
दृष्ट्वाऽम्भोधिनिभं प्रभुं मम विभुं कृष्णं प्रियं ब्रूत तं
का चित्त्वद्विरहातुराऽतिशिथिला शोकद्रुतेत्येव माम् ॥

५. उणर्त्तल्डलुणन्दुं—

संश्लेषातिशयप्रियाः प्रियतमासक्ताश्च हंसाः प्रियं
रम्ये श्रीमधुकृत्पुरे मम विभुं दृष्ट्वा च कृत्वाञ्जलिम् ।
दिव्यश्रीतुलसीस्रगञ्चितशिरोमौळिं हरिं सादरं
स्तोत्रैर्युक्ततमैर्ममाप्यनुगुणैर्यूयं भृशं शंसत ॥

६. पोत्तियानिरन्देन्—

पुन्नागाश्रयिणस्तु यूयमधुना हे कोकिलाः स्वस्तिवः
किञ्चित्प्रार्थ्यमिदं मयाऽस्ति कदळीषण्डादिभिर्भूषिते ।
रम्ये श्रीमधुकृत्पुरे मम विभुं वीरं हरिं चक्रिणं
देवेशं त्ववलोक्य चानयत मे मोहान्तकं तद्वचः ॥

७. ओरुवण्णम् शेन्रु पुक्कु—

सौम्य श्रीशुक दिव्यसूनभरितैर्वृक्षस्स्वयं शोभिते
रम्ये श्रीमधुकृत्पुरे मम विभोश्श्यामं वपुः श्रीपतेः ।
वक्त्रं रक्तसरोजवच्च नयनं तत्पादपाणि तथा
दृष्ट्वा शङ्खसुदर्शनौ तदुचितौ किञ्चिन्मदर्थे वद ॥

८. तिरुन्दक्कण्डेनक्कोन्र रैयाय्—

हे (१)पूवै द्विज दिव्यपुष्पभरितैः पुन्नागवृक्षादिभि-
श्चित्रे श्रीमधुकृत्पुरे मम विभोर्नेत्रे विशाले हरेः ।

---

(१) पूवै-इतिद्रविडभाषायां पक्षिविशेषनामधेयम् ।

दिव्यं तन्मकुटं चतुर्भुजगिरीन् नीलाम्बुदश्यामलं
दृष्ट्वा तं मम किञ्चिदुत्तरमिहानीयोपकारं कुरु ॥

९. अडिकल्कैतोळुदु—

हं हंसाः कुसुमेशयाः प्रभुममुं कृष्णं हरिं मायिनं
दृष्ट्वा श्रीमधुकृत्पुरे भृशसुषश्शङ्खारवोद्घोषिते ।
श्रीशं तं विनयात्प्रणम्य नितरां पापाकुलां मां प्रति
ब्रूतोक्तिं कृपया तु यूयमुचितामेकान्तकाले हरेः ॥

१०. वेल्कोण्डुम्मै यानिरन्देन्—

यूयं भो मधुपास्सुगन्धभरिताः किञ्चित्तु याचे स्वयं
युष्मानेव विशेषतः सुविमले पम्पाजलोदक्तटे ।
रम्ये श्रीमधुकृत्पुरे मम विभुं दृष्ट्वा च रक्षःपुरी-
ध्वंसोत्साहिनमच्युतं वदत मां चैकामिमां जीविताम् ॥

११. मिन्कोक्शेर्पुरिनूल्—

श्रीशं वामनमच्युतं सुविलसद्यज्ञोपवीताञ्चितं
भूयाच्चां मति वञ्चकं शठरिपुस्तत्पादपद्माश्रयः ।
स्तोतुं श्रीकुरुकापुरप्रभुरसौ साहस्रमाहात्म्य च
ज्ञात्वेदं मधुकृत्पुरानुदशकं धन्या दिवि स्युर्जनाः ॥



अथ षष्ठशतके

२. द्वितीयदशकम् (सिसिरै मडवार्)

(नायिकावस्था नायकस्य विलम्बात्प्रणयकोपेन नायिकया तद्वारणमुच्यते ।)

१. सिसिरै मडवार्—

अग्रं ते रमणी जनस्य तु तटिन्मध्यस्य च त्वत्प्रिय-
स्यैवं दुष्टविचेष्टितं तव कथं वच्मीति शङ्काऽस्ति मे ।
लङ्कावप्रविनाशकोऽसि भगवन् मायी भवान् वेद्म्यहं
चेष्टां ते किमतः फलं व्रज विभो दत्वा च मे कन्तुकम् ॥

२. पोकु नम्बियुनूतामरैपुरैकण्णियुम्—

हे पूर्ण व्रज दूरतस्त्वमधुना ते नेत्रपद्मद्वयं
रम्यं स्मेरमुखं वयं न हि हरे धन्यास्त्वयं वीक्षितम् ।
प्रेयस्यस्तव सन्ति भाग्यभरितास्तापिञ्छकेश्योऽन्यत-
स्तासान्तु श्रुतिगोचरं पशुगणैस्त्वं वेणुनादं कुरु ॥

३. पोयिल्लु निन् पुळ्ळुवम्—

भो भोः कृत्रिमपूर्ण याहि वद ते वाचं हरे कृत्रिमां
त्वन्मायाद्यनभिज्ञसन्निधितले मे भाति सर्वं च ते ।
सौन्दर्यं प्रतिकूलमेव नयने बिम्बाधरे श्रीपते
विस्तीर्णाम्बुधिमन्थ सुन्दरभुजा नार्यः प्रियास्तेऽद्य काः ॥

४. आलिनीलिलै येळुलकुमुण्डु—

सुप्तस्त्वं वटपत्रके किल पुरा भुक्त्वा च लोकानिमान्
मायां ते न विदन्ति हन्त दिविषद्वर्गाश्च विद्मः कथम् ।
शक्तस्त्वं पशुघासने हि ललनालीलास्थले सैकते
किं वाग्भिस्तव कृत्रिमाभिरधुना सर्वं च विद्मो वयम् ॥

५. कळरेल्लांम्बियुन् कैतवम्—

मिथ्यापूर्णं तवाप्तकृत्रिमवचो माऽस्त्वत्र तु श्रीहरे
चक्रिन् कैतवमस्ति सर्वविदितं ते भूतले वा दिवि ।
किञ्चिद्वच्मि तवाद्य तच्छृणु तव प्रेष्ठास्तरुण्यस्स्वयं
सन्तप्ता मधुभाषिताः किल ततो लीलां शुकैर्मे त्यज ॥

६. कुळकियेङ्गळ्कुळमणन् कोण्डु—

अस्माकं परिगृह्य पुत्थलिमिमां किं वाऽसि मुग्धोऽधुना
किं ते कार्यमितः पुरैव चरितं विद्मो वयं ते हरे ।
अस्माकं न किल क्षमार्हमिदमस्त्यास्ते तव प्रेयसी
गोष्ठी तेऽनुगुणा त्रिलोकमहिता माऽस्मानुपै हि स्वयम् ॥

७. कन्ममनेङ्गळ्कैयिल्—

अस्माकं करतोऽद्य पुत्थलिहृतिर्नैवोचिता ते हरे
भुक्त्वा वारिधिमन्नमेव च जगत्संरक्ष्य शुद्धोऽसि हि ।
दोषोऽयं किल दोष एव तव चाप्यस्मासु लीलां च ते
श्रुत्वा दण्डधरा भवन्ति करुणाहीना हि नस्सोदराः ॥

८. पिणक्कियावैयुम्—

सर्वां स्त्वं चिदचिद्गणानपि भृशं सम्मेळयन् भेदयन्
भासि ज्ञाननिधिश्च मूर्त उदितो भास्वानभिन्नस्स्वयम् ।
पूर्णः कीर्तिपयोनिधिः किल सखीवर्गैर्वयं चोदिता
लीलायामिह वारिताश्च भवता किं ब्रूयुरन्ये जनाः ॥

९. उकवैयाल्नेञ्जमुळ्ळुरुकि

प्रीत्याऽन्तर्हृदयं द्रवीकृतमिदं भूयात्कटाक्षैस्तव
श्रीपद्माक्ष वशीकृता वयममी भूयास्म चेति त्वया ।
अस्माकं हि विनाशितं सुरुचिरं लीलागृहं चौदनं
पादेनैव तवाद्य हन्त न हि तद्दृष्टं त्वया सस्मितम् ॥

१०. विनिलङ्गुडियिनाय्

भास्वद्दिव्यकिरीट ! भो ! परशुभृत् प्रध्वंसयन् दुर्नृपान्
प्रख्यातोऽसि यदेकविंशतिजयैः! पूर्वं जगत्सृष्टिकृत् ।
अद्य त्वं किल गोपवंशमखिलं चोज्जीवयन् भास्यहो!
नीलश्रीमणिवर्ण! तेऽद्य चरितैर्गोप्यो वयं कर्शिताः ॥

११. आयिचयाकियवन्नै—

गोप्यां तन्नवनीतचौर्यकथने सत्यां स्वयं मातरि
श्रीकृष्णं विलपन्तमेव च रुषा स्तोतुं शठारिर्मुनिः ।
साहस्रं कुरुकापुरप्रभुरसावाहोत्तमं द्राविडं
तत्रेदं दशकं शुभन्तु पठतां नैवास्त्यलभ्यं शुभम् ॥

———०———

अथ षष्ठशतके

३. तृतीयदशकम् (नल्कुरवुम् शेल्वुम्)

(अत्र शठारिः प्रणयकलहे सर्वेश्वरेण स्वाङ्गीकारप्रकार-
माह तिरुविण्णकर् (श्रीदिव्यपुरी) नायक-
परमिदं दशकम् ।

१. नल्कुरवुम् शेल्वुम्—

श्रीसङ्कोचधनाढ्यते च नरकस्वर्गौ च वैरातिसौ-
हार्दे चापि विषामृते च सकलं भूत्वा स्वयं व्यापकः ।
स्वामी नः परमेश्वरो मम विभुर्यो भाति पश्यामि तं
श्रीसम्पूर्णकुलाश्रये तु नगरे श्रीदिव्यपुर्याह्वये ॥

२. कण्डविन्बम् तुन्बम्—

दृश्यं यत्सुखदुःखरूपमखिलं चिन्ताप्रशान्त्यात्मकं
शीतोष्णं च मिथोविरुद्धमपि यत्कोपप्रसादात्मकम् ।
तत्सर्वं स्वयमेव योऽस्ति भगवान् दृश्यो न चाक्ष्णोर्हरि-
स्तस्येदं नगरं शुभं मम विभोश्श्रीदिव्यपुर्याह्वयम् ॥

३. नगरसुम् नाडुकलुम्—

सर्वं यन्नगरात्मकं च सकलं ग्रामात्मकं यत्स्वयं
ज्ञानं मौढ्यमपि स्वयं निरवधि ज्योतिस्तथाऽन्धं तमः ।
भूलोकस्सुरलोक इत्यपि च यश्श्रीदिव्यपुर्यां विभु-
र्भाति श्रीहरिरस्य कीर्तिरतुला ! नान्यत्तु पुण्यं भवेत् ॥

४. पुण्णियम् पावम्—

पुण्यं पापमिदं च सङ्गविरहौ तच्चत्स्मृतिर्विस्मृति-
स्सत्यं चानृतरूपमेतदखिलं भूत्वाऽपि न स्यात्तथा ।
योऽसौ श्रीपतिरच्युतो मम विभुश्श्रीदिव्यपुर्यां हरिः
कृष्णस्यास्य कृपां भजध्वमतुलां! किं स्यादिदं कैतवम् ॥

५. कैतवम् शेम्मै—

कौटिल्यं च तथाऽऽर्जवं च सकलं नीलत्नधावळयके
सत्यासत्यमयं च यौवन-जरे नूत्नं च जीर्णं च यत् ।
तत्सर्वं स्वयमेव यो मम विभुश्श्रीदिव्यपुर्यां हरि-
स्तस्योद्यानमिदं जगत्त्रयमहो! ब्रह्मादिदेवाश्रितम् ॥

६. मृदुलकङ्कलुमायङ्गनाय्—

त्रैलोक्यं सकलं च यो न च तथा रागोऽपि वैरं स्वयं
लक्ष्मीश्चापि सरोजदिव्यभवना ज्येष्ठाऽप्यलक्ष्मीस्स्वयम् ।
स्तोत्रं निन्दनमप्ययं स्वयमहो! श्रीदिव्यपुर्यां हरि-
र्भाति श्रीपतिरच्युतोऽप्यघिनि मे ज्योतिः परं मानसे ॥

७. परं शुडरुडम्बाय्—

ज्योतिश्चापि परं स्वयं हि मलिनं चेदं जगद्भास्वरं
सर्वत्रापि च गुप्तमप्यचलमप्येवं हि मायात्मकम् ।
देवाद्यैरपि सेविते हि नगरे श्रीदिव्यपुर्याह्वये
भाति श्रीपतिरस्य पादयुगळं सेव्यं! न चान्यन्नृणाम् ॥

८. वन् शरण्शुरक्काय्—

देवानां च शरण्यमप्रतिहतं! सर्वासुराणां रिपु–
र्हन्ता! चापि जगत्त्रयस्य शरणं सेव्यं न सेव्यं च यः ।
एवं दक्षिणदिक्प्रकाशि शरणं श्रीदिव्यपुर्यां हरिः
कृष्णो मे प्रभुरस्ति! मेऽस्ति शरणं नित्यं च सेव्यो मम ॥

९. एन्नप्पनेनक्काय्—

योऽसौ मेऽस्ति पिता च मेऽस्ति जननी धात्री च सौवर्णभा-
स्स्वामी रत्नमहोज्ज्वलस्स्वयमसौ मुक्तामयो मे प्रभुः ।
प्राकारैश्च हिरण्मयैर्विलसिते श्रीदिव्यपुर्याह्वये
सोऽयं मे नगरे स्वपादकमलच्छायां शरण्यामदात् ॥

१०. निळल्वेय्यिल्—

छायाऽपि श्रमहारिणी स हि हरिस्तापावहश्चातपो
योऽणुश्चापि महान् विभाति सपदि ह्रस्वोऽपि दीर्घोऽस्ति यः ।
एवं भाति चराचरं च न तथा! श्रीदिव्यपुर्यां हरिः !
प्राप्यं तत्पदयुग्ममेव शरणं! नान्यद्भवेत्पश्यत ॥

११. काण्मिन् कळुलकीर्—

लोकाः पश्यत चाद्भुतं तु तदिदं प्रत्यक्षमेवेति च
श्रीशं सर्वजगत्प्रमातृचरणं स्तोतुं शठारिर्मुनिः ।
साहस्रं कुरुकापुरप्रभुरसावाहाच्युताज्ञात्मकं!
ज्ञात्वा दिव्यपुरं प्रतीह दशकं स्युस्सूरिसेव्या नराः ॥

अथ षष्ठशतके

४. चतुर्थदशकम् (कुरवैयाच्चियरोडु)

(अत्र शठारिश्श्रीकृष्णस्य रासक्रीडादिवैभवमनुसन्धत्ते ।)

१. कुरवैयाच्चियरोडु—

गोपीभिः किल रासगोष्ठ्यभिरतिर्गोवर्धनोद्धारणं
पूर्णाम्भस्यपि कालियस्य सरसि स्वाङ्घ्रिद्वयान्मर्दनम् ।
एवं सर्वविधं च नागशयनस्यात्यद्भुतं चेष्टितं
सञ्चिन्त्यैव दिवानिशं प्रमुदितोऽस्म्यद्यानवाप्तं न मे ॥

२. गेयत्तीङ्कुळलूदित्तुम्—

गीतं हृद्यतमं तु वेणुमुखतो गायन् पशून् घासयन्
मुग्धाक्षीं कुसुमस्रगञ्चिततनुं नीळां समाश्लिष्य यः ।
मायाचेष्टितमद्भुतं व्यरचयत्तस्याद्य वृत्तं स्मरन्
मोदेऽहं द्रुतचित्त एव सततं! लोकस्समः को मम? ॥

३. निकरिल्मल्लरैचेत्तदुम्—

मल्लानामपि मर्दनं पशुगणैर्गत्वा च तद्घासनं
दीर्घोत्तुङ्गकरस्य चापि करिणस्सम्मर्दनं वैरिणः ।
एवं चेष्टितसन्ततिं च विविधां स्मृत्वा परज्योतिषः
सङ्कीर्त्यापि च नित्यमस्मि सुचिरं तुष्टो न मे स्याद्व्यथा ॥

४. नोववाच्चियुरलोडु—

वन्धप्राप्तिमुलूखलेऽस्य तु हरेर्भव्यत्वमप्यस्य तां
हन्तुं स्तन्यविषस्य पानमपि तन्मायात्मिकां पूतनाम् ।
मायांभृच्छकटस्य भञ्जनमपि श्रीकृष्णचेष्टावळिं
स्मृत्वा मे मन एवमेव सततं तुष्टं! किमीहेऽपरम् ॥

५. वेण्डिक्तेवरिरक्कवन्दु पिरन्ददुम्—

देवैरर्थित एव जन्मभृदिह क्षीरार्णवादर्थितो
मात्रा यस्तमसि स्वयं यदविशद्गोपाङ्गणं श्रीहरिः ।
पुष्टस्तत्र हि गुप्त एव च रिपुं कंसं यथा चावधीत्
सर्वं कृत्रिमचेष्टितं तु तदिदं वच्मीह! किं मे भयम्? ॥

६. इकल्कोळपुकळैप्पिळन्ददुम्—

युद्धे तस्य बकस्य दारणमपि! ख्यातं वृषध्वंसनं!
चोत्तुङ्गार्जुनवृक्षयुग्ममथनं त्रिविक्रमं चेष्टितम् ।
एवं कृत्रिमचेष्टितावळिमिमां नाथस्य मे श्रीहरे-
स्स्तोतुं हन्त! दिवानिशं किल कृती सोऽहं! न चिन्ताऽस्ति मे॥

७. मनप्परिप्पोडळुक्कु—

जातो दुःखयुते च मानुषकुले नानातनूर्धारयन्
स्वेच्छातश्च रिपून् प्रहृत्य नितरां कोपप्रशान्तिं वहन् ।
दिव्यश्रीतुलसीं किरीटकलितां मालां च धत्ते हरि-
र्वक्षस्येनमहं स्मरामि सततं! कस्स्यात्समो मे भुवि ॥

८. नीणिलत्तोडु वान् वियप्प—

द्यावाभूमितलातिविस्मयकरं मायामयं योधनं
बाणस्यापि सहस्रबाहुमथनं भूमेश्च मानं तथा ।
श्रीमद्वामनरूपिणोऽपि च हरे र्नाथस्य मे चेष्टितं
सञ्चिन्त्यास्मि कृती हृदीह विविधं क्षोभो न मे मानसे ॥

९. कलक्कवेल्कडल्—

सप्ताम्भोधिततिं च सप्त च गिरीन् लोकांश्च सप्त स्वयं
योऽसौत्यापि रथं नयन्नतितरां मायाक्रियां चाकरोत् ।
यश्चक्रं च बिभर्ति दक्षिणकरे वामे तु शङ्खं च तं
स्तोतुं श्यामलवर्णमस्मि हि कृती कस्स्यात्समो मे भुवि ॥

१०. मण्मिशै-पेरुम्पारम्—

पृथ्वीभारविनाशनाय समरे तस्मिन् पुरा भारते
मायाचेष्टितमद्भुतं बहुविधं कृत्वा चमूनाशनम् ।
एवं यः कृतकृत्य एव च पुनर्धाम स्वकीयं ययौ
ज्योतिस्तं परमं प्रणम्य कृतिनः किं मेऽस्ति नाथोऽपरः ॥

११. नायकन् मुलुवेलुलकुक्कुमाय्—

सप्तानां जगतां च नायकमणिर्यं स्सप्तलोकीं स्वयं
भुक्त्वोद्गीर्य च तन्मयोऽपि न तथा तं केशवं श्रीपतिम् ।
स्तोतुं श्रीकुरुकापुरप्रभुरसौ दिव्यं शठारिर्जगौ
साहस्रं तदिदं करोति दशकं भक्ताननन्याश्रयान् ॥

अथ षष्ठशतके

५. पञ्चमदशकम् (तुवळिल्मामणिमाडम्)

(नायिकावस्थां प्राप्तश्शठारिरत्र वरधन्विमङ्गलपुर
(तोलैविल्लिमङ्गलम्)नायकविषयेऽति
प्रवणोऽस्तीति सखीभिर्मातृ
वर्गं प्रत्युक्तिः ।)

१. तुवळिल्मामणिमाडम्—

ध्यायन्तीं वरधन्विमङ्गलपुरं श्रीरत्नसौधाञ्चितं
तामेतां प्रति मुञ्चताद्य सकलामाशां जनन्योऽनघाः ।
सेयं कीर्तयतीह तस्य विमले श्रीशंखचक्रे हरे-
र्नेत्राम्भोजयुगं सबाष्पनयना स्थित्वा मुहुर्जल्पति ॥

२. कुमिरुमोशैं विळवोलि—

यूयं श्रीवरधन्विमङ्गलपुरं प्रत्नं प्रविश्यानया
श्रीदिव्योत्सवघोषभूषितमिमां दिव्यामृतोक्तिं प्रति ।
आशावर्जितमानसास्स्त! यदियं श्रान्ता च संस्मृत्य तं
देवानामधिदेवमेव सततं साश्रुर्द्रुताङ्गा स्वयम् ॥

३. कैरकोळ्पैम्बोळिल्—

दिव्यश्रीवरधन्विमङ्गलपुरे नानातरूणां गणै-
र्यूयं तान्तु सरोवरैरपि वृते रम्ये च नीत्वा स्वयम् ।
श्लाघ्यश्रीशुभवाचमप्यहह! तां दूरे त्वकार्ष्टाद्य सा
बाष्पार्द्राऽब्धिशयं त्रिविक्रममपि स्मृत्वा च गोपालकम् ॥

४. निर्कुम् नान्मैरवाणर्वाल्—

नित्यं वेदचतुष्टयं श्रितवतामावासभूतं शुभं
सेयं श्रीवरधन्विमङ्गलपुरं दृष्ट्वाऽद्य धार्ष्ट्यान्विता ।
यूयं पश्यत मातरस्सततमप्येषा स्मरन्ती मुदा
कृष्णं वारिधिवर्णमेव शिथिलं नैवाद्य वश्या भवेत् ॥

५. कुळैयुम् वाण्मुकत्तेळैयै—

नीत्वैतां वरधन्विमङ्गलपुरं दीप्राननां कोमलां
यूयं वारिजलोचनं त्वकुरुत प्रेक्षास्पदं चोज्ज्वलम् ।
सेयं तद्दिवसात्प्रभृत्यहह हा! बाष्पार्द्रनेत्रा भृशं
मोहान्धा हृदि दिव्यरूपनिरतां बद्धाञ्जलिस्तद्दिशे ॥

६. नोक्कुम् पक्कमेल्लाम्—

सर्वत्रापि किलेक्षुकाण्डसरणिं व्रीह्यादिपद्मावळीं
दृष्ट्वेयं वरधन्विमङ्गलपुरे श्रीताम्रपर्णीतटे ।
नान्यत्पश्यति कुत्र चिच्च सततं तस्यैव नामान्यहो
सङ्कीर्त्यास्ति मुदाऽन्विता मणिनिभाङ्गस्याद्य वै मातरः ॥

७. अन्नैमीरणिमामयिल्—

सेयं रम्यमयूरसुन्दरमृगी सौन्दर्यमौग्ध्यान्विता
नान्यच्छ्रीवरधन्विमङ्गलपुरं प्रत्नं विनाऽऽकर्णयेत् ।
वश्या नैव हि नः किमीदृशमहो भाग्यं पुरा चार्जितं
किं वा मायिचरित्रमेतदनिशं तच्चिह्ननामोक्तयः ॥

८. तिरुन्दु वेदमुम् वेळ्वियुम्—

वेदैर्यज्ञगणैश्श्रिया च भरितं श्रीताम्रपर्णीतटे
चोदीच्ये वरधन्विमङ्गलपुरं यस्मिन् दिने साऽभजत् ।
तत्कालात्प्रभृति स्वयं शिथिलितस्वाङ्गा विशालाम्बका
सङ्कीर्त्यास्त्यरविन्दलोचनमहो नित्यं द्रुतस्वाशया ॥

९. इरङ्गि नाळ्तोरुम् वाय्वेरीइ—

नित्यं साश्रुभरा हृदि भ्रमवशा वाचि स्वयं चापला-
ज्जल्पन्ती च तरूनपि द्रवयति ध्यात्वा मणीन्द्रप्रभम् ।
आहूयापि च केशिवक्त्रदळनस्यावासभूतं शुभं
सेयं श्रीवरधन्विमङ्गलपुरं सङ्कीर्त्य बद्धाञ्जलिः ॥

१०. पिन्नैकोलिनलमामकळ्कोल्तिरुमकळ्कोल्—

नीळा किं धरणी किमु स्वयमियं श्रीरेव वा जन्मतः
किं किं वाऽद्भुतमस्य मुग्धचरितं स्मृत्वाऽऽह्वयत्येव तम् ।
तद्वासं वरधन्विमङ्गलपुरं प्रत्नं च मूर्ध्ना नम-
न्त्येवेयं सततं च तत्पुरमहानामश्रुतिं चिन्तयेत् ॥

११. शिन्दैयालुम् शोल्लालुम्—

श्रीशं वाङ्मनसक्रियाभिरनिशं देवाधिदेवं हरिं
माता चापि पितेत्ययं शठरिपुस्स्तोतुं सहस्रं जगौ ।
मौनी श्रीवरधन्विमङ्गलपुरं प्रत्नं प्रतीदं शुभं
ज्ञात्वा तद्दशकं रमापतिपदाम्भोजाश्रयास्स्युर्जनाः ॥



अथ षष्ठशतके

६. पष्ठदशकम् (मालुक्कु वैयमळन्द मणाळक्कु)

(अत्र जननी विरहार्तायास्सुताया आभरण-सौन्दर्य कान्त्यादि-

च्युतिं वदति ।)

१. मालुक्कु वैयमळन्द मणाळक्कु—

श्रीशाय लोकगणमानकृते च नीला-
म्भोदाभदिव्यवपुषे जलजाम्बकाय ।
सेयं सुता मम मधुस्रविरम्यपुष्पा
प्रादात्करस्य वलयं शुभगन्धिकेशी ॥

२. शङ्गुविल्वाळतण्डु—

शङ्खं च चापमसिचक्रगदाश्च धर्त्रे
विम्बाधराय सरसीरुहलोचनाय ।
सौलभ्यरम्यतुलसीधरशीर्षकाय
सेयं ह्यदात्स्वशुभरूपयुतां च शोभाम् ॥

३. निरम् करियानुक्कु—

नीलाम्बुदाभमपि लोकगणाशिनं तं
बालं हरिं सपदि वञ्चकमप्रमेयम् ।
श्रीचक्रपाणिमनुचिन्त्य सुता ममेयं
चास्ते स्वगौरवभरं च शुभं त्यजन्ती ॥

४. पीडुडै नान्मुकनै—

ज्ञानादिवैभवयुतं च चतुर्मुखं तं
सृष्ट्वा धरामपि च मानमुखाद्विधृत्य ।
दौत्यं च पाण्डवकृते वहते सुतेयं
मे विष्णवे स्वगुणशीलमपि त्यजन्ती ॥

५. पण्बुडै वेदुम्पयन्द परनुक्कु—

वेदार्थवक्तुरपि तस्य परस्य पुंसः
पृथ्वीं वराहवपुषोद्धरतो मुरारेः ।
देवेशितुर्जलधिशायिन एव वश्या
सेयं स्रगञ्चिततनुस्स्वमतिं त्यजन्ती ॥

६. कर्पकक्कावन नर्पल तोळर्कु—

श्रीकल्पवृक्षसमबाहुमुदारतेजो-
मालाभिरामकनकाद्रिनिभस्वमौळिम् ।
रम्याब्जहस्तमपि तं प्रति कोमलाङ्गी
सेयं सुता मम निजां च तनुं त्यजन्ती ॥

७. मेय्यमर्पल्कलन्—

दिव्यैश्च भूषणगणैरमितैर्लसन्तं
श्रीशेषशायिनमिहाम्बुजपाणिपादम् ।
कृष्णं प्रभुं प्रति सुता मम कोमलेयं
लावण्यमप्यहह ! भाति निजं त्यजन्ती ॥

८. शायक्कुरुन्दमोशित्त—

कुन्दाख्यवृक्ष-शकटासुर-पूतनादि-
ध्वंसं विरच्य वशयन्तमिमां सुतां मे ।
तं प्रत्यनन्तगुणमच्युतमुत्तमाङ्गी
सेयं त्यजत्यहह ! सुन्दरतां सुकेशी ॥

९. माण्बमै कोलत्तु—

सौन्दर्यशोभिनममुं प्रति वामनं श्री-
काकुत्स्थमद्भुतगुणं महसां निधानम् ।
सञ्चिन्त्य मेऽद्य तनया कुचकुट्मलाढ्या
सेयं त्यजत्यहह ! हन्त ! निजं सुरूपम् ॥

१०. पोर्पमै नीळ्मुडि—

दीव्यत्किरीटविलसत्तुलसीसमेतं
श्रीमल्लजिद्भुजविभूषितमप्रमेयम् ।
नित्यं च मायिनमनन्तपदार्थरूपं
स्मृत्वाऽथ तं त्यजति सेयमिह स्वमानम् ॥

११. कट्टेलिल्शोलै—

अत्यन्तरम्यतरुशोभित-वेङ्कटाद्रि-
नाथं स्तुवन् हि कुरुकापुरराट्छठारिः ।
दिव्यप्रबन्धमिममाह सहस्रमाद्यं !
ते सूरिभोगभरिता दशकं विदुर्ये ॥

अथ षष्ठशतके

७. सप्तमदशकम् (उण्णुम् शोरु)

(मूर्छान्ते प्रबुद्धा नायिका (श्रीकोळूरपुरं) प्रविष्टेति जननी निश्चिनोति ।)

१. उण्णुम् शोरु—

भोज्यं पेयमपीह भाति किल मे ताम्बूलवीटी च स
श्रीकृष्णः प्रभुरेव सर्वमिति यत्साश्रुस्तदीयान् गुणान् ।
भूम्यामत्र तु तत्पुरीं च कथयन्त्येवं स्वयं मे सुता
श्रीकोळूरिति तत्पुरं सुविदितं नूनं प्रविष्टाऽधुना ॥

२. ऊरुम् नाड्डुमुलकमुम्—

तन्नामानि च तत्रजोऽपि च भुवि ग्रामाश्च देशास्त्वयं
लोकाश्चाप्यखिला ब्रुवन्त्विति किल स्त्रीत्वं त्यजन्ती निजम् ।
श्रीकोळूरिति तत्पुरं मम सुता सस्यादिपूर्णं गता !
किं वाऽऽयाति पुनश्च हन्त ! वदत प्रेष्ठाश्च तत्पक्षिणः ॥

३. पूवै पैङ्किळिकळ्—

नानापक्षिगणाश्शुकादय इमे लीलार्थकाः कन्तुकाः
पुष्पाद्याश्रयभाजनानि सकलं श्रीशस्य नामानि हि ।
एवं कीर्तनतत्परा मम सुता गत्वा पुरीं पावनीं
श्रीकोळूरिति तां किलाश्रुभरिता स्यात् ! किन्नु कुर्यादहो ? ॥

४. कोल्लैयेन्वर्कोलो—

श्रीकोळूरिति तां पुरीं मुररिपोस्सम्पत्समृद्धामियं
पुत्री मे सुकुमारमुग्धहरिणी गन्तुं हि सक्ताऽभवत् ।
किं निन्दन्ति पुरस्त्रियश्च परितस्सैयन्तु वेलातिगे-
त्याहोस्विद्धत सद्गुणेति नितरां शंसन्ति जल्पप्रियाः? ॥

५. मेवि नैन्दु नैन्दु—

शैथिल्यान्मनसस्स्वयन्तु चपला सेयं सुता मेऽद्य तां
श्रीकोळूरुपुरीं गतैव सकलां लीलां त्यजन्ती निजाम् ।
तत्रत्यानि सरांसि सस्यभरितां क्षेत्रावळीं श्रीपते-
र्देवागारमियं विलोक्य मुदिता भूयात्किलाद्य स्वयम् ॥

६. इनैनक्कुदवादु—

विश्लिष्टा च सुता ममाद्य हरिणी मुग्धा तु गत्वा पुरीं
श्रीकोळूरिति तामवाच्यतिलकप्रायां शुभां श्रीपतेः ।
दृष्ट्वा दिव्यविलोचनद्वयमियं बिम्बाधरं च स्वयं
बाष्पार्द्रायतलोचना प्रतिकलं सम्मोहिता स्यादहो ॥

७. मल्कुनीर्कण्णोडु—

सेयं साश्रुविलोचना भ्रमवशा चित्तं च नक्तन्दिवं
श्रीशेत्याह्वयति स्वयं च चलति श्रान्ताऽद्य सम्पद्युताम् ।
श्रीकोळूरिति तां पुरीं कथमहो ! विष्णोरियं प्राप्नुया-
त्कान्तं तं प्रति मोहिता मम सुता तस्मिन् शयानं पुरे ॥

८. ओशिन्दनुण्णिडैमेल्—

पद्मायाः प्रियवल्लभस्य तु हरेश्श्रीशस्य विष्णोः पुरीं
श्रीकोळूरिति तां विशेत्किमु सुता मे भ्रान्तिवश्या स्वयम् ।
मां त्यक्त्वाऽद्य महार्तिखिन्नहृदया श्रान्ता स्वहस्तं कटि-
स्थाने हन्त निवेश्य बाष्पभरितस्वाक्षिद्वया भामिनी ॥

९. कारियम् नल्लनकळ्—

भोग्यं रम्यपदार्थजातमखिलं कृष्णाय सङ्कल्पये-
द्या दिव्याभरणा किलार्द्रहृदया सन्त्यज्य सर्वं त्विदम् ।
पौरस्त्रीपरिवादजल्पविवशा विस्मृत्य सर्वांश्च नः
श्रीकोळूरुपुरं गता मम सुता सर्वांस्तृणीकृत्य नः ॥

१०. निनैक्किलेन् देय्वङ्गाळ्—

भोः देवाः कथमद्य चिन्त्यमिह मे सेयं सुता श्रीहरिं
लोकेशं त्वरविन्दलोचनममुं नेषच्च जातु त्यजेत् ।
श्रीकोळूपुरमद्य तस्य हि गता द्रागेव मुग्धा मृगी !
नैवेयं किल चिन्तयेन्निजकुलस्येदं कळङ्कायितम् ॥

११. वैत्तमानिदियाम्—

निक्षेपं मधुसूदनं निजमहानिध्यात्मकं श्रीहरिं
स्तोतुं श्रीकुरुकापुरप्रभुरसौ मौनी शठारिः कविः ।
साहस्रं परमं जगौ च तदिदं ये ये पठन्ति स्वयं
श्रीकोळूरुपुरं विचिन्त्य दशकं ते दिव्यधामेश्वराः ॥

———0———

अथ षष्ठशतके

८. अष्टमदशकम् (पोन्नुलकालीरो)

(नायिकावस्था-पक्षिगणान् दौत्यकृत्ये प्रेरयति नायिका ।)

१. पोन्नुलकालीरो—

यूयं स्नेहपरास्तु पक्षिनिवहाः! पापिन्यहं प्रार्थये
युष्मान् किञ्चिदिदं पुराऽखिलजगत्स्रष्टा पयोदाकृतिः ।
कृष्णं तं मम नायकं प्रभुमिमां मे दुर्दशां ब्रूत भो!
युष्माकं परमे पदेऽपि भुवि च स्यादाधिराज्यं ततः ॥

२. मैयमर्वाळनेडुङ्कण्—

यूयं मेऽद्य शुकाः प्रभुं मम हरिं श्रीचक्रपाणिं च तं
बिम्बोष्ठं सहसा विलोक्य तनुसञ्जाशां च मे ब्रूत भोः ।
क्षिप्रं मां प्रति तद्वचोऽपि वदत श्रीमत्सखीनां पुरः
स्थित्वा मे करतश्च साज्यमधुरक्षीरान्नभाजस्स्त भोः ॥

३. ओडिवन्देन् कुळल्मेल्—

यूयं मत्प्रियषट्पदाः! शुभकुरुक्षेत्राधिपानां पुरा
पञ्चानां च सुहृत्तमोऽश्वसरणिं तां स्यन्दनालिं चमूम् ।
सर्वं चापि विनाश्य यः प्रभुरभूत्तस्याच्युतस्याद्भुतां
पीत्वा तां तुलसीं ममापि शिरसि स्रक्पानसक्तास्स्त भोः ॥

४. तूमदुवाय्कळकोण्डुवन्दु—

यूयं मे कुटजाश्रया मधुकराः! प्रीत्याऽत्र पानाशया
सक्ताश्चेदिह पापिनीं सपदि मां यो वञ्चयन् वर्तते ।
दिव्ये धामनि सूरिवर्यपरिषन्नाथं विलोक्यैव तं
दिव्यश्रीतुलसीधरं वदत किं युक्तं तवेदं त्विति ॥

५. तुङ्गळक्कुयानुरैक्केन्—

भो भो मत्परिपोषिताः प्रियशुकाः! किञ्चिद्वदाम्यद्य वः
साक्षादेव हि सादरं शृणुत मां श्रीमानिमां पापिनीम् ।
त्यक्त्वा चित्तहरो ममाब्जनयनस्ताक्ष्योधिरूढो गत-
स्तं दृष्ट्वा वदत क्वचित् किमुचितं तेऽस्तीति सत्कल्पकम् ॥

६. एन्मिन्नुनूल्मार्वन्—

मत्पुष्टाः प्रियपक्षिणः! सुरुचिरं यज्ञोपवीतं वहन्
वक्षस्यस्ति मम प्रभुः प्रियतमः कृष्णस्स्वपादस्थिताम् ।
दिव्यां तां तुलसीं ददाति न हि मेऽङ्घ्रिन्नान् प्रतीदं वच-
श्शिक्षां प्राप्य मया च तत्र वदत श्रीशं प्रति क्वापि तम् ॥

७. पूवैकळपोल्निरत्तन्—

रम्यश्रीशकुनप्रभं च विलसत्पद्माम्बकं मायिनं
माहात्म्याच्चिदचिच्छरीरकममुं श्रीचक्रपाणिं हरिम् ।
केशिघ्नं मधुसूदनं प्रति वचो यूयं ममोक्त्वा स्वयं
पुत्थल्यः! किमु वारयेत तनुलावण्यादिनाशं च मे ॥

८. पाशरवेय्दियिन्ने—

वेगेनासम! पाण्डरद्विज! महापापिन्यहं कर्शिता
वैवर्ण्यं गमिताऽस्मि कल्पशतकैरेतैरतीतैरियम् ।
श्रीशं निर्मलनीलमौळिमनघं सूरीन्द्रनाथं हरिं
दृष्ट्वा त्वं वद नान्यवस्तु तमृते पश्यामि सेयं त्विति ॥

९. पेर्तुमत्तोर्कैळैकण्—

वीचीनामुपरिप्लवैर्यदशनं यूयं बलाकागणाः!
सञ्चारेषु विचित्य तुष्टहृदया युष्मान् विनाऽन्यन्न मे ।
पापिन्याश्शरणं ततोऽसितपयोदाभं च कृष्णं हरिं
तं सूरीन्द्रपतिं विलोक्य वचनं तस्यानिशं ब्रूत मे ॥

१०. वन्दिरुन्दुम्सुडैय—

यूयं हंसगणाः! कळत्रसहिताः पुष्पेषु भोगाश्रयाः
प्राप्य स्वैरमिमां च मां स्मरवशां तस्मै निवेद्य स्वयम् ।
श्रीकान्ताय रमां निजोरसि सदा बिभ्रत्स्वरूपाय तत्-
सूक्तीर्मेऽत्र पुनर्निवेदयत भो श्श्रीशावरोधस्थलात् ॥

११. मात्तङ्कळाल्न्दुकोण्डु—

दिव्यां सूक्तिततिं विचित्य सरसां सूरिश्शठारिः कवि-
स्स्तोतुं तं मधुसूदनं प्रभुमहो साहस्रपद्यावळिम् ।
आह श्रीकुरुकापुरप्रभुरसौ ये ये पठन्ति स्वयं
तत्रेदं दशकं तु ते किल भवन्त्येव द्रवात्माशयाः ॥

अथ षष्ठशतके

९. नवमदशकम् (नीराय् निलनाय्)

(अत्र सर्वेश्वरः परमपदादत्यन्तमार्तियुक्तेन शठारिणा समाहूयते ।)

१. नीराय् निलनाय्—

नीरावनीदहनवायुनभोमयस्त्वं
मुख्योज्ज्वलौ शशिरवी च समस्तसृष्ट्या ।
रुद्रोऽप्यजोऽसि करतस्तव दीप्रचक्रं
धृत्वा च शङ्खमिह सर्वनुतोऽभ्युपेहि ॥

२. मण्णुम् विण्णुम् मकिल—

द्यावापृथिव्यभिनुतोऽसि च वामनस्त्वं
भूम्नाऽवनीं दिवमपि स्वयमेव गृह्णन् ।
मायिन् ! प्रभो ! भुवि तु सञ्चर जातु विष्णो !
दृष्ट्वा यदा तु मुदितोऽहमिहास्मि नृत्यन् ॥

३. मालत्तूडे नडन्दु—

भूम्यां किल प्रतियुगं च चरन् शयान-
स्तिष्ठन् क्रमादुपविशन्नपि सर्वलोकान् ।
त्वं पालयन्नसि चिरं ! रमया समेतं
त्वामप्यनाश्रित इहास्मि किमद्य खिन्नः ? ॥

४. तळेन्दुम् मुरिन्दुम्—

भित्वा तनुं च शकटासुररूपिणस्त्वं
पादेन भासि परमः प्रभुरच्युतो नः ।
ब्रह्मा शिवश्शतमखश्च सुराः प्रणम्यं
त्वां तु स्तुवन्ति च यथाऽत्र तथाभ्युपेहि ॥

५. विण्मीदिरुप्पाय्—

दिव्ये च धामनि गिरेरुपरि स्वयं त्वं
क्षीरोदधावपि भुवीह हृदन्तरेषु ।
वासं स्थितिं च शयनं चलनं च वृत्तिं
प्राप्याण्डगोऽसि हृदि मेऽत्र ! किमस्यदृश्यः? ॥

६. पायोरडि वैत्तु—

एकं पदं प्रसरणाज्जगतीह कृत्वा
सर्वत्र चापि दिवि चान्यदहो ! निधाय ।
मायिन् ! विभासि ! तव दर्शनकाङ्क्षयाऽहं
किं सञ्चरामि भुवि हन्त! परिद्रुताङ्गः ? ॥

७. उलकिल्तिरियुम्—

लोकेऽत्र कर्मसरणिश्च समस्तलोक-
स्त्वं भासि सर्वजगतामपि चैक आत्मा ।
वाह्याण्डवर्तिदशदिक्पतिसूरिनाथ-
स्त्वं मे प्रसीद भगवन्नतिमन्दबुद्धेः ॥

८. अरिविलेनुक्करुळोय्—

त्वं ज्ञानिनां हृदि वसन्नसि सर्वगन्धो
ज्योतिर्मयोऽसि वपुषाऽद्य मयि प्रसीद ।
अज्ञोऽहमस्म्यशरणो ! हृदि मे प्रविश्य
त्वं मां किमद्य बहिरेव करोषि खिन्नम् ॥

९. आवि तिकैक्क—

चित्तभ्रमावहतयाऽल्पसुखं प्रदर्श्य
पञ्चेन्द्रियार्तिविवशं किमु पापिनं माम् ।
त्वं नाशयस्यहह! भूमितलाक्रमि त्वत्-
पादाम्बुजं प्रति कदा नु समाह्वयेर्माम् ॥

१०. कुरुका नीळा—

सङ्कोचवृद्धिरहितं सततं त्वनन्तं
चात्मानुभूतिसुखमप्यहह! भ्रमाय ।
मायिन् ! हरे! तव पदाम्बुजभक्तसेवा-
लेशस्य किं सदृशमस्ति बताद्भुतस्य ॥

११. तेरिदल् निनैदल्—

दूरं श्रुतेश्च मननस्य दृढस्मृतेश्च
श्रीशं तदीयचरणाश्रितदासदासः ।
स्तोतुं शठारिरवदच्च सहस्रमेत-
द्भक्तान् करोति दशकं जगदीशदासान् ॥



अथ षष्ठशतके

१०. दशमदशकम् (उलकमुण्डपेरुवाया)

(अत्र शठारिः पद्मासमेतस्य श्रीवेङ्कटाचलपतेश्चरणारविन्द
योश्शरणागतिं करोति ।)

१. उलकमुण्डपेरुवाया—

मन्नाथ! त्वं हि लोकान् पृथुवदनतया भक्षयस्यन्तकाले !
निस्सीमा भाति कीर्तिस्तव विशदमहाज्योतिराळिर्हि मूर्तिः ।
सर्वश्रेष्ठोऽन्तरात्मा मम किल ! तिलकस्सर्वलोकेषु भासि!
श्रीशस्त्वं वेङ्कटेशः कथमहमनघस्त्वत्पदाब्जे भजेयम् ॥

२. कूराव्तीराव्निलनाकि—

दुष्टात्मानः प्रणष्टास्स्वयमसुरगणास्ते बलिष्ठाः प्रदग्धा—
श्चक्रं हस्ते बिभर्षि स्वयमहह हरे दक्षिणे देवदेव ।
तीर्थेष्वम्भोजदीप्रेष्वनलकुलसमेष्वत्र वै वेङ्कटाद्रौ
भासि त्वं ! क्षिप्रमेनं कुरु तव चरणद्वन्द्वसक्तं जनं माम् ॥

३. वण्णमरुळ्कोळ्—

कारुण्यं शीलसिद्धं तव किल जलदश्याम मायाचरित्र
स्वामिन् ! हृत्पद्मसक्ता मधुरतमरसश्चामृतात्माऽमरेशः ।
सत्यं भासि त्वमेवं ! मणिकनकमहामौक्तिकानां च राशी-
नाकर्षन् वेङ्कटाद्रौ रुचिरसरिति मां योजय त्वत्पदाब्जे ॥

४. आवावेन्नादुलकत्तै—

निष्कारुण्यान्नृशंसानसुरकुलगणान् हन्तुमेवाग्निवक्त्रै-
र्बाणैर्वर्षैस्तु शार्ङ्गं ननु वहसि हरे श्रीपते देवदेव ।
सूरीन्द्रैर्मौनिवृन्दैरपि महिततले वेङ्कटाद्रौ सुमाळी-
वर्षैः पूर्णं पदाब्जं तव गमय च मां पापिनं त्वत्कटाक्षैः ॥

५. पुणरानिन्नमरमेळ्—

हे धन्विन् ! गाढबन्धानपि सपदि तदा सप्त वृक्षान्निकृत्त्य
प्रख्यातस्सान्द्रवृक्षद्वयमपि च विशन्नन्तराऽस्यादिमूल ! ।
नाथ श्रीवेङ्कटाद्रौ पृथुजलदसमैर्हस्तिभिस्सेविते ऽस्मिन्
श्रीशार्ङ्गं बिभ्रतस्ते पदकमलयुगे किङ्करस्स्यां कदा वा ॥

६. एन्नाळे नाम् मण्णळन्द—

पद्मद्वन्द्वं कदा वा वयमिह जगतां मानदक्षन्तु धन्याः
पश्यामश्चेति देवास्सततमपि तव स्तोत्रसक्ता भजन्ति ।
सर्वे त्वामेव सत्यं त्रिकरणत इह श्रीश भो वेङ्कटेश
त्वत्पादाब्जे कदा वा मम भवति विभो किङ्करस्यैव दास्यम् ॥

७. अडियेन् मेवियमर्किन्—

सूरीन्द्र ! त्वं हि भक्त्या सततमपि मयाऽत्रानुभाव्योऽमृताब्धिः-
श्शत्रुघ्नः पक्षिराजो ध्वज इह किल ते नाथ बिम्बाधरोऽसि ।
पापाटव्याः कुमार त्वमिह विलससि श्रीधरो वेङ्कटाद्रौ
त्वत्पादाब्जावलोकं क्षणमपि न सहे त्यक्तुमत्युत्सुकोऽहम् ॥

८. नोलादात्तेवुनपादम्

त्वत्पादाब्जोत्सुकस्त्वं क्षणमपि न सहे त्यक्तुमित्येव सूक्ष्म-
ज्ञानेशो नीलकण्ठस्सुमतिरपि चतुर्वक्त्र इन्द्रोऽपि रामाः ।
दिव्यास्त्वा मीननेत्राः परित इह हरे वेङ्कटाद्रौ भजन्ति
त्वामेव त्वं हि कान्तस्सकलजनमनोरञ्जनो मामुपेहि ॥

९. वन्दाय्पोले वारादाय्—

आयातोऽप्यत्र न त्वं किल नयनपथे वर्तसे नागतोऽपि
प्रत्यक्षं तिष्ठसि त्वं द्वियुगभुज सरोजाक्ष बिम्बाधरोऽसि ।
मत्प्राणेशामृताब्धे निशमपि दिवसं चात्र चिन्तामणीन्द्राः
कुर्यास्श्रीवेङ्कटाद्रौ न हि तव विरहं जातु सोढुं क्षमोऽस्मि ॥

१०. अकलकिल्लेनिरैयुम्—

विश्लेषं न क्षणं च स्वयमहह सहे चेति पद्मा तवोर-
स्यास्ते नित्यं समस्तामलसुगुणनिधे नाथ मे लोकनाथ ।
देवैश्श्रेष्ठैर्मुनीन्द्रैरपि महिततमो वेङ्कटाद्रौ विभासि
त्वत्पादाब्जं प्रविष्टोऽस्म्यहमिह सततं दासभूतोऽस्म्यनाथः ॥

११. अडिक्कीळमन्दुंपुकुन्दु—

लोका उज्जीवितास्त्त स्वयमिह मम पादाब्जयुग्मे श्रितास्ते-
त्युक्त्वा नित्यं प्रसन्नं प्रभुमिह कुरुकापत्तनेशश्शठारिः ।
स्तोतुं श्रीवेङ्कटेशं दशकमिदमपि प्राह मुक्त्यै सहस्रे
ज्ञातॄणामस्य भक्ता अपि परमपदे नित्यवासं भजन्ते ॥

इति श्रीकलिकिसिंहभगवद्भिरचितायां सहस्रगाथारत्नावल्यां

षष्ठशतकं सम्पूर्णम् ॥

अथ सप्तमशतके

१. प्रथमदशकम् (उण्णिलावियवैवराल्)

(पञ्चेन्द्रियैस्सह स्वस्यावस्थानं सुदुस्सहमित्याक्रन्दति शठारिः ।)

१. उण्णिलावियवैवराल्—

सङ्ख्यातीतविचित्रवृत्त भगवन् सूरीन्द्रसंसेवित
त्रैलोक्याधिपते ममामृतनिधे स्वामिन् प्रभो! मे हरे ।
अन्तर्वैरिकुलेन पञ्चकरणग्रामेण सम्पीडितं
मामेवं तव पादपङ्कजनतेर्दूरे तुदस्येव हा ॥

२. पूवैयाकुम्वन्को—

माधुर्याद्यमृताम्बुधे जलनिधि-क्ष्मा-पालक श्रीहरे

नीलाम्भोदनिभ श्रुतीरितगुण श्रीचक्रपाणे विभो ।

मां पापाश्रयमत्र घोरविसरत्पञ्चेन्द्रियाणां वशं

कृत्वा हन्त दिवानिशं च तुदसि त्वत्सङ्गिनं नातनोः ॥

३. वैदियानिर्कुमैवराल्—

विस्तीर्णां पृथिवीमिमां किल सृजन् मूलात्मकस्त्वं हरे

भक्षित्वा पुनरुद्गिरन्नपि पदेनाक्रम्य चोद्धृत्य च ।

ज्योतिष्मन्मकुटाञ्चित त्वमिह मां पञ्चेन्द्रियैः पीडितं

कुर्वन् किं मधुसूदनाद्य भजसे हा! त्वत्पदाद्दूरगम् ॥

४. ध्रु दुनानरियावकै—

सर्वाचेलनचेतनावळिमपि त्वय्येव कृत्वा स्वयं

बालस्त्वं वटपत्रशाय्यहह मे पापस्य दिव्यौषध ।

दुष्पञ्चेन्द्रियवश्यमेव किल मां कृत्वा भ्रमान्धं भुवि

त्वत्पादाम्बुजसंश्रयाद्विरहितं त्यक्त्वाऽसि दूरं गतः ॥

५. तीर्मरुन्दिनू यैन्दुनोय्—

चक्रं ते करतो वहन्नसुरनिर्मूलप्रणाशं हरे

कृत्वा सूरिकुलाधिपोऽसि भगवन् मे पञ्चशब्दादिभिः ।

बन्धं दुर्विषयैः प्रकल्प्य परितः पञ्चेन्द्रियैर्मां तुदन्

किं दूरीकुरुषे रुजो मम महादिव्यौषधात्माऽद्य कः ॥

६. विण्णुलार्पेरुमार्कु—

भूम्यामत्र हि नित्यसूरिनिवहानप्येवमेतान्यहो

हा! हा! हन्त! तुदन्ति मां च बहुधा पञ्चेन्द्रियाणि स्वयम् ।

किं वैतानि न कुर्वते वद भवानेव त्यजेन्मां च च-

न्नादे मे कवितासु भक्तिमयन स्वान्तोक्तिषु भ्राजसे ॥

७. ओनुशोल्लियोरुत्तिनिलू—

देवैश्चाप्यसुरैस्सहाम्बुधितले सर्वावृतं भूधरं
कृत्वा मन्थनकल्पभो मम हरे दिव्यामृतात्मा भवान् ।
कारुण्यन्तु विना तवात्र चपलैः क्षुद्रैश्च पञ्चेन्द्रियै-
र्नित्यं पीडित एव तानि च कदा जेतुं प्रभुस्स्यामहम् ॥

८. द्दृशमुदेनत्तोनि—

स्वामिन् मे वरसूरिमूले भगवन् कृष्णात्र पञ्चेन्द्रियै-
र्देवानामपि मोहनोऽसि महतीं मायां तवेमां हरे ।
निर्मूल्याद्य तवायुधादिसहितं दिव्यं शुभं विग्रहं
स्मर्तुं स्तोतुमिहार्चितुं च कुरु मे शक्तिं दयावारिधे ॥

९. कुलमुदलड्डुन्तीविनै—

भूम्यादीनि जगन्ति सर्वचिदचिद्वर्गैस्सृजन् प्राग्भवान्
कृष्णो मे प्रभुरद्य भाति च परं ज्योतिस्स्वयं भास्वरम् ।
वंशोन्मूलन-तापकारण-महापापावलेर्वर्धके
गर्ते दुर्विषयात्मके पतनकृत्पञ्चेन्द्रियात्पाहि माम् ॥

१०. एनूपरंशुडरेयेनु—

प्राक् पाथोनिधिमन्थनादमृतहृन्मूर्ते सुतेजोनिधे
मे स्वामिन्निति च स्तवैस्तव पदाम्भोजद्वयप्रेमतः ।
चित्तं मे द्रुतमस्ति यद्यपि तथाऽप्यत्यन्तभाराश्रयं
देहं मे कृतवानसीह विषया मां पीडयन्तीन्द्रियैः ॥

११. कोण्डमूर्तियोमूवराय्—

त्रैगुण्याश्रयतस्त्रिमूर्तितनुभृद्यस्सृष्टिरक्षालयान्
कुर्वन्नाभिसरोजधृच्च सलिले तं शायिनं माधवम् ।
स्तोतुं तस्य हि दासदासपरिषद्दासानुदासस्स्वयं
साहस्रं शठजिच्चकार दशकं चेदं विदन्तोऽनघाः ॥

———०———

अथ सप्तमशतके

२. द्वितीयदशकम् (कङ्गुलुम् पकलुम्)

(पराङ्कुशनायिकायाः श्रीरङ्गनाथविरहव्यथामुल्बणामुपपादयति तज्जननी ।)

१. कङ्गुलम् पकलुम्—

निद्रां नाप्नोति नक्तन्दिवमियमबला स्यात्किरन्ती स्वहस्ता-
दश्रून् ते शङ्खचक्रे विशदयति करोत्यञ्जलिं हस्ततोऽपि ।
पद्माक्षेत्यार्तिवश्या तव विरहवशा हा कथं स्यामिति त्वां
सर्वत्रेयं विचिन्वन्त्यहह कथमियं जीवतीत्यद्य वेत्सि ॥

२. एन्शेय्किन्राय्—

किं वा कुर्यास्सरोजाम्बक मयि कृपयेत्येव चिन्ताकुला स्या-
द्बाष्पावळ्या च रङ्गेश्वर रुचिरसरिन्नायकेत्येव वक्ति ।
उच्छ्वासैश्च द्रुता स्यात् स्मरति किल पुरा कर्म नीलाब्दवर्णं
सृष्टिस्थित्यन्तहेतुं कथयति च कथं हन्त वोज्जीविता स्यात् ॥

३. वळिकलळिरैयुम्—

लज्जाहीनेव भाति स्वयमिह मणिवर्णेति खं पश्यतीयं
मूर्छामाप्नोति वीरासुरकुलहननेत्येव चित्ते द्रुता स्यात् ।
काकुत्स्थ त्वामदृश्यं कथय कथमहं हन्त पश्यामि कृष्णे-
त्यार्ता श्रीरङ्गनाथ त्वमिह वद कथं किं करोष्यद्य चास्याः ॥

४. इट्टकालिट्टकैकळाय्—

निश्चेष्टा पाणिपादे भवति चरति चाप्यन्तरा मोहिता स्या-
त्कृत्वा चाप्यञ्जलिं सा विषयचपलतां वक्ति धिङ्मूर्छितास्यात् ।
कूरोऽस्यम्भोधिवर्णेत्यपि वदति समाहूय हे चक्रपाणे
मामायाहीति मोहं भजति किल हरे रङ्गराट्! किन्नु कुर्याः ॥

५. शिन्दिवक्कुम् तिशैक्कुम्—

सञ्चिन्त्यैवापि मोहं भजति पुनरियं याति संज्ञां च भक्त्या
कृत्वा चाप्यञ्जलिं त्वां नमति किरति सा रङ्गराजेति चाश्रून् ।
आयाहीत्येव मोहं भजति नरहरे सायमुद्भिन्नदैत्य !
क्षीराब्धेः प्राप्तपूर्णामृत कुशलमतिं कन्यकां मोहयेः किम् ॥

६. मैयल् शेय्देन्नै—

मायिन् मुग्धां च कृत्वा मम हरसि मनो रम्यवक्त्रोऽसि रत्न-
त्येवं शीताम्बुधारावृतशुभनगरीरङ्गनाथेति वक्ति ।
धत्से तीव्रासिचापौ सुरवर करतश्शङ्खचक्रे गदां च-
त्येवं श्रीशेषशायिन् त्वयि धृतहृदयां तामिमां किन्नु कुर्याम् ॥

७. पालतुन्बङ्गळ्—

नानादुःखानि भोगानपि वितरसि भो दीनबन्धो दयाळो
कालाधीशोऽसि चाम्भोनिधिकृतशयनः कृष्ण गम्भीरभावः ।
मीनाक्रान्ताम्बुधारावृत-शुभनगरी-रङ्गनाथेति तीर्थे-
त्येवं बाष्पाळिवर्षान् प्रवहति सततं मत्सुता कोमलाङ्गी ॥

८. कोलुन्दुवानवर्कळ्कु—

सूरीन्द्रोत्तंसभूषामणिरयमचलोद्धारको गोपतिश्चे-
त्येवं क्रन्दन्त्यनाथा भजति च बहुसन्ताप-निश्वास-शीला ।
तिष्ठन्ती नीलवर्णेत्यपि गगनमियं पश्यति व्यायताक्षी
त्वां पश्येयं कथं वेत्यपि वदति विभो रङ्गराट् किन्नु कुर्याम् ॥

९. एन्तिरुमकळ्शेर्मार्बने—

मन्नाथ श्रीधरोरस्स्थल मम सकलप्राणरूपेति वक्ति
स्वैरं दंष्ट्राग्रतो भूभरण वृषजयन्व्यूढगोपीप्रियेति ।
श्रीमद्रङ्गाभिधाने कृतनिजवसते दक्षिणेऽस्मिन् पुरे त्वं
नित्यं बाभासि विष्णो त्वयि सततमियं मोहिता किं भवेद्वा ॥

१०. मुडिविवल्तनक्कु—

अस्या दुःखान्तकं किं मम भवति न वेद्मीति वक्तीयमेव
त्रैलोक्याधीश शम्भो विकचसुमजटाभृच्चतुर्वक्त्र देव ।
सूरीणां नायकेति स्वयमियमनिशं रङ्गनाथेति वक्ति
भ्रान्तेव त्वत्पदाब्जे जलदरुचियुता प्राप्तसत्ता चकास्ति ॥

११. मुकिल्वण्णनडियै—

मेघश्यामाङ्घ्रियुग्मं शरणमुपगतश्श्रीशठारिस्स्वपुर्यां
वृक्षावल्यम्बुधाराद्यवतरणतले दिव्यसाहस्रकर्ता ।
विष्णोस्स्तुत्यै विदुर्ये दशकमिदममी दिव्यसूरीन्द्रधाम्नि
प्राप्य स्थानं परं तत् सततमपि भवन्त्यद्भुतानन्दसिन्धौ ॥

अथ सप्तमशतके

तृतीयदशकम् (वेळ्ळैच्चुरि शङ्गोडु)

('तेन्तिरुप्पेरै' नामकं श्रीकुरुकापुरीप्रान्त्यं दिव्यदेश मनुभवति श्रीपराङ्कुशनायिका ।)

१. वेळ्ळैच्चुरिशङ्गोडु—

यूयं नैव हि वित्थ मातर इदं-श्रीशङ्खचक्रे वहन्
पद्माक्षो हृदि मेऽत्र तार्क्ष्यमधिरुह्यास्ते च सञ्चारवान् ।
केश्शब्दैरिह वर्णयामि सुसुखावासं हरेस्तस्य तु
१श्रीवेराख्यपुरं भजे श्रुतिरवैर्युक्तं च वाद्यारवैः ॥

२. नानक्करुङ्कळल्—

हे सख्य श्शृणुताद्य मातर इमा यूयं च पार्श्वस्थिताः
चित्तं नैव हि मे वशं मम सदा दुर्निग्रहं भाति च ।

---

१. तिरुप्पेरै—इति प्रसिद्धपुरम् ।

सक्तं भात्यधरे हि बिम्बसदृशे नक्तन्दिवं श्रीपते-
श्श्रीबेराख्यपुरे स्थितस्य तु हरेः कृष्णस्य देवेशितुः ॥

३. शेङ्गनिवायिन् तिरत्तदायुम्—

मच्चित्तं सततं च सक्तमधरे बिम्बायिते श्रीहरे-
र्भास्वन्मौळितले च पद्मनयने श्रीशङ्खचक्रद्वये ।
चित्तं मे सखि मासवासरमहादिव्योत्सवैरावृते
श्रीबेराख्यपुरे स्थिते भगवति न्यस्तं हि लज्जां विना ॥

४. इळन्दवेग्मासै त्तिरत्तु—

चेतो मत्प्रियमन्तरङ्गमहह स्वैरं हि सक्तं बहि-
स्तत्रैवाद्य किमस्ति साध्यमिह मे मग्नोऽस्मि वेदस्वनैः ।
उद्यद्वारिधिघोषराजिसदृशैरुद्भासिते श्रीहरे-
श्श्रीबेराख्यपुरे स्थितस्य चरिते मय्याग्रहात्किं फलम् ॥

५. मुनिन्दुशकटमुदैत्तु—

कोपात्तं शकटं प्रमर्द्य कुमतिं तां पूतनां ध्वंसयन्
मध्ये वृक्षयुगस्य यस्स्म विशति क्षिप्त्वा च वत्सासुरम् ।
कृष्णं तं प्रति मे मनोऽस्ति सततं लज्जाविहीनं ततः
किं मय्याग्रहतः फलं त्यजत मां श्रीबेरपुर्यां क्षणात् ॥

६. कालम्पेर वेन्नैक्काट्टुमिनूकल्—

नीलाम्भोदनिभो हरिर्मम पुरस्तिष्ठत्यहो दूरतो
यात्येवाद्य करान्मम स्वयमियं त्वाशा ममात्युत्कटा ।
भूम्यामत्र स वर्तते किल चतुर्वेदाश्रयैर्वैदिकैः
श्रीबेराख्यपुरे तु सस्यभरिते तत्रैव नेयाऽस्म्यहम् ॥

७. पेरेयिल्शूल्कडल्—

प्राकारावृतवार्धिसंवृतमहालङ्कापुरीनाशक-
श्श्रीबेराख्यपुरेऽस्ति तत्र हि मनो मे मार्गयत्येव तम् ।
नायात्येव किलान्यतश्च सखि मे के स्युस्सहाया इह
भ्रान्तं मेऽद्य मनो न कोऽपि च पुनश्चाहूय सम्भावयेत् ॥

८. कण्डुचे कोण्डेळ्ळारुम् कूडि—

सर्वे मामिह बाह्यचिह्नवशतश्श्रीनीलवर्णं प्रति
श्रीशं मे हृदयं द्रवीकृतमिति प्राहुर्हि निन्दावचः ।
आशा मे सखि तावतैव महती पृथ्वी-समुद्र-द्युलो-
कातीताऽस्ति वसामि तस्य वसतौ श्रीबेरपुर्यां स्वयम् ॥

९. शेर्वन् शेनेन्नुडैत्तोळिमीर्काळ्—

सख्यो मातर एवमद्य न तु मामाश्वासयेत स्वयं
किं वक्तव्यमिहास्ति वो मम मनःपूर्तिश्च नास्तीह हि ।
कृष्णश्श्यामलवर्ण एष भगवानास्ते स्वयं श्रीधर-
श्श्रीबेराख्यपुरे हि सस्यभरिते तत्रैव यामि क्षणात् ॥

१०. नकरमुमनाडुम् पिरवुम्—

सख्यो मे शृणुत प्रभास्वरमहासौधाञ्चितेऽस्मिन् पुरे
श्रीबेरे मकरायतश्रुतिपुटो मायी हरिश्श्रीधरः ।
हत्वा तान् शतकौरवानपि चिराच्चित्तं च नीलाम्बुद-
श्चक्री मे हृतवान् विचिन्त्य तमनु व्रज्यां न लज्जाऽस्ति मे ॥

११. उलितोरुलि—

नानाकल्पयुगादिषु स्वयमहो नामानि रूपाणि स-
द्वृत्तादीनि पृथग्बिभर्ति य इमं स्तोतुं जगत्पालकम् ।
नीलाम्भोधिनिभं शठारिरवदत्साहस्रमन्तादिकं
श्रीबेराख्यपुरं प्रतीह दशकाद्भक्तास्तु चक्रायिताः ॥

अथ सप्तमशतके

४. चतुर्थदशकम् (आलियेळ)

(भगवतो विजयरूपाणि चरित्राण्यनुभवति श्रीशठकोप-
मुनीन्द्रः ।)

१. आलियेळ—

चक्रं च शङ्ख इह शार्ङ्गमपि क्रमेण
दिग्वन्दिवाक्ततिगदासिगणाः किलोच्चाः ।
अण्डाज्जलानि मकुटाङ्घ्रितले किलोच्चे
कालोद्गमे ननु हरे जगदाक्रमोऽयम् ॥

२. आलमलैक्केदिन्दोंडुमोलि—

सर्वेश्वरेण विबुधोत्सवमन्थकाले
दिव्यामृतार्जनविधौ सरितो गिरींस्तान् ।
प्रत्युद्धृता इति च वासुकिमन्दरोत्था
मन्थे च शब्दसरणिर्महती महाब्धौ ॥

३. नान्निलवेळमण्णुम् तानत्तवें—

देवे तदाण्डतलतः पृथिवीन्तु शृङ्गा-
दुद्धृत्य बिभ्रति निजस्थितिमेव याता ।
सप्तान्तरीपसरणिर्गिरयोऽपि सप्त
स्वस्थानगा जलधयोऽपि च सप्त सुस्थाः ॥

४. नाळुमेळ निलनीरुमेळ—

देवस्य भक्षणविधिर्जगतां तु कीदृक्
कालश्च भूमिरपि वारिनभोग्रहाश्च ।
अग्निश्च वायुरपि घोररवैः प्रणष्टा
निर्मूलिताश्च गिरयो महसां प्रणाशैः ॥

५. ऊणुडै मल्लर्तदन्दं शोलि—

देवस्य वृत्तमिह भारतयुद्धकाले
दिव्यं हि मल्लसरणिः प्रबला च भग्ना ।
राज्ञां बलिष्ठपृतनाः किल कम्पितास्ताः
खस्थास्सुराश्च पुरतः प्रबलैश्च शब्दैः ॥

६. पोल्दु मेलिन्द—

देवो दिनान्तसमये गगने च दिक्षु
द्रागेव शोणितसरित्प्रसरान् प्रवाह्य ।
दैत्यासुरप्रमथनं कृतवानितीदं
त्वद्रेर्हि केसरिकृतं च विदारणं स्यात् ॥

७. मालनिरैत्तु—

उद्घोषशालिशरवर्षगणैश्शतानां
रक्षःकुलस्य निधने रुधिरप्रवाहाः ।
अब्धिं च रक्तमयमेव हि कुर्वते स्म
श्रीशो हरिस्समहरत्तु यदा च लङ्काम् ॥

८. नेर्शेरिन्दान्—

बाणासुरस्य बहुबाहुततिप्रभेत्ता
देवो यदा किल तदा ध्वजकुक्कुटेशः ।
ज्वालामयोऽपि दहनश्च स च त्रिणेत्र-
स्सर्वे पलायनकरा स्सकलैर्हि दृष्टाः ॥

९. अन्नु मण्णिरैरिकाल्—

देवो यदा तु जगतामपि सर्गकर्ता
भूमिं जलं च दहनानिलदेवमार्गान् ।
अद्रीन् रविं च शशिनं महसां ततीश्च
वृष्टिं च देवनिवहानकरोत्तदाऽन्यान् ॥

१०. मेय् निरकौल्—

घासोद्यताश्च पशवोऽद्रितलादधस्तात्
संरक्षिता निपतिताश्च गिरेर्गजाद्याः ।
अत्युत्कटाश्च सरितस्तु हरिः प्रवर्षा-
त्रातुं च गोकुलजनान् गिरिधृद्यदाऽऽसीत् ॥

११. कुनूमेड्डुत्तपिरान्—

गोवर्धनोद्धरणकृत्प्रभुभक्तवर्गै-
र्ये स्सङ्गतोऽस्ति शठजित्सततं तदीये ।
साहस्रके तु दशकं तदिदं पठन्त-
स्सर्वत्र चापि जयमेव सदा लभन्ते ॥



अथ सप्तमशतके

५. पञ्चमदशकम् (कर्पारिरामपिरानै)

(भगवद्विभवावतारगुणगणास्सर्वोपजीव्या इति शंसति शठारिमुनिः ।)

१. कर्पारिरामपिरानै—

सर्वे चापि चराचरास्सुमहितायोध्यापुरे वासिन-
स्सर्वत्रापि पिपीलिकातृणमुखास्सृष्टौ च धातुस्स्वयम् ।
मुक्त्यै साधनवर्जिता अपि परं धामाव्ययं प्रापिताः
किं रामन्तु विना प्रभुं तदितरासक्तास्स्युरेवोत्सुकाः ॥

२. नाट्टिट्पिरन्दवर—

जातोऽस्मिन् जगति स्वयं च बहुसन्तापाकुलश्चाश्रित-
त्राणार्थं तु निशाचरान् कुचरितान् प्रध्वंस्य विष्णुर्हरिः ।

लोकं यः परिपालयन् पुनरपि स्वं धाम सर्वेर्ययौ
तद्वृत्तं च निशम्य किं भुवि जना नारायणान्याश्रयाः ॥

३. केळपार्कल्केशवन् कीर्त्ति—

श्रोतॄणां श्रवणाग्नितुल्यवचनैरत्यन्तनिन्दात्मकै-
श्श्रीशं यः किल निन्दति स्म शिशुपालाख्यः पुराणो रिपुः ।
सोऽपि श्रीहरिपादपङ्कजयुगं प्राप्नोदिति ज्ञानिनां
सान्निध्ये किमु केशवान्ययशसश्शुश्रूषवस्स्युः क्वचित् ॥

४. तन्मैयरिपवर—

नानादेवमुखप्रपञ्चसरणेः पूर्वं हि शून्यं यदा
सर्वं चास्त तदा तु कारणजलादण्डं सृजन्नेव यः ।
तत्रामुं चतुराननं पुनरपि स्रष्टुं नियोज्याखिलं
धत्ते योऽस्य विचिन्त्य दिव्यचरितं किं वाऽन्यदासा बुधाः ॥

५. शूळल्कळुशिन्दिक्किल्—

मग्नां तां प्रळयार्णवे तु पृथिवीमुद्धर्तुमेवाञ्जसा
दंष्ट्रातोऽत्र वराहरूपमभजद्यस्तस्य वृत्तं शुभम् ।
आकर्ण्याप्यनुचिन्त्य सद्गतिपरा किं चिन्तयन्तो जना
मायिश्रीचरणाम्बुजातयुगळादन्यद्भजेयुः क्वचित् ॥

६. केट्ट्रुमुणर्न्दवर—

नित्यासङ्कुचितात्युदारकर एवासीद्बलिर्यो महान्
दसस्तेन हि पीडितास्सुरगणास्तैरर्थितोऽयं हरिः ।
दुःखध्वंस्यभवच्च वामनवपुस्तस्याद्भुतं नाटकं
दृष्ट्वाऽऽकर्ण्य विचिन्त्य यान्ति शरणं किं केशवाद्वाऽपरम् ॥

७. कण्डुम् तेळिन्दुम् कत्तार्—

मार्कण्डेयमसौ जटामकुटभृद्रुद्रस्स्वयं पालया-
म्येवेत्युक्तिवरप्रदश्च सहसा तेनागतश्चाच्युतम् ।
सम्प्रार्थ्याभजदिष्टसिद्धिमिति सञ्चिन्त्यापि दृष्ट्वा च ये
ज्ञातारः किममी भवन्ति विबुधाः कृष्णं विनाऽन्यं श्रिताः ॥

८. शेल्लवुणर्न्दवर—

निस्सीमात्मतपोबलात्सुरगणान् सम्पीडयन्तं खलं
दैत्यं तं च हिरण्यमद्भुततनुश्श्रीनारसिंहो हरिः ।
क्षिप्रं हन्त विदार्य मायिचरितोऽभूदेतदाकर्ण्य च
ज्ञातारो यदि शृण्वते किमु बुधाश्श्रीशस्य वृत्तात्परम् ॥

९. मायमरिपवर—

दायं सर्वमपि स्वयं किल बलादाक्रम्य ते कौरवा-
स्सर्वे चापि विनाशिताश्च हरिणा पञ्चाश्रितार्थं ध्रुवम् ।
सारथ्यं वहता चमूं च सकलां हत्वा प्रयात्रेति य-
द्वृत्तं ये तु विदुर्बुधाः किमु हरेस्ते मायिनोऽन्यं श्रिताः ॥

१०. वार्तै यरिपवर्—

अज्ञानाश्रयजन्म–रुक्क्षति–जरा–मृत्यादिभिश्चाखिलां
नानादुःखपरम्परामपि च निर्मूल्य प्रणाश्य स्वयम् ।
भक्तान् यः कुरुते स्वपादकमलद्वन्द्वाश्रितान् रक्षितान्
वृत्तं तस्य विचिन्त्य किन्नु विबुधास्स्युर्मायिनोऽन्यं श्रिताः ॥

११. तेळिवुत्तु वीविनि निन्नवक्कु—

नित्यं निर्मलचेतसस्तु परमानन्दं पदं प्रापयन्
कृष्णो भाति हि नित्यनिर्मलमतिस्तं श्रीशठारिर्मुनिः ।
स्तोतुं श्रीकुरुकापुरप्रभुरसौ साहस्रमेवातनो-
त्तत्रेदं दशकं विदुर्यदि जगत्त्रय्यां विशुद्धाशयाः ॥

———

अथ सप्तमशतके

६. षष्ठदशकम् (पामरु मूवुलकुम्)

(भगवत्साक्षात्कारोऽलाभक्लेशेन उच्चैराक्रन्दति शठारि ।)

१. पामरु मूवुलकुम्—

विस्तीर्णलोक-ततिसृट् किल पद्मनाभो
विस्तीर्णलोक-मितिकृत् किल पद्मपादः ।
पद्माम्बकोऽसि ननु पद्मकरोऽसि देव
त्वां पालकं त्वशरणोऽत्र कदा भजेयम् ॥

२. एनु कोल्ल्शेर्वदन्दो—

पृथ्वीजलानिलमरुद्गगनात्ममाला
सर्वेतराऽपि च पदार्थततिस्त्वमीशः ।
गोपालकश्च गिरिभृत्परमोऽसि देवै-
स्स्तव्यं तवाङ्घ्रियुगळन्तु कदा भजेयम् ॥

३. कात्त वेङ्कूत्तावो—

धृत्वा गिरिन्तु परिपालक शैलवर्षा-
दस्मद्विहारनटनस्तुलसीधरोऽसि ।
रुद्रश्चतुर्मुख उभौ तव हि प्रकारौ
स्तोत्रातिगं हृदिभवं क्व भजे बत त्वाम् ॥

४. एङ्गुत्तलैप्पेय्वनान्—

गोपाल दिव्यतुलसीधर मौळिदीप्र
त्रैलोक्यरूप विषमाम्बक—धातृरूप ।
इन्द्रोऽसि वज्रधरं देवगणोऽसि हि त्वां
सर्वस्य मूलमपि कुत्र भजाम्यहं वा ॥

५. एन्नुळेक्कोवलने—

गोपाल नीलमणिरूप ममाच्युत त्व-
न्नाभीसरोज भव लोकतर्तिं विलोक्य ।
आत्मा हृदीह मम हन्त कथं भजेत्त्वां
दिव्ये च धामनि वसन्तमहो परात्मन् ॥

६. वन्देय्दुमाररियेन्—

माणिक्यनीलतनुरेव किलासि रक्तै-
स्सूनै रिवारुणदुकूलकराङ्घ्रिनेत्रैः ।
नाभीपुटानन-हृदम्बुज-तेजसा च
श्रीवत्सलाञ्छन न वेद्मि गतिं तवाप्त्यै ॥

७. पुन् तिरुमार्बन् तन्नै—

श्रीशं धरोद्धृतिकरं गिरिजापतिं त्वां
पश्यामि किं त्रिपुरनाशकमिन्द्रियेशम् ।
वाणीपतिं किमु शचीशमिहामरेशं
सर्वात्मकोऽसि भगवन् विविधैश्च रूपैः ॥

८. आलियेक्काण्परियाय्—

भीता निशाचरगणास्तु बिलं प्रविष्टा
लङ्कापुरात्सपदि मालिमुखांश्च शूरान् ।
हत्वाऽधिरूढगरुडे तु हरावुपेन्द्रे
त्वय्यत्र भास्वति कथं नु विलोकये त्वाम् ॥

९. काण्डुम् कोलो नेञ्जमे—

क्रूरं निशाचरपतिं प्रबलं च वीरं
हत्वा समूलमपि तस्य किलानुजाय ।
लङ्काधिपत्यकृदगात्परमं पदं यो
राज्यं दधच्चिरममुन्तु कदा भजामः ॥

१०. एत्तरुम् वैकुन्दत्तै—

जातश्शिशुश्च किल गोकुलपुष्ट आसी-
दत्यद्भुत-स्वचरितः खलकंसहन्ता ।
पश्चाश्रितोऽरिपृतनान्तक एष दिव्यं
धाम श्रितः किल ददाति परं पदं नः ॥

११. पुक्कवरि युरुवाय्—

दैत्यान्तकं नरहरिं ननु चक्रपाणिं
श्रीशं शठारिरभजत्कुरुकापुरेशः ।
साहस्रपद्यकृदिदं दशकं पठन्त-
स्स्तव्या भवन्ति दिवि चामरधारिणीभिः ॥

—※※—

अथ सप्तमशतके

७. सप्तमदशकम् (एळैयरावि युण्णुम्)

(भगवदवयवसौन्दर्यस्याऽरुन्तुदत्वं मातृसखीजनसकाशे वक्ति पराङ्कुशनायकी ।)

१. एळैयरावि युण्णुम्—

नारीजनान्तकयुगं किमिदं तु दिव्यं
श्रीकृष्णलोचनयुगं त्वथवा न वेद्मि ।
नव्याम्बुजद्वयमिवास्ति पुरो ममाक्ष्णोः
किं मातरो! मम सखीनिवहाश्च! कुर्याम् ॥

२. आट्टियुम् तूत्तियुम् निनु—

हे मातरः किमु फलं मम निन्दनाद्यैः
किं कल्पवल्ल्युत लताङ्कुर एव पार्श्वे ।
नो वेद्म्यहं हि नवनीतहरस्य नासा
चित्ते ममास्ति कि.ल.दीपशिखेव दीप्रा ॥

३. वालियदोर्कनिकोल्

दिव्यं फलं किमुत किं मम पापपुञ्जं
किं वा प्रवाळशकलो न हि वेद्मि सम्यक् ।
नीलाम्बुदाभवपुषो मम नायकस्य
विम्बाधरो दिशि दिशीह पुरो ममास्ते ॥

४. इन्नुयिर्कैयमॅल्—

नारीवधार्थमिह नीलधनुर्द्वयं किं
कामस्य किं तदिदमिक्षुधनुस्स्वरूपम् ।
कृष्णस्य कामजनकस्य किलेश्वरस्य
भ्रूयुग्ममेव सततं हृदि मेऽस्ति शल्यम् ॥

५. एनुनिनॅ तिकलुम्—

ज्योतिर्मयी किमिह विद्युदियं सुशुभ्रा
मुक्तावळी किमियमस्ति ममासुहन्त्री ।
मन्दस्मितं गिरिभृतस्तदिदं प्रभोर्मे
प्राणान् दहत्यहह मे न गतिर्जनन्यः! ॥

६. उय्विडमेळैयक्कुंम्—

नारीजनासुरगणादिनिवासभूमिः
कुत्रेति भाति मकराकृतिरेव सेयम् ।
श्रोत्रद्वयी रुचिरकुण्डलशोभितेयं
कृष्णस्य शेषशयनस्य तुदेत्सदा माम् ॥

७. काण्मिन् कळन्नैयर्काळ्—

हे मातरस्सपदि पश्यत मामितीदं
नो वेद्मि दर्शयितुमिन्दुरहो किमेषः ।
किं पूर्णमेव विततं नु चतुर्भुजस्य
विष्णोर्ललाटफलकं किल मां हिनस्ति ॥

८. कोळिळैत्तामैरयुम्—

कृष्णस्य दिव्यमहसाऽञ्चितमाननं मे
प्राणान् क्षिलाति निजदिव्यमहःप्रभाभिः ।
पद्मप्रवाळलतिकाधनुरिन्दुमुक्ता-
श्रीपल्लवादिभिरिहाभरणैर्जनन्यः! ॥

९. कोळ्किन्र कोळिरुळै—

गाढान्धकार-निबिडान्तर-नीलतन्तु-
सन्तान-निर्मलततिः किमिहालकाळिः ।
कृष्णस्य दिव्यतुलसीसुरभिर्हरेन्मां
हे मातरः किमितिमां क्षुभितां कुरुध्वे ॥

१०. नित्ति मुत्तुळेन्नु—

हे मातरः किमिति मां बत निन्दथाद्य
बाह्याङ्गणेऽत्र किमु तिष्ठसि निस्त्रपेति ।
ज्योतिर्मयेऽद्य मकुटे मणिवर्णदीप्रे
कृष्णस्य भाति हृदयं मम नित्यसक्तम् ॥

११. कट्करिय पिरमन्—

नेत्रातिगैर्विधिशिवेन्द्रमुखैश्च देवै-
र्दृश्यो न यस्तमिह कृष्णमसौ शठारिः ।
स्तोतुं सहस्रमतनोत्कुरुकापुरेशः
कुर्यादिदं च दशकं दिवि सूरिसङ्गम् ॥

अथ सप्तमशतके

८. अष्टमदशकम् (मायावामननें)

(अत्र दशके भगवता प्रदर्शितं स्वविचित्रविभूतियोगमनुभवति शठारिः ।)

१. मायावामनने—

मायात्मवामन हरे मधुसूदन त्वं
ब्रूहीह मे त्वमसि वह्निजल-क्षमात्मा ।
आकाश-वायु-जननी-जनक प्रजात्मा-
ऽप्यन्यच्च सर्वमिति कीदृगयं प्रकारः ॥

२. अङ्गण्मलत्तॆण्डुळाय्मुडि—

त्वं ब्रूहि मेऽच्युत लसत्तुलसीस्रगाढ्य-
मौळे किमिन्दु रवि तारक राजिरूपः ।
त्वं किं तमश्च भुवि वृष्टिनुती च निन्दा
क्रूरो यमश्च किमसि त्वमहो विचित्रम् ॥

३. चित्तिरत्तेर्वलवा—

सारथ्यवेषधर चक्रधर त्वमेव
ब्रूहीह मे युगयुगेष्वपि तत्स्वरूपः ।
तत्तद्भवाखिल–समान चराचरात्मा
नानाविधोऽसि च कथं विषमा विचित्राः ॥

४. कळळविळतामरैक्कण्कण्णने—

पद्माक्ष कृष्ण वद किञ्चिदिदं हरे मे
सन्तोऽप्यसन्त इह भाति भवाननन्ताः ।
नानाविधोऽसि च विशालपयोधिमध्ये
शेषे शयान इति योगविधिः कथं ते ॥

५. पाशङ्ङूनीक्किरुयेन्नै—

पाशान् विमोच्य मम दास्यसुखावहस्त्वं
मायिन् वदाद्य तुलसीकुसुमाढ्यमौळे ।
कायोऽपि जीव इह भासि मृतिश्च जन्म
मायामयोऽसि किमु मोहपरम्परेयम् ॥

६. मयक्का वामनने—

हे वामन त्वमसि मोहकरो वदाद्य
वेद्यं मम भ्रमहरं ननु विस्मृतिस्त्वम् ।
ज्ञानं किलोष्णमपि शीतमहो विचित्रं
नानाजयस्सुकृत-दुष्कृत-तत्फलादिः ॥

७. तुयरङ्ङळ्शेय्युम् कण्णा—

दुःखावहः त्वमिह कृष्ण सुदीप्रमौळे
दुःखावहाभिमति-काम-सुखात्मकोऽसि ।
दुःखावहाभिलषितानि चराचराश्च
मानं त्वमेव वद कीदृगियन्तु लीला ॥

८. एन्न शुण्डायङ्ङळाल् निनैन्दाय्—

मन्नाथ कृष्ण! ननु मामपि लीलया त्वं
दासं करोषि तव गोपयसि स्वभावम् ।
त्रैलोक्यमूलमसि सृष्टिकरोऽसि चान्त-
र्व्यापी बहिश्च तव कीदृगयं स्वभावः ॥

९. एन्न इयर्कैकळाल्—

कीदृक् स्थितोऽसि मम कृष्ण कथं स्वभावात्
त्वं हस्त-पाद-सकलेन्द्रिय-रूपधारी ।
शब्द-स्पृगादि-रस-रूपक-गन्धरूपी
सर्वं त्वमेव तव सूक्ष्मकला ह्यनन्ताः ॥

१०. पुष्पैनुणुक्कङ्गळे इदनिल्—

सूक्ष्मान्तरं न किल भाति ततः परं चे-:
त्येवं श्रुतिर्वदति सच्च भवानसच्च ।
पुष्पाद्यलंकृतगुरस्स्थलमच्युतस्य
श्रीशस्य ते ! श्रुतिमतोऽस्ति ! तव प्रकारः ॥

११. आमु वण्णमिव देन्नु—

सर्वेश्वरं मतिविदूरमपि क्रमेण
नानाप्रकारकथनैश्च शठारिसूरिः ।
स्तोता सहस्रमकरोद्द्रविडात्मकं तत्
ज्ञात्वाऽपि चात्र दशकं फलसिद्धिभाजः ॥

अथ सप्तमशतके

९. नवमदशकम् (एन्नूक्कुमेन्नै)

(अत्र संसारे किमर्थं मां स्थापयसीति शठारिणा पृष्टो भगवान् सहस्रगीत्यवतारणार्थ मेवेति प्रत्युक्तवान्; तन्निशम्य सदृश प्रत्युपकाशभावं प्रतिपादयन् विद्धो भवति मुनिवरः ।)

१. एन्नूक्कुमेन्नै—

स्वीकृत्य मां प्रथमतोऽप्यसकृच्च मूर्ध्ना
कृत्वा स्वकीयमिह दिव्यकवित्वसीम्नि ।
स्तोतुं स्वमेव परमं प्रभुमादिभूतं
ज्योतिः परं मम कथं बत ! वर्णयामि ? ॥

२. एन् सोल्लि निर्पन्—

यो मामनुग्रहवशात्कवितासु सक्तं
कुर्वन्ममैव कवितेति जना यथाऽऽहुः ।
कर्ता तथा स्वयमभूत् स्वनुतौ प्रसक्तो
मायी ! त्रिमूर्तिममुमद्य कथं स्तवीमि ? ॥

३. आमुदल्वनिवनेनुं—

सोऽयं कविर्भवति मे स्तुतिकृत्किलेति-
स्वज्ञानकृन्मम पुरा रसनां प्रविष्टः ।
दिव्यं कवित्वमिह भक्तजनाय कुर्वन्
आद्यस्स्वयं स्वविषयं ! किमु विस्मरेयम् ! ॥

४. अप्पनैयेन् मरप्पनु—

पार्श्वे मम स्थित इमां कवितां च कुर्वन्
स्वस्य स्तुतिं य इह मामपि पापशीलम् ।
उज्जीवयन् गुणयुतं कुरुते परात्मा
तं नायकं मम कदा बत ! विस्मरेयम् ? ॥

५. शीर्कण्डुकोण्डु तिरुन्दु—

सञ्चिन्त्य सद्गुणगणान् मधुरं च काव्यं
कर्तुं न शक्तिरिह मेऽस्ति ! तथाऽपि गृह्णन् ।
मामेव दिव्यकवितां स्वयमेव कुर्वन्
मद्द्वारतस्स्वविषयां परमः प्रभुर्मे ॥

६. इन् कविपाडुम् परमकविकळाल्—

स्वस्य स्तुतिं न किल कारयति स्वयन्तु
श्रीमानयं मधुरदिव्यकवीन्द्रमूलात् ।
अद्यागतोऽत्र कृपया मयि सान्निधाना-
द्वैकुण्ठराट् किल मया स्वनुतिं तनोति ॥

७. वैकुन्दनादनेन वल्विनै माय्न्दु—

वैकुण्ठनाथ इह मे प्रबलाघहन्ता
मद्द्वारतस्स्वनुतिमेव हि कर्तुकामः ।
दिव्यां कवित्वसरणिं मयि सन्दधाती-
त्येवं विचिन्त्य सुगुणन्तु कदाऽस्मि तृप्तः ? ॥

८. आर्यनो आळियङ्कै—

अज्ञं च मां कविवरं रचयन्नुदारां
दिव्यां कृतिं स्वविषयां प्रकटीकरोति ।
यश्चक्रभृन्मम विभुः किल ! तस्य कीर्तिं
स्तोतुं प्रभुर्न हि भवेयमनन्तलोकैः ।।

९. तिरत्तुक्केतुप्पुरवाम्—

मां चापि दिव्यमतिमेव विधाय साक्षात्
यो मन्मुखान्मधुरसत्कृतिकृत् स्वनुत्यै ।
तं सर्वशक्तमपि माधवमुत्तमं किं
स्तुत्वा त्रिकालसमयेषु भवामि तृप्तः ? ।।

१०. उद्विक्कैम्मारेन्नुयिर—

आत्मानमेव कृतविन्ननु चार्पयामी-
त्येवं विचिन्त्य स च भाति तदीय एव ।
इत्येववेद्मि ! कवितां ललितां विधातु
स्तस्योपहारकणिकाऽत्र न चापरत्र ।।

११. इङ्गुमङ्गुम् तिरुमालनि—

अत्राप्यमुत्र परमन्तु विनेन्दिरेशं
नास्त्यन्य इत्ययमहो ! शठजिन्मुनीन्द्रः ।
चक्रे सहस्रमुन्नितं दशकं तदेतत्
सङ्कीर्तितं वितनुते परमं प्रमोदम् ।।

सप्तमशतके

१०. दशमदशकम् (इन्दम् पयक्क)

(केरळादिव्यदेशे (तिरुवारन्विळै) इन्दिरया सह विराजमानस्य)
भगवतः पादारविन्दपरिसरे परिचर्यां कर्तुमीहते शठारि)
श्रीनदीमातृकग्रामः = तिरुवारन् विळै (मलैयाळदेशे)

१. इन्दम् पयक्क—

आनन्दामृतभोगसक्तहृदयौ पद्मा च विष्णु स्स्वयं
लोकान् सप्त च सन्नियोज्य च मुदे दास्ये स्वकीये सदा ।
आनन्दाश्रयनित्यवाससहिते तौ श्रीनदीमातृक—
ग्रामे सन्निहितौ हि ! तत्र च मुदा किंवाऽञ्जलिं कुर्म हे ? ॥

२. आकुञ्जोलैयमोनिनि—

निस्सन्देहमिदं भवेत्किमु महालोकानशेषानपि
स्वाङ्घ्रिद्वन्द्वमितान् विधाय जयाति श्रीवामनो मे प्रभुः ।
अत्युच्चोज्ज्वलरम्यसौधवलये ग्रामे नदीमातृके
तं गत्वा किमु सम्प्रदक्षिणमहो ! तीर्थैस्सुगन्धै र्नुमः ? ॥

३. कुडुञ्जोल् वैकलुम् गोविन्दनै—

गोविन्दं मधुसूदनं हरिममुं सिंहं रिपूणां वयं
दृष्ट्वा श्रीगरुडध्वजं तदुषिते ग्रामे नदीमातृके ।
यज्ञैः पञ्चभिरञ्चितेऽपि च चतुर्वेदैष्षडङ्गैरपि
श्रीशं तं प्रणमाम किन्नु सततं ? किं साध्यमेतत्तु नः ? ॥

४. वाय्क्कुम्कोल्निच्चलुम्—

इक्षुव्रीहि–समृद्धसस्यभरिते ग्रामे नदीमातृके
त्रैलोक्याधिपतेः प्रभोस्तु मधुराजातस्य कृष्णस्य नौ ।
रम्यौ नीलतनोश्च दिव्यचरणौ पद्मायितौ किं हृदा
ध्यातुं शक्यतमौ ममात्र वसतः ? किं साध्यमेतत्सदा ? ॥

५. मलरष्पिप्पोवुकल्—

नित्यं मे मनसा विचिन्त्य चरणौ दिव्यौ तु पद्मायितौ
व्यन्तुं मे प्रभुरच्युतो विलसति ग्रामे नदीमातृके ।
भक्तानुग्रहकृच्च शेषशयनः पुष्पाढ्यसौधावृते ।
कीर्तिं तस्य जगत्तताम् यदि वयं गायाम नश्येदघम् ॥

६. ओनुनिल्ला केडम् मुत्तवुम्—

तत्राजौहि तदा विजित्य च रिपुं पूर्णां रमां रुक्मिणीं
दिव्यालङ्कृतसद्भुजां श्रितममुं कृष्णं मनो मे सदा ।
स्तोतुं शक्तमिदं भवेदिति हरिर्ग्रामे नदीमातृके
भातीदं तु पुरं शुभं नमत भो ! भक्ता अघं नश्यति ॥

७. नीलनगरमवुवे—

दिव्या सा नगरीति पुष्पमहिते ग्रामे नदीमातृके
दिव्ये सन्निहितः प्रभुर्मम हरिः कृष्णस्तु सूरीश्वरः ।
बाणावासपुरं प्रविश्य च युधि त्र्यक्षे तु दूरं गते
विष्णुर्बाणसहस्रबाहुभिदसौ ! नान्यश्शरण्योऽस्तिनः ॥

८. भनिमत्तोनिल—

त्वत्पादौ तु विना न मेऽस्ति शरणं चेति ह्रदे दुर्गमे
ग्राहग्रस्तपदो गजस्तु शरणं यस्याङ्घ्रियुग्मं गतः ।
सोऽयं दुःखहरो हरिर्विजयते ग्रामे नदीमातृके
सस्याढ्ये ! तदिदं पुरं च भजतां सर्वं प्रणश्येदघम् ॥

९. सीविनैयुळ्ळत्तिन्—

क्रूराघात्ययतः परं पदमपि प्राप्नोमि चेन्मानसं
सक्तं स्यान्मम सप्रदक्षिणमिदं ग्रामे नदीमातृके ।
वन्द्ये वाङ्मनसानुरूपकृतिभिस्सर्वैश्च लोकैः स्वयं
सस्याढ्ये परमे सदाऽपि कुतुकात् संसेवितुं तत्पुरम् ॥

१०. शिन्दैमत्तोनिनूर्—

चेतो वाक्तनुभिस्तु भक्तनिवहैर्नित्यानुभाव्ये मुदा
नित्यं भाति हि तीर्थपुण्यचरितो ग्रामे नदीमातृके ।
श्रीशस्तत्र मनो ममास्ति सततं ! नान्यत्र चेति स्वयं
सूरीन्द्रः परमद्य वेत्ति ! हृदये गोप्यं न किञ्चिद्भवेत् ॥

११. तीर्त्तनुक्कत्तपिन्—

तीर्थं तं शरणं गतोऽस्मि सततं ! नान्यं किलेति स्वयं
तीर्थस्यैव परस्य दास्यनिरतो विष्णोश्शठारिर्मुनिः ।
तीर्थप्रायमिदं सहस्रमकरोद्दिव्यं पठन्तीह ये
तच्चेदं दशकं स्तुवन्ति किल तान् देवास्स्वदेवीः प्रति ॥

इति श्रीकल्किसिंह-भगवद्विरचितायां सहस्रगाथा-रत्नावळ्यां
सप्तमं शतकं सम्पूर्णम् ॥

अथ अष्टमशतकम् ।

१. प्रथमदशकम् (तेविमारावार)

(यथामनोरथं नित्यविभूतिप्राप्त्यलाभेन भगवतः प्रणतपारतन्त्र्यगुणे अतिशङ्कमानोऽथ प्रसीदति शठारिः)

१. तेविमारावार—

देव्यस्ते श्रीश्च भूमिस्तदितरमहिषीवर्ग एवं च दिव्या-
स्सूरीन्द्राः किङ्करास्ते त्रिभुवनमपि तत्पालनार्हाश्च देहाः ।
सर्वाणीमानि रूपाण्यहह ! तव सरोजाक्ष ! बिम्बाधर ! त्वं
मे भास्यात्मा च रत्नं शुभममृतमहो ! त्वां दिदृक्षेऽब्धिमन्थ! ॥

२. काणुमाररुळाय्—

देहि त्वद्दर्शनं मे सपदि करुणयेत्यर्थिरूपोऽपि पापी
साश्रुश्चाद्दत्य च त्वां मुहुरवदमहं हन्त ! नामानि तेऽत्र ।
किं वेद्म्यक् ते कृपा मय्यहह ! रघुपते ! कृष्ण ! मे कल्पकस्त्वं
सिद्धं पक्वं फलं चामृतमवनिधर ! त्वां तु वीक्षे कथं वा ? ॥

३. एडुत्तपेराळेन्—

प्राप्य त्वां नन्दगोपः पृथुविमलयशास्तस्य सूनुः प्रियस्त्वं
प्राणात्मा वै यशोदाकुलमणि-परमानन्द-मत्तेभडिम्भः ।
विष्णुस्स्वामी मम त्वं खरनखर ! हिरण्याक्षवक्षोविदारिन् ।
वात्सल्याब्धे ! न हित्वं भवसि धृततनुश्चाद्य ! को विश्वसेदा ?

४. उमरुकन्डुकन्द—

युद्धे तत्र धरातलाखिलचमूविध्वंसक ! श्रीहरे !
देवानाममृतं त्वमेव हि विषं रक्षोगणानां ननु ।
आत्मा त्वं मम !भक्तहृद्यमिह यत्तते वपुर्भक्तहृत्-
प्रीत्युत्कर्षकरी क्रिया तव सदा ! मायां न वेद्यज्ञकः ॥

५. आरुयिरेयो—

प्राणात्मन् ! पृथिवीं सृजन्नपि वहन् भुक्तोद्गिरन्मानकृत्
सर्वेशः प्रळयार्णवे च शयितो मन्थो ऽम्बुधे स्सेतुकृत् ।
तद्भेत्ता च भवान्महान् किल नृणां देवोऽसि देवाधिपो
लोकानामसि चान्तरात्मक इह त्वां प्राप्नुयां वा कथम् ?

६. एङ्गुवन्दुरुकोवेन्नैयालवाने—

मन्नाथो जगतां प्रभुश्च सकला लोकाश्च देवाः क्रिया
लोकातीतपदार्थजातमखिलं त्वं सूक्ष्मचिच्चाप्यचित् ।
सर्वं त्वं परमे पदेऽपि विलसत् सर्वेन्द्रियात्युद्गतं !
त्वामेवं परमात्मरूपमनघं मूढः कथं प्राप्नुयाम् ? ॥

७. इरन्ददुम् नीये येदिर्न्ददुम् नीये—

क्षीरं चाज्यं तदीदं रसमपि जलधौ लब्धमेवामृतं त्वं
तस्यापि प्राप्तसारं मधुरमपि फलं तस्य सर्वं त्वमेव ।
नीळासंश्लेषभोगी सुमहितविभवो गोपसिंहोऽस्यतीतं
भव्यं यद्वर्तमानं तदिदमद इति त्वं हि सर्वं च तत्त्वम् ॥

८. मणन्दुपेराया मायत्ताल्मुलुदुम्—

मायातस्सर्ववस्तुष्वपि विशसि महान् गोपबालस्त्वमेव !
त्वन्माहात्म्यं हि रक्षोगणशमन ! सदा पापिनं मां तुदेच्च ।
क्षीराम्भोधिं श्रितस्त्वं गरुडगमन ! भोः शेषशायिन् ! मनो वा
काया स्सर्वेऽप्यहं च त्वमसि ननु ! ततो न प्रणन्तुं च वेद्मि ॥

९. यानुम् नीताने—

याथात्म्यादस्म्यहं च त्वमिह भवमहानारकादित्वमेव—
स्त्येवं चेत्किं फलं स्यात्परमपदगतेः? किं भयं नारकाद्वा ? ।
एवं चिन्ताकुलोऽहं त्वमिति किल यदा तत्त्ववित्स्यां तदाऽपि
स्याद्भीतिर्नारकान्मे ! परमपदमहानन्द ! मे देहि तेऽङ्घ्री ।

१०. ताळकळैयेनक्के—

तेऽङ्घ्री मे दत्तवां स्त्वं ! तत इह कृतविन्मे किलात्मार्पणं ते
साक्षात्सत्यं तनोमि ! स्वयमहह ! महान् ज्योतिषामाकरस्त्वम् ।
त्वं मे साहस्रबाहुः प्रभुरसि हि सहस्राक्षिपादाब्जमौळि-
स्सत्यं साहस्रनामा विलससि सततं ! मे गतिस्त्वं शरण्यः ॥

११. पेरियवप्पनै—

सर्वस्मात्परमेव धातृपितरं रुद्रस्य तातं पितु-
स्सर्वेषाममि मौनिनां च पितरं ध्येयं शठारिर्मुनिः ।
देवानामपि देवमेव कुरुकानाथो जगन्नायकं
स्तोतुं चाह सहसमत्र दशकादुज्जीवनं स्याच्च नः ॥

———

अष्टमशतके

२. द्वितीयदशकम् (नङ्गळवरिवळै)

(संसारे सर्वथाऽपि नैराश्यं प्रकाशयति शठारिः——
सखीजनाय नायिकावाचा ।)

१. नङ्गळवरिवळै—

हे सख्यः ! करकङ्कणैस्सुरुचिरैर्युक्ताः प्रिया मेऽधुना
किञ्चिद्वक्तुमिहोत्सुकाऽस्मि च रहो यद्गोप्यते वैरिणाम् ।
दुस्माधस्समयोऽस्ति मे ! शृणुत ! मे नाथं हरिं वेङ्कटं
तार्क्ष्यारूढमवाप्तुमस्मि शिथिला वैवर्ण्यत स्सुस्तनी ॥

२. वेण्डिच्चेन्नोनु—

प्राप्यैनं बत ! किञ्चिदाप्तुमिह मे सख्यस्स्पृहाढ्यास्तु वः
किञ्चिद्वक्तुमहं न वेद्मि सदृशं हा ! हन्त ! पद्माम्बकः ।
अत्यन्तं रमणीयरूप इह मे नाथ स्स्वयं वञ्चक
स्सूरीन्द्रः किल ! तद्वशं तु वलयं स्त्रीत्वं च मे किं लभे ? ॥

३. कालमिळैक्किलज्ञाल्—

नीलाम्भोदनिभोज्ज्वलामलतनुः कृष्णोऽहरन्मे तनोः
कान्ति कङ्कणयुग्ममप्यहमहो ! तत्प्राप्तये चानु तम् ।
गत्वा चाप्यभवं मनोज्ञवदनाः ! लोकापवादास्पदं !
लज्जा मेऽस्ति वृथाऽद्य ! कालमतिगा पापा न लीनाऽस्म्यहम् ॥

४. कूडच्चेन्नेनू—

प्रासादैर्वलयैर्ध्वजैश्च भरिते दाक्ष्ये कुळन्दाह्वये ?
रम्ये तं नगरे विचित्रचरितं जिष्णुं च तार्क्ष्यध्वजम् ।
श्रीशं चक्रधरं समर्च्य तमनु प्राप्ता स्वयं चेतसा
हीनाऽहं करकङ्कणैश्च ! किमितो दद्यां स्वशीलं विना ? ॥

५. आलि वलवनै यादरिप्पुम्—

याथार्थ्यात्परिशीलने स्वयमसौ सर्वेषु कल्पेष्वपि
स्वैरं चैकविधो ऽप्रमेयमहिमा ज्योतिर्मयश्चादिमः ।
श्रीशं चक्रधरं तमेव हि भजे ! सोऽयं च मामागतो !
हे सख्यः ! किमितः परं बत ! वदाम्येषाऽस्म्यधन्या स्वयम् ॥

६. तोल्लै यम् शोदि—

तत्त्वं चेत्परिशील्यते ननु हरेस्तेजः परं भास्वरं
वाचोऽतीतमहो ! सुरा अपि च ते श्रान्ता न शक्तास्स्तुतौ ।
एवं चास्ति परत्वमस्य ! ननु मेऽद्यार्षींच्च कान्ति ! न मे
हा ! दद्यात्तुलसीं सुमं धटपुरे सुप्तोऽद्य ! कुर्यां किमु ?

७. मालरि केशव नारणन्—

भक्तानामघहृच्च केशवविभुर्नारायणो माधवो
गोविन्दः परमः प्रभुः किल हरिर्वैकुण्ठ इत्येव च ।
स्तोताऽहं बहुनामभिश्च ! हरिणा त्यक्तोऽस्मि ! रूपं निजं
सोऽयं नैव च दर्शयेद्यदि शपे ! मात्राळिसङ्गो न मे ॥

८. इडैयिल्लै यान् वळर्त्त किळिकाळ्—

मत्पुष्टा हि शुकाश्च कोकिलमयूराद्या द्विजा नैव वः
सङ्गो मय्यहहाद्य कान्ति-वलय-स्वान्तादिहारी मम ।
यत्रास्ते परमं पदं तदपि च क्षीराब्धि-शेषाचलौ
सर्वं प्राप्यमहो ! तथाऽपि सुलभं न स्यात्तु पाशो यदि ॥

९. काण्कोडुप्पानन्नन्—

दुर्दर्शोऽस्ति हि वञ्चकश्च जगतां दिव्याकृतिर्वामनो
भूम्यां चापि दिवि प्रवृद्धतनुरेवासौ हि देवाधिपः ।
तस्मै मे तनुकान्तिरर्पिततमा ! लज्जाऽपि मेऽद्यार्पिता !
किं वाऽन्यत्तु ददामि हन्त ! वदत प्रेष्ठास्तु सख्यो मम ॥

१०. एम्नुडै नल् नुदल्—

हे सख्यः ! सुललाटदेशरुचिराः ! किं त्वाऽद्य कुर्यामहं !
चेतो मे न वशं भवेयमिति मां त्यक्त्वाऽनु गत्वा च तम् ।
पाणि द्वन्द्व धृत-स्वशङ्ख-विमलश्रीचक्रसंशोभिन-
श्चन्द्रार्काञ्चित-शृङ्ग-नीलगिरि-सङ्काशस्य सक्तं पदे ॥

११. पादमडैवतन् पाशत्ताले—

पादाम्भोजसमाश्रयैकहृदयस्सन्त्यक्तकामान्तरः
कृष्णं निर्मलकीर्तिमेव सततं स्तोतुं शठारिर्मुनिः ।
साहस्रं कुरुकापुरप्रभुरसावाहात्र गायन्ति ये
तच्चेदं दशकं भजन्ति कुशलं तेऽत्राप्यमुत्र स्वयम् ॥

—꧁꧂—

अथ अष्टमशतके

३. तृतीयदशकम् (अङ्गुमिङ्गुम्)

(परवासुदेवस्य मङ्गलाशासनपरो न कोप्यस्तीति विषण्ण-
श्शठारिः नित्यमुक्तादयो बहवस्तादृशास्सन्तीति
भगवता समाधीयते ।)

१. अङ्गुमिङ्गुम्—

तत्रात्र चाप्यभित एव च देवरक्षो—
मर्त्यादयोऽपि तव सन्महिमानभिज्ञाः ।
त्वां श्रीधराधिप ! सुगोपसुताधवेति
श्रीशङ्खचक्रधरमेव शरण्यमाहुः ॥

२. शरणमाकिय नान्मरै—

सेनागणप्रबलभीतिकरं स्वशङ्खं
भक्तात्मरक्षणचणं वहतो मुरारेः ।
दासा वयं श्रुतिचतुष्टयदूरनिष्ठा
मुक्तास्त्रयं हि मृति-जन्म-जरादि-रोगैः ॥

३. आळुमाळाराळियुम् शङ्गुम्—

चक्रं च शङ्खमपि च स्वयमेष धृत्वा
खड्गं च चापमपि च स्वयमुद्बिभर्ति ।
नान्योऽस्ति भृत्य इति हन्त ! न मे कराभ्यां
तत्पाद-बाहु-परिचारविधिं हि वेद्मि ॥

४. जालम् पोनकमूपत्ति—

दिव्याकृतिस्त्वमखिलं परिभुज्य लोकं
पत्रे वटस्य शयित शिशुरेव मुग्धः ।
तत्सुन्दरं तव वपुश्च पयोदनीलं
पापी दिदृक्षुरहमस्मि ! युगं क्षणं मे ॥

५. कोषियार् माडक्कोळूर्—

कोळूर्-पुरेऽपि च पुळिङ्गुडि-नाम्नि दिव्ये
क्षेत्रे किलासि शयितो ! न किलागतोऽत्र ।
श्रान्तिः किमद्य तव भक्तजनार्तिभङ्गा-
दाहोस्विदत्र जगदाक्रमणात्पदा ते ? ॥

६. पणियावमरर्—

श्रीसूरिवर्यकुलवन्द्य उदारशील—
श्श्रीशङ्ख-चक्रवर-भूषण-भूषिताङ्गः ।
लोकेऽत्र दुस्सहतमार्ति-तति-प्रशान्त्यै
मच्चित्तविभ्रमकरो मणिवर्ण एति ॥

७. वरुवार् शेल्वार् वण् परिशारत्तु—

आयान्ति यान्ति किल भक्तजना महान्तो !
लक्ष्मीधरं हृदि च वण्परिशारपुर्याम् ।
नाथं च मे मम दशां न वदन्ति तेऽमी
ते शङ्खचक्रवहनाय भटोऽस्ति चेति ॥

८. पूर्ने वेलै शुग्नेरार् कोल—

ससाद्रि सप्तजल मध्यगतान्तरीपैः
क्रान्त्वा त्वमेव जितवान् किल सप्तलोकीम् ।
श्रीश ! त्वदीय शुभ-सुन्दर पादपद्मे
दासं दयाकर ! कदा कुरुषे च दास्ये ? ॥

९. तिरुमाल् नान्मुकन् शेम्शडैयान्—

श्रीमन् ! चतुर्मुख-शिवादय इत्यमी त्वां
मन्नाथ ! के बत ! विदुर्मम चित्तहारिन् ! ।
कालानुकूल ! शुभकारण ! मां च दास्ये
कृत्वा विभासि जलदाभ ! किमद्य वच्मि ? ॥

१०. कलक्कमिल्ला नल्-तव-मुनिवर्—

निर्दोषशुद्धतपमा मुनयोऽपि मुक्ता
नित्याश्च सूरिनिवहाः किल तं भजन्ति ।
अस्माभिरस्य किमु वारिधि-मन्थनस्य
स्तोत्रं भवेत्तु सुकरं ? वदताद्य यूयम् ॥

११. उरैयावेश्नोय् तविर—

अत्यन्तदुर्वच-महार्ति-हरस्य विष्णो-
श्श्रीशस्य दिव्यमकुटस्य हरेस्स्तवाय ।
साहस्रमाह शठजित् पठतां तदेत—
द्दिव्यं च तत्र दशकं न पुनर्भवस्स्यात् ॥

अथ अष्टमशतके

४. चतुर्थदशकम् (वार्कडा वरुवियानै)

(तिरुचित्तारु नामके दिव्यदेशे केरळमण्डलीये भगवतस्सन्निधानं सानन्द मनु भवति मुनिवरः ।)

१. वार्कडावरु वेयानै—

भित्वा मत्तद्विपाद्रि-द्विरदन-शिखरौ हस्तिनं तं निपात्य
स्वेच्छासञ्चारकारी गजपति-हननान्मल्लहन्ता च कृष्णः ।
वीधीसौधेषु राज्ञामपि सपदि बहिः पश्यतां कंसहन्ता
*श्रीरम्याद्रीश-पुर्यां वसति यदुशिशुस्तत्र सेव्या सरित्रः ॥

२. एङ्गळ् शेल् शार्वु—

अस्माकं सेव्यभोग्यामृतनिधिरपि मे नायकश्च त्रिलोकी—
सृष्टि-स्थित्यप्ययार्थं त्रिविधतनुररसावन्तरात्मा सदा नः ।
सूरीन्द्रस्सस्यपूर्णे निवसति हि हरिस्तत्र शित्तार्-समीपे
श्रीरम्याद्रीश–पुर्यां न हि शरणमहो ! तं विनाऽस्माकमन्यः ॥

३. एल्लमर् पेरुमान्—

सूरीणां नायकोऽसौ मम च विभुरहो ! भूमिमुद्धृत्य नाथो
मे सर्वानादिपापावळिशमनकरश्शेषिरूपो ममेशः ।
श्रीरम्याद्रीश–पुर्यां वसति शुभसरित्पाश्चिमेऽसौ हि भागे ।
तत्पादाब्जद्वयं मे शरणमिह परं ! नान्यदित्येव मन्ये ॥

४. पिरिदिल्लै येनक्कु—

त्रैलोक्यव्यापि-दिव्य-स्वतनुरयमहो ! वामनो ब्रह्मचारी
मन्नाथोऽम्भोधिमन्थो मणिनिभ इह भात्येव शित्तार् तटेऽसौ ॥
श्रीरम्याद्रीश -पुर्यां क्रमुकयुकदळी-नारिकेळादि-रम्ये
देशे ऽस्याङ्घ्रिद्वयं मे शरणमिह हरेर्नान्यदित्येव सत्यम् ॥

---

* मलैनाळदेशे प्रसिद्धमिदं शेम्कुन्नूरु दिव्यक्षेत्रम् ।

५. अङ्गदोररणुम्—

नान्यन्मे भाति सत्यं शरणमिह ततो ! भाति तत्त्वं तदेव !
स्वान्तं मे भाति चात्मा सततमपि हरौ तत्र नान्यत्र सत्यम् ।
श्रीरम्याद्रीश –पुर्यां निवसति हि स यत्राग्निहोमो वृणोत्ये—
वाकाशे सौधमालां ! सरिदिह शरणं सा ममाभीतिहेतुः ॥

६. पुनक्कु नल्लरनै—

मन्नाथं मे शरण्यं पितरमपि परं मातरं सूरिगोष्ठ्या—
श्श्रीशं स्वस्याप्यवेद्यं शयितमपि विशालाम्बुधौ श्रीहरिं तम् ।
देवानां साम्यमाप्ता वसतिमुपगता यत्र सौधाश्रितायां
श्रीरम्याद्रीश–पुर्यां सरिदुपरितले ऽद्राक्षमीशं तमेनम् ॥

७. तिरुच्चेङ्गुन्नूरिल्—

श्रीरम्याद्रीश–पुर्यां लघुसरिदुपकण्ठाश्रयश्श्रीहरिर्मे
चित्ते नित्यं चकास्ति स्वयमहह ! सरोजाक्षि-बिम्बाधराद्यैः ।
पद्भ्यां हस्तैश्च पद्मैररुणमकुटभृन्नाभिपद्मश्च पद्मां
धृत्वा वक्षस्यसौ श्रीकटिवसनधरो हारदिव्यायुधाद्यैः ॥

८. तिकळचेन् शिन्दैयुळ्—

मच्चित्ते भास्वरं तं महितगुण चतुर्वेद-भूदेववन्द्यं
श्रीरम्याद्रीश- पुर्यां लघुसरिदुपकण्ठाश्रय देवदेवम् ।
वीराणां चासुराणां प्रमथनकरमेवान्तकं स्तोतुमेनं
लोकानां सृष्टि-रक्षा-प्रळयकरमहो ! नैव रीतिं हि वेद्मि ॥

९. पदैप्पोडु केडुप्पु काप्पवन्—

औदार्योदात्तकीर्ते ! सकलविधमहाज्ञानवृत्तादिनिष्ठै—
श्श्रीरम्याद्रीश पुर्यां लघुसरिदुपकण्ठाश्रयो ऽसीह पूज्यः ।
सृष्टिस्थित्यप्ययानामधिपतय इमे धातृरुद्रादयस्त्वं
रक्षादीक्षां दधासि ! स्वयमखिलजगद्रूप एवासि ! सत्यम् ॥

१०. अमरूंद नादनै--

नाथं सर्वेप्सितार्थप्रदमखिलसुरान् रुद्रधातृप्रमुख्यान्
रक्षन्तं तैस्सहस्रत्रितय-निगमविद्-भूसुरैराश्रितायाम् ।
श्रीरम्याद्रीश–पुर्यां लघुसरिदुपकण्ठेऽत्र नित्यं लसन्तं
मायाचेष्टं श्रितोऽहं प्रभुममितमहासस्यकेदारदेशे ॥

१२. तेनै नन् पालै—

नाथं हृद्यं च दुग्धं मधुरसममृतं चेक्षुकाण्डं च लोकान्
भक्षित्वा च स्वनाभिस्थल-सरसिजतस्तं विरिञ्चं च सृष्ट्वा ।
मायाचेष्टं प्रभुं तं सुमहितकुरुकापत्तनेशश्शठारि—
स्स्तोतुं साहस्रमाह स्वयमिह दशकं मोक्षदं बन्धनाशात् ॥

अथ अष्टमशतके

५. पञ्चमदशकम् (मायक्कूत्ता वामना)

(भगवन्तं साक्षाच्चिकीर्षुर्मुनिसार्वभौमस्तृषित सर्वेन्द्रियग्राम-
स्सन् आक्रोशति ।)

१. मायक्कूत्ता वामना—

मायाविचेष्टित ! हरे ! मम वामन ! श्री—
कृष्ण ! त्वदक्षि–कर–पाद–सरोजवृन्दैः ।
रक्ताधरेण तनुपल्लवतश्च भासि
त्वं जङ्गमः किल तटाक इहैहि जन्तु ॥

२. काणवाराय्येन्नु—

अत्यन्तनीलमणिपर्वत ! दीप्रमौळे !
स्वामिन्नुपेहि 'पुरतस्त्विति वाचि नेत्रे ।
शोषोऽस्ति मेऽत्र तृषया ! त्रपया किलाहं
क्लिन्नोऽस्मि ! हन्त न हि जातु च मामुपैषि ॥

३. मुडिशेर्शेन्नियम्मा—

भास्वत्किरीट ! मम नाथ ! लसत्तुलस्या
मालां बिभर्षि ननु चेति वृथा विलप्य ।
श्रान्ता वयं विमलमेघनिभाभ्युपेहि
श्रीमन् ! चतुर्भुज ! सुकुण्डल ! बिम्बवक्त्र ! ॥

४. तूनीर् मुकिल्पोल् तोन्नुम्—

क्षीराम्बुधौ तु शयनाद्रजताद्रिशृङ्गे
त्वं नीलमेघसदृशोऽसि ! सुनीलमूर्ते ! ।
बिम्बाधरश्च मधुमत्कमलाक्षियुग्मं
चित्ते ममास्ति भरितं तव ! किं वदेयम् ? ॥

५. शोल्लमाट्टेनडियेन्—

भुक्ताखिलाब्धिवृतभूमितलोऽसि हि त्वं
नीलाब्दवर्ण न हि वक्तुमहं तु शक्तः ।
त्वत्पादयुग्ममिह भास्वरमस्ति सक्तं
चित्ते ममाद्य रवियुग्ममिवास्य निट् का ? ॥

६. कोण्डलूवण्णा कुडुक्कूत्ता ?—

नीलाम्बुदाभ ! घटलील ! ममाक्षिरूप !
श्रीकृष्ण ! नाथ ! मम दिव्यजगन्निवास ! ।
इत्येव दास्यविधये किल वच्मि ! भूम्यां
वार्धौ दिवि स्वमहसा समुपेहि सेव्य ! ॥

७. वन्दु तोन्नायनेल्—

पद्माक्षि–हस्त–पद ! रक्तसरोजवक्त्र !
सूर्याभनीलमणिरश्मिनिधे ! विभो माम् ।

आयाहि मत्पुरत एव ! न चेत्त्वदङ्घ्रौ
दास्याय मां वृणु समस्तजगत्प्रमाणे ॥

८. ओक्कुमम्मातुरुवम्—

चेतोहरं मम विलोक्य च मेघवृन्दं
क्लिन्नोऽस्मि नाथतनुसन्निभमस्ति चेति ।
पञ्चाश्रितार्थमिह वत्सल ! पार्थसूत–
स्त्वं तान् शतं च हतवान् ! न हि मामुपैषि ॥

९. इदुवोपोरुत्तम्—

दीप्रस्वचक्रधर ! माधव ! तार्क्ष्यकेतो !
किं युक्तमेतदिति चेद्विलपामि भूयः ।
भारापनोदन ! भुवो मधुरापुरे त्वं
जातोऽसि सस्यभरिते ! किमु मां वृणीषे ? ॥

१०. पिरन्दमाया—

मायामयावतरणाद्भुतवीरवृत्त !
श्रीभारताख्ययुधि ! वार्यनिलाग्निभूखैः ।
सर्वैश्च भासि पयसीह घृतं यथा त्वं !
सर्वत्र मायिचरितं क विलोकये त्वाम् ? ॥

११. एङ्गे काण्गेन्—

श्रीसूरिभोग्यतुलसीधरमप्रमेयं
पश्याम्यहं क नु वतेति मुहुः प्रकीर्त्य ।
दिव्योक्तिभिश्शठजिदाह सहस्रमत्र
प्रत्यक्षमेव दशकं पठतां सुखं स्यात् ॥

अथ अष्टमशतके

६. षष्ठदशकम् (एल्लियुम् कालैयुन्)

तिरुक्कडित्तानम् = श्रीकटिस्थानम् ।

(केरळमण्डले 'तिरुक्कडित्तान' नाम्नि दिव्यदेशे भगवतस्सन्नि-
धानमनुसन्धाय प्रहृष्यति शठारिः ।

१. एल्लियुम् कालैयुम्—

नक्तन्दिवं स्मरत मामिति यः कृपालु
रस्मासु भाति तुलसीकुसुमाढ्यमौळिः ।
नाथस्य तस्य पुरमस्ति कटिस्थलाख्यं
स्थानं हि शेषपदवीं भजतां पदं तत् ॥

२. तिरुक्कडित्तानमुम्—

युद्धे महाबलमदाढ्यमवश्यचित्तान्
निर्मूल्य राक्षसगणानखिलान् शरौघैः ।
वीराग्रणीर्वसति मे हृदये कटिश्री—
स्थाने च तुष्टहृदयस्सततं परात्मा ॥

३. ओरुवरिरुवरोर् मूवर्—

एकोऽप्युभावपि च यस्त्रय इत्यपीह
स्थित्वा स्वयं रहसि गुप्ततनुर्बभौ सः ।
श्रीवत्सलाञ्छन उदारमनाः कटिश्री—
स्थाने चकास्ति मनसो मधुरोऽत्र मायी ॥

४. मायप्पिरानेन—

श्रीसूरिसेवित–सुगन्ध–लसत्कटिश्री–
स्थाने वसन् हि महिते भुवि मायिवृत्तः ।
दग्धे ममाघनिचये मयि सौहृदान्मे
चित्ते विशालभुवनेऽत्र कृताश्रयोऽस्ति ॥

५. कोयिल् कोण्डान्—

दिव्यैश्च सूरिनिवहैरखिलैश्च सेव्ये
वैकुण्ठ–दिव्यनगरे सततं वसन् यः ।
कृष्णस्स एव घटलील इहापि भाति
श्रीशः कटिस्थलपुरे मम चात्र चित्ते ॥

६. कूत्तवम्मान् कोडियेन्—

लीलापरः प्रभुरसौ मम पापिनोऽस्मिन्
चित्ते वसन् व्यसनहा मधुसूदनो मे ।
अत्रास्ति सस्यभरिते महिते कटिश्री-
स्थाने ! पुरं तदिदमस्त्यखिलार्तिहन्तृ ॥

७. कोण्मिनिडर केड वुळ्ळत्तु—

गोविन्द एव पृथिवीं च दिवं समग्र
पद्भ्यां ममौ ! भुवि नृणामपि तौ हि वन्द्यौ ।
पादौ ! द्युलोकनिलयैरपि नित्यसेव्यं
चेदं कटिस्थलपुरं भजतार्तिशान्त्यै ॥

८. ताननकर्कळ्त्तल स्चिरन्दु—

दिव्यं पदं च परमं पृथिवी पयोधि–
स्सर्वं च सर्वनगराणि च तत्रतत्र ।

सर्वेश्वरस्य किल तस्य भवन्ति भोग्या—
न्येतत्कटिस्थलमिदं च मनोऽस्य हि स्वम् ॥

९. तायप्पदिकळ तलैच्चिरन्दु—

तेजस्विसूरिवरसेव्य—कटिस्थलाख्ये
वासी च गोकुलपतिः किल मायिवृत्तः ।
अर्चास्थलेषु सकलेष्वपि भाति सेव्य—
स्स्वामी महाननिशमद्भुतशीलवृत्तः ॥

१०. अप्पुंदन् नारायणन्—

नारायणोऽद्भुतचरित्र इहास्ति विष्णु—
श्श्रीवामनो हरिरसौ मम हृत्सरोजे ।
तिष्ठत्यसौ श्रुतिचतुष्टयविद्वरेण्यै—
स्सेव्ये कटिस्थलपुरे किल कल्पकाढ्ये ॥

११. शोलै तिरुक्कडित्तानत्तुर—

वृक्षादिसस्यभरिते महिते कटिश्री—
स्थाने रमापतिमिमं कुरुकापुरीशः ।
स्तोतुं सहस्रमकरोच्छठजित्सुधार्द्रं
तत्रेदमस्ति दशकं दिवि वासमूलम् ॥

अथ अष्टमशतके

७ सप्तमदशकम् (इरुत्तुम् वियन्देन्नै)

(भगवता समुत्पादितमत्यानन्दमयमनुभवमनुभूय प्रीतो भवति शठकोपमुनिः ।)

१. इरुत्तुम् वियन्देन्नै—

विस्मित्य मां स्वचरणाम्बुजयोः करोत्वि—
त्यभ्यर्थ्य तं सुचिरमेव किलाह्वयामि ।
सोऽयं प्रविश्य हृदये मम वामनोऽद्य
प्रीत्या चकास्ति ननु सन्ततसाक्षिभूतः ॥

२. इरुन्दान् कण्डुकोण्डु—

मच्चित्तशासनपराण्यपि चेन्द्रियाणि
दुर्निग्रहाण्यपि निगृह्य च साक्षिभूतः ।
नाथो महाद्रिपवरे ऽतिदयाळुरासी—
दित्येतदत्र न किलाद्भुतमद्य भाति ॥

३. अरुळ् तानिनि यानरियेन्—

नाथस्स एव हृदि मेऽस्ति तमःप्रहन्ता !
नान्यत्फलं भवति चात्र जगत्त्रयं च ।
नैवास्ति तत्फलमहो ! करुणा किमेषा ?
किं मोह एव ? किमु मायिन एव माया ? ॥

४. मायमयक्कु मयक्कान्—

गोपालको मम विभुः किल सूरिनाथः
कृष्णोऽद्य भास्वरदयानिधिरुज्ज्वलं तम् ।

स्वं निग्रहन्तु विमलं हृदि मे निवेश्य
श्रीशो न वञ्चयति मामिह मोहयेत् किम् ! ॥

५. तिरुकुम् तन् तिरुवरुळ् शेय्दु—

कृत्वा प्रसादमिह मय्यपि च स्वकीर्तिं
प्रख्यापितां जगति मे ननु सम्प्रकाश्य ।
मय्येव भाति मणिपर्वतसन्निभोऽसौ !
किं तस्य कीर्तिमतुलामपि कीर्तयेयम् ? ॥

६. पोरुळ् मत्तेनक्कुमोर—

माणिक्यभूभृदुपरि प्रतताम्बुजाभा—
न्यस्याङ्घ्रि-नेत्र-कर-हृद्वदनानि नाभिः ।
मह्यं च किञ्चिदिह वस्तु ददाति चेत्स—
स्वात्मानमेव वितरेद्धत ! तर्हि कस्मै ? ॥

७. शेव्वायुन्दि वेण्पल्—

वक्त्राम्बुजं दशनकुट्मलनाभिपद्मं
तेजस्वि च श्रवणयुग्ममिहास्य शोभा ।
सर्वत्र चाप्यहमहं त्विति भाति ! सोऽयं
मन्दस्मितैर्हृदि ममास्ति ! न वेद्मि चान्यत् ॥

८. अरियेन् मत्तरुळ्—

नान्योपकारविदहं ! मयि दास्यभाग्यं
विन्यस्य मात्युपकृतिं स्वयमेव कुर्वन् ।
अव्याजमेष परमो हृदि मे स्थितोऽद्य
त्रैलोक्यमप्युदरतस्स्वयमेव धृत्वा ॥

९. वयित्तिल् कोण्डु—

भूपालकानपि सुरान् जठरे दधानं
त्रैलोक्यमप्युदरतस्स्वयमेव धृत्वा ।
सर्वेश्वरं स्थितियुतं च यथावदेनं
चित्ते निजे किल सदाऽपि निवेशयामि ॥

१०. वैत्तेन् मदियाल्—

उद्यत्तरङ्गभरितेऽपि च दुग्धसिन्धौ
तेजस्विनि स्वशयने शयितं फणीन्द्रे ।
नाथं परं मम किलाकरवं स्वचित्ते !
विश्लेषमेव न सहे ऽहमितः कदाऽपि ॥

११. शुड र्प्पोम्बणै नम् परनै—

तेजस्वि शेषशयनं परमं प्रभुं नः
श्रीशं हि दास्यविधये ऽङ्घ्रियुगं शठारिः ।
स्तोतुं सहस्रमकरोद्दशकं तदेत—
त्तीव्राक्षितो दहति जन्ममहाघतूलम् ॥

अथ अष्टमशतके

८. अष्टमदशकम् (कणूकळू शिवन्दु—

(अत्र श्रियः पत्युस्सर्वस्वामित्वं प्रतिपाद्यते ।)

१. कणूकळू शिवन्दु—

दिव्याब्जायितलोचनश्च विलसद्दन्तश्च वक्त्राम्बुजे
श्रोत्रद्वन्द्वविलोलकुण्डलयुगो नीलम्बुदाभो हरिः ।

श्रीमान् भास्वररत्नमौळिरसमो विष्णुश्चतुर्बाहुधृ—
च्चक्री शार्ङ्ग-गदासि-शङ्ख-भृदसौ वाभाति चित्ते मम ॥

२. अडियेनुळ्ळानुडलुळ्ळान्—

अण्डान्तश्च बहिश्च शास्ति सकलं योऽन्तर्नियन्ता स्वयं
दुर्वर्ण्यश्च परात्परः परिमळानन्दानुभूतेरपि ।
निस्सीमामृतवारिधिश्च विशदज्ञानामृताम्भोनिधि-
र्देवानां पतिरेक एव हृदये मे भाति चात्मन्यपि ॥

३. उणर्विलुम्बरोरुवनै—

सूरीणां पतिमप्रमेयमपि तं प्राप्तुं प्रसादादहं
तस्यैवाद्य करोमि तं मम हृदीत्येषा कृपा चास्य हि ।
बुद्धि-प्राण-शरीरमुख्यमखिलं चान्यत्तु हेयं भवे-
दित्येवं विशदां मतिं च जनयन्नात्माऽपि मे भात्ययम् ॥

४. यानुम् तानायोलिन्दानै—

जीवाजीवसमस्तमूलमपि तं विष्णुं शिवाब्जासना-
द्यात्मानं प्रथमं सुधारस-मधु-क्षीरेक्षुसारात्मकम् ।
बुद्धि-प्राण-शरीरगं मम हरिं चात्मान्तरात्मानम-
प्येवं गुप्तमिमं मयीह विशदं वेद्मि स्वयं श्रीधरम् ॥

५. निन्र वोन्रै युणरून्देनुक्कु—

आत्मज्ञानवतोऽपि मे न विलसेत्सूक्ष्मस्वरूपं च तत्
प्राज्ञानामपि दुर्गमं हि ! विशदज्ञानेऽपि दुर्दर्शता ।
एवं चेदमुपर्युपर्यपि महागूढं सुसूक्ष्मं भवे-
त्तत्तद्दोषगुणाद्यतीतममलज्ञानात्मकं दुर्ग्रहम् ? ॥

६, नन्नायू ञानम् कडन्दु पोयू—

नानाज्ञानमतीत्य शुद्धमनसा सर्वेंद्रियाणां जया-
दुर्वारामित–सत्प्रधान–विविधज्ञानात् स्वयं चात्मनः ।
निर्मूल्यपि सुखं च दुःखमखिलं सङ्गाच्च मुक्तो यदि
स्यान्मुक्तिः क्षणतः किलेयमपि च प्राप्यैव मुक्तिः क्वचित् ॥

७. अदुवे वीडु—

मुक्तिस्सैव किलात्मभुक्तिरिति या ! तस्याः फलं स्यात्सुखं
चेत्येवं हि वदन् यदि प्रकृतिसङ्गाद्यैर्विहीनस्स्वयम् ।
सा मुक्तिः किल मुक्तिरेव च फलंच स्यात्सुखं ! तद्विना
का मुक्तिः किमु तत्फलं त्विति मनोभ्रान्त्या पतन्त्येव हि ॥

८. एयुत्तारेयुत्तारेयुत्तार—

हा ! हा ! हन्त ! पतन्ति चेति शिथिलान्येवेन्द्रियादीन्यहो !
दृष्ट्वा गेहनिवासिनोऽपि युगपद्बाह्याश्च दुःखाकुलाः ।
क्रन्दन्त्येव यदा तदोत्क्रमदशां प्राप्तस्य चोन्मत्तवत्
तेषु स्नेहपरं मनो मम हरौ सक्तं यदि स्याद्वरम् ॥

९. कुडित्ताकिल् नल्लुरैप्पु—

ऐक्यं स्याद्यदि तच्छुभं शशविषाणाद्याश्च लभ्या यदि
स्याज्जीवः परमः पुमान् गरुडसत्केतुश्च मायी हि नः ।
जीवेनैव हि कल्पितं कथमपि स्यादैक्यमित्याशया
योगीन्द्राः परितोऽप्यटन्ति हि वृथा कालत्रयेऽपीदृशाः ॥

१०. उळरुमिल्लैयल्लराय्—

भक्तानां न किलास्त्यसन्नयमसन्नन्यात्मनां श्रीधरो
भात्यस्मत्प्रभुरद्वितीयविभवस्सर्वैर्गुणैर्मे हृदि ।

वृद्धिं च क्षयमद्य शुक्लशशिनः कृष्णस्य चामी यथा
ज्ञानाज्ञान–तमःप्रकाश-सरणिं सर्वां निहन्मो वयम् ॥

११. तेरुळुम्मरुळुम्मायूत्तु—

ज्ञानं मोहमपि प्रणाश्य च निजे पादाब्जयुग्मे हरि-
स्स्वामी भक्तकुलं निवेश्य कृपया धाता च रुद्रस्स्वयम् ।
श्रीशो रक्षति ! तत्कृपास्पदमसौ साहस्रमाहातुलं
सूरिश्श्रीशठजिच्च ! तत्र दशकं चेदं तदङ्घ्री नयेत् ॥

अष्टमशतके

२ नवमदशकम् (करुमाणिक्क मलै मेल्)

(केरळमण्डलीये श्रीव्याघ्रपुरे स्वस्याभिनिवेशप्रकर्षं प्रकाशयति शठारिरन्यापदेशगिरा ।

१, करुमाणिक्क मलै मेल्

माणिक्याद्रितले महोज्ज्वलसरोजानीव वक्षस्स्थलं
वक्त्रं नेत्रकराङ्घ्रिनाभिवसनादीनि स्वयं भासयन् ।
नाथश्श्रीपतिरस्मदीश उदितक्षेत्रादि सस्यावृते
श्रीमद्व्याघ्रपुरे न वक्ति हि हरेर्नाम्नोऽन्यदेषा सुता ॥

२. अव्वैमीरिदर्केन्—

हे मातृप्रमुखाः ! किमद्य करवै ! रम्ये सुवर्णाचले
तेजस्वी रविरेव किं ग्रहगणास्ताराङ्गणा वेत्यहो ! ।
भास्वद्दिव्याकिरीट हार-सकलालङ्कार-भूषाधर
स्स्वामी व्याघ्रपुरस्य सस्यभरितस्येति स्तवीति स्वयम् ॥

३. पुकलुमिवळ् निन्र—

गर्जत्तुङ्गतरङ्गवारिधिरहो ! ज्वालागणैरुज्ज्वलै—
स्सञ्चारी किमयं त्विति स्तुतिकरा यस्यारयोऽपि स्वयम् ।
तस्यैवायुधचक्रधारिण इयं रक्षः प्रहर्तुर्हरेः
श्रीमद्व्याघ्रपुरं हि रत्नभवनैर्दीप्रं स्तवीत्यन्वहम् ॥

४. ऊर्वलम् किळर शोलैयुम्

उद्यद्वृक्षगणेक्षुकाण्डनिवह-व्रीह्यादिभिर्भूषिते
श्रीमद्व्याघ्रपुरे च रम्यसलिलक्षेत्रे त्रिलोकीभुजः ।
सूरीन्द्रस्य गुणैश्शुभैर्विलसतश्श्रीशस्य नाम वळिं
सेयं कीर्तयति स्वयं हि सततं सम्यक्प्रकाशावहा ॥

५. पुनैयिलैकलणिवुम्—

प्राचीनाभरणावळिं सपदि यद्धृत्वा त्वियं शोभते
सद्वस्त्रैरपि च स्वगात्रविलसल्लावण्य-शोभादिभिः ।
तत्सर्वं न निसर्गसिद्धमिह हि श्रीव्याघ्रपुर्यां प्रभो—
स्त्रैलोक्याधिपतेः कृपाम्बुधितले मग्नाऽस्ति सेयं स्वयम् ॥

६. तिरुवरुळ् मूळ्कि वैकलुम्—

गम्भीराम्बुधिवर्ण-कृष्ण-करुणा-पाथोधि-मग्ना चिरं
सेयं सङ्गमकाल-चिह्न-भरिता ! तस्मादयं तामिमाम् ।
भूयश्चाप्युपकर्तुमत्र वसति श्रीव्याघ्रपुर्यां हरि—
स्तस्यानुग्रहतस्त्वियं विलसति श्रीपक्वपूगाधरा ॥

७. मेल्लिडै चेल्ववण्कोडि—

मूर्ध्नी पल्लवसन्ततिं सुरुचिरां ताम्बूलवल्ली स्वयं
धृत्वा भाति ! तया किलु क्रमुकसद्वृक्षोऽत्र संश्लिष्यते ।

पुष्पैः पक्वफलैश्च भाति कदळी सा नारिकेळान्विता,
श्रीमद्व्याघ्रपुरेऽत्र कृष्णचरणौ सेयं श्रिताः कन्यका ॥

८. मडवरल्नैमीर तळ्कु

युष्माकं जननीजनाः ! किमु वदाम्यत्यन्तसम्प्द्युता
गीर्वाणोक्तियुताश्च वेदपठनैराराधयन्तो हरिम् ।
श्रीमद्व्याघ्रपुरेऽत्र सान्ति बहवश्चाज्याहुतेर्धूमतो
लोकान् व्याप्य च ! शेषशायिन इयं नामैव सङ्कीर्तयेत् ॥

९. परवाळिवळ् निन्रिराप्पकल्—

शीताम्भोनिधिवर्ण-कृष्ण-चरितैर्वेदादिघोषैर्युता
विप्रा यत्र सरस्सु चाब्जनिवहा दीपायिताश्चोज्ज्वलाः ।
श्रीमद्व्याघ्रपुरं हि सस्यभरितं तत् कीर्तयन्ती सदा
सेयं नान्यदहो ! वदेन्मम सुता नक्तन्दिवं तत्परा ॥

१०. अनि मत्तोरुपायमेन्—

उत्तुङ्गैर्नवरत्नसौधनिवहैर्या दक्षिणस्या दिश—
श्श्रीमद्व्याघ्रपुरी चकास्ति तिलकप्राया हि तस्यामियम् ।
श्रीकृष्णस्य कृपाश्रया भगवतो विष्णोस्स्वयं मायिनो
नो चेद्दिव्य सुगन्धिशीततुलसीयुक्ता कथं स्यादियम् ? ॥

११, नेर पट्ट निरै—

त्रैलोक्याधिपतेः प्रभोर्भगवतः कैङ्कर्यसक्तात्मनां
भक्तानामपि भक्तभक्तिभरितो योऽसौ शठारिर्मुनिः ।
दिव्यद्राविडसूक्तिहारमकरोत् साहस्रपद्यात्मकं
तत्रेदं दशकं पठन्ति भुवि ये ते श्रीपतेः किङ्कराः ॥

अष्टमशतके

१०. दशमदशकम् (नेडुमाल्कडिमै)

(अत्र स्वीयां भागवतनिष्ठाकाष्ठामुपवर्णयति शठारिः ।)

१. नेडुमाल्कडिमै—

दास्यं तस्य परस्य पुंस यह यत्कांक्षे तदा मे क्षणात्
दुर्मार्गास्सकलाश्च कुत्र चिदहो ! लीनाः प्रणष्टास्स्वयम् ।
तद्दासाङ्घ्रियुगाश्रयोऽथमिह मे त्रैलोक्यराज्यादपि
श्रेयानेव ! कथं त्यजामि तमहो ! तद्दासपादाश्रयम् ?

२. वियन्मूवुलकुपेरिनुम्—

त्रैलोक्याधिपतित्वमप्यहह ! मे माऽस्त्वेव माऽस्त्वेव तत्
स्वातन्त्र्यं परमं च केवलपदं स्वात्मानुभूत्यात्मकम् ।
विष्णोर्वार्षुकमेघसन्निभतनोः पादाब्जदासास्तु ये
तेषां पादसमाश्रयादिह महानन्दं भजे ! नान्यतः ॥

३. उरुमो पाधियेनुक्कु—

त्रैलोक्यं सकलं स्वदिव्यवपुषा व्याप्य स्थितं वामनं
पद्माक्षं यदि संश्रये स्वयमहं दास्याय तत्पादयो ।
तच्चाप्यद्य न रोचते मम तदीयाङ्घ्रिद्वयं ये श्रिता-
स्तेषामेव महात्मनां भुवि पदाम्भोजाश्रयोऽस्त्वद्य मे ॥

४. इङ्गे तिरिन्देर्क्कु—

पृथ्वीं य स्सकलामिमां ननु पुरा भुक्त्वाऽपि चोद्गीर्य च
स्वामी बिम्बफलाधरस्सुरुचिराम्भोजाक्षियुग्मो हरिः ।

तत्कल्याणगुणास्तु वाचि यदि मे चित्ते च रूपं शुभं
हस्ते पुष्पचयश्च चेद्भुवि किमस्त्यत्रापि मे शोच्यता ! ॥

५. वळिपट्टटोडवरुल्पेत्तु—

सन्मार्गैर्यदि याम्यहं तु परमं धाम प्रभोर्मायिनः
पादाम्भोजयुगप्रभाविलसितश्चानन्दमग्नो दिवि ।
तत्सर्वं न वरं हि मे ! भुवि परं देही स्वरूपं मम
ज्ञात्वा मत्कवितारसामृतपरीवाहे भवेयं बुधैः ॥

६. नुकर्च्चि युरुमो—

हस्तं मत्तगजं प्रणाश्य विलसच्चक्रायुधो भाति य-
स्तीक्ष्णाक्षिद्वयरक्तकेशमसुरध्वंसं च तार्क्ष्यं नयन् ।
तत्कल्याणगुणानुभूतिसदृशं किं वा भवेज्जातु चित्
त्रैलोक्याधिपतित्ववैभवमपि स्यात्फल्गु ! मे न प्रियम् ॥

७. तनिमा प्पुकले—

दिव्यश्लाघ्यगुणान्वितं च सततं सृष्टेश्च मूलं परं
ब्रह्म स्वेक्षणाचिन्तनं च जगतां हेतुश्च देवाधिराट् ।
तस्याङ्घ्रिद्वय-पल्लवाश्रयणतोऽप्यस्माकमेतत् प्रियं
तद्भक्तावळिसङ्गमाद्भवति यत्सौख्यं महत्सन्ततम् ॥

८. नालुम् वायूक्क नङ्गळ्कु—

सृष्ट्वैकार्णवमद्भुतं तदुपरि स्वैरं शयानो हरिः
पादाम्भोज-भुजोत्तमाङ्ग-सरणिं स्वीयां प्रकाश्याच्युतः ।
भास्वत्कल्पककोटिसूर्यविलसन्माणिक्य-भूभृत्सम-
स्तद्भक्तावळिसङ्गमोऽस्तु सततं चस्माकमुज्जीवनः ॥

९. तमरकल् कूट्टम्—

भक्तानामखिलाघनाशनपटुस्स्वामी चकास्ति स्वयं
धृत्वा चक्रगदासि-शार्ङ्ग-जलजान्यन्यायुधान्यप्यसौ ।
सौन्दर्याकर-पञ्चबाण-जनकस्तस्यानघा ये जना
दासास्तादृशदास—दास्यविभवो नित्यं चकास्त्वेव नः ॥

१०. वायुक्क तमियेर्कु—

मूर्तिं चाप्यतसीसुमस्य सदृशीं दिव्यां चतुर्बाहुभृ-
द्धृत्वा भाति च चक्रपाणिरतुलो मे नायकोऽसौ हरिः ।
नित्यं तच्चरणाब्जदाससरणेर्दासानुदासाश्च ये
तद्दासाः प्रभवो हि नः ! कुलमिदं कल्पेषु दास्येऽस्तु नः ॥

११. नल्ल कोलपाट्टु—

त्रैलोक्येऽपि विचित्रदिव्यरचने सर्वत्रगं श्रीहरिं
कृष्णं पद्मविलोचनं हि कुरुकापुर्याश्शठारिः प्रभुः ।
स्तोतुं चाह सहस्रमुत्तममिदं भक्ता विदुश्चेत् स्वयं
दाराद्यैर्दशकं भवन्ति भवनेष्वेवात्र भाग्यान्विताः ॥

इति श्रीकल्किसिंह-भगवद्भिरचितायां सहस्रगाथा-रत्नावळ्यां
अष्टमं शतकं सम्पूर्णम् ॥

———

अथ नवमशतके

१. प्रथमदशकम् (कोण्डपेण्डीर)

(अत्र औपाधिकबन्धून् विहाय निरुपाधिकबन्धुं परमात्मनं सेवध्वमित्याह शठारिः ।)

१. कोण्डपेण्डीर—

पत्नीपुत्रसुतादि-बन्धु-परिवाराद्याः फलापेक्षिणो
वित्ते हस्तगते हि नः परिजना नैवान्यदा सादराः ।
तस्मादष्टदिशासु चोपरितलेऽधस्ताच्च सर्वत्र य-
द्विश्वं तत्परिभुज्य रक्षितुरमी नाथस्य दासा वयम् ॥

२. तुणैयुम् शार्वुम्—

आप्ता बन्धुजनाश्च रक्षणपरास्तेऽमी च नः पार्श्वगा-
स्सर्वे स्वार्थपरायणा हि नटनैः कर्षन्ति सर्वं रसम् ।
तस्मादेकशरेण सप्तविटपिच्छेत्तुः परं स्वामिनो
दास्यादेव भवाम नीलजलदस्योज्जीविता रक्षिताः ॥

३. पोरुळ् कैयुण्डाय् शेल्ल—

वित्ते हस्तगते हि नः परिजनास्स्वस्तीति नानास्तुतिं
कृत्वा यान्ति धनग्रहा न हि भजन्त्यस्मान् दरिद्रायितान् ।
नानाकण्टक-राक्षस-प्रमथनं नाथं श्रिताश्चेद्वयं
जातं श्रीमधुरापुरे हरिममुं नान्यच्छरण्यं हि नः ॥

४. अरणमावर—

आपत्कालसुहृत्तमा इति वृथा वित्तादिदानैर्वशे
ये ये चात्र कृतास्त एव च ऋणग्राहाः प्रयान्ति स्वयम् ।

अस्माकं न सहायका इति परं सत्यं वृथा वर्णनं !
शीलं श्रीमधुरोद्भवस्य शरणं ! नास्माकमन्यद्भवेत् ? ॥

५. शदिरमेत्रु—

चातुर्यं परमं निजं हि बहुधा सम्भाव्य वाङ्माधुरी-
मेव स्त्रीनिवहा नटन्ति च सुखं तैः प्राप्य तुष्टा अपि ।
काले हन्त ! पतन्ति दुःखजलधौ तस्माद्दुरात्मासुर—
ध्वंसं श्रीमधुरोद्भवं तु शरणं सम्प्राप्य यामस्सुखम् ॥

६. इल्लै कण्डीरिन्बम्—

नास्त्येवात्र सुखं जगत्यहह ! हा ! श्रीशस्मृतिं तां विना
याता एव वृथा स्वयं त्वगणिता जाता मृताः प्राक्तनाः ।
पूर्णश्रीमदनादिसिद्ध मधुरापुर्युद्भव-श्रीहरेः
कल्याणात्मगुणस्तुतिर्हि शरणं ! नान्यद्भवेत्सारतः ॥

७. मत्तोन्रिल्लै—

नान्यद्भाति शरण्यमित्यपि वयं ब्रूमस्स्वयं सारतो
युष्माकं हितमेव ! नात्र जगति क्लेशावकाशो नृणाम् ।
नित्यं चिन्तनमेव भाति फलदं ! नैवात्र हानिः भवेत् !
गोपालं मधुरोद्भवं गुणनिधिं स्तुत्वा ऽनिशं जीवत ॥

८. वाळ्वल् कण्डीर—

लोकोज्जीवनमेतदेव हि वरं ! सन्दृश्यतां हन्त ! हा !
मायिश्रीचरणस्तुतिं हि शरणं प्राप्याप्यनन्याश्रयाः ।
ये ये सन्ति सुहृच्चकास्ति मधुरापुर्युद्भवः श्रीहरि—
स्तेषां ! तद्गुणकीर्तनान्न हि परं सञ्जीवनं रक्षकम् ॥

९. यादुमिल्लै—

नास्त्येवात्र ततोऽतिशायि ! सततं चैश्वर्यकामास्तथा
नीता एव दरिद्रतां किल यथाश्रोत्रप्रवृद्धौ रताः ।
निश्श्रोत्राहि भवन्ति हन्त ! तत एवान्यन्न कृष्णात्परं
तत्त्वं श्रीमधुरापुरे जनिजुषो मालाढ्यबाहुद्वयात् ॥

१०. कण्णनल्लालिल्लै कण्डीर—

कृष्णान्नापरमस्ति वस्तु शरणं ! स्वख्यातिविख्यातये
भूभारापनयाय सोऽत्र मधुरापुर्यां कृताविर्भवः ।
तस्माद्वस्तु यदस्ति वोऽद्य सकलं तत्पादपद्मद्वये
भक्त्या चार्पयत श्रमादिरहितास्सर्वं स एवास्ति वः ॥

११. आदुमिल्लै मत्तवनिल्—

तस्मान्नापरमस्ति किञ्चिदिति यत्तन्निर्णयात्तं हरिं
श्रीकृष्णं कुसुमस्रगञ्चिततनुं स्तोतुं शठारंर्मुनिः ।
दिव्यद्राविडवाङ्मयं सुरुचिरं साहस्रमाहानघं !
तत्रेदं दशकं पठन्ति भुवि ये तेषां हि दासा वयम् ॥

———

नवमशतके

द्वितीयदशकम् (पण्डै नाळाले)

(अत्र श्रीपुळिङ्गुडिदिव्यदेशे भगवन्तं संसेव्य स्वार्तिहरणमर्थयते मुनीन्द्रः ।)

१. पण्डै नाळाले—

क्षेत्रैश्श्रीताम्रपर्णी–तटसलिलयुतैर्भास्वरे श्रीपुळिङ्गु–
ड्याख्ये श्रीदिव्यदेशे शयित! तव कृपां प्राप्य लक्ष्म्याश्च देव्याः।

देवागारे च सम्मार्जनमपि सुचिरात्किङ्करत्वं च सर्वं
प्राप्तानां भक्तिभाजां वद किमपि वचोऽस्माकमाढ्यैः कटाक्षैः ॥

२. कुडिक्किडन्दाक्कं शेय्दु—

रम्ये सौवर्णसौधैश्शयित ! शुभपुळिङ्कुड्यभिख्ये पुरेऽत्र
क्षेत्रैश्चाप्यार्द्रसस्यैर्वयमखिलकुलैश्शेषवृत्तिं गतास्ते ।
कैङ्कर्यं चाप्यनन्यास्तव चरणयुगे संश्रिता एव दासाः !
कारुण्यात्त्वं पदाब्जं कुरु शिरसि च मे भूमिमानायतं ते ॥

३. किडन्दनाळ् किडन्दाय्—

शेषे त्वं दीर्घकालादिह शयनमिदं ते कियन्तं च कालं
धत्से ? श्रीमन् ! पुळिङ्कुड्यभिधपुरशयानान्तरङ्गे तु शेषः ।
नित्यं चामी वयं ते ! सरसिजनयन ! त्वत्कृपार्द्रैः कटाक्षै–
रुत्थाय श्रीसमेतस्सपदि च जगतां सेव्य एवास्व पीठे ॥

४. पुळिङ्गुडिक्किडन्दु—

शय्यां प्राप्तः पुळिङ्कुड्यभिहितनगरे भासि मच्चित्तवासिन्
नित्यं चासीन एव त्वमिह वरगुणश्रीपुरे श्रीसमेतः ।
तिष्ठन् वैकुण्ठपुर्यां ! मयि च करुणया ! विस्मिता वीक्ष्य शीलं
भावत्कं नृत्तसक्ता वयमिह जलदाभैहि बिम्बाधर ! त्वम् ॥

५. पवळम् पोल् कनिवाय्—

रम्यश्रीताम्रपर्णीतटभुवि च पुळिङ्कुड्यभिख्ये शयान !
श्रीश ! त्वं तार्क्ष्यवाहस्सपदि करुणयाऽभूर्गजस्यार्तिहन्ता ।
ज्योत्स्नामुक्ताभमन्दस्मित ! शुचिरदन ! त्वं प्रवाळाधरोऽसि !
प्रेम्णा मामभ्युपैहि स्वनयनयुगळाम्भोजभास्वद्विकासैः ॥

६. काय् चिनप्परेदैयूर्दु—

सौवर्णाद्रौ महाम्भोधरवदयमभूस्त्वं हि तार्क्ष्याधिरूढः
स्वामी श्रीशङ्खचक्राद्यसि-सहित-गदा-शार्ङ्गधारी सुमौळिः ।
क्रूरं माली सुमालीत्यभिहितमसुरद्वन्द्वमाजौ निहत्य
ध्वंसी रोषाद्रिपूणां ! विपदुपशमनो नः पुळिङ्गुड्यधीशः ॥

७. पुम्मिढर कडिन्दु—

अस्माकं दुःखहन्ता त्वमिह ! दिविषदां तत्र संरक्षकोऽसि
श्रीमन् ! मन्नाथ ! शेषे सरसिजरुचिरे श्रीपुळिङ्गुड्यभिख्ये ।
क्षेत्रे भक्तोत्तमानामिह भुवि महितानन्दकोलाहलैर्नः
संसेव्यो लोकदृश्यो भव नयनपथे जातु चास्माकमीश ! ॥

८. पुङ्गल् कण् मुकप्पे—

चन्द्रावासैश्च सौधैर्विलसति महिते श्रीपुळिङ्गुड्यभिख्ये
क्षेत्रे वैकुण्ठपुर्यामपि कृतवसते ! देव ! लोका यथा त्वाम् ।
पादाम्भोजप्रणामैरसकृदुपरि चोत्थान-सम्प्रार्थनार्चा—
स्तोत्राद्यैस्संश्रितास्स्युस्त्वहमहमिकया त्वं तथा स्याश्च दृश्यः ॥

९. वीत्तिढङ्कोण्डु—

मीनावळ्यत्प्लुताढ्ये सुरुचिरमहित-व्रीहि-सस्यावृते च
क्षेत्रे श्रीमत्पुळिङ्गुड्यभिहितनगरे राक्षसध्वंसिशस्त्रः ।
भास्वानस्माकमत्र प्रियतमसुतनो ! मङ्गळाशासनार्थं ।
दृश्योऽस्मल्लोचनानां कृतवसतिरहो ! त्वं भवात्रैव भूम्याम् ॥

१०. कोडुविनैप्पडैकळ् वल्लैयाय्—

तीव्राघातायुधानां प्रभुरमरगणान् वीतदुःखान् करोषि
प्रध्वंस्यैवासुराणां गणमखिलमपि त्वं खलानां विषात्मा ।

त्वद्भक्तस्यामृतात्मा मम शयित ! पुळिङ्कुड्यभिख्येऽत्र पद्मा—
पृथ्वीदेवीकरस्थं पदयुगमपि मे जातु कुर्याः करस्थम् ॥

११, कूवुदल् वरुदल् शेय्दिडाय्—

उद्धोषाम्भोधिमन्थं हरिमपि किल मामाह्वयायाहि वेति
प्राथ्र्य प्राप्ताभिलाषश्शठरिपुरतनोत्ताम्रपर्णीतटेशः ।
वाचा साहस्रमालां कृतिमिह दशकं चाद्वितीयं पठन्त-
श्चित्ते नित्यं वहन्ति स्वयमखिलजगन्मान-पादाब्जयुग्मम् ॥

—※※—

अथ नवमशतके

१. तृतीयदशकम् (ओरायिरमाय्)

(अत्र श्रीमतो नारायणस्य शीलगुणमनुभवति मुनिवरः ।)

१. ओरायिरमाय—

एकैकनाम बहुधा जगतां च रक्षां
कर्तुं क्षमं भवति ! नामसहस्रवाच्यः ।
नीलाम्बुदाभसुतनुश्शुभदिव्यरूपो
नारायणोऽप्रतिम एव किल प्रभुर्नः ॥

२. अवने यकल् मालम् पडैत्तु—

पृथ्वीमिमां च विततामयमेव सृष्ट्वा
चोद्धृत्य भक्षणकरोऽपि पुनश्च सृष्ट्वा ।
माता च पादतलंतस्स्वयमेव सृष्टि—
स्थित्यन्तकृच्च ! सकलं च तमेव विद्मः ॥

३. अरिन्दन वेदवरुम् पोरुळ्—

वेदान्तगुप्त-परमार्थ-परैश्च शास्त्रै-
रेषोऽप्रमेय इति निश्चितमेव तत्त्वम् ।
प्राज्ञाश्च वैदिकवरा हरिमेव नत्वा
व्याधिच्छिदं किल विदुः परमौषधं तम् ॥

४. मरुन्दे नङ्गळ् पोक मकिळ्च्चिक्कु—

दिव्यौषधं परममेव किलास्मदीयं
भोगावळेरिति च सूरिवरैः प्रतुष्टैः ।
सङ्कीर्तितः प्रभुरसौ मम नीलवर्णः
कृष्णो मुकुन्द इति मानस ! मा त्यजैनम् ॥

५. मनमेयुन्नै—

हे चित्त ! पापविवशो ऽहमिहार्थये त्वा-
मेतत्परं सुदृढमेव पुनः पुनश्च ।
दिव्यातिरम्यतुलसीस्रजमप्रमेयं
नित्यं भज त्वमसमं ! न हि जातु मुञ्चेः ॥

६. अवैवदुमणियार—

बाहुद्वये च सकलाभरणाञ्चिते श्री-
देव्याश्च सङ्गम इहास्य निशाटनाशः ।
क्षीराम्बुधेश्च मथनं त्वमृतार्थमित्य-
वैतद्विचिन्त्य निरतं मम चित्तमस्मिन् ॥

७. आकम् शेर नरशिङ्गमदाकि—

एकां तनुं च नरतामपि सिंहतां यो
धृत्वा ऽसुरस्य नखतोऽपि बिभेद वक्षः ।

वैकुण्ठवर्तिनममुं हि दिदृक्षु चित्तं
नक्तन्दिवं च कुतुकाकुलितं मदीयम् ॥

८. इनि प्पोक विडविनैयुम् केडुत्तु—

प्रध्वंस्य च द्विविधकर्मफलं प्रवेशं
देहेषु चापि विविधेषु निवार्य चास्मान् ।
उज्जीवयन् जगति भाति च वेङ्कटाद्रौ
तं प्राप्य साञ्जलिपुटाः किल सन्ति देवा ॥

९. तोळुदु मामलर—

पुष्पं च तीर्थमपि दीपसुधूपयुक्तं
स्वीकृत्य चार्चयितुमुत्सुकताऽपि मा भूत् ।
एवं सुशीलमनघं तव शेषशायिन् !
पादाम्बुजं तव कथं नु भजे ? न वेद्मि ॥

१०. ताळतामरैयान्—

पद्मोद्भवोऽपि तव नाभिसमुद्भवोऽसौ !
रुद्रस्त्रिशूलभृदयं तव पार्श्वभूतः ।
शेषाश्च देवनिवहास्तव सन्ति भक्ताः ।
शीलं तवानिशमहं तु कथं स्तवीमि ? ॥

११. शीलमेल्लैयिलान्—

निस्सीमशील-हरिपादसरोजयुग्मं
स्तोतुं शठारिरतनोत्कुरुकापुरीशः ।
साहस्रसूक्तिसरणिं ! दशकं तदेत—
द्वैकुण्ठसङ्गमकरं पठतां जनानाम् ॥



अथ नवमशतके

४. चतुर्थदशकम् (मैयार करुङ्कण्णि)

(अत्र भगवन्तं शङ्खचक्रपाणिं सिषेविषुः शठारिः साभिनिवेशमाक्रोशति ।)

१. मैयार करुङ्कण्णि—

नीलाञ्जनाक्तनयनां कमलोद्भवां तां
लक्ष्मीं स्ववक्षसि बिभर्षि हि पद्मवर्णाम् ।
श्रीमन् ! सुदर्शनसुशङ्खधरं कराभ्यां
त्वां द्रष्टुमिच्छति सदा मम नेत्रयुग्मम् ॥

२. कण्णे युळ्ळै क्काणक्करुदि—

मन्नेत्ररूप ! तव दर्शनकाङ्क्षयेदं
चित्तं मनोरथशतैर्मम सानुलापम् ।
देवादिभिश्च मुनिभिश्च न शक्यते यो
द्रष्टुं तमीप्सुरहमद्य किलाह्वयामि ॥

३. अळैक्किन्नवडि—

दासायितस्य मम मानसमस्ति खिन्नं ।
भावं व्यनक्ति च यथा शुनकस्स्वपुच्छात् ।
गोवर्धनोद्धरणतः पशुपालकस्त्वं !
किं ते दया तु न भवेन्मयि चेति दूये ॥

४. डरुवदिदुवेन्—

देवादिदानवगणस्य च नारसिंह !
त्वं दुर्गमोऽसि ! तव शेषतयैव धन्याः ।

तेऽमी च दास्यविभवात्तव किं लभेम
भ्रान्ता वयं त्विति मनो मम सीदतीदम् ॥

५. अरियाय वन्मानै—

दुष्टात्मनाशममराधिपतिं प्रभुं नः
सृष्टेः पुरैव चतुराननसर्गहेतुम् ।
श्रीशेषशायिनमुदारसुनीलवर्णं
त्वां त्वत्पदाब्जमपि मेऽस्ति दिदृक्षु चित्तम् ॥

६. करुत्ते युन्नै क्काण क्करुदि—

मत्प्राप्यभूत ! तव दर्शनकाङ्क्षया त्वां
चित्ते ममैव सुदृढं विनिवेश्य मोदे ।
देवाधिदेव ! महसा दिवि चाद्वितीय !
त्वां मे मनोऽनुभवति प्रियमादि तत्त्वम् ॥

७. उकन्देयुन्नै—

मच्चित्तवास ! विमल ! प्रबलं च दैत्यं
वक्षोविदारणमुखान्नखतो विनाश्य ।
त्वं नारसिंहवपुषा किल लोकपाल-
स्त्वां मेऽन्तरङ्गमनुभूय चकास्ति हृष्टम् ॥

८. उरुवाकियवारु शमयङ्गळ्क्केल्लाम्—

एकीभवत्प्रबल-षण्मत—भञ्जकं तं
सर्वान्तरात्मकमनादिमुदारशीलम् ।
देवादिकारणमहं पुरुषोत्तमं श्री—
कृष्णं मम प्रियमिहास्मि विलोक्य धन्यः ॥

९. कण्डुकोण्डेन् कण्णिणैयार—

नाथं विलोक्य मम लोचनयुग्मतोऽहं
सन्तुष्ट एव सकलाघविनाशतोऽद्य ।
सूरीश्वरं दिविभवं प्रति दासभूतो
×भक्तामृतं व्यरचयं मम सूक्तिहारम् ॥

१०. अढियानिवनेन्रु—

दासोऽयमस्ति हि ममेति कृपां च पूर्णां
कृत्वा मयीह विलसन्तमुदारकीर्तिम् ।
प्राप्याहमस्मि गरुडध्वजमप्रमेयं
लोकप्रमातृचरणं शरणं कृतार्थः ॥

११. आरामदयानै—

मत्तद्विपप्रमथनं कुरुकापुरीश—
स्स्तोतुं किलाह शतकैस्तु शठारिरेताम् ।
साहस्रपद्यसरणिं ! दशकं किलेदं
सम्पादयेच्च परमान् दिवि सूरिभोगान् ॥

× अत्र श्रीशठारिः स्वयमेव स्वप्रबन्धं भक्तामृतत्वेन प्रशंसतीति मुक्तकपद्येऽपि "भक्तामृतं विश्वजनानुमोदनम्" इति प्रकाशते ॥

अथ नवमशतके

५ पञ्चमदशकम् (इन्नुयिर् चेवलुम् नीरुम्).

नायिकावस्था—पक्षिगणसम्बोधनम् ॥.

१. इन्नुयिर् चेवलुम् नीरुम्—

हे हे कोकिलनायिकाः ! प्रियतमैः कान्तैस्समेता मिथ—
श्चाहूयात्र पुरश्च मे न कुरुत प्रेम्णा च भोगारवान् ।
तन्मे प्राणविनाशकं किल ! न मे नाथं तु कृष्णं हरिं
यूयंऽचाह्वयथाद्य ! किं हरथ वा तस्मै ममासूनिमान् ? ॥

२. इत्तनै वेण्डुवदन्रु—

कान्तापक्षिगणाः ! प्रियैस्सह कथं संश्लेषशब्दानिमा
नेवं हन्त ! चिरं कुरुध्व इह वा ? हा हन्त ! नैतद्वरम् ।
मायाचेष्टितवैभवस्स तु हरिर्नैवास्ति सत्यव्रतो
गोविन्दस्तत एव हस्तकलितं तस्यास्ति मे जीवितम् ॥

३. अघन्र् कैयदे—

भो ! भो ! स्त्रीशकुनाः पिया अपि मम प्राणाः प्रतिष्ठापिता
स्तस्यैवाद्य करे हरेरिह रतौ यूयं महासम्भ्रमैः ।
संश्लेषैकरसाः ! कथं बत सहे दुर्भाग्यतः पापिनी ?
नैवात्राद्य ममासवः किल ! कथं मे जीवितं धारये ? ॥

४. कुक्कुरल् केट्टुम्—

यूयं कुक्कुटनायिकाः प्रियतमै स्संश्लेषशब्दान्विताः
कृष्णो हन्त ! निशम्य चापि न हि मामायाति मायी हरिः ।

एवं मा कुरुताद्य सङ्गमरवान्! वाक्चित्तकर्माणि नः
तस्यैवाद्य वशे! शरीरमसवस्तेऽमी चरन्त्यन्तरे ॥

५. अन्तरम् निन्रुळल्किनू—

यूयं पक्षिगणाः! कथं मम पुरो हा! हन्त! नानारवै—
र्नृत्यन्तोऽद्य तुदेत मां? स हि हरिर्मायेन्द्रजालाकुलः।
जित्वा सप्त जगन्ति भाति च वहन् लक्ष्मीं च वक्षस्स्थले!
भोक्तुं मे सकलानसून् कृतमतिर्हा! हन्त! सम्यक् स्वयम् ॥

६. नन्गेण्णि नानूवळर्त्त—

मत्प्राणायित एव तेऽस्ति सदृशो वक्त्रे च नेत्रे तथा
काकुत्स्थः करतोऽपि पादतलतश्श्यामात्तनोर्वर्णतः।
सोऽयं सङ्गत एव मां त्यजति हा! त्वं मे सखेति भ्रमा—
देवं हे शुक! वर्धितोऽसि हि मया मुग्ध! त्यजाद्यारवान् ॥

७. कूट्टुण्डु नीङ्गिय—

सङ्गत्यैव मया सहाद्य तु गतो दूरं सरोजाम्बकः
कृष्णो नीलमणिप्रभः प्रियतमो मायी च बिम्बाधरः ॥
विद्युच्चापलसत्पयोदनिवहा यूयं समाना हि मे
कान्तस्येति ममासुहारि तदिदं! युष्मद्वपुर्गोप्यताम् ॥

८. उयिक्कंदु कालनेनु—

यूयं कोकिलबालकाः! किमु हरेः कृष्णस्य नामानि ता-
न्येवं हन्त! विघोष्य जीवितहराः? किं प्रार्थनं मे वृथा ॥
युष्माकं दधिदुग्धमिश्रमहमेवान्नं समर्प्याखिलां
सूक्तीनां सरणिं च शिक्षितवतीत्येवं किमेतत्फलम्? ॥

९. पण्बुडै वण्डोडु तुम्बिकाळ्—

गानैरेव मनोरमैर्मधुकरा यूयं विहारप्रिया
युष्माकं रुतमस्ति मेऽद्य मनसो हन्त ! व्रणे शस्त्रवत् ।
गानं वस्त्यजताद्य हन्त ! मम हि प्राणान् हरन् दूरतः
कृष्णो हन्त ! गतोऽम्बुजाक्षियुगळो ! हा ! हन्त ! कुर्यां किमु ?

१०. एळनण्णिनासुम्—

वैकुण्ठाधिपतिं तमेव परमं प्राप्तुं हि सज्जाऽस्म्यहं !
यूयं हन्त ! बका विहाररसिकाः क्षेत्रोदकेषु स्वयम् ।
किं स्यादद्य विचारतः फलमहो ? रम्यं वपुर्मेऽधुना
सीदत्येव ! समस्तलोकसरणिस्सौख्यं परं प्राप्नुताम् ॥

११. इन्बम् तलप्पेरुदु—

सर्वव्यापि-मनोरम स्वसुगुणावळ्या वशीकृत्य च
स्तोत्रे ऽस्मिन् कृपया प्रवर्तयति यश्श्रीशस्तु मायी हरिः ।
तं सङ्कीर्तयितुं शठारिरतनोत्साहस्रपद्यावलिं !
तत्रेदं त्रिजगद्द्रवीकरणतो हृद्यं नवैकात्मकम् ॥

नवमशतके

६ षष्ठदशकम् उरुकु मालू नेञ्जम

(अत्र भगवद्दिव्यमङ्गलविग्रहस्मारकवस्तुजातैर्दूयते शठरिपुः ।)

तिरुक्काळ्करै—दिव्यदेशपरमिदं दशकम् ॥

१. उरुकु मालू नेञ्जम्—

वीथीषु दिव्यकुसुमावळिसौरभश्री—
पूर्णं च काळ्करै—महापुरमाश्रितं तम् ।

स्मृत्वा ऽस्ति मायिन मिदं मम चित्तमार्द्रं !
संवर्धतेऽभिलषितं मम किन्नु कुर्याम् ? ।।

२. निनैंदोरुम्—

उद्यानवर्तिसरसीयुत काळ्करैश्री—
स्वामिन् ! ममार्य ! तव वैभवमप्रमेयम् ।
स्मृत्वा मनो द्रवति मे ! वचसा धुनी स्यात् !
गाने तु दग्धहृदयोऽस्मि कथं भजे त्वाम् ? ।।

३, नीमैंयाल् नेञ्जम् वञ्जित्तु—

सौशील्यतो मम मनो वशयन् प्रविश्य
मां च द्विधा किल विभज्य च धारकस्सन् ।
भुक्त्वा च मां लसति काळ्करै-दिव्यदेशे
मेघायितस्वतनुरस्य न वेद्मि मायाम् ।।

४. अरिकिलेन् तन्नुळ्—

स्वस्मिन्नशेषभुवनानि दधान एव
स्वैरं स्वयं च निवसन्नखिलेषु तेषु ।
स्वामी महासुरभि-काळ्करै—नायकोऽसौ
भुङ्क्ते च मामपि ! न वेद्मि कृपाप्रकारम् ।।

५. तिरुवरुळ् शेय्यवन् पोल—

चित्ते प्रविश्य मम कारुणिकश्शरीरं
चात्मानमप्यहह ! मे स्वयमेव भुक्त्वा ।
रम्याढ्य काळ्करै-विभुर्जलदाभमूर्तिः !
कृष्णस्य तस्य विविधा हि चकास्ति माया ।।

६. एन् कण्णन् कळत्रम्—

कृष्णस्य कृत्रिमगतिर्मम भाति भोग्या !
व्यामोहतस्स किल मां परिभुज्य दीनाम् ।
मां मोहयत्यहह ! काळ्करै—नायकं तं
कृष्णेति सन्ततमहं हरिमाह्वयामि ॥

७. काळ्करैयेत्तुम्—

मायाविना मम हृदब्जतले प्रविश्य
भुक्तोऽपि भोगमवशेषितमेव मत्वा ।
आत्मा स्तवीति मम काळ्करै नायकं तं
कृष्णं हि कामविवशश्शिथिलो द्रवेच्च ॥

८. कोळुण्डाननूरि—

भुक्त्वा च देहमपि मे स्वयमागतोऽयं
चात्मानमप्यहह ! मेऽत्र दिने दिने च ।
निश्शेषमेव परिभुज्य चकास्ति मेघ—
श्श्रीकाळ्करै-प्रभुरहो ! मम दास्यमीदृक् ॥

९. आरुयिर् पट्टदु—

विम्बाधरश्च सरसीरुहलोचनोऽयं
नीलाम्बुदाभ इह काळ्करै-वासशीलः ।
श्रीमच्चतुर्भुजधरोऽस्ति हि देवदेवो !
भोग्योऽहमस्मि किल तस्य समोऽद्य को मे ? ॥

१०. वारिक्कोण्डुन्नै—

पश्यामि चेदहमशेषमपि त्वदीयं
भुञ्जे किलेत्यभिलषन्तमतीत्य मां च ।

मेघायितः किल चिरात्तु निपीय पूर्णं
श्रीकाळ्करै—प्रभुरसौ त्वरयाऽनुभुङ्क्ते ॥

११. कडियनायू कञ्जनै क्कोनू पिरानू तन्नै—

कंसं निहत्य च रुषा जगतां च बन्धु—
र्यस्तं स्तुवन् शठरिपुः कुरुकापुरीशः ।
साहस्रमाह परमं ! दशकं किलेदं
संसारतापशमनं पठतां सुखाय ॥

नवमशतके

७ सप्तमदशकम् (एम् कानलकम् कलिवायं)

नायिकावस्था—पक्षिगणसम्बोधनम्

१. एम् कानलकम्—

आहारं जलधेस्तटेषु च वनेष्वन्विष्य सञ्चारिणि !
त्वं मत्प्रीतियुते ! च शोणितपदे ! भव्ये ! बलाकाह्वये ।
श्रीमूळिक्कळनायकं च तुलसीमालाढ्यमौळिं प्रति
त्वं दूती भव ! सञ्चरत्पदयुगं ते मेऽद्य शीर्षे कुरु ॥

२. त्रुमरोडुं पिरियादे—

यूयं बन्धुमणैश्च कान्तसहितास्सञ्चारशीला द्विजाः ।
श्रीमूळिक्कळनायकं प्रति मम ब्रूतोक्तिमेतां परम् ।
त्यक्ता तेन च बन्धुभिश्च नितरां जीवामि किं गर्हिता ?
किं नार्हाऽस्म्यहमच्युतस्य परमां गोष्ठीं प्रवेष्टुं च ताम् ? ॥

३. तक्किळमे केळीकंळू—

आहारानुगतांस्तटाकसलिले हंसा ? भलाकागणाः ।
श्रीमूळिक्कळनायकस्य नयनश्रीपाणि-पादांबुजं
अम्भोजात-सुपत्र-मूर्तिमपि तं बिम्बाधरं श्रीहरेः
किं नार्हाम्यवलोकितुं च रुचिरं ? यूयन्तु तं पृच्छत ॥

४. तिरुमेनियडिकलुक्कु—

अम्भोदारुचिरास्तु यूयमधुना दौत्यं वहन्तो मम
श्रीमूळिक्कळनायकं प्रति गतास्तस्यै तनु दीयताम् ।
भो ! भो ! नाथ ! दयापरेति वचनं ब्रूथैव चेत्किं तनो—
स्सादृश्यं भवत्तां हरेच्च गमनं विष्णोः पदे वारयेत् ? ॥

५. तेळिविसुम्बु कडिदोडि—

आकाशे त्वरया च धावनपरा अम्भोधरा वैद्युत-
ज्वालाभिस्सहितास्तु यूयमधुना मूळिक्कळेशं प्रति ।
दौत्यं मे वहतोक्तिमेव नयत ! क्लेशापहः केशवः
किं मे नैव ददाति दर्शनमयं चित्ते निवासी मम ॥

६. तूदुरैसळू शेप्पुमिनूकळू—

यूयं भो मधुरोक्तयो मधुकराः ! पुष्पावळीशोभिते
श्रीमूळिकळनाम्नि तत्र तु पुरे लक्ष्मीं वहन् वक्षसि ।
आस्ते यस्तु विलोक्य तं वदत मे दौत्यं वहन्तस्स्वयं
शैथिल्यं मम भूषणाङ्गद-दुकूलादीनि यान्तीत्यहो ! ॥

७. शुडर् वळ्युम्—

उद्यानेषु विहारिणो द्विजगणा यूयं विलोक्याच्युतं
तं ब्रूताद्य गिरं मदर्थमनघामेकां प्रवाळाधरम् !

श्रीमूळिक्कळवासिनं सुरुचिराम्भोजाम्बकं श्रीधरं !
किं कीर्तिस्तव मेऽङ्गदं च वसनं हृत्वा भुजौ मुञ्चतः ? ॥

८. पुनक्कोन्रु पणियीर्कळ्—

भृङ्गीभृङ्गमणाश्च यूयमधुनोद्यानेषु संश्लेषिणः
प्रीत्या हन्त ! मिथः पुरे दृढतमप्राकारमालावृते ।
श्रीमूळिक्कळनाम्नि वासिनममुं मूर्त्याऽतसीश्यामलं
दृष्ट्वा श्रीतुलसीलसन्मकुटमप्येकां गिरं ब्रूत मे ॥

९. पून्तुळाय् मुडियाक्कुं--

यूयं पक्षिगणा जलोपरिचरा दृष्ट्वा हरिं श्रीधरं
श्रीमूळिक्कळवासिनं वदत मे श्रीचक्रपाणिं प्रियम् ।
वैवर्ण्यं वहतीह मे स्तनयुगं पूर्वन्तु भूषाधरं !
नेत्राब्जद्वयमश्रुपूरितमहो ! त्यागोऽद्य मे नोचितः ॥

१०. तकवन्रेन्रैयीर्कळ्—

यूयं हंसगणाश्च मन्दगमना आहारमन्विष्य सं-
श्लेषानन्दयुता नदीपरिसरे ! तं मे विलोक्यप्रियम्
श्रीमूळिक्कळनायकं वदत ! ते युक्तं न हीदंत्विति
क्षिप्रं जीवितकाल एव मम यत्काञ्ची भवेत्प्रच्युता ॥

११. ओळिविनि् तिरुमूळिक्कळत्तुरैयुम्—

श्रीमूळिक्कळवासिनं प्रति हरिं तेजः परं श्रीधरं
मुग्धोक्त्या शुकभाषिता तु रमणी कान्ता यथा भाषयेत्
प्रीत्या श्रीकुरुकापुरप्रभुरसौ श्रीसूक्तिसाहस्रके
पद्यानां दशकं तथेदमवदत् संसाररोगापहम् ॥



नवमशतके

अष्टमदशकम् (अरुक्कुम् विनैयायिन)

(इदं दशकं–तिरुनावाय् दिव्यदेशपरम्)

१. अरुक्कम् विनैयायिन—

चित्ते निवेशयितुमच्युतमुत्सुकानां
सर्वाघहारिच सुगन्धिवनाभिरामम् ।
श्रीशस्य भोग्यमुचितं कथमस्थि सेव्यं
नावाय्–पुरं शुभतमं मम पापभाजः ? ॥

२. कोडियेरिडै—

यस्य प्रिया तनुकटिः कमलोद्भवा श्री–
र्यस्य प्रियाऽब्जनयना तरुणी च नीळा ।
सर्वेश्वरस्य सततं किल तस्य भोग्यं
नावाय्–पुरं मम कदा भवतीह सेव्यम् ॥

३. एवै कोलणुकप्पेरुनाळ्—

संश्लेषकालमनिशं च विचिन्त्य चित्ते
नेत्रद्वये ऽप्यहमिहास्मि हि साश्रुपूरः ।
नारायणः कमलया सह भाति हि श्री—
नावाय्–पुरेऽत्र तु विशामि कदा ? न वेद्मि ॥

४. मालेलरियेम्—

उद्यानशोभि–सुम–सौरभ–वासिते श्री—
नावाय्–पुरे लसति संश्रित एव नीळाम् ।

पद्माम्बकां हरिरसौ किल ! तस्य सेवां
नित्यं चिकीर्षुरहमस्मि ! कदा भजेयम् ? ॥

५. मणालन् मलर्मङ्कैक्कुम्—

भर्ता श्रियोऽपि च भुवोऽपि च देवतानां
सर्वात्मनां प्रभुरसौ परमे पदेऽपि ।
नावाय्-पुरे वसति सादरमच्युतोऽमुं
दृष्ट्वा कदाऽक्षियुगळेन सुखं भजेयम् ? ॥

६. कण्डे कळिक्किन्नदु—

भृङ्गावळी–भरित–पुष्पवनावृते श्री—
नावाय्–पुरे विजयसे सततं हरे ! त्वम् ।
गोपालनाथ ! तव सत्यमहं हि दासो !
नेत्रद्वयं मम हि दर्शनसौख्यकाङ्क्षि ॥

७. कोवाकियमावलियै—

अर्थी महाबलिकरात्पृथिवीं च हृत्वा
देवासुरादि-समरान्तक ! देव ! देव ! ।
नारायणात्र कमलासहितोऽसि हि श्री—
नावाय्-पुरे ! कुरु दयां मयि दासभूते ॥

८. अरुळादोळिवाय्—

किं त्वं करोषि न कृपां मयि ? किं करोषि
त्वत्पादपद्मयुगळे कृपयाऽथवा माम् ? ।
स्वैरं कुरुष्व ! मनसीह ममानघे त्वां
नावाय्-पुरेश ! कलये ! सुमतिं प्रदेहि ॥

९, तेवरे मुनिवर्क्कु—

देवादिभिश्च मुनिभिश्च न शक्यते यो
द्रष्टुं त्रिमूर्तिजननस्य च मूलभूतः ।
लोकत्रयाधिपतिरस्ति स सादरं श्री-
नावाय्-पुरे बत ! तमद्य भजन्ति के वा ? ॥

१०. अन्दो वणुकप्पेरुनाळू—

आरामशोभिनि विभासि किलागतः श्री-
नावाय् पुरेऽद्य मणिवर्ण ! कदा भजे त्वाम् ?
इत्येव सन्ततविचिन्तनतः किल त्वां
श्रीशेति हन्त ! हृदयार्द्रतया ऽह्वयामि ॥

११. वण्णम् मणिमाडम्—

रम्ये विभाति मणिसौधयुते हरिश्री—
नावाय् पुरे ! तमिममेव शठारिसूरिः ।
स्तोतुं सहस्रगणिते दशकं व्यतानी
देतत्पठन्त इह याति हि दिव्यगन्धम् ॥



नवमशतके

१. नवमदशकम् (मल्लिकै कमळ्)

नायिकावस्था

१. मल्लिकै कमळ्—

मल्लीसौगन्ध्यपूर्णोऽप्यनिल इह हि मे शस्त्रवद्भाति ! दिव्यं
गानं रम्यं च शल्यं ! जनयति नितरां मोहमेवास्तसन्ध्या

सन्ध्यारक्ताः पयोदा अपि च विशसनां हन्त ! कान्तं विना मे
पद्माक्षं गोपसिंहं स्तनभुजयुगळे काय धृत्वा प्रयामि ? ॥

२. पुकलिडमरिकिलम्--

प्राप्यं देशं न वेद्मि स्वयमयमनिलो हन्त ! घण्टारवैश्च
क्लिश्नात्यैवास्तसन्ध्या बत ! सपदि च मामङ्गरागैस्समेता ।
रागोऽयं पञ्चमो भात्यनिलकुटजमालान्वितो हन्त ! कान्तो
गोपालो लोकपालो न हि समुपगतः ! प्राणरक्षा कथं मे ? ॥

३. इनि यिरुन्देन्नुयिर्--

अत्र प्राणान् कथं मे सपपि बत ! वहाम्यद्य संश्लेषतो मे
कृत्वा वक्षोजयुग्मं शिथिलमिव कटिं चापि भुग्नामिवासौ ।
हित्वा मां चोर एव स्वयमहह ! हरिस्त्वत्र नायाति कृष्ण-
स्तस्याक्षिद्वन्द्व-वक्त्राद्यलकरुचि-चतुर्बाहवो मां तुदन्ति ॥

४. पावियेन् मनत्ते--

पापिन्या मेऽद्य चित्तं तुदति च पवनो हन्त ! शीतोऽद्य दाही
चन्द्रस्सन्तापकारी दहनवदहह ! ज्वालिनी पुष्पशय्या ।
साक्षात्तार्क्ष्याधिरुढं तदपि च परमं दैवतं भृङ्गतुल्यं !
भुक्ता तेनास्मि पुष्पस्रगहमतिकृशा ! दुर्दशा दुस्सहा मे ॥

५. यांमुदै नेञ्जमुम्--

चित्तं चेदं न मित्रं मम ! सपदि पशूनाह्वयत्येव सन्ध्या !
गोपालो नागतोऽसौ कठिनहृदय एवास्यं वेणुस्तुदन्माम् ।
हा ! हा ! तं चाभियाता मम किल पुरतो हन्त ! मे प्राणसख्यः!
कारुण्यं तस्य मृग्यं मयि ! कथमधुना प्राणरक्षा भवेन्मे ? ॥

६. अवनुडैयरुळ्—

दुष्प्रापो मेऽद्य तत्सङ्गमसमय इह ! श्रीहरेस्तस्य विष्णोः
कारुण्यं तद्विना मे न हि भुवि तु भवेज्जीवितं ! चाद्य सन्ध्या ।
चित्तं मे नानुकूलं ! विधिशिवसहिता साऽपि लक्ष्मीस्तनुं च
प्राप्नोत्यस्येति नाहं बत! शरणमहो ! प्राप्नुयां ! किन्नु कुर्याम् ?॥

७. आरुक्केन् शोल्लुकेन्—

नीलाम्भोदाभमूर्तिं ननु मम हृदयं कृष्णमेवाश्रितं त-
न्मायावश्यं ! सुगन्धस्सरसमधुरगीतादिभिर्वाति वातः ।
नानामल्लीसुमाद्यैः परिमळभरितो हन्त ! वातोऽयमेवं
मर्मस्पर्शी तुदन्मां ! कथमहह ! जनन्योऽद्य मे वच्मि वृत्तम् ? ॥

८. पुदुमणमुकुन्दु कोण्डु—

वातोऽयं दिव्यगन्धो नवनवविभवो वाति सन्ध्या च रक्ता
तीव्रा ! हा ! हन्त ! कृष्णः कुटिल गतिरहो ! तस्य मायाऽतितीव्रा ।
सौरभ्योपेतमल्ली परिमळ-विसरश्चन्दनाच्चापि वेणो-
र्नादोऽयं पञ्चमस्थः किल मम सपदि प्राणहृद्दीपिकाजित् ॥

९. ऊदुमत्तीङ्कुळल्के—

मध्ये मध्ये मनोहार्यभिनवभणितैर्वेणुनादैर्गतासु-
श्चाहं हा ! हन्त ! वीक्षामपि रुचिरतमां सूक्तिसङ्गीतमालाम् ।
कान्ताचित्ताभिरामामहह ! न हि परां वेद्मि वाचाऽपि वक्तुं
चेष्टां तस्याद्य रात्रिर्भवति ! बत ! न मां कान्त आयाति मायी ॥

१०. मालैयम् वन्ददु—

आयातैव निशाऽधुना न तु हरिर्गोर्थी समायात्यहो !
गावश्चापि वृषैश्चरन्ति सहिता लीलाविलासाकुलाः ।

श्रूयन्ते बहुधा च वेणुनिनदा दीप्रा लताष्षट्पदै-
र्मल्ल्याद्या जलधिश्च खेचररवो ! जीवामि किं तं विना ? ॥

११. अवनै विट्टकन्रु—

तद्विश्लेषसहा न ये निशि भृशं गोपीजनाः क्रन्दनै-
स्तेषामेव शठारिरिप्यहह ! तद्विश्लेषदुःखासहः ।
साहस्रे परमं जगौ च ! दशकं चेदं पठन्तो भुवि
प्रीत्या भक्तजनास्तमेव शरणं प्राप्तास्स्थ चोज्जीविताः ॥

अथ नवमशतके

१० दशमदशकम् (मालैनण्णि)

अत्र

इदं दशकं "तिरुक्कणपुरम्"—इति सुप्रसिद्ध-कण्वपुराख्य-
दिव्यदेशपरम् ॥

१. मालै नण्णि—

प्राकाररम्य-शुभ-कण्वपुराधिनाथः
प्राप्तस्स एव हि पुरा वटपत्रशय्याम् ।
तस्याङ्घ्रियुग्ममनिशं प्रतिपद्य पद्मै-
राराध्य पापरहिता भवतात्र धन्याः ॥

२. कळ्ळविऴुम् मलरिट्टु—

भक्ताश्च यूयमधुना भजताच्युतं तं
पुष्पैस्तु रम्यवलयेन च राजतेन ।
संशोभिते सपदि कण्वपुरे वसन्तं
भक्त्या भजध्वमनिशं च पुरं कृतार्थाः ॥

३. तोण्डर नुमूतम्—

उद्यानशोभि-शुभकण्वपुराधिनाथं
वैकुण्ठनाथममराधिपतिं मुरारिम् ।
भक्ता भजन्तु मिळितास्तु भवन्त एनं
भक्त्या समर्प्य कुसुमानि च वीतदुःखाः ॥

४. मानै नोक्कि—

कान्तस्य यस्य सततं हरिणायताक्षी
नीळा प्रिया सपदि तं मधुरं गुणाढ्यम् ।
आराध्य कण्वपुरनाथमिहैव पुष्पै-
र्यूयं भजध्वमयमेव भवेच्छरण्यः ॥

५. शरणमाकुम्—

सोऽयं भवेच्च शरणं शरणागतानां
वैकुण्ठमेव तनुते मरणं गतानाम् ।
स्वामी लसद्वलय-कण्वपुराधिनाथो
भूपालको भवति भक्तततेश्च भक्तः ॥

६. अन्बनाकुम्—

स्वाङ्घ्रिद्वयाश्रितजनेषु च वत्सलोऽयं
वक्षोविदारणपटुश्च हिरण्यकस्य ।
सौवर्णसद्वलय-कण्वपुराधिनाथ-
स्सत्याश्रयेषु सततं च भवेत्स सत्यः ॥

७. मेय्यनाकुम्—

सत्योऽस्त्यनन्यमनसां किल भक्तिभाजां
मिथ्याऽस्ति चान्यमनसां हरिरिन्दिरेशः ।

क्षेत्रावळीलसित-कण्वपुराधिनाथो
भव्यो भवेत्किल सदा शरणागतानाम् ॥

८. अणियनाकुम्—

वश्यो भवेत्स्वचरणाम्बुज—भक्तिभाजां
व्याधिं प्रणाश्य स हि जन्मततिं निहन्यात् ।
सौवर्णसद्वलय-कण्वपुरेशितुर्वं-
स्संसेव्यमङ्घ्रियुगळं परमेष्ठिनस्तत् ॥

९. पादनाळुम्—

तस्याङ्घ्रियुग्म—भजनात्सकलं च दुःखं
नश्येन्न भीतिकणिकाऽस्ति ममाद्य काऽपि ।
श्रीवेदविद्वसति—कण्वपुराधिनाथं
मूलं परन्तु भजतां न हि दुःखगन्धः ॥

१०. इल्लैयल्लल्—

पद्मालयामुरसि यस्तु दधाति तस्य
प्राकारशोभि—शुभकण्वपुर—प्रशंसा ।
दुःखापहा भवति मे ! न हि भाति चिन्ता !
तस्मान्न मेऽद्य किल किञ्चिदिहास्त्यलभ्यम् ॥

११. पाडुशारा विनै—

सर्वाघनाशविधये कुरुकापुरीशः
श्रीमान् शठारिरवदत्सरसं सहस्रम् ।
तत्रेदमेव दशकं परिगाय नृत्तैः
श्रीशस्य पादयुगळं शरणं भजध्वम् ॥

इति तदिदं श्रीकलिकिसिंह—भगवद्विरचितायां सहस्रगाथा—रत्नावळ्यां
नवमशतकं सम्पूर्णम् ॥

———

अथ दशमशतके

१ प्रथमदशकम् (ताळतामरै)

(अत्र—कैङ्कर्यप्रतिबन्धकनिबर्हणमुच्यते ।)

तिरुमोहूर्—(श्रीमोहपुरी)— दिव्यदेशपरमिदं दशकम् ॥

१. ताळतामरै—

अम्भोजावळिभिस्तटाकसरणिर्यत्रास्ति सम्भूषिता
क्षेत्रेष्वत्र सदाऽपि वासरसिकश्श्रीमोहपुर्यां हरिः ।
रक्षोनाशकरश्चतुर्भुजधरो बिम्बाधरः पद्मदृङ्
नीलाम्भोदनिभस्स एव शरणं रम्यालको ! नेतरः ॥

२. इलम् कदिमत्तोम्—

दिव्यश्रीतुलसीसुमावळिधरस्साहस्रनाम्नां प्रभु-
र्वाच्यो वेदचतुष्टयप्रवचनैर्विप्रोत्तमैरन्विते ।
श्रीमन्मोहपुरे चकास्ति हि हरिस्तस्यैव पादाम्बुज-
च्छायारूप—महातटाकसलिले मग्ना वयं सर्वदा ॥

३. भनि पामोरुपुकलिडमिलम्—

नान्यं त्वान्तु विना वयं हि शरणं प्राप्ता इति श्रीहरिं
यं देवाश्चतुराननेश्वरमुखाश्शंसन्ति भूयस्स्वयम् ।
त्रैलोक्याधिपतेस्तु तस्य वसतिं भक्त्या वयं सन्नताः
श्रीमन्मोहपुरीं भजाम शरणं सर्वार्तिशान्त्यै सदा ॥

४. इडर् केडवेम्मै प्पोन्दु—

दुःखध्वंसकरोऽद्य पालय विभो ! सर्वानिहास्मानिति
स्तुत्वा देवगणाश्च ते मुनिगणास्संश्रित्य तेजः परम् ।

धन्यास्सन्त्विति भाति शेषशयनश्श्रीमोहपुर्यामसौ
स्तोतुं तत्पदयुग्ममार्तिशमनं भक्तास्समागच्छत ॥

५. तोण्डीर् वम्मिन्—

अस्माकं परमं महश्च जगतां मूलं परं पादत-
स्सर्वाण्डान्तरलोकमानचतुरश्श्रीमोहपुर्यां हरिः ।
भात्येवाष्टदिशासु चेक्षुमधुरश्रीह्यादिसस्यावृतं
देवागारमिमं परीत्य विनता नृत्याम चागच्छत ॥

६. कूत्तन् कोवलन्—

मायाचेष्टित एव गोपतिलको दुष्टासुरध्वंसक-
स्सूरीणामपि मौनिनां च सुलभस्स्तोत्रान्वितानां च नः ।
माधुर्यामृतवारिधिस्सुरुचिरक्षेत्रावृते भात्यसौ
श्रीमन्मोहपुरे किलास्य चरणद्वन्द्वं शरण्यं हि नः ॥

७. मत्तिलमरणू—

लोकानामाद्यमूलप्रकृति-परिसरस्कारणाम्भःप्रसृष्टेः
पश्चात्तं चाब्जयोनिं मुनिमपि च सुरान् सर्वलोकांश्च सृष्ट्वा ।
सोऽयं श्रीमोहपुर्यां विलसति हि हरिस्तत्पुरं चेत्परीत्य
स्वैरं यामोऽस्मदार्तिस्सपदि परिहृता स्याच्छरण्यं न चान्यत् ॥

८. तुयर्केडुम् कडिदु—

उद्यद्वृक्षैस्तटाकैरपि च बहुविधैर्भूषितायां चकास्ति
श्रीविष्णुर्मोहपुर्यां दशरथतनयो दिव्यरत्नप्रभोऽसौ ।
यस्मिन्नम्भोधिरूपे निशिचरनिवहा हन्त ! नष्टास्सहस्रै-
र्नाम्नां क्रूराशयास्तं भजत भुवि जना भक्तितो दुःखशान्त्यै ॥

९. मणित्तडत्तडि—

अच्छस्वच्छमहातटाकसदृशस्वाङ्घ्रिद्वयश्श्रीहरिः
पद्माक्षश्च चतुर्भुजो विलसति ज्योतिः प्रवाळाधरः ।
वानाराक्षसकाननावळिगणच्छेदी च वीराग्रणी-
रस्मिन् मोहपुरेऽद्य भाति शरणं चास्माकमेतत्परम् ॥

१०. नामडैन्दनल्लरण्—

अस्माकं शरणं परं तदिदमेवेति स्वयं संश्रितान्
भक्तान् रक्षति कामरूपभृदसौ श्रीमोहपुर्यां वसन् ।
देवानामसुरप्रणाशनविधौ कीर्तिं परां भक्तितो
यूयं भक्तगणास्स्तुत स्मरणतः पश्चात्स्वयं धार्मिकाः ॥

११. एत्तुमिन् नमर्काळ्—

अस्मद्बन्धुगणास्स्तुतिं कुरुत चेत्येवं शठारिः प्रिया—
नाहूयाच्युतमेव शंसितुममुं श्रीकुम्भलीलाश्रयम् ।
साहस्रे व्यतनोदिदं च दशकं श्रीमोहपुर्याश्रयं
भक्त्या ये तु पठन्ति दुःखमखिलं तेषां प्रणश्येत् क्षणात् ॥

अथ दशमशतके

२ द्वितीय दशकम् (केडुमिडरायवेल्लाम्).

(अत्रापि तदेवोच्यते)

अनन्तशयनाख्य-दिव्यदेशपरमिदं दशकम् ।

१. केडुमिडरायवेल्लाम्—

श्रीमत्केशवनामकीर्तनकृतां सर्वार्तिनाशो भवेत् ।
क्रूरा हिंसनतत्परा यमभटा नैवोपसर्पन्ति तान् ।

तस्माद्यूयमनन्तशायिपुरमेवाद्य स्वयं प्राप्नुत
क्षेत्रैः पुष्पवनान्वितैः परिवृतं, शेते च यत्राऽच्युतः ॥

२. इनु पोय् प्पुक्कुदिराकिल्—

यूयं चेदधुनैव तत्र तु गतास्संसारदुःखं हतं
भूयादेव हि सप्तजन्मसु च वः । प्रोद्यत्तरुप्राङ्गणैः ।
उद्यानैर्विलसत्यनन्तशयने दिव्ये पुरे श्रीहरे-
रेकं नाम सहस्रमेव भवति ! ध्यानात्परं स्यात्पदम् ॥

३. ऊरुम् पुळ्कोडियुमःदे—

यस्याऽऽस्ते विनतासुतस्तु सततं दिव्यं हरेर्वाहनं
केतुश्चापि स एव ! सोऽद्य जगतां भक्षी च रक्षाकरः ।
आस्ते श्रीमदनन्तशायिनगरे ! क्षिप्रं प्रविश्यात्र वः
खेदान्नाशयत स्वयं ! वदत तन्नामापि साहस्रके ॥

४. पेरुमिन् कुशमिनू—

अम्भोधेस्तटतो वनैः परिवृते सौरभ्यसम्भूषितै-
र्नित्यं यो विलसत्यनन्तशयने तं पुष्पहस्तास्स्वयम् ।
आराध्यात्र भवन्ति धन्यहृदया भक्तास्तदीयं परं
भाग्यं कीर्तयत स्वयन्तु सततं निश्शङ्कमेवानघम् ॥

५. पुण्णियम् शेय्दु—

भक्त्या यूयममुं समर्चयत सत्पुष्पैश्च तीर्थान्वितै-
स्तन्नामानि च गायत प्रियतमान्येतज्जनिं नाशयत् ।
ये तं नाथमनन्तशायिनगरे भक्त्या भजन्ति स्वयं
तत्पादप्रवणा भवन्ति सुदृढं सूरीश्वरास्ते दिवि ॥

६. अमरराय् त्तिरिकिनूर्कल्कु—

गोविन्दः किल षण्मुखस्य जनकं सम्मोचयन् पातकां-
द्देवानामपि चादिरेव परमो योऽनन्तपुर्याश्रयः ।
तं सेनापतिरर्चयत्यनुदिनं नित्यैश्च मुक्तैस्स्वयं
भक्तास्तेऽपि च बान्धवा इति वयं भूयास्म तैं स्सङ्गताः ॥

७. तुडैत्त कोविन्दनारे—

लोकान् जीवांश्च देवानखिलमितरदप्...
गोविन्दो भाति मूर्तिः परमगुणमणिश्शेषशायी विभुर्नः ।
क्षेत्रैर्मीनाळियुक्तैर्विलसितविभवेऽनन्तपुर्याख्यदेशे !
तत्र द्वारादिशुद्धिक्रमकृतमनसां सर्वपापं प्रणश्येत् ॥

८. कडुविनै कळैयलाकुम्—

पापं नश्यति ! मन्मथस्य जनकः कृष्णो विभाति स्वयं
दिव्ये ऽनन्तपुरे सदेति च जगुः ! शेषे शयानस्य च ।
तस्याङ्घ्रिद्वयदर्शनाय निरता यूयं समागच्छत !
भ्रान्तिर्माऽस्तु च संशयोऽद्य ! विशदं सर्वं वदामो वयम् ॥

९. नामुमक्करिय चोल—

अस्माभिः कथितानि तानि च दिनान्यद्यागतानि स्वयं !
दिव्येऽनन्तपुरे वरे सुरुचिरोद्याने ऽद्य रक्षाऽस्ति नः ।
धूपं दिव्यसुगन्धिपुष्पसरणिं श्रीवामनाङ्घ्रिद्वये
कर्तुं स्तोतुमिमं च सक्तमनसां पापानि नश्यन्त्यहो ! ॥

१०. मायुन्दरुम् विनैकळ्तासे—

भक्ताश्चेदिह माधवेति सकृदप्याहुस्स्वयं भक्तितः
पापानि प्रहतानि तानि ! कनकप्राकारसंशोभिते ।

दिव्येऽनन्तपुरे हरेर्भुवि तु ये स्तोत्रं च नाथस्य नः
कुर्युर्धूप-सुदीप-गन्ध-कुसुमैस्ते यान्ति कीर्तिं पराम् ॥

११. अन्दमिल् पुकळ्—

दिव्यानन्तपुरेश्वरं च जगतामादिं हरिं श्रीधरं
स्तोतुं श्रीकुरुकेश्वरश्शठरिपुः पञ्चापि पञ्चाब्रवीत् ।
साहस्रे तदिदं पठन्ति दशकं ये धाम्नि दिव्ये स्वयं
ते गत्वा हि भजन्ति दिव्यललनाहस्तैश्शुभालंक्रियाम् ॥

दशमशतके

३ तृतीयदशकम् (वेयूमरुतोळिणै)

(अत्रापि तदेवोच्यते)

(नायिकावस्था--)

१. वेयूमरुतोळिणै—

बाहुद्वन्द्वं कृशं हा ! बत ! तनुकृशतां मे न पश्येद्वियोगं
कूजन्ती कोकिलाळिस्सपदि बत ! मयूरावळिर्नृत्तसक्ता ।
गोसङ्घानुप्रयाते त्वयि मम हि दिनं कल्पसाहस्रमेव !
त्वन्नेत्राब्जद्वयं मां तुदति बत ! हरे ! कृष्ण ! न त्वं दयाळुः ॥

२, तकविलै तकविलैये नी कण्णा—

कारुण्यं ते न कृष्णास्त्यहह ! न हि न हि ! श्लेषकालेऽपि ते मे
वक्षोजद्वन्द्वमेतत्पृथु भवति ! महानन्दपाथोधिरेवम् ।
आकाशं चाप्यतीत्य भ्रमयति सुतरां बुद्धिमेवं दशा स्यात्
स्वप्नावस्था हि ! जीवस्तव विरहसहो नैव ! गा नानुयाहि ॥

३, वीव नित्र् पशुनिरै—

धेनूनां घासकाले तव विरहसहा नास्मि ! सीदामि ! हन्तो-
च्छ्वासैस्सन्तप्तचित्ता ऽरम्यहह ! न हि सहायोऽद्य मे नीलमूर्ते ।
सञ्चारस्ते न दृश्यो मम भवति ! दिनं चैकमेवं न याति !
त्वद्विश्लेषेऽश्रुपातो न विरमति ! दशां तामिमां हन्म गोप्यः ॥

४. तोळुत्तैयोम् तनिमैयुम्—

दासीनां ते दशां नः पृथगिह विरहे हन्त ! नैव स्मरेस्त्वं !
गोविन्दैवं पशूंस्ताननुसरसि वने हन्त ! मुञ्चन्निहास्मान् ।
मायास्वादूक्ति–सारामृत–सरिति च ते मानसं मेऽस्ति मग्नं
पापिन्या हन्त ! हन्त ! स्मृतमपि वचनं ते दहत्येव मेऽसून् ॥

५. पणिमोळि निनैदोरुम्—

त्वत्स्वादूक्तिस्मृतिर्मां दहति बत ! दिनं कृष्ण ! गोघासकाले
मल्लीसौगन्ध्यवातान्वितमहह ! समायाति सायं च सन्ध्या ।
रत्नोद्भासे तवोरस्यभिनवकुटजैः कुट्मलैर्वासितं मे
भूयाद्वक्षोजयुग्मं त्वधरमधुरसो मेऽस्तु ! हस्तोऽस्त्वमस्ते ॥

६. अडिच्चियोम् तलैमिशै—

गम्भीराम्भोधिनेत्र ! स्वयमिह चरणौ ते कुरुष्वोत्तमाङ्गे
त्वस्माकं कृष्ण ! कान्तास्तव किल परितस्तत्र सन्त्येव बह्व्यः ।
स्त्रीत्वं हा ! दुस्सहं नः किल नयनयुगं त्वश्रुपूर्णं ! मनश्च
भ्रान्तं ! नस्ते पशूनामनुगमनमहो ! नाशकं ! तप्त आत्मा ॥

७. वेमेमदुयिर्—

शैथिल्यं यान्ति काञ्च्यङ्गद-वलय-मुखान्यद्य ! नेत्राब्जयुग्मं
रम्यं बाष्पाम्बुपूर्णं ! स्तनयुगमपि मे हन्त ! हा ! शुष्यतीदम् ।

बाहू चैतौ कृशौ मे ! मणिनिभ ! तव दिव्याङ्घ्रिपद्मद्वयं च
क्लिन्नं स्यात्कानने ! त्वं पशुगणमनुयास्यासुरैः किं भवेद्वा ? ॥

८. अम्बुरकैक्कृतलैप्पेय्यिल्—

आयाता राक्षसाश्चेत्कथमहह ! भवेदित्यहं हन्त ! चिन्ता-
पारावारेऽस्मि मग्ना ! पशुगणमनु मैवाद्य याहीति वच्मि ।
आशापाशाभिसन्धि—प्रयतन—रतयश्चार्तिमूलं ममाद्य !
त्वं मे हस्तस्थितस्स्याः ! पुरत इह चरेर्गोपिकाभिः प्रियाभिः ॥

९. उकक्कु नल्लवरोडुम्—

प्रीताभिः कामिनीभिर्यदि चरसि सुखं प्राप्नुषे वीतदुःख—
स्त्वं मे नाथ ! प्रियं मे महदिति विदितं ! माऽस्तु मे स्त्रीत्वदोषः ॥
विश्लेषो दुस्सहो मे ! पशुगणमनु मायाहि ! कंसेरितैस्ते
नानायुद्धानि च स्युर्निशिचरनिवहैर्हन्त ! मेऽनुव्रजोक्तिम् ॥

१०. अवत्तङ्क्कविकैयुम्—

गोपानां नायको नः कुलमणिरसि भो देव ! बिम्बाधरस्त्वं
क्रूराः कंसेरिताश्चाप्यसुरभटगणा मौनिभीत्यै चरन्ति ।
एकस्त्वं निस्सहायो बलमपि च विहायैव रामं प्रयासि !
क्लेशास्ते स्युर्वचो मे शृणु ! परमपदात्किं वरं गोपकृत्यम् ? ॥

११. शेङ्गनिवायेङ्गळायर्तेवु—

अस्मद्गोपान्वयेन्दोश्चरणयुगळमेवात्र बिम्बाधरस्य
स्तोतुं चोदारभावश्शठरिपुरवदत्सूक्तिमालासहस्रे ।
गोपीनां वाक्यरीत्या पशुगणमनु मा गच्छ कान्तां विहाय
श्रीमन्मामित्यपीदं दशकमपि नयेद्वाचकांस्तस्य गोष्ठीम् ॥

दशमशतके

४ चतुर्थदशकम् (शार्वे तवनेरिक्कु)

(अत्रापि तदेवोच्यते)

१. शार्वे तवनेरिक्कु—

नीलाम्बुदाभतनुरब्जविलोचनोऽसौ
यः पञ्चभूतमय एव च चक्रपाणिः ।
सूरीश्वरैरपि च तस्य सुकीर्तितस्य
दामोदरस्य चरणौ ननु भक्तिलभ्यौ ॥

२. पेरुमैयने—

दिव्यामराधिपतिरेव निजप्रभावा-
द्दृश्यो न यस्तु भुवि भक्तिवियुक्तचित्तैः ।
नित्यं श्रिया सहित एव चकास्ति मूर्त्या
पद्माम्बको ऽस्त्यघहरो मम नायकोऽसौ ॥

३. आक्किन्नानालियान्—

चक्रं बिभर्ति ! ननु रक्षति नस्ततोऽद्य
ध्वस्तं समस्तभवदुःखमपि क्षणान्नः ।
हानिर्न काचिदपि नः किल जातु च स्या-
न्नीळापतेस्तु चरणौ शिरसा वहामः ॥

४, तलैमेल् पुनैन्देन्—

धृत्वा च तस्य चरणौ शिरसाऽस्मि धन्य-
स्तं सूरिभिश्च वटपत्रशयं सुसंव्यम् ।

श्रीशैलवासमपि मे हृदि नित्यवासं
निश्चित्य चास्मि कृतकृत्य इहाद्य मान्यः ॥

५. तिरुच्चित्तिरुन्देनू—

मच्चित्तवासिनमिमं सततं मुरारिं
निश्चित्य चक्रधरमेव च मायिवृत्तम् ।
जानामि दूरगमिमं हि हरिं परेषां
सत्यं त्वसत्यमपि शेषशयं प्रियं नः ॥

६. नाकत्तणैयानै—

शेषे शयानमपि भक्तिजुषां दयालुं
पार्श्वे वहन्तमपि तं तरुणेन्दुचूडम् ।
अस्मत्प्रभुं ननु हरिं परमं भजेऽहं !
तत्पादपद्मयुगळं प्रणमामि नित्यम् ॥

७. पणि नेञ्जे नाळुम्—

माणिक्यभास्वरतनुर्मधुसूदनोऽसौ
नाथो ममास्ति कनकप्रभचक्रधारी ।
भक्तात्मनां हि भवदुःखविनाशको नः !
प्राप्यं परात्परममुं भज चित्त ! नित्यम् ॥

८. आळियानाळि—

श्रीचक्रपाणिरमरातिग–सुप्रभाव–
स्संहारकोऽस्ति जगतां स च सर्गकर्ता ।
गोपालको गिरिधरो निजबाहुवीर्यात् !
तत्पादसंस्मरणतश्शुभमेहि चित्त ! ॥

९. कण्डेन् कमलमलर् पादम्—

भक्त्या भजन्तु सततं च जना इतीदं
प्रागेव हि प्रकटितं परमेण पुंसा ।
वेदान्ततत्त्वमिति तत्क्रमतोऽद्य दृष्टः
तत्पादपद्मयुगळं सकलाघशान्त्यै ॥

१०. वकैयाल् मनमोनि—

सम्पूजनाय च यथाविधि चित्तदार्ढ्यात्
श्रीमाधवस्य सततं शुभधूपदीपैः ।
पुष्पैश्च तीर्थसहितैरमरा हि सज्जा—
स्स्युस्तस्य पादयुगळं भजतां शरण्यम् ॥

११. पत्तेंरु पत्ति—

साक्षात्परात्परममुं दृढबाहुमीशं
प्राप्तुं हरिं वळुदिनाड्डुदितश्शठारिः ॥
साहस्रमाह ! दशकं पठतां तदेतत्
कृष्णस्य पादयुगळं परमं शरण्यम् ॥

दशमशतके

५ पञ्चमदशकम् (कण्णन् कळलिणै)

(अत्रापि तदेवोच्यते)

१. कण्णन् कळलिणै—

कृष्णपादाम्बुजद्वन्द्वं प्राप्तुं कुतुकिनान्तु वः ।
चिन्तनीयं सदा नाम नारायण इति ध्रुवम् ॥

२. नारणनेम्मान्—

नारायणोऽस्मदीशोऽयं भूदेवीवल्लभो हरिः ।
मत्तवारणविध्वंसी कारणं जगतां स्वयम् ॥

३. ताने युलकेल्लाम्—

स्वयमेव जगत्सर्वं ! सृष्ट्वा चोद्धृत्य तत्स्वयम् ।
भुक्त्वा च पुनरुद्गीर्य सर्वं रक्षति च स्वयम् ॥

४. आळ्वानाळिनीर्—

शेषे स्तोत्रार्हसद्वक्त्रे शयानं कारणार्णवे ।
रक्षकं प्राप्य तत्पादौ पुष्पैरर्चयतानिशम् ॥

५. नाडीर नाळ्तोरुम्—

नव्यैः प्रतिदिनं पुष्पैराराधयत तं हरिम् ।
तन्नाम गायत प्रीत्या ! मोक्ष एव भवेद्ध्रुवम् ॥

६. मेयान् वेङ्गडम्—

अतसीगुच्छसच्छायः पूतनास्तन्यपानकृत् ।
नित्यं वसति हि प्रीत्या माधवो वेङ्कटाचले ॥

७. माधवनेन्नेनु—

माधवस्य शुभं नाम सङ्कीर्तयथ चेत्स्वयम् ।
भूतं भव्यं च पापं वस्सम्भवेन्नैव जातु चित् ॥

८. शारा एवङ्गळ्—

नोपसर्पन्ति दुःखानि ! नीलाम्बुदनिभस्य तत् ।
नाम ये कीर्तयन्त्येते सर्वं स्युरमरास्स्वयम् ॥

९. अमरर्क्केरियानै—

देवानां दुर्लभं विष्णुं भक्तानां सुलभं हरिम् ।
ये भजन्ति स्वयं प्रीत्या तेषां पापं न सम्भवेत् ॥

१०. विनं वल्लिरुलेन्नुम्—

पलायन्ते हि पापानि चाज्ञान-रुचि-वासनाः ।
आराध्य नूतनैः पुष्पैर्नाथं चिन्तयतानिशम् ॥

११. नेडियानरुळ् शूडुम्—

श्रीपतेः करुणापात्रं शठारिरवदन्मुनिः ।
साहस्रे दशकं चेदं भक्तानां फलमुत्तमम् ॥

दशमशतके

६ षष्ठदशकम् (अरुळ् पेरुवार्)

(अत्रापि तदेवोच्यते)

तिरुवाट्टारु—पुरविषयकमिदं दशकम् ॥

१. अरुळ् पेरुवार्—

कारुण्याश्रय-भक्तवर्यसरणेर्दासस्य मे श्रीहरि-
श्चक्री स्वां करुणां प्रदर्शयति च स्वाभीष्टरीत्या मम ।
नाहं जन्म तु कामयेऽत्र विपुले मोहावहे भूतले !
भ्रान्तिं सन्त्यज मानसाद्य चपल ! प्राप्यैव वाट्टार्-प्रभुम् ॥

२. वाट्टात्तानडि वणङ्गि—

श्रीवाट्टार्-पुरनायकस्य चरणौ नत्वा भवध्वंसका-
नाथं केशवमच्युतं वयममी सङ्कीर्त्य गीतैश्च तम् ।

ध्वस्तप्राक्तनकर्मपाशनिवहा स्त्यक्त्वा च संसारिभि-
स्सङ्गं श्रीहरिमाश्रिताश्शृणु मनो ! नारायणं श्रीधरम् ॥

३. नण्णिनम् नारायणनै—

भो भो ! मानस ! संश्रिताः किल वयं नारायणं श्रीधरं
तन्नामावळिकीर्तनैस्स तु हरिर्वाट्टार्- निवासी स्वयम् ।
आगत्यात्र परं पदं प्रियतमं नः प्राप्यमेवाव्ययं
दातुं चास्ति हि साभिलाष इदमेवास्तु प्रियं नः फलम् ॥

४. एत्तेअत्तुळिरुन्दु—

हे सच्चित्त ! खलं हिरण्यकशिपुं भित्वा च वक्षस्स्थले
श्रीवाट्टार्–प्रभुरेष भाति समरे तान् पाण्डवान् भारते ।
धृत्वा रक्षितुमायुधं च परमस्स्वामी स्थितो मे हृदि
प्राकाश्यं द्रविडागमस्य रचयन् दिव्यं कृपावान्मयि ॥

५. वानेर वळि तन्द—

दिव्यं धाम परं प्रयातुमपि नस्सन्मार्गदायी हरि–
श्श्रीवाट्टार्-प्रभुरेष पूर्वमवदद्यां रीतिमेव स्वयम् ।
तां प्राप्याद्य तु तार्क्ष्यवाहचरणौ तावेव नौमि प्रियौ
भाति श्रीतुळसीधरो मम शिरस्येवं हता दुर्गतिः ॥

६. तलैमेल ताळिणैकळ्—

तत्पादाम्बुजयुग्ममस्ति सततं मन्मस्तके ! भाति मे
नाथः पद्मविलोचनो मम हृदि स्थैर्यं गतंस्सर्वदा ।
श्रीवाट्टार्-नगरेऽस्ति शेषशयनो ! मत्तद्विप-ध्वंसिन-
स्तस्याङ्घ्रिद्वयमेव सन्ततममी संश्रित्य धन्या वयम् ॥

७. कुरै कळलूकळू कुरुकिनम्—

दिव्यं भूषणभूषितं पदयुगं संश्रित्य धन्या वयं !
गोविन्दो हृदि सन्ततं वसति मे ! पाथोधिपर्यावृते ।
देशे दक्षिणदिग्भवेऽस्ति तिलकप्रायेऽत्र वाट्टार्-पुरे
दिव्ये रत्नमयेऽस्य पादतुळसी मेऽङ्गे सुगन्धावहा ॥

८. मेयूनिनूरु कमंळू तुळवं—

सौगन्ध्यान्वितमूर्तिरेष तुलसीभास्वत्किरीटो हरि-
र्वीरश्रीयुतचक्रपाणिरतुलो नीलाञ्जनाद्रिप्रभः ।
श्रीवाट्टार् पुरवासिनोऽस्य किमहं सत्कारकृत्यं शुभं
कृत्वा ऽस्म्यद्य कृती ? सदाऽपि हृदि मे यस्माच्च बाभात्यसौ ॥

९. तिकलकिनू तिरुमार्बिल्—

लक्ष्म्या वक्षसि भास्वरो ऽयमधुना वाट्टार-पुरे श्रीधर-
स्तार्क्ष्यारूढ इहास्ति शीतलगुणे नित्यं सुसेव्यो नृणाम् ।
युद्धे राक्षससङ्घनाशकृदसौ चित्ते ममास्ति स्वयं
निश्चिन्तो विलसत्यहो ! न किल मां त्यक्त्वा प्रयात्यन्यतः ॥

१०. पिरियादाळचेय्येनु—

कैङ्कर्यं सततं भवेदिति च तत्प्रत्यर्थि-जन्मापह-
श्श्रीमान् भाति हिरण्यकासुर-तनुच्छेदी च शेषेशयः ।
सेवां प्राप्य परां तदा नरहरिर्भूत्वा च भक्तावनो
यो वाट्टार्-नगरे ऽस्त्यसौ हि महतां सेवाफलं दर्शयन् ॥

११. काट्टि त्तन् कनैकळूलूकल—

वीरश्रीयुत-पादपङ्कज-युगं स्वीयं प्रदर्श्य स्वयं
नानादुर्गतिनाशको विजयते वाट्टार्-पुरे श्रीधरः ।

इत्येवं दशकं त्विदं शठरिपुस्साहस्रके द्राविडे
श्राव्यं चाह हि ! सूरयोऽपि तादिदं श्रुत्वा न तृप्ता दिवि ॥

अथ दशमशतके

७ सप्तमदशकम् (शेम्शोल् कविकाळ्)

(अत्रापि तदेवोच्यते)

तिरुमालिरुंशोलैमलै—(श्रीवनगिरि)—विषयकमिदं दशकम् ।

१. शेम्शोल् कविकाळ्—

मायी वञ्चकसार्वभौम उदितो मायाकविर्मानसे
मे जीवेऽपि किल प्रविश्य रहसि स्वैरं च तत्सङ्गतः ।
भुक्त्वा तन्मम चित्त-चेतन-युगं सर्वं स्वयं सर्वतः
पूर्णो भाति ! वनाचलेऽद्य कवयश्श्लाघ्यास्स्थ सेवान्विताः ॥

२. ताने याकि निरैन्दु—

भुक्त्वा जीवमिहाखिलं मम हरिस्स्वैरं स्वयं पूर्ण ए-
वाऽऽस्ते सर्वजगन्मयोऽपि परितस्सर्वात्मवर्गात्मकः ।
एवं चाहमपि स्वयं भवति च स्तोतापि ! मे माक्षिकं
दुग्धं चेक्षुरसोऽमृतं च वनशैलेशोऽपि भाति स्थिरः ॥

३. एनै मुत्तुमुयिरुण्डु—

भुक्त्वा मां परितोऽपि मेऽद्य तनुमप्याविश्य मायामयीं
जीवे मेऽपि समग्र एव विलसन्मायी चकास्ति प्रभुः ।
दाक्ष्यें तत्र वनाचले सुरुचिरे ! दृष्ट्वाऽप्यहं तां दिशं
नत्वाऽप्यन्यत एव यामि किमहो? नाथस्य कीदृक् कृपा ? ॥

४. ६न् कोलम्मान् तिरुवरुळ्—

जीवानां जगतां च मण्डलमपि स्वैरं स्वयं पाति य-
स्सोऽयं नास्तिकराक्षसप्रमथनस्सञ्चारशीलो भुवि ।
आस्ते दक्षिणदिग्भवे च तिलकप्राये वनाद्रौ परं !
देहं मे न हि जातु च त्यजति ! मे नाथस्य कीदृक्कृपा ? ॥

५. नण्णावसुरर् नलिवेय्द्—

नाशार्थं नास्तिकानां दिवि च दिविषदां श्रेयसेऽप्यास्तिकानां
प्रीत्यै चानन्दवृद्ध्यै सततशुभगणाशंसिनां वै मुनीनाम् ।
पद्याळीहृद्यगीतावळिमपि च मम स्वैरमेव स्वयं श्री-
नाथो मे भाति गायन्नहह ! वनगिरौ गानलोलो ऽनुगायन् ॥

६. तिरुमालिरुंशोलैयाने याकि—

भक्त्या तौ विधिशङ्करौ पदयुगं स्तुत्वा च यस्य प्रियौ
कारुण्यात्स जगत्त्रयीं च जठरे कृत्वा स्वयं रक्षकः ।
कल्पान्तेष्वपि माधवो वनगिरौ भात्यद्य नाथो मम
प्रीत्याऽसौ मयि मोहितोऽस्ति सततं ! नैव त्यजेन्मां हरिः ॥

७. अरुळै यीयेन्नम्माने—

कारुण्यं मयि दर्शयेश्वर ! दयासिन्धो ! जगन्नायके-
त्येवं रुद्रचतुर्मुखौ शतमखो देवा मुनीन्द्रा अपि ।
यं शंसन्ति सदाऽपि तस्य सततं वासाश्रयो भास्वरो
रम्यो मोहविनाशको गिरिरयं नाम्ना वनाद्रिस्स्वयम् ॥

८. तिरुमालिरुंशोलैमलैये—

श्रीमन्तं च वनाद्रिमद्भुततमं ! क्षीराम्बुधिं ! मस्तकं
मे ! विष्णोः परमं पदं च कमलाकान्तस्य ! शेषाचलम् ।

देहं जीवमपीह मेऽत्र हृदयं वाचं कृतिं चाच्युतो
नैवासौ त्यजति क्षणं च जगतामेकं परं कारणम् ॥

९. ऊऴिक्षुदल्वनोरुवने येन्दुम्—

सर्वेषां जगतां य आदिरखिलं विश्वं सृजन् पालयन्
कल्पेष्वेव विनाशयन्नपि चरत्येवं प्रभुर्मे हरिः ।
गम्भीराम्बुधिवर्ण एष जयति श्रीमान् वनाद्रौ शुभे !
हे चित्त ! त्वमिमं गिरिं भज सदा ते स्वस्ति ! मोक्षो भवेत् ॥

११. मङ्गवोट्टुन् मामायै—

स्वामिन् ! मे वनगिर्यधीश ! यदहं भूत्वा त्वमेवाच्युत !
श्रीमन् ! पालयसीह मां च ! विषयान् ज्ञानेन्द्रियाणां गणम्
तत्कर्मेन्द्रियपञ्चकं च दळयन् भूतानि पञ्चापि च
त्वं मूलप्रकृतिं महान्तमपि चाहङ्कारचित्ते जहि ॥

११. मानाङ्कारमनम् केड—।

नाशार्थं महतोऽप्यहङ्कृतिमनस्तत्त्वद्वयस्याप्यसौ
नाशायेन्द्रियपञ्चकस्य विषयैर्भूत्वाऽभिमानी स्वयम् ।
आत्मात्मीयमपि स्वयं भवति यस्तं श्रीशठारिर्भजन्
साहस्रे दशकं किलाह तदिदं मुक्त्यै वनाद्रिं प्रति ॥



अथ दशमशतके

अष्टमदशकम् (तिरुमालिरुम्शोलैमलै)

तिरुप्पेर्-(श्रीनामपुरी)-विषयकमिदं दशकम् ॥

१. तिरुमालि शोलैमलैयेन्रेन्—

श्रीमद्वनाद्रि-शुभकीर्तनतः परात्मा
चित्ते प्रविश्य मम भाति च माधवोऽयम् ।
अस्येदमेव नगरं मणिवाहि-नद्या-
स्तीरे शुभं लसति नामपुराभिधानम् ॥

२. पेरेयुरैकिन्र पिरान्—

श्रीनामपुर्यधिपतिः परमः प्रभुर्मे
चित्ते प्रविश्य कृपया स्थिरमेव पूर्णः ।
सप्ताम्बुदाम्बुधिगिरीनपि सर्वलोकान्
भुक्त्वाऽप्यतृप्तमपि तं मयि धारयामि ॥

३. पिडित्तेन् पिरवि केडुत्तेन्—

श्रीगोपुरैर्ध्वजयुतैरपि सौधवर्गै-
स्सम्भूषिते वसति नामपुरे मुरारिः ।
तत्पादयुग्मभजनात्सुलभाद्भवाब्धिं
सन्तीर्य दुःखरहितोऽस्मि निहत्य मायाम् ॥

४. एलिदायिनवारेन्रु—

प्राप्यं हि भाति सुलभं मम चेति नेत्र-
द्वन्द्वं प्रहर्षभरितं हृदयं प्रहृष्टम् ।

आनन्दवानहमिहास्मि ददाति विष्णुः
श्रीनामपुर्यधिपतिः परमं पदं मे ॥

५. वाने तरुंवानेनक्काय्—

भृङ्गावृतैरपि वनैस्सहिते च रम्ये
मोक्षप्रदो जयति नामपुरे हरिर्मे ।
एवं प्रतिश्रुतियुतो मम चर्मदेहं
क्षिप्रं प्रविश्य हतवान्मम कर्मराशिम् ॥

६. तिरुप्पेर नकरान्—

श्रीनामपुर्यधिपतिर्वनगिर्यधीश-
स्स्वामी हृदीह निवसामि तवेति पूर्णः ।
चित्ते प्रविश्य मम गौरवमातनोती-
त्यानन्दवानहमिहामृतपानमत्तः ॥

७. उण्डु कंळित्तेर्कु—

श्रीनामपुर्यधिपतिर्मम दर्शनार्थं
प्रत्यक्ष एव भवतीह ! न याति दूरम् ।
नित्यानुभूति—मुदितोऽस्मि ! न हीयते मे
किञ्चिच ! भोगविभवैर्नम उक्तिगोऽस्मि ॥

८. कण्णुळ् निन्रकलान्—

चक्षुःपुरोऽस्ति मम ! नैव हि याति दूरं ।
सङ्कल्पतः किल महानतिसूक्ष्मरूपः ।
सप्तस्वरादिरसवारिधिराढ्य-सौध-
श्रीनामपुर्यधिपतिर्हृदि मे प्रविष्टः ॥

९. इन्नूरेन्नै प्पोरुळाक्कि—

अद्य स्वयं सपदि मामपि वस्तु कृत्वा
स्वात्मानमेव मयि भाति च सन्निवेश्य ।
पूर्वं कथं त्यजति हि स्म परानुगं मां ?
प्रष्टुं हि नामपुरनायकमुद्यतोऽस्मि ॥

१०. उत्तेनुकन्दु पणिशेय्दु—

त्वां संश्रितोऽस्मि ! तव पादयुगं श्रितोऽस्मि
त्वद्दास्यतो मम विभो ! तदिदं हि काङ्क्षे ।
श्रीवैदिकाश्रयभुवीह तु नामपुर्यां
भासि ! त्वदङ्घ्रिविनतेषु न दुःखसङ्गः ॥

११. निल्लावल्लल् नीलचयलूशूल—

क्षेत्रैश्च सस्यभरितैः परितः परीतं
निर्दुःखमेव शुभनामपुरं प्रतीदम् ।
साहस्रके व्यरचयद्दशकं शठारि·
भक्ताः पठन्ति यदि शासति धाम दिव्यम् ॥



अथ दशमशतके

नवमदशकम् ॥ (शूल्-विशुम्बु)

(अर्चिरादिमार्गवर्णनम् ॥)

१. शूल्विशुम्बु—

नारायणस्य जगतां परिपालकस्य
भक्तान्मम प्रभुवरस्य विलोक्य मेघाः ।

गर्जन्ति तूर्यनिनदैः ! स्वकरैस्तरङ्ग-
नृत्यन्ति चाब्धय उदेति च सप्तलोकी ॥

२. नारणन् तमरैक्कण्डु—

भक्तान् विलोक्य सजलो जलदः प्रहृष्टो
नारायणस्य गगने ननु पूर्णकुम्भैः ।
सौवर्णकैर्लसति ! गर्जति चाब्धिमाला !
लोका भजन्ति गिरिभिर्दिवि तोरणैस्तान् ॥

३ तोळुदनरुलक्कर्कल्—

विक्रान्तभूमिवलयस्य हरेस्तु भक्तान्
धूपैश्च पुष्पसहितैः परितोऽर्चयन्तः ।
लोका उपर्यथ परं पदमेव गन्तुं
मार्गोऽयमित्यपि मुदा मुनयोऽपि चाहुः ॥

४. एदिरेदिरिमैयवर्—

श्रीमाधवस्य तुळसीरुचिराढ्यमौळे-
र्भक्तान् मुदाऽप्यनिमिषास्स्थलतोऽर्चयन्तः ।
ते द्वादशापि रवयः किरणैः करैस्स्वै-
र्भेरीनिनाद उदभूज्जलधेश्च घोषैः ॥

५. मादवन् तमरेनूरु—

द्वारेषु तत्र दिवि वासिन आह्वयन्त-
श्श्रीमाधवाश्रितगणानिह गच्छतेति ।
तुष्टास्समर्प्य सुकृतानि च वेदवक्त्रा
गायन्ति हि स्म गरुडा अपि किन्नराश्च ॥

६. वेळ्ळियुर—

आराधिताश्श्रुतिमुखैस्सुकृतैश्च धूपै-
स्सौगन्ध्यवद्भिरपि काहळ–शङ्खनादैः ।
भक्तास्सुचक्रिग इदं पदमाश्रितास्स्थे-
त्यभ्यार्थिता बहुतमां च सुराङ्गनाभिः ॥

७. मडन्दैयर्—

श्रीकेशवोऽम्बुधिशयश्शुभरत्नमौळि-
र्गोपालको विजयते ननु कुम्भपुर्याम् ।
भक्तान् किलास्य मरुतो वसवश्च तुष्टा-
स्तुत्वा स्वकीयललनानिवहैस्तु धन्याः ॥

८. कुडियडियारिवर्—

गोविन्दभक्तनिवहा इति कीर्तितास्तै-
र्दिव्यैः किरीटसहितैरभिगम्य तुष्टैः ।
श्रीमाधवस्य परमं पदमेव गन्तुं
तद्गोपुरं रुचिरकेतुयुतं प्रविष्टाः ॥

९. वैकुन्दम् पुकुदलुम्—

वैकुण्ठनाथपुर–सम्मुख-पालकैश्चा-
प्यायात सान्निधिमिहेति मुदाऽर्चितास्ते ।
तत्रामराश्च मुनयो नितरां प्रहृष्टा
भौमाः परं पदमिदं ननु यान्ति चेति ॥

१०. विदिवकै पुकुन्दनर्—

भाग्यान्विता इति च वेदविदां स्वकीय-
स्थानेषु पूजिततमाः पदपद्मशुद्ध्या ।

श्रीपादुकानिधि-सुचूर्ण-सुपूर्णकुम्भै-
र्दीपैश्च दिव्यललनाभिरभिप्रयाताः ॥

११. वम्दवरेदिर्कोंकळ—

सर्वेश्वरेऽप्यभिमुखे स्वयमागते ऽस्मिन्
दिव्ये च भक्तनिवहैर्मणिमण्टप तैः ।
आनन्दसिद्धिमवदत्परमां शठारि-
स्साहस्रके ऽत्र दशकान्मुनयो दिवि स्युः ॥

अथ दशमशतके

१० दशमदशकम् (मुनियेनान्मुकने)

(परमपदे-सायुज्य-मोक्षप्राप्तिवर्णनम् ।)

१. मुनिये नान्मुकने—

मौनिन् ! हे चतुरानन ! त्रिणयन ! श्रीनाथ ! बिम्बाधर !
श्रीमाणिक्यसुरूप ! पद्मनयन ! त्वं वञ्चको भासि मे ।
एकस्मिन्मयि पूर्ण एव विलसस्यात्मा च शीर्षेऽसि मे !
त्वां मुञ्चामि न जातु चिच्च तदहं ! त्वं मां च मा वञ्चय ॥

२. मायम् शेय्येलेन्नै—

मां मा वञ्चय ! वक्षसीह तव या मालेव भाति स्वयं
श्रीः पद्मा शुभगन्धिकेश्यनु च तां त्वां चानु सत्यं शपे ।
कृत्वा स्नेहमहो ! मया सह भवानैकीभवन्मां हरे !
निश्शङ्कं वृतवान् किल ! त्वमधुना मामाह्वयागत्यभोः ॥

३. कूविक्कोळ्ळाय् वन्दन्दों—

हे माणिक्य ! मम प्रिय ! त्वमसि यद्ब्रह्मेन्द्ररुद्रात्मना-
मादिर्नाभिसरोजमूलमसि यत्सूरीश्वरो भ्राजसे ।
त्वं मे भासि किलात्मनस्तु शरणं ! न त्वां विना वेद्म्यहं !
तस्मादाह्वय मां हरे ! मम विभो ! मामागतस्सन्नहो ! ॥

४. उम्बरम् तण् पालेयो—

आद्या सा प्रकृतिश्च रम्यतनुभिर्भोग्याभिरानन्दनी !
तत्र त्वं पुरुषः परोऽसि गगने ज्योतिश्च तत्राप्यहो ! ।
ब्रह्मा शङ्कर इत्युभौ त्वयि परं दृष्टौ ? सुरान् यादवान्
सृष्ट्वा भाति भवान् ममापि परमो नाथोऽद्य मां त्यक्तवान् ॥

५. पोरविट्टिट्टेन्नै—

तप्तायस्तु यथा पिबेज्जलमहो ! तापस्य शान्त्यै तथा
त्वामेवामृतमव्ययं किल पिबाम्येवाहमार्तोऽधुना ।
त्यक्त्वा मां यदि दूरतो बहिरहो ! कर्तुं च मां चिन्तयेः,
प्राप्यः कश्शरणं ममास्ति च कुतः ? किंस्यान्ममेत्यप्यहम् ? ॥

६. एनक्काराववुदाय्—

भो भो ! श्यामलवर्ण ! पद्मनयन ! त्वं भासि बिम्बाधर-
स्ते श्रीर्भात्यनुरूपरूपविभवा पद्मा नु ! तस्याः प्रियः ।
त्वं मे भासि भृशं प्रियो ऽनवधिकं सारामृतं मे भवान्
देहात्माद्यखिलाशनोऽसि ! नितरां तस्माच्च मां भोजय ॥

कोलमलर्प्पावैक्कु—

सौन्दर्यान्वितपद्मवासभवन-श्री-वल्लभो मत्प्रियो
नीलाद्रिर्धृतबालचन्द्रयुगळो भास्वान् यथा त्वं तथा ।

दंष्ट्रातोऽसि वराह उद्धृतधराबिम्बस्तु रम्याकृति-
स्तद्रक्षं जलधेश्च मन्थनकरं किं त्वां त्यजाम्यच्युतम् ? ॥

८. पेत्तिनि प्पोक्कुवनो—

कर्मद्वन्द्वमपि स्वयं च जगतामात्मा फलं च स्वयं
त्रैलोक्यं सकलं च गुल्ममखिलं संसारपाशात्मकम् ।
गुप्तस्त्वं किल तत्र सूक्ष्मतम एवाऽऽद्यं च बीजं भवान्
मे प्राणं परमं प्रपद्य किमहं मुञ्चामि च त्वां पुनः ? ॥

९. मुदल् तनिवित्तेयो—

त्रैलोक्यस्य निमित्तकारणमपि त्वं बीजमेवाद्वयं ।
तत्राप्यत्र समग्ररूपभृदपि त्वं सर्वमूलं परम् ।
भुक्तिर्मुक्तिरितिद्वयस्य परमं मूलं प्रधानं च भा-
स्येवं सर्वदिशासु चाव्ययममुं त्वां संश्रयेऽहं कदा ? ॥

१०. मूळ्ळदकनू—

सर्वव्यापि-समस्तदिक्तत—महानित्यप्रकृत्यात्मक-
स्त्वं व्याप्यासि ततोऽतिशायि-विलसज्ज्योतिर्मयात्मात्मकः ।
ज्ञानानन्दनिधिस्ततोऽतिशयितस्त्वं ज्योतिरेवाव्ययं ।
तच्चातीत्य भवं ममाभिलषितं सम्पूर्य संश्लेषभाक् ॥

११. अवावर च्चूळ्—

सर्वापेक्षितसम्प्रदानचतुरं सर्वेश्वरं श्रीहरिं
त्वन्तर्यामितया चतुर्मुखहराद्यात्मानमेवाच्युतम् ।
आक्रन्द्य प्रहतार्तिसन्ततिरयं दिव्यं शठारिर्जगा-
वन्ताद्युक्तिमहस्रमत्र दशकाद्धद्धाश्च मुक्तास्स्वयम् ॥

इति श्रीकल्किसिंह-भगवद्विरचितायां सहस्रगाथारत्नावल्यां
दशमशतकं सम्पूर्णम् ॥

निगमनम् ।

श्रीयादवाद्रिनाथेन वादिभीकरसूरिणा ।
श्रीमता कल्किसिंहेन सेयं रत्नावळी कृता ॥
दिव्येयं कल्किसिंहेन श्रीशेन परमात्मना ।
सहस्रगाथा-रत्नावळ्याख्या व्याख्या मया कृता ॥
दिव्यसूरिवरैरेव शठारि प्रमुखैरहम् ।
प्रेरितस्तत्कृतामेव मन्ये रत्नावळीमिमाम् ॥
तामिमां परमानन्दसन्दोह-जननीं शुभाम् ।
सन्धार्य हृदि सन्तुष्टास्सन्तु रत्नावळीं बुधाः ॥

श्रीमते शठकोपाय नमः ॥

श्रीमते कल्किसिंहाय भगवते परमात्मने नमः ॥

श्रीकल्किसिंह-भगवद्विरचिता सहस्रगाथारत्नावळी सम्पूर्णा ॥

श्रीमद्वरवरमुनये नमः ।
श्रीवादि भीकरमहागुरवे नमः ।



श्रीः

शोधनपत्रिका.

पुट.	पंक्ति.	(असाधु.)	(साधु.)
(i)	१२	दृष्ट्वावा	दृष्ट्वा
(vi)	१०	भागवतः	भगवतः
(viii)	९	सर्वमोक्षप्रदंच	सर्वमोक्षप्रदं च ।
१२	३	दुर्विधैः	दुर्विधेः
,,	२६	बाष्पार्द्रवस्त्राऽस्म्यहम्	शीतानिलाघाततः
२३	२६	शतमुख	शतमख
२४	१०	सुपरि	मुपरि
३२	२०	शर्व	शक्र
४४	१४	हरि	हरिं
४८	११	नृसिह्म	नृसिंह
५६	११	समुद्धति	समुद्धृति
५७	१०	नंश्यति	नश्यति
५८	४	मम्द	मन्द
५९	४	कैङ्कर्य	कैङ्कर्यं
६०	२३	जननं मृतिश्च	जननानि मृत्युः

पृट.	पंक्ति.	(असाधु)	(साधु.)
,,	२१	सहस	सहस्र
१८६	११	धट	घट
१८७	२३	शक्रं	चक्रं
१९०	१८	ऽलौ	ऽसौ
१९५	१२	द्रूम	ध्रूम
२०२	४	दुर्वारा	दुर्वारा
,,	११	भुक्तिः	मुक्तिः
२०७	२२	चस्माक	चास्माक
२११	१३	मुमिः	मुनिः
२२५	१८	मणैश्च	गणैश्च
२२७	५	मणाश्च	गणाश्च
२२८	७	मस्थि	मस्ति
२३०	१५	याति	यान्ति
२३१	१०	सपपि	सपदि
२६२	३	नाथने	नाथेन


नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् । रम्या रामा मृदुतनुलता नन्दने नापि रन्तुं भावे भावे हृदयभवने भावयेयं भवन्तम् ॥ ४ ॥ नास्था धर्मे न वसुनिचये नैव कामोपभोगे यद्यद्भव्यं भवतु भगवन्पूर्वकर्मानुरूपम् । एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥ ५ ॥ दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम् । अवधीरितशारदारविन्दौ चरणौ ते मरणेऽपि चिन्तयामि ॥६॥ कृष्ण त्वदीयपदपङ्कजपञ्जरान्तः अद्यैव मे विशतु मानसराजहंसः । प्राणप्रयाणसमये कफवातपित्तैः कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ ७ ॥ चिन्तयामि हरिमेव सन्ततं मन्दमन्दहसिताननाम्बुजम् । नन्दगोपतनयं परात्परं नारदादिमुनिबृन्दवन्दितम् ॥ ८ ॥ करचरणसरोजे कान्तिमन्नेत्रमीने श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे । हरिसरसि विगाह्यापीय तेजोजलौघं भवमरुपरिखिन्नःखेदमद्य त्यजामि ॥ ९ ॥ सरसिजनयने सशङ्खचक्रे मुरभिदि मा विरम स्वचित्त रन्तुम् । सुखतरमपरं न जातु जाने हरिचरणस्मरणामृतेन तुल्यम् ॥ १० ॥ माभीर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातनाः नामी नः प्रभवन्ति पापरिपवस्स्वामी ननु श्रीधरः । आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ ११ ॥ भवजलधिगतानां द्वन्द्ववाताहतानां सुतदुहितृकलत्रत्राणभारार्दितानाम् । विषमविषयतोये मज्जतामप्लवानां भवतु शरणमेको विष्णुपोतो नराणाम् ॥ १२ ॥ भवजलधिमगाधं दुस्तरं निस्तरेयं कथमहमिति चेतो मास्म गाः कातरत्वम् । सरसिजदृशि देवे तावकी भक्तिरेका नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥ १३ ॥ तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले दारावर्ते तनयसहजग्राहसंघाकुले च । संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्

पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ ॥ १४ ॥ माद्राक्षं क्षीण-पुण्यान्क्षणमपि भवतो भक्तिहीनान्पदाब्जे माश्रौषं श्राव्यबन्धं तव चरितमपास्यान्यदाख्यानजातम् । मास्मार्षं माधव त्वामपि भुवनपते चेतसाऽपह्नुवानान् माभूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मान्तरेऽपि ॥ १५ ॥ जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं पाणिद्वन्द्व समर्चयाच्युतकथाश्श्रोत्रद्वय त्वं शृणु । कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं जिघ्र घ्राण मुकुन्दपादतुळसीं मूर्धन्नमाधोक्षजम् ॥ १६ ॥ हे लोकाश्शृणुत प्रसूति मरणव्याधेश्चिकित्सामिमां योगज्ञास्समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः । अन्तर्ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयतां तत्पीतं परमौषधं वितनुते निर्वाणमात्यन्तिकम् ॥ १७ ॥ हे मर्त्याः परमं हितं शृणुत वो वक्ष्यामि संक्षेपतस्संसारार्णवमापदूर्मिबहुलं सम्यक्प्रविश्य स्थिताः । नानाज्ञानमपास्य चेतसि नमो नारयणायेत्यमुं मन्त्रं सप्रणवं प्रणामसहितं प्रावर्तयध्वं मुहुः ॥ १८ ॥ पृथ्वी रेणुरणुः पयांसि कणिका फल्गुः स्फुलिङ्गो लघुः तेजो निः श्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः । क्षुद्रा रुद्रपितामहप्रभृतयःकीटास्समस्तास्सुरा दृष्टे यत्र स तावको विजयते भूमावधूतावधिः ॥ १९ ॥

बद्धेनाञ्जलिना नतेन शिरसा गात्रैस्सरोमोद्गमैः कण्ठेन स्वरगद्गदेन नयनेनोद्गीर्णबाष्पाम्बुना । नित्यं त्वच्चरणारविन्दयुगुलध्यानामृतास्वादिनां अस्माकं सरसीरुहाक्ष सततं सम्पद्यतां जीवितम् ॥ २० ॥ हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते हे कंसान्तक हे गजेन्द्रकरुणापारीण हे माधव । हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥ २१ ॥ भक्तापायभुजङ्गगारुडमणिस्त्रैलोक्यरक्षामणिः गोपीलोचनचातकाम्बुदमणिस्सौन्दर्यमुद्रामणिः । यः कान्तामणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिः श्रेयो देवशिखामणिर्दिशतु नो गोपालचू-

डामणिः ॥ २२ ॥ शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसम्पूज्यमन्त्रं संसारोत्तारमन्त्रं समुपचिततमस्सङ्घनिर्याणमन्त्रम् । सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसन्दष्टसन्त्राणमन्त्रं जिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम् ॥ २३ ॥ व्यामोहप्रशमौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं दैत्येन्द्रार्तिकरौषधं त्रिभुवने सञ्जीवनैकौषधम् । भक्तात्यन्तहितौषधं भवभयप्रध्वंसनैकौषधं श्रेयःप्राप्तिकरौषधं पिब मनश्श्रीकृष्णदिव्यौषधम् ॥ २४ ॥ आम्नायाभ्यसनान्यरण्यरुदितं वेदव्रतान्यन्वहं मेदश्छेदफलानि पूर्तविधयस्सर्वे हुतं भस्मनि । तीर्थानामवगाहनानि च गजस्नानं विना यत्पदद्वन्द्वाम्भोरुहसंस्मृतीर्विजयते देवस्स नारायणः ॥२५ ॥ श्रीमन्नाम प्रोच्य नारायणाख्यं के न प्रापुर्वाञ्छितं पापिनोऽपि । हा नः पूर्वं वाक्प्रवृत्ता न तस्मिन् तेन प्राप्तं गर्भवासादिदुःखम् ॥२६॥ मज्जन्मनः फलमिदं मधुकैटभारे मत्प्रार्थनीयमदनुग्रह एष एव । त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्यभृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥ २७ ॥ नाथे नः पुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति । यं कञ्चित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं सेवायै मृगयामहे नरमहो मूका वराका वयम् ॥ २८ ॥ मदन परिहर स्थितिं मदीये मनसि मुकुन्दपदारविन्दधाम्नि । हरनयनकृशानुना कृशोऽसि स्मरसि न चक्रपराक्रमं मुरारेः ॥ २९ ॥ तत्वं ब्रुवाणानि परं परस्मान्मधु क्षरन्तीव सतां फलानि । प्रावर्तय प्राञ्जलिरस्मि जिह्वे नामानि नारायणगोचराणि ॥ ३० ॥ इदं शरीरं परिणामपेशलं पतत्यवश्यं श्लथसन्धिजर्झरम् । किमौषधैः क्लिश्यसि मूढ दुर्मते निरामयं कृष्णरसायनं पिब ॥ ३१ ॥ दारा वाराकरवरसुता ते तनूजो विरिञ्चिस्स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः । मुक्तिर्माया जगदविकलं तावकी देवकी ते माता मित्रं बलरिपुसुतस्त्वय्यतोऽन्यन्न जाने ॥ ३२ ॥

कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमस्याम्यहं कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः । कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं कृष्णे तिष्ठति सर्वमेतदखिलं हे कृष्ण संरक्ष माम् ॥ ३३ ॥ स त्वं प्रसीद भगवन्कुरु मय्यनाथे विष्णो कृपां परमकारुणिकः किल त्वम् । संसारसागरनिमग्नमनन्त दीनं उद्धर्तु-मर्हसि हरे पुरुषोत्तमोऽसि ॥ ३४ ॥ नमामि नारायणपादपङ्कजं करोमि नारायणपूजनं सदा । वदामि नारायणनाम निर्मलं स्मरामि नारायणतत्त्वमव्ययम् ॥ ३५ ॥ श्रीनाथ नारायण वासुदेव श्रीकृष्ण भक्तप्रिय चक्रपाणे । श्रीपद्मनाभाच्युत कैटभारे श्रीराम पद्माक्ष हरे मुरारे ॥ ३६ ॥ अनन्त वैकुण्ठ मुकुन्द कृष्ण गोविन्द दामो-दर माधवेति । वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनाभिमुख्यम् ॥ ३७ ॥ ध्यायन्ति ये विष्णुमनन्तमव्ययं हृत्पद्ममध्ये सततं व्यवस्थितम् । समाहितानां सततमभयप्रदं ते यान्ति सिद्धिं परमां च वैष्णवीम् ॥ ३८ ॥ क्षीरसागरतरङ्गशीकरासारतारकि-तचारुमूर्तये । भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥ ३९ ॥ यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ मित्रे द्विजन्म-वरपद्मशरावभूताम् । तेनाम्बुजाक्षचरणाम्बुजषट्पदेन राज्ञा कृता कृतिरियं कुलशेखरेण ॥ ४० ॥ मुकुन्दमाला समाप्ता ।



श्रीयामुनमुनिभिरनुगृहीता

चतुःश्लोकी ।

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः । वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥ * ॥ कान्तस्ते पुरुषोत्तमः फणिपतिश्शय्यासनं वाहनं वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहनी । ब्रह्मेशादिसुरव्रजस्सदयितस्त्वद्दासदासीगणः श्रीरित्येव च नाम ते भगवति ब्रूमः

कथं त्वां वयम् ॥ १ ॥ यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभुः नालं मातुमियत्तया निरवधिं नित्यानुकूलं स्वतः । तां त्वां दास इति प्रपन्न इति च स्तोष्याम्यहं निर्भयो लोकैकेश्वरि लोकनाथदयिते दान्ते दयां ते विदन् ॥ २ ॥ ईषत्त्वत्करुणानिरीक्षणसुधासन्धुक्षणाद्रक्ष्यते नष्टं प्राक्तदलाभतस्त्रिभुवनं संप्रत्यनन्तोदयम् । श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् ॥ ३ ॥ शान्तानन्तमहाविभूतिपरमं यद्ब्रह्मरूपं हरेः मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भुतम् । यान्यन्यानि यथासुखं विहरतो रूपाणि सर्वाणि तान्याहुः स्वैरनुरूपरूपविभवैर्गाढोपगूढानि ते ॥ ४ ॥ आकारत्रयसम्पन्नामरविन्दनिवासिनीम् । अशेषजगदीशित्रीं वन्दे वरदवल्लभाम् ॥

चतुःश्लोकी समाप्ता ॥

—०—

श्रीयामुनमुनिभिरनुगृहीतं

स्तोत्ररत्नम् ।

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् । स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ॥ * ॥ नमो नमो यामुनाय यामुनाय नमो नमः । नमो नमो यामुनाय यामुनाय नमो नमः ॥ * ॥

नमोऽचिन्त्याद्भुताक्लिष्टज्ञानवैराग्यराशये । नाथाय मनयेऽगाधभगवद्भक्तिसिन्धवे ॥ १ ॥ तस्मै नमो मधुजिदङ्घ्रिसरोजतत्त्वज्ञानानुरागमहिमातिशयान्तसीम्ने । नथाय नाथमुनयेऽत्र परत्र चापि नित्यं यदीयचरणौ शरणं मदीयम् ॥ २ ॥ भूयो नमोऽपरिमिताच्युतभक्तितत्त्वज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः । लोकेऽवतीर्णपरमार्थसमग्रभक्तियोगाय नाथमुनये यमिनां वराय ॥ ३ ॥

तत्त्वेन यश्चिदचिदीश्वरतत्स्वभावभोगापवर्गतदुपायगतीरुदारः । सन्दर्शयन्निरमिमीत पुराणरत्नं तस्मै नमो मुनिवराय पराशराय ॥ ४ ॥ माता पिता युवतयस्तनया विभूतिस्सर्वं यदेव नियमेन मदन्वयानाम् । आद्यस्य नः कुलपतेर्वकुलाभिरामं श्रीमत्तदंघ्रियुगलं प्रणमामि मूर्ध्ना ॥ ५ ॥ यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति यस्मिन्नस्मन्मनोरथपथस्सकलस्समेति । स्तोष्यामि नः कुलधनं कुलदैवतं तत्पादारविन्दमरविन्दविलोचनस्य ॥६॥ तत्त्वेन यस्य महिमार्णवशीकराणुश्शक्यो न मातुमपि शर्वपितामहाद्यैः । कर्तुं तदीयमहिमस्तुतिमुद्यताय मह्यं नमोऽस्तु कवये निरपत्रपाय ॥ ७ ॥ यद्वा श्रमावधि यथामति वाप्यशक्तः स्तौम्येवमेव खलु तेऽपि सदा स्तुवन्तः । वेदाश्चतुर्मुखमुखाश्च महार्णवान्तः को मज्जतोरणुकुलाचलयोर्विशेषः ॥ ८ ॥ किश्चैष शक्त्यतिशयेन न तेऽनुकम्प्यस्स्तोताऽपि तु स्तुतिकृतेन परिश्रमेण । तत्र श्रमस्तु सुलभो मम मन्दबुद्धेरित्युद्यमोऽयमुचितो मम चाब्जनेत्र ॥ ९ ॥ नावेक्षसे यदि ततो भुवनान्यमूनि नालं प्रभो भवितुमेव कुतः प्रवृत्तिः । एवं निसर्गसुहृदि त्वयि सर्वजन्तोः स्वामिन्न चित्रमिदमाश्रितवत्सलत्वम् ॥ १० ॥ स्वाभाविकानवधिकातिशयेशितृत्वं नारायण त्वयि न मृष्यति वैदिकः कः । ब्रह्मा शिवश्शतमखःपरमस्वराडित्येतेऽपि यस्य महिमार्णवविप्रुषस्ते ॥ ११ ॥ कश्श्रीः श्रियः परमसत्वसमाश्रयः कः कः पुण्डरीकनयनः पुरुषोत्तमः कः । कस्यायुतायुतशतैककलांशकांशे विश्वं विचित्रचिदचित्प्रविभागवृत्तम्॥१२॥ वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमोचनमहिष्ठफलप्रदानैः । कोऽन्यः प्रजापशुपती परिपाति कस्य पादोदकेन स शिवस्स्वशिरोधृतेन ॥ १३ ॥ कस्योदरे हरविरिञ्चमुखः प्रपञ्चः को रक्षतीममजनिष्ट च कस्य नाभेः । क्रान्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः कः केन वैष परवानिति शक्यशङ्कः ॥ १४ ॥ त्वां शीलरूपचरितैः

परमप्रकृष्टसत्त्वेन सात्त्विकतया प्रबलैश्च शास्त्रैः। प्रख्यातदैवपरमा-
र्थविदां मतैश्च नैवासुरप्रकृतयः प्रभवन्ति बोद्धुम् ॥ १५ ॥ उल्लं-
घितत्रिविधसीमसमातिशायिसंभावनं तव परिव्रढिमस्वभावम् ।
मायाबलेन भवतापि निगूह्यमानं पश्यन्ति केचिदनिशं त्वदनन्य-
भावाः ॥ १६ ॥ यदण्डमण्डान्तरगोचरं च यद्दशोत्तराण्यावरणानि
यानि च । गुणाःप्रधानं पुरुषः परं पदं परात्परं ब्रह्म च ते विभू-
तयः ॥ १७ ॥ वशी वदान्यो गुणवानृजुः शुचिर्मृदुर्दयालुर्मधुरः
स्थिरस्समः । कृती कृतज्ञस्त्वमसि स्वभावतस्समस्तकल्याणगुणा-
मृतोदधिः ॥ १८ ॥ उपर्युपर्यब्जभुवोऽपि पूरुषान् प्रकल्प्य ते ये
शतमित्यनुक्रमात् । गिरस्त्वदेकैकगुणावधीप्सया सदा स्थिता नो-
द्यमतोऽतिशेरते ॥ १९ ॥ त्वदाश्रितानां जगदुद्भवस्थितिप्रणाश-
संसारविमोचनादयः । भवन्ति लीला विधयश्च वैदिकास्त्वदीयग-
म्भीरमनोऽनुसारिणः ॥ २० ॥ नमो नमो वाङ्मनसातिभूमये नमो
नमो वाङ्मनसैकभूमये । नमो नमोऽनन्तमहाविभूतये नमो नमोऽन-
न्तदयैकसिन्धवे ॥२१॥ न धर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमां-
स्त्वच्चरणारविन्दे । अकिञ्चनोऽनन्यगतिश्शरण्य त्वत्पादमूलं शरणं
प्रपद्ये ॥ २२ ॥ न निन्दितं कर्म तदस्ति लोके सहस्रशो यन्न मया
व्यधायि । सोऽहं विपाकावसरे मुकुन्द क्रन्दामि संप्रत्यग-
तिस्तवाग्रे ॥ २३ ॥ निमज्जतोऽनन्तभवार्णवान्तश्चिराय मे कूल-
मिवासि लब्धः । त्वयापि लब्धं भगवन्निदानीमनुत्तमं पात्रमिदं
दयायाः ॥ २४ ॥ अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं
हि दुःखम् । किंतु त्वदग्रे शरणागतानां पराभवो नाथ न तेऽनु-
रूपः ॥ २५ ॥ निरासकस्यापि न तावदुत्सहे महेश हातुं तव पाद-
पङ्कजम् । रुषा निरस्तोऽपि शिशुस्स्तनन्धयो न जातु मातुश्चरणौ
जिहासति ॥ २६ ॥ तवामृतस्यन्दिनि पादपङ्कजे, निवेशितात्मा
कथमन्यदिच्छति । स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरकं

हि वीक्षते ॥ २७ ॥ त्वदंघ्रिमुद्दिश्य कदापि केनचिद्यथा तथा वापि सकृत्कृतोऽञ्जलिः । तदैव मुष्णात्यशुभान्यशेषतश्शुभानि पुष्णाति न जातु हीयते ॥ २८ ॥ उदीर्णसंसारदवाशुशुक्षणिं क्षणेन निर्वाप्य परां च निर्वृतिम् । प्रयच्छति त्वच्चरणारुणाम्बुजद्वयानुरागामृतसिन्धुशीकरः ॥ २९॥ विलासविक्रान्तपरावरालयं नमस्यदार्तिक्षपणे कृतक्षणम् । धनं मदीयं तव पादपङ्कजं कदा नु साक्षात्करवाणि चक्षुषा ॥ ३० ॥ कदा पुनश्शंखरथाङ्गकल्पकध्वजारविन्दाङ्कुशवज्रलाञ्छनम् । त्रिविक्रम त्वच्चरणाम्बुजद्वयं मदीयमूर्धानमलङ्करिष्यति ॥ ३१ ॥ विराजमानोज्ज्वलपीतवाससं स्मितातसीसूनसमामलच्छविम् । निमग्ननाभिं तनुमध्यमुन्नतं विशालवक्षस्स्थलशोभिलक्षणम् ॥ ३२ ॥ चकासतं ज्याकिणकर्कशैः शुभैश्चतुर्भिराजानुविलम्बिभिर्भुजैः । प्रियावतंसोत्पलकर्णभूषणश्लथालकाबन्धविमर्दशंसिभिः ॥ ३३ ॥ उदग्रपीनांसविलम्बिकुण्डलालकावलीबन्धुरकम्बुकन्धरम् । मुखश्रिया न्यक्कृतपूर्णनिर्मलामृतांशुबिम्बाम्बुरुहोज्ज्वलश्रियम् ॥ ३४ ॥ प्रबुद्धमुग्धाम्बुजचारुलोचनं सविभ्रमभ्रूलतमुज्ज्वलाधरम् । शुचिस्मितं कोमलगण्डमुन्नसं ललाटपर्यन्तविलम्बितालकम् ॥ ३५ ॥ स्फुरत्किरीटाङ्गदहारकण्ठिकामणीन्द्रकाञ्चीगुणनूपुरादिभिः । रथाङ्गशङ्खासिगदाधनुर्वरैर्लसत्तुलस्या वनमालयोज्ज्वलम् ॥ ३६ ॥ चकर्थ यस्या भवनं भुजान्तरं तव प्रियं धाम यदीयजन्मभूः । जगत्समस्तं यदपाङ्गसंश्रयं यदर्थमम्भोधिरमन्थ्यबन्धि च ॥३७॥ स्ववैश्वरूप्येण सदानुभूतयाऽप्यपूर्ववद्विस्मयमादधानया । गुणेन रूपेण विलासचेष्टितैस्सदा तवैवोचितया तव श्रिया ॥ ३८ ॥ तया सहासीनमनन्तभोगिनि प्रकृष्टविज्ञानबलैकधामनि । फणामणिव्रातमयूखमण्डलप्रकाशमानोदरदिव्यधामनि ॥ ३९ ॥ निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः । शरीरभेदैस्तव शेषतां गतैर्यथोचितं शेष इती-

रिते जनैः ॥ ४० ॥ दासस्सखा वाहनमासनं ध्वजो यस्ते वितानं व्यजनं त्रयीमयः । उपस्थितं तेन पुरो गुरुत्मता त्वदंघ्रिसंमर्द-किणाङ्कशोभिना ॥ ४१ ॥ त्वदीयभुक्तोज्झितशेषभोजिना त्वया निसृष्टात्मभरेण यद्यथा । प्रियेण सेनापतिना न्यवेदि तत्तथाऽनुजानन्तमुदारवीक्षणैः ॥ ४२ ॥ हताखिलक्लेशमलैस्स्वभावतस्सदानुकूल्यैकरसैस्तवोचितैः । गृहीततत्परिचारसाधनैर्निषेव्यमाणं सचिवैर्यथोचितम् ॥ ४३ ॥ अपूर्वनानारसभावनिर्भरप्रबद्धया मुग्धविदग्धलीलया । क्षणाणुवत्क्षिप्तपरादिकालया प्रहर्षयन्तं महिषीं महाभुजम् ॥ ४४ ॥ अचिन्त्यदिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृतोदधिम् । श्रियश्श्रियं भक्तजनैकजीवितं समर्थमापत्सखमर्थिकल्पकम् ॥ ४५ ॥ भवन्तमेवानुचरन्निरन्तरं प्रशान्तनिश्शेषमनोरथान्तरः । कदाऽहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि सनाथजीवितः ॥ ४६ ॥ धिगशुचिमविनीतं निर्दयं मामलज्जं परमपुरुष ! योऽहं योगिवर्याग्रगण्यैः । विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं तव परिजनभावं कामये कामवृत्तः ॥ ४७ ॥ अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे । अगतिं शरणागतं हरे ! कृपया केवलमात्मसात्कुरु ॥ ४८ ॥ अविवेकघनान्धदिङ्मुखे बहुधा सन्ततदुःखवर्षिणि । भगवन्भवदुर्दिने पथः स्खलितं मामवलोकयाच्युत ॥४९॥ न मृषा परमार्थमेव मे शृणु विज्ञापनमेकमग्रतः । यदि मे न दयिष्यसे ततो दयनीयस्तव नाथ ! दुर्लभः ॥ ५० ॥ तदहं त्वदृते न नाथवान् मदृते त्वं दयनीयवान्न च । विधिनिर्मितमेतदन्वयं भगवन्पालय मास्म जीहपः ॥ ५१ ॥ वपुरादिषु योऽपि कोऽपि वा गुणतोऽसानि यथातथाविधः । तदयं तव पादपद्मयोरहमद्यैव मया समर्पितः ॥ ५२ ॥ मम नाथ यदस्ति योऽस्म्यहं सकलं तद्धि तवैव माधव । नियतस्वमिति प्रबुद्धधीरथवा किन्नु समर्पयामि

ते ॥ ५६ ॥ अवबोधितवानिमां यथा मयि नित्यां भवदीयतां स्वयम् । कृपयैतदनन्यभोग्यतां भगवन्भक्तिमपि प्रयच्छ मे ॥ ५४ ॥ तव दास्यसुखैकसङ्गिनां भवनेष्वस्त्वपि कीटजन्म मे । इतरावसथेषु मा-स्म भूदपि मे जन्म चतुर्मुखात्मना ॥ ५५ ॥ सकृत्त्वदाकारविलो-कनाशया तृणीकृतानुत्तमभुक्तिमुक्तिभिः । महात्मभिर्मामवलोक्य-तां नय क्षणेऽपि ते यद्विरहोऽतिदुस्सहः ॥ ५६ ॥ न देहं न प्राणान्न च सुखमशेषाभिलषितं न चात्मानं नान्यत्किमपि तव शेषत्ववि-भवात् । बहिर्भूतं नाथ क्षणमपि सहे यातु शतधा विनाशं तत्सत्यं मधुमथन विज्ञापनमिदम् ॥ ५७ ॥ दुरन्तस्यानादेरपरिहरणीयस्य महतो निहीनाचारोऽहं नृपशुरशुभस्यास्पदमपि । दयासिन्धो बन्धो निरवधिकवात्सल्यजलधे तव स्मारंस्मारं गुणगणमितीच्छामि गत-भीः ॥ ५८ ॥ अनिच्छन्नप्येवं यदि पुनरितीच्छन्निव रजस्तमश्छन्न-श्छद्मस्तुतिवचनभङ्गीमरचयम् । तथापीत्थंरूपं वचनमवलम्ब्यापि कृपया त्वमेवैवंभूतं धरणिधर मे शिक्षय मनः ॥ ५९ ॥ पिता त्वं माता त्वं दयिततनयस्त्वं प्रियसुहृत्त्वमेव त्वं मित्रं गुरुरसि गति-श्चासि जगताम् । त्वदीयस्त्वद्भृत्यस्तव परिजनस्त्वद्गतिरहं प्रपन्नश्चैवं सत्यहमपि तवैवास्मि हि भरः ॥ ६० ॥ जनित्वाऽहं वंशे महति जगति ख्यातयशसां शुचीनां युक्तानां गुणपुरुषतत्त्वस्थितिविदाम् । निसर्गादेव त्वच्चरणकमलैकान्तमनसामधोधः पापात्मा शरणद निमज्जामि तमसि ॥ ६१ ॥ अमर्यादः क्षुद्रश्चलमतिरसूयाप्रसवभूः कृतघ्नो दुर्मानी स्मरपरवशो वञ्चनपरः । नृशंसः पापिष्ठः कथमह-मितो दुःखजलधेरपारादुत्तीर्णस्तव परिचरेयं चरणयोः ॥ ६२ ॥ रघुवर ! यदभूस्त्वं तादृशो वायसस्य प्रणत इति दयालुर्यच्च चैद्यस्य कृष्ण ! । प्रतिभवमपराद्धुर्मुग्ध ! सायुज्यदोऽभूर्वद किमपदमागस्तस्य तेऽस्ति क्षमायाः ॥ ६३ ॥ ननु प्रपन्नस्सकृदेव नाथ तवाहमस्मीति च याचमानः । तवानुकम्प्यस्स्मरतः प्रतिज्ञां मदेकवर्जं किमिदं व्रतं

ते ॥ ६४ ॥ अकृत्रिमत्वच्चरणारविन्दप्रेमप्रकर्षावधिमात्मवन्तम् । पितामहं नाथमुनिं विलोक्य प्रसीद मद्वृत्तमचिन्तयित्वा ॥ ६५ ॥

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

स्तोत्ररत्नं समाप्तम् ।

—०—

श्रीकाञ्चीपूर्णमुनिभिरनुगृहीतं

देवराजाष्टकम् ।

श्रीमत्काञ्चीमुनिं वन्दे कमलापतिनन्दनम् ।
वरदांघ्रिसदासङ्गरसायनपरायणम् ॥
देवराजदयापात्रं श्रीकाञ्चीपूर्णमुत्तमम् ।
रामानुजमुनेर्मान्यं वन्देऽहं सज्जनाश्रयम् ॥

नमस्ते हस्तिशैलेश ! श्रीमन्नम्बुजलोचन ! । शरणं त्वां प्रपन्नोऽस्मि प्रणतार्तिहराच्युत ! ॥ १ ॥ समस्तप्राणिसन्त्राणप्रवीणकरुणोल्बण । विलसन्तु कटाक्षास्ते मय्यस्मिञ्जगतां पते ! ॥ २ ॥ निन्दिताचारकरणं निवृत्तं कृत्यकर्मणः । पापीयांसममर्यादं पाहि मां वरदप्रभो ! ॥ ३ ॥ संसारमरुकान्तारे दुर्व्याधिव्याघ्रभीषणे । विषयक्षुद्रगुल्माढ्ये तृषापादपशालिनि ॥ ४ ॥ पुत्रदारगृहक्षेत्रमृगतृष्णाम्बुपुष्कले । कृत्याकृत्यविवेकान्धं परिभ्रान्तमितस्ततः ॥ ५ ॥ अजस्रं जाततृष्णार्तमवसन्नाङ्गमक्षमम् । क्षीणशक्तिबलारोग्यं केवलं क्लेशसंश्रयम् ॥ ६ ॥ सन्तप्तं विविधैर्दुःखैर्दुर्वचैरेवमादिभिः । देवराज ! दयासिन्धो ! देवदेव ! जगत्पते ! ॥ ७ ॥ त्वदीक्षणसुधासिन्धुवीचिविक्षेपशीकरैः । कारुण्यमारुतानीतैश्शीतलैरभिषिञ्च माम् ॥

देवराजाष्टकं समाप्तम् ।

—०—

श्रीभगवद्रामानुजमुनिभिरनुगृहीते गद्यत्रये
शरणागति गद्यम् ।

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म व्यामोहतस्तदितराणि तृणाय मेने । अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः रामानुजस्य चरणौ शरणं प्रपद्ये ॥

वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमहर्निशम् ॥

भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासङ्ख्येयकल्याणगुणगणाम्, पद्मवनालयाम्, भगवतीम्, श्रियम्, देवीम्, नित्यानपायिनीम्, निरवद्याम्, देवदेवदिव्यमहिषीम्, अखिलजगन्मातरम्, अस्मन्मातरम्, अशरण्यशरण्याम्, अनन्यशरणश्शरणमहं प्रपद्ये ॥ १ ॥

पारमार्थिकभगवच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैङ्कर्यप्राप्त्यपेक्षया पारमार्थिकी भगवच्चरणारविन्दशरणागतिर्यथाऽवस्थिताऽविरताऽस्तु मे ॥ २ ॥

अस्तु ते ॥ ३ ॥

तयैव सर्वं सम्पत्स्यते ॥ ४ ॥

अखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूप ! स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूप ! स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजस्सौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारु-

ण्यमाधुर्यगाम्भीर्यौदार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसङ्कल्पकृतित्वकृतज्ञताद्यसङ्ख्येयकल्याणगुणगणौघमहार्णव ! स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यनिरतिशयसुगन्धनिरतिशयसुखस्पर्शनिरतिशयौज्ज्वल्यकिरीटमकुटचूडावतंसमकरकुण्डलग्रैवेयकहारकेयूरकटकश्रीवत्सकौस्तुभमुक्तादामोदरबन्धनपीताम्बरकाञ्चीगुणनूपुराद्यपरिमितदिव्यभूषण ! स्वानुरूपाचिन्त्यशक्तिशङ्खचक्रगदाशार्ङ्गाद्यसंख्येयनित्यनिरवद्यनिरतिशयकल्याणदिव्यायुध ! स्वाभिमतनित्यनिरवद्यानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासङ्ख्येयकल्याणगुणगणश्रीवल्लभ ! एवम्भूतभूमिनीलानायक ! स्वच्छन्दानुवर्तिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्तगुणगणशेषशेषाशनगरुडप्रमुखनानाविधानन्तपरिजनपरिचारिकापरिचरितचरणयुगल ! परमयोगिवाङ्मनसापरिच्छेद्यस्वरूपस्वभावस्वाभिमतविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभवानन्तपरिमाणनित्यनिरवद्यनिरतिशयवैकुण्ठनाथ ! स्वसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तिस्वशेषतैकस्वभावप्रकृतिपुरुषकालात्मकविविधविचित्रानन्तभोग्यभोक्तृवर्गभोगोपकरणभोगस्थानरूपनिखिलजगदुदयविभवलयलील ! सत्यकाम ! सत्यसङ्कल्प ! परब्रह्मभूत ! पुरुषोत्तम ! महाविभूते ! श्रीमन् ! नारायण ! श्रीवैकुण्ठनाथ ! अपारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यसौन्दर्यमहोदधे ! अनालोचितविशेषाशेषलोकशरण्य ! प्रणतार्तिहर ! आश्रितवात्सल्यैकजलधे ! अनवरतविदितनिखिलभूतजातयाथात्म्य ! अशेषचराचरभूतनिखिलनियमननिरत ! अशेषचिदचिद्वस्तुशेषिभूत ! निखिलजगदाधार ! अखिलजगत्स्वामिन् ! अस्मत्स्वामिन् ! सत्यकाम ! सत्यसङ्कल्प ! सकलेतरविलक्षण ! अर्थिकल्पक ! आपत्स-

स्व ! श्रीमन् ! नारायण ! अशरण्यशरण्य ! अनन्यशरणस्त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये ॥ ५ ॥

[अत्र द्वयम् ॥] ।

पितरं मातरं दारान् पुत्रान्बन्धून् सखीन् गुरून् । रत्नानि धनधान्यानि क्षेत्राणि च गृहाणि च ॥ ६ ॥ सर्वधर्मांश्च सन्त्यज्य सर्वकामांश्च साक्षरान् । लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो ॥७॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च गुरुस्त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥ ८ ॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥९॥

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् । पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ १० ॥

मनोवाक्कायैरनादिकालप्रवृत्तानन्ताकृत्यकरणकृत्याकरणभगवदपचारभागवतापचारासह्यापचाररूपनानाविधानन्तापचारान्, आरब्धकार्यान्, अनारब्धकार्यान्, कृतान्, क्रियमाणान्, करिष्यमाणांश्च सर्वानशेषतः क्षमस्व ॥ ११ ॥

अनादिकालप्रवृत्तविपरीतज्ञानं आत्मविषयं कृत्स्नजगद्विषयं च विपरीतवृत्तं चाशेषविषयमद्यापि वर्तमानं वर्तिष्यमाणं च सर्वं क्षमस्व ॥ १२ ॥

मदीयानादिकर्मप्रवाहप्रवृत्ताम्, भगवत्स्वरूपतिरोधानकरीम्, विपरीतज्ञानजननीम्, स्वविषयायाश्च भोग्यबुद्धेर्जननीम्, देहेन्द्रियत्वेन भोग्यत्वेन सूक्ष्मरूपेण चावस्थिताम्, दैवीम्, गुणमयीम्, मायाम्; दासभूतम् 'शरणागतोऽस्मि; तवास्मि दासः' इति वक्तारं मां तारय ॥ १३ ॥

"तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते; प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् । आस्थितस्सहि युक्तात्मा मामेवानुत्तमां गतिम् ॥ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते । वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः" । इति श्लोकत्रयोदितज्ञानिनं मां कुरुष्व॥१४॥

"पुरुषस्स परः पार्थ ! भक्त्या लभ्यस्त्वनन्यया, भक्त्या त्वनन्यया शक्यः, मद्भक्तिं लभते पराम्" इति स्थानत्रयोदितपरभक्तियुक्तं मां कुरुष्व ॥ १५ ॥

परभक्तिपरज्ञानपरमभक्त्येकस्वभावं मां कुरुष्व ॥ १६ ॥

परभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवोऽहं तथाविधभगवदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भवानि ॥ १७ ॥

एवंभूतमत्कैङ्कर्यप्राप्त्युपायतयाऽवक्लृप्तसमस्तवस्तुविहीनोऽपि, अनन्ततद्विरोधिपापाक्रान्तोऽपि, अनन्तमदपचारयुक्तोऽपि, अनन्तमदीयापचारयुक्तोऽपि, अनन्तासह्यापचारयुक्तोऽपि, एतत्कार्यकारणभूतानादिविपरीताहङ्कारविमूढात्मस्वभावोऽपि, एतदुभयकार्यकारणभूतानादिविपरीतवासनासम्बद्धोऽपि, एतदनुगुणप्रकृतिविशेषसम्बद्धोऽपि, एतन्मूलाध्यात्मिकाधिभौतिकाधिदैविकसुखदुःखतद्धेतुतदितरोपेक्षणीयविषयानुभवज्ञानसङ्कोचरूप मच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नप्रतिहतोऽपि येन केनापि प्रकारेण द्वयवक्ता त्वं केवलं मदीययैव दयया निश्शेषविनष्टसहेतुकमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नः,मत्प्रसादलब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिः, मत्प्रसादादेव साक्षात्कृतयथावस्थितमत्स्व-

रूपरूपगुणविभूतिशीलोपकरणविस्तारः, अपरोक्षसिद्धमन्नियाम्यतामद्दास्यैकस्वभावात्मस्वरूपः, मदेकानुभवः, मद्दास्यैकप्रियः, परिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियमदनुभवस्त्वं तथाविधमदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भव ॥ १८ ॥

एवम्भूतोऽसि ॥ १९ ॥

आध्यात्मिकाधिभौतिकाधिदैविकदुःखविघ्नगन्धरहितस्त्वं द्वयमर्थानुसन्धानेन सह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्व ॥ २० ॥

शरीरपातसमये तु केवलं मदीययैव दयया अतिप्रबुद्धः, मामेवावलोकयन्नप्रच्युतपूर्वसंस्कारमनोरथः, जीर्णमिव वस्त्रं सुखेनेमां प्रकृतिं स्थूलसूक्ष्मरूपां विसृज्य, तदानीमेव मत्प्रसादलब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियमदनुभवस्त्वं तथाविधमदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भविष्यसि ॥ २१ ॥

मा ते भूदत्र संशयः ॥ २२ ॥

"अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन, रामो द्विर्नाभिभाषते; सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम; ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ;इति मयैव ह्युक्तम् ॥ २३ ॥

अतस्त्वं तव तत्वतो मज्ज्ञानदर्शनप्राप्तिषु निस्संशयस्सुखमास्व॥२४॥

[अन्त्यकाले स्मृतिर्या तु तव कैङ्कर्यकारिता ।
तामेनां भगवन्नद्य क्रियमाणां कुरुष्व मे ॥]

गद्यत्रये शरणागतिगद्यं समाप्तम् ।

श्रीभगवद्रामानुजमुनिभिरनुगृहीते गद्यत्रये

श्रीरंगगद्यम् ।

चिदचित्परतत्त्वानां तत्त्वयाथार्थ्यवेदिने ।
रामानुजाय मुनये नमो मम गरीयसे ॥

स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं क्लेशकर्माद्यशेषदोषासंस्पृष्टं स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजस्सौशील्यवात्सल्यमार्दवार्जवसौहार्द साम्यकारुण्यमाधुर्यगाम्भीर्यौदार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रम सत्यकामसत्यसङ्कल्पकृतित्वकृतज्ञताद्यसङ्ख्येयकल्याणगुणगणौघमहार्णवं परब्रह्मभूतं पुरुषोत्तमं श्रीरङ्गशायिनम् अस्मत्स्वामिनं प्रबुद्धनित्यनियाम्यनित्यदास्यैकरसात्मस्वभावोऽहं तदेकानुभवः तदेकप्रियः परिपूर्णं भगवन्तं विशदतमानुभवेन निरन्तरमनुभूय तदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भवानि ॥ १ ॥

स्वात्मनित्यनियाम्यनित्यदास्यैकरसात्मस्वभावानुसन्धानपूर्वक भगवदनवधिकातिशयस्वाम्याद्यखिलगुणगणानुभवजनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूप नित्यकैङ्कर्यप्राप्त्युपायभक्ति तदुपायसम्यज्ज्ञानतदुपायसमीचीनक्रिया तदनुगुणसात्विकतास्तिक्यादिसमस्तात्मगुणविहीनः दुरुत्तरानन्ततद्विपर्ययज्ञानक्रियानुगुणानादिपापवासनामहार्णवान्तर्निमग्नः तिलतैलवद्दारुवह्निवद्दुर्विवेचत्रिगुणक्षणक्षरणस्वभावाचेतनप्रकृतिव्याप्तिरूप दुरत्ययभगवन्मायातिरोहितस्वप्रकाशः अनाद्यविद्यासञ्चितानन्ताशक्यविस्रंसनकर्मपाशप्रग्रथितः अनागतानन्तकालसमीक्षयाऽप्यदृष्टस-

५

न्तारोपायः, निखिलजन्तुजातशरण्य ! श्रीमन् ! नारायण ! तव चरणारविन्दयुगलं शरणमहं प्रपद्ये ॥ २ ॥

एवमवस्थितस्याप्यर्थित्वमात्रेण परमकारुणिको भगवान् स्वानुभवप्रीत्योपनीतैकान्तिकात्यन्तिकनित्यकैङ्कर्यैकरतिरूपनित्यदास्यं दास्यतीति विश्वासपूर्वकं भगवन्तं नित्यकिङ्करतां प्रार्थये ॥ ३ ॥

तवानुभूतिसम्भूतप्रीतिकारितदासताम् । देहि मे कृपया नाथ ! न जाने गतिमन्यथा ॥ ४ ॥

सर्वावस्थोचिताशेषशेषतैकरतिस्तव । भवेयं पुण्डरीकाक्ष ! त्वमेवैवं कुरुष्व माम् ॥ ५ ॥

एवंभूततत्त्वयाथात्म्यावबोधतदिच्छारहितस्यापि एतदुच्चारणमात्रावलम्बनेन उच्यमानार्थपरमार्थनिष्ठं मे मनस्त्वमेवाद्यैव कारय ॥ ६ ॥

अपारकरुणाम्बुधे ! अनालोचितविशेषाशेषलोकशरण्य ! प्रणतार्तिहर ! आश्रितवात्सल्यैकमहोदधे ! अनवरतविदितनिखिलभूतजातयाथात्म्य ! सत्यकाम ! सत्यसङ्कल्प ! आपत्सख ! काकुत्स्थ ! श्रीमन् ! नारायण ! पुरुषोत्तम ! श्रीरङ्गनाथ ! मम नाथ ! नमोऽस्तु ते ॥ ७ ॥

गद्यत्रये श्रीरङ्गगद्यं समाप्तम् ।

—०—

श्रीभगवद्रामानुजमुनिभिरनुगृहीते गद्यत्रये

श्रीवैकुण्ठ गद्यम् ।



यामुनार्यसुधाम्भोधिमवगाह्य यथामति ।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम् ॥ १ ॥

स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदम्, क्लेशकर्माद्यशेषदोषासंस्पृष्टम्, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येय कल्याणगुणगणौघमहार्णवम्, परमपुरुषम्, भगवन्तम्, नारायणम्, स्वामित्वेन सुहृत्त्वेन गुरुत्वेन च परिगृह्य, ऐकान्तिकात्यन्तिकतत्पादाम्बुजद्वयपरिचर्यैकमनोरथः, तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधनमस्तीति मन्वानः, तस्यैव भगवतो नारायणस्य, अखिलसत्त्वदयैकसागरस्य, अनालोचितगुणागुणाखण्डजनानुकूलामर्यादशीलवतः, स्वाभाविकानवधिकातिशयगुणवत्तया देवतिर्यङ्मनुष्याद्यखिलजनहृदयानन्दनस्य, आश्रितवात्सल्यैकजलधेः, भक्तजनसंश्लेषैकभोगस्य, नित्यज्ञानक्रियैश्वर्यादिभोगसामग्रीसमृद्धस्य, महाविभूतेः, श्रीमतश्चरणारविन्दयुगलम् अनन्यात्मसञ्जीवनेन तद्गतसर्वभावेन शरणमनुव्रजेत् ॥ २ ॥

ततश्च प्रत्यहं आत्मोज्जीवनाय एवमनुस्मरेत् ॥ ३ ॥

चतुर्दशभुवनात्मकमण्डं दशगुणितोत्तरं चावरणसप्तकं समस्तं कार्यकारणजातमतीत्य परमव्योमशब्दाभिधेये ब्रह्मादीनां वाङ्मनसाऽगोचरे श्रीमति वैकुण्ठे दिव्यलोके सनकविधिशिवादिभिरप्यचिन्त्यस्वभावैश्वर्यैर्नित्यसिद्धैरनन्तैर्भगवदानुकूल्यैकभोगैः दिव्यपुरुषैर्महात्मभिरापूरिते तेषामपीयत्परिमाणम्, इयदैश्वर्यम्, ईदृशस्वभावम् इति परिच्छेत्तुमयोग्ये दिव्यावरणशतसहस्रावृते दिव्यकल्पकतरूपशोभिते दिव्योद्यानशतसहस्रकोटिभिरावृते अतिप्रमाणे दिव्यायतने कस्मिंश्चिद्विचित्रदिव्यरत्नमये दिव्यास्थानमण्टपे दिव्यरत्नस्तम्भशतसहस्रकोटिभिरुपशोभिते दिव्यनानारत्नकृतस्थलविचित्रिते दिव्यालङ्कारालङ्कृते परितः पतितैः पतमानैः पादपस्थैश्च नानागन्धवर्णैर्दिव्यपुष्पैश्शोभमानैर्दिव्यपुष्पोपवनैरुपशोभिते सङ्कीर्णपारिजातादिकल्पद्रुमोपशोभितैरसङ्कीर्णैश्च कैश्चिदन्तःस्थपुष्परत्-

त्नादिनिर्मितदिव्यलीलामण्टपशतसहस्रोपशोभितैस्सर्वदाऽनुभूय-मानैरपि अपूर्ववदाश्चर्यमावहद्भिः क्रीडाशैलशतसहस्रैरलङ्कृतैः कैश्चिन्नारायणदिव्यलीलाऽसाधारणैः कैश्चित्पद्मवनालयादिव्यलीलाऽसाधारणैस्साधारणैश्च कैश्चिच्छुकशारिकामयूरकोकिलादिभिः कोमलकूजितैराकुलैर्दिव्योद्यानशतसहस्रैरावृते मणिमुक्ताप्रवालकृतसोपानैर्दिव्यामलामृतरसोदकैर्दिव्याण्डजवरैरतिरमणीयदर्शनैरतिमनोहर-मधुरस्वरैराकुलैः अन्तःस्थमुक्तामयदिव्यक्रीडास्थानोपशोभितैर्दिव्य-सौगन्धिकवापीशतसहस्रैर्दिव्यराजहंसावलीविराजितैरावृते निरस्ताति-तिशयानन्दैकरसतया चानन्त्याच्च प्रविष्टानुन्मादयद्भिः क्रीडोद्देशै-र्विराजिते तत्र तत्र कृतदिव्यपुष्पपर्यङ्कोपशोभिते नानापुष्पासवा-स्वादमत्तभृङ्गावलीभिरुद्गीयमानदिव्यगान्धर्वेणापूरिते चन्दनागरु-कर्पूरदिव्यपुष्पावगाहिमन्दानिलासेव्यमाने मध्ये पुष्पसञ्चयविचि-त्रिते महति दिव्ययोगपर्यङ्के अनन्तभोगिनि श्रीमद्वैकुण्ठैश्वर्यादिदि-व्यलोकं आत्मकान्त्या विश्वमाप्याययन्त्या शेषशेषाशनादिसर्वप-रिजनं भगवतस्तत्तदवस्थोचितपरिचर्यायामाज्ञापयन्त्या शीलरूपगु-णविलासादिभिरात्मानुरूपया श्रिया सहासीनम्, प्रत्यग्रोन्मीलितसर-सिजसदृशनयनयुगलम्, स्वच्छनीलजीमूतसङ्काशम्, अत्युज्ज्वलपीतवा-ससम्, स्वया प्रभया अतिनिर्मलया अतिशीतलया स्वच्छया माणि-क्याभया कृत्स्नं जगद्भासयन्तम्, अचिन्त्यदिव्याद्भुतनित्ययौवन-स्वभावलावण्यमयामृतसागरम्, अतिसौकुमार्यादीषत्प्रस्विन्नवदाल-क्ष्यमाणललाटफलकदिव्यालकावलीविराजितम्, प्रबुद्धमुग्धाम्बुजचा-रुलोचनम्, सविभ्रमभ्रूलतम्, उज्ज्वलाधरम्, शुचिस्मितम्, कोमलग-ण्डम्, उन्नसम्, उदग्रपीनांसविलम्बिकुण्डलालकावलीवन्धुरकम्बुक-न्धरम्, प्रियावतंसोत्पलकर्णभूषणश्लथालकावन्धविमर्दशंसिभिश्चतु-र्भिराजानुविलम्बिभिर्भुजैर्विराजितम्, अतिकोमलदिव्यरेखालङ्कृ-तातामकरतलम्, दिव्याङ्गुलीयकविराजितम्, अतिकोमलनखाव-

लीविराजितम्, अतितुरक्ताङ्गुलीभिरलङ्कृतम्, तत्क्षणोन्मीलितपुण्डरीकसदृशचरणयुगलम्, अतिमनोहरकिरीटमकुटचूडावतंसमकरकुण्डलग्रैवेयकहारकेयूरकटकश्रीवत्सकौस्तुभमुक्तादामोदरबन्धनपीताम्बरकाञ्चीगुणनूपुरादिभिरत्यन्तसुखस्पर्शैर्दिव्यगन्धैर्भूषणैर्भूषितम्, श्रीमत्या वैजयन्त्या वनमालया विराजितम्, शङ्खचक्रगदासिशार्ङ्गादिदिव्यायुधैस्सेव्यमानम्, सङ्कल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादिके श्रीमति विष्वक्सेने न्यस्तसमस्तात्मैश्वर्यम् वैनतेयादिभिस्स्वभावतोनिरस्तसमस्तसांसारिकस्वभावै भगवत्परिचर्याकरणयोग्यैर्भगवत्परिचर्यैकभोगैर्नित्यसिद्धैरनन्तैर्यथायोगं सेव्यमानम्, आत्मभोगेन अनुसंहितपरादिकालदिव्यामलकोमलावलोकनेन विश्वमाह्लादयन्तम्, ईषदुन्मीलितमुखाम्बुजोदरविनिर्गतेन दिव्याननारविन्दशोभाजनकेन दिव्यगाम्भीर्यौदार्यसौन्दर्यमाधुर्याद्यनवधिकगुणगणविभूषितेन अतिमनोहरदिव्यभावगर्भेण दिव्यलीलालापामृतेन अखिलजनहृदयान्तराण्यापूरयन्तम्, भगवन्तम्, नारायणम्, ध्यानयोगेन दृष्ट्वा भगवतो नित्यस्वाम्यम् आत्मनो नित्यदास्यं च यथावस्थितमनुसन्धाय, "कदाऽहं भगवन्तं नारायणं ममनाथं ममकुलदैवतं ममकुलधनं ममभोग्यं ममसातरं ममपितरं ममसर्वं साक्षात्करवाणि चक्षुषा; कदाऽहं भगवत्पादाम्बुजद्वयं शिरसा धारयिष्यामि; कदाऽहं भगवत्पादाम्बुजद्वयपरिचर्याकरणयोग्यः तत्पादौ परिचरिष्यामि; कदाऽहं भगवत्पादाम्बुजद्वयपरिचर्याशया निरस्तसमस्तेतरभोगाशः अपगतसमस्तसांसरिकस्वभावः तत्पादाम्बुजद्वयं प्रवेक्ष्यामि; कदा मां भगवान् स्वकीयया अतिशीतलया दृशा अवलोक्य स्निग्धगम्भीरमधुरया गिरा परिचर्यायां आज्ञापयिष्यति" इति भगवत्परिचर्यायां आशां वर्धयित्वा, तयैवाशया तत्प्रसादोपबृंहितया भगवन्तमुपेत्य, दूरादेव भगवन्तं शेषभोगे श्रिया सहासीनं वैनतेयादिभिस्सेव्यमानं "समस्तपरिवाराय श्रीमते नारायणाय नम" इति

प्रणम्य, उत्थायोत्थाय पुनः पुनः प्रणम्य अत्यन्तसाध्वसविनयावनतो भूत्वा, भगवत्पारिषद्गणनायकैर्द्वारपालैः कृपया स्नेहगर्भया दृशाऽवलोकितः सम्यगभिवन्दितैस्तैरेवानुमतः भगवन्तमुपेत्य श्रीमता मूलमन्त्रेण "भगवन् माम् ऐकान्तिकात्यन्तिकपरिचर्याकरणाय परिगृह्णीष्व" इति याचमानः प्रणम्यात्मानं भगवते निवेदयेत् ॥ ४ ॥

ततो भगवता स्वयमेवात्मसञ्जीवनेन अवलोकनेनावलोक्य सर्वदेशसर्वकालसर्वावस्थोचितात्यन्तशेषभावाय स्वीकृतः अनुज्ञातश्च अत्यन्तसाध्वसविनयावनतः किङ्कुर्वाणः कृताञ्जलिपुटः भगवन्तमुपासीत ॥ ५ ॥

ततश्चानुभूयमानभावविशेषः निरतिशयप्रीत्या अन्यत् किञ्चित्कर्तुं द्रष्टुं स्मर्तुमशक्तः पुनरपि शेषभावमेव याचमानः भगवन्तमेव अविच्छिन्नस्रोतोरूपेणावलोकनेनावलोकयन्नासीत ॥ ६ ॥ ततो भगवता स्वयमेवात्मसञ्जीवनेनावलोकनेनावलोक्य सस्मितमाहूय समस्तक्लेशापहं निरतिशयसुखावहं आत्मीयं श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत ॥ ७ ॥

[लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नोर्योऽसौ पुरा समजनिष्ट
जगद्धितार्थम् । प्राप्यं प्रकाशयतु नः परमं रहस्यं संवाद
एष शरणागतिमन्त्रसारः ॥]

गद्यत्रये श्रीवैकुण्ठगद्यं समाप्तम् ।

गद्यत्रयं च समाप्तम् ॥

श्री श्रीवत्सचिह्नमिश्रैरनुगृहीतायां पञ्चस्तव्यां

श्रीवैकुण्ठस्तवः ।

श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने । अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः रामानुजस्य चरणौ शरणं प्रपद्ये ॥ १ ॥ त्रैविद्यवृद्धजनमूर्धविभूषणं यत् सम्पच्च सात्विकजनस्य यदेव नित्यम् । यद्वा शरण्यमशरण्यजनस्य पुण्यं तत्संश्रयेम वकुलाभरणाङ्घ्रियुग्मम् ॥ २ ॥ भक्तिप्रभावभवदद्भुतभावबन्धसन्धुक्षितप्रणयसाररसौघपूर्णः । वेदार्थरत्ननिधिरच्युतदिव्यधाम जीयात्पराङ्कुशपयोधिरसीमभूमा ॥ ३ ॥ यन्मङ्गलाय महते जगतामुशन्ति त्रैविष्टपान्यपि पदानि यदाश्रयाणि । वन्दामहे सरसिजेक्षणमद्वितीयं वेदान्तवेद्यमनिदम्प्रथमं महत्तत् ॥ ४ ॥ पीताम्बरं वरदशीतलदृष्टिपातमाजानुलम्बिभुजमायतकर्णपाशम् । तन्मेघमेचकमुदग्रविशालवक्षः लक्ष्मीधरं किमपि वस्तु ममाविरस्तु ॥ ५ ॥ परतत्त्वमक्षरमदृश्यमगोत्रवर्णमग्राह्यमव्ययमनीदृशमद्वितीयम् । ईशानमस्य जगतो यदगोरणीयः तद्वैष्णवं पदमुदारमुदाहरामः ॥ ६ ॥ आम्नायमूर्धनि च मूर्धनिचोर्ध्वपुंसां यद्धाम वैष्णवममीक्ष्णतरं चकास्ति । तन्मादृशामपि च गोचरमेति वाचः मन्ये तदीयमिदमाश्रितवत्सलत्वम् ॥ ७ ॥ जानन्नपीह किल मामनपत्रपिष्णुर्विष्णोः पदप्रणयिनीं गिरमाद्रियेऽहम् । न श्वावलीढमपि तीर्थमतीर्थमाहुर्नो ह्यन्यताऽपि च शुना किल लज्जितव्यम् ॥ ८ ॥ देवस्य दैत्यमथनस्य गुणेष्वियत्ता संख्या च वाङ्मनसगोचरमत्यभूताम् । अप्येवमण्वपि च तत्र ममार्तिशान्त्यै कीटस्य तृष्यत उदन्वति विप्रुषाऽलम् ॥ ९ ॥ प्रेमार्द्रविह्वलगिरः पुरुषाः पुराणाः त्वां तुष्टुवुर्मधुरिपो ! मधुरैर्वचोभिः ।

वाचो विडम्बितमिदं मम नीचवाचः क्षान्तिस्तु ते सविषया मम दुर्वचोभिः ॥ १० ॥ आज्ञा तवात्रभवती विदिता त्रयी सा तां हि प्रमाणमुपजग्मुरतीन्द्रियेऽर्थे । आभासभूयमभियान्त्यपराणि दोषैः एषा तु दोषरहिता महिता पुराणी ॥ ११ ॥ अन्तर्हितो निधिरसि त्वमशेषपुंसां लभ्योऽसि पुण्यगुरुभैरितरैर्दुरापः । तत्र त्रयीं सुकृतिनः कृतिनोऽधिजग्मुर्बाह्येषु बाह्यचरितैरितरैर्निपेते ॥ १२ ॥ चित्रं विधेर्विलसितं त्विदमाविरस्ति दुष्टात्मनामयमहो किल दुर्विपाकः । यत्केचिदत्रभवतीं श्रुतिमाश्रयन्तोऽप्यर्थे कुदृष्टिविनिविष्टधियो विनष्टाः ॥ १३ ॥ बाह्याः कुदृष्टय इति द्वितयेऽप्यपारं घोरं तमस्समुपयान्ति न हीशसे तान् । जग्धस्य काननमृगैर्मृगतृष्णिकेप्सोः कासारसत्त्व निहतस्य च को विशेषः ॥ १४ ॥ न्यायस्मृतिप्रभृतिभिर्भवता निसृष्टैर्वेदोपबृंहणविधावुचितैरुपायैः । श्रुत्यर्थमर्थमिव भानुकरैर्विभेजुः त्वद्भक्तिभावितविकल्मषशेमुषीकाः ॥ १५ ॥ ये तु त्वदंघ्रिसरसीरुहभक्तिहीनास्तेषाममीभिरपि नैव यथार्थबोधः । पित्तभ्रमाञ्जनमनापुषि जातु नेत्रे नैव प्रभाभिरपि शङ्कसितत्वबुद्धिः ॥ १६ ॥ तत्त्वार्थतत्परपरश्शतवेदवाक्यैस्सामर्थ्यतः स्मृतिभिरप्यथ तादृशीभिः । त्वामेव तत्वपरसात्त्विकसत्पुराणैर्देवज्ञधीभिरपि निश्चिनुमः परेशम् ॥ १७॥ अन्यत्र तु क्वचन केचिदिहेशशब्दाल्लोक प्रसिद्धिमुपगम्य तमीशमाहुः । तैश्च प्रसिद्धिविभवस्य समूलतायै ग्राह्या त्रयी त्वयि तु साऽच्युत ! सम्मुखीना ॥ १८ ॥ यः खल्वणोरणुतरो महतो महीयानात्मा जनस्य जनको जगतश्च योऽभूत् । वेदात्मक प्रणवकारणवर्णवाच्यं तं त्वां वयं तु परमेश्वरमामनामः ॥ १९ ॥ आत्मेश्वरोऽसि न परोऽस्ति तवेश्वरोऽन्यः विश्वस्य चाधिपतिरस्य परायणं च । नारायणाच्युत ! परस्त्वमिहैक एव ब्रह्मादयोऽपि भवदीक्षणलब्धसत्ताः ॥ २० ॥ नित्यस्समाभ्यधिकवर्जित ऊर्जितश्रीः नित्येऽक्षरे दिवि वसन् पुरुषः पुराणः । सत्त्वप्रवर्तनकरो जगतोऽस्य

मूलं नान्यस्त्वदस्ति धरणीधर ! वेदवेद्यः ॥ २१ ॥ यं भूतभव्यभव-दीशमनीशमाहुरन्तस्समुद्रनिलयं यमनन्तरूपम् । यस्य त्रिलोकजननी महिषी च लक्ष्मीः साक्षात्स एव पुरुषोऽसि सहस्रमूर्धा ॥ २२ ॥ सर्वश्रुतिष्वनुगतं स्थिरमप्रकम्प्यं नारायणाह्वयधरं त्वमिवानवद्यम् । सूक्तं तु पौरुषमशेषजगत्पवित्रं त्वामुत्तमं पुरुषमीशमुदाजहार ॥ ॥ २३ ॥ आनन्दमैश्वरमवाङ्मनसावगाह्यमाम्नासिषुश्शतगुणोच्चरितक्रमेण । सोऽयं तवैव नृषु हि त्वमिहान्तरात्मा त्वं पुण्डरीकनयनः पुरुषश्च पौष्णः ॥ २४ ॥ यन्मूलकारणमनुघ्यत सृष्टिवाक्यैर्ब्रह्मेति वा सदिति वाऽऽत्मगिराऽथवा तत् । नारायणस्त्विवति महोपनिषद्ब्रवीति सौबालिकीप्रभृतयोऽप्यनुजग्मुरेनाम् ॥ २५ ॥ ज्योतिःपरं परमतत्वमथो परात्मा ब्रह्मेति च श्रुतिषु यत्परवस्त्ववीतम् । नारायणस्तदिति तद्विशिनष्टि काचिद्विष्णोः पदं परममित्यपरा गृणाति ॥ २६ ॥ सन्तीदृशश्श्रुतिशिरस्सु परस्सहस्रा वाचस्तव प्रथयितुं परमेशितृत्वम् । किञ्चेह न व्यजगणः क्रिमिधातृभेदं कामजगन्ति निगिरन् पुनरुद्गिरंश्च ॥ २७ ॥ रूपश्रिया परमया परमेण धाम्ना चित्रैश्च कैश्चिदुचितैर्भवतश्चरित्रैः । चिह्नैरनिह्नवपरैरपरैश्च कैश्चिन्निश्चिन्वते त्वयि विपश्चित ईशितृत्वम् ॥ २८ ॥ यस्याः कटाक्षणमनुक्षणमीश्वराणामैश्वर्यहेतुरिति सार्वजनीनमेतत् । तां श्रीरिति त्वदुपसंश्रयणान्निराहुस्त्वां च श्रियश्श्रियमुदाहुरुदारवाचः ॥ २९ ॥ माया त्वया गुणमयी किल या निसृष्टा सा ते विभो ! किमिव नर्म न निर्मिमीते । कौतस्कुताःस्थिरकुतर्कवशेन केचित्सत्यां श्रुतौ च बधिरास्त्वयि तन्महिम्ना ॥ ३० ॥ यः स्थावरक्रिमिपतङ्गमतङ्गजादिष्वन्येषु जन्तुषु सदैव विजायमानः । त्वं नित्यनिर्मलनिरञ्जननिर्विकारकल्याणसद्गुणनिधे ! स इतीरितस्तैः ॥ ३१ ॥ त्वद्दृष्टिजुष्टमिदमाविरभूदशेषं नो चेत्कटाक्षयसि नैव भवेत्प्रवृत्तिः । स्थातुं च वाञ्छति जगत्तव दृष्टिपातं तेन श्रुतै जगदिषे हि जगत्त्वमेव

॥ ३२ ॥ एवं भगो ! इह भवत्परतन्त्र एव शब्दोऽपि रूपवदमुष्य चराचरस्य । ऐश्वर्यमीदृशमिदं श्रुतिषूदितं ते पापीयसामयमहो त्वयि मोहहेतुः ॥ ३३ ॥ ये त्वत्कटाक्षलवलक्ष्यमिव क्षणं तैरैश्वर्यमीदृशमलभ्यमलम्भि पुंभिः । यत्केऽपि सञ्जगरिरे परमेशितृत्वं तेषामपि श्रुतिषु तन्महिमप्रसङ्गात् ॥ ३४ ॥ नित्येषु वस्तुषु भवन्निरपेक्षमेव तत्तत्स्वरूपमिति केचिदिह भ्रमन्तः । ऐश्वर्यमत्र तव सावधि सङ्गिरन्ते ब्रूते त्रयी तु निरुपाधिकमीशनं ते ॥ ३५ ॥ इच्छात एव तव विश्वपदार्थसत्ता नित्यं प्रियास्तव तु केचन ते हि नित्याः । नित्यं त्वदेकपरतन्त्रनिजस्वरूपा भावत्कमङ्गलगुणा हि निदर्शनं नः ॥ ३६ ॥ विश्वस्य विश्वविधकारणमच्युत ! त्वं कार्यं तदेतदखिलं चिदचित्स्वरूपम् । त्वं निर्विकार इति वेदशिरस्सु घोषो निस्सीममेव तव दर्शयतीशितृत्वम् ॥३७॥ किं साधनः क्व निवसन् किमुपाददानः कस्मै फलाय सृजतीश इदं समस्तम् । इत्याद्यनिष्ठितकुतर्कमतर्कयन्तस्त्वद्वैभवं श्रुतिविदो विदुरप्रतर्क्यम् ॥ ३८ ॥ यत्संघृतं दशगुणोत्तरसप्ततत्त्वैरण्डं चतुर्दशजगद्भवधातृधाम । अण्डानि तत्सुसदृशानि परश्शतानि क्रीडाविधेस्तव परिच्छदतामगच्छन् ॥ ३९ ॥ इच्छाविहारविधये विहितान्यमूनि स्यात्त्वद्विभूतिलवलेशकलायुतांशः । या वै न जातु परिणामपदास्पदं सा कालातिगा तव परा महती विभूतिः ॥ ४० ॥ यद्वैष्णवं हि परमं पदमामनन्ति खं वा यदेव परमं तमसः परस्तात् । तेजोमयं परमसत्त्वमयं ध्रुवं यदानन्दकन्दमतिसुन्दरमद्भुतं यत् ॥ ४१ ॥ यद्ब्रह्मरुद्रपुरुहूतमुखैर्दुरापं नित्यं निवृत्तिनिरतैस्सनकादिभिर्वा । सायुज्यमुज्ज्वलमुशन्ति यदापरोक्ष्यं यस्मात्परं न पदमश्रितमस्ति किञ्चित् ॥ ४२ ॥ रूपेण सद्गुणगणैः परया समृद्ध्या भावैरुदारमधुरैरपि वा महिम्ना । तादृक्तदीदृगिदमित्युपवर्णयन्त्यो वाचो यदीयविभवस्य तिरस्क्रियायै ॥ ४३ ॥ यद्वृद्ध्यपक्षयविनाशमुखैर्वि-

कारैरेतैरसंस्तुतमनस्तमितास्तिशब्दम् । यद्वैरवाच्छ्रुतिषु फल्गुफलं क्रियाणां आदिष्टमन्यदसुखोत्तरमध्रुवं च । ४४ ॥ निष्कल्मषैर्निहतजन्मजराविकारैर्भूयिष्ठभक्तिविभवैरभवैरवाप्यम् । अन्यैरधन्यपुरुषैर्मनसाऽप्यनाप्यं वैकुण्ठनाम तव धाम तदामनन्ति ॥ ४५ ॥ नित्या तवान्यनिरपेक्षमहामहिम्नोऽप्येतादृशी निरवधिर्नियता विभूतिः । ज्ञानादयो गुणगणास्समतीतसीमाः लक्ष्मीः प्रिया परिजनाः पतगेन्द्रमुख्याः ॥ ४६ ॥ एकस्य येषु हि गुणस्य लवायुतांशस्स्यात्कस्यचित्स खलु वाङ्मनसातिगश्रीः । ते तादृशोऽत्यवधयस्समतीतसंख्याः त्वत्सद्गुणास्त्वमसि तन्निरपेक्षलक्ष्मीः ॥ ४७ ॥ सर्वस्य चैव गुणतो हि विलक्षणत्वमैश्वर्यतश्च किल कश्चिदुदाश्रितस्स्यात् । तत्प्रत्युत त्वयि विभो ! विभवो गुणाश्च सम्बन्धतस्तव भजन्ति हि मङ्गलत्वम् ॥ ४८ ॥ दूरे गुणास्तव तु सत्वरजस्तमांसि तेन त्रयी प्रथयति त्वयि निर्गुणत्वम् । नित्यं हरे ! निखिलसद्गुणसागरं हि त्वामामनन्ति परमेश्वरमीश्वराणाम् ॥ ४९ ॥ ज्ञानात्मनस्तव तदेव गुणं गृणन्ति तेजोमयस्य हि मणेर्गुण एव तेजः । तेनैव विश्वमपरोक्षमुदीक्षसे त्वं रक्षा त्वदीक्षणत एव यतोऽखिलस्य ॥ ५० ॥ अभ्युद्यता तव युवत्वमुखैर्गुणौघैरानन्दमेधितमियानिति सन्नियन्तुम् । ते ये शतन्त्विति परम्परया प्रवृत्ता नैवैष वाङ्मनसगोचर इत्युदाह ॥ ५१ ॥ एवं तया चतुरया तव यौवनाद्यास्सर्वे गुणास्सह समस्तविभूतिभिश्च । अव्याहतास्स्युरवधीनवधीरयन्तो वाचामगोचरमहामहिमान एव ॥ ५२ ॥ संवर्तवर्ति निखिलं निरभिज्ञमज्ञं चित्रे च कर्मणि यथार्हमहो नियच्छन् । सद्यः क्रिमिद्रुहिणभेदमभेदमेतदाविश्वकर्थ सकृदीक्षणदीक्षणेन ॥ ५३ ॥ अस्तं यदुद्यदुपचाय्यपचायि चैवमीशं दरिद्रमथ जङ्गममप्यजिङ्गम् । विश्वं विचित्रमविलक्षणवीक्षणेन विक्षोभयस्यनवधिर्वत शक्तिरैशी ॥ ५४ ॥ रूपप्रकारपरिणामकृतव्यवस्थं विश्वं विपर्यसितुमन्यदसच्च कर्तुम् । क्षाम्यन्स्वभावनियमं किमुदीक्षसे त्वं स्वातन्त्र्यमैश्वरमपर्यनुयोज्यमाहुः ॥ ५५ ॥

संवर्तसम्भृतकरस्य सहस्ररश्मेरस्त्रं तमिस्रयदजस्रविहारि हारि । नित्यानुकूलमनुकूलनृणां परेषामुद्वेजनं च तव तेज उदाहरन्ति ॥ ५६ ॥ नैव ह्यवाप्यमनवाप्तमिहास्ति यस्य सत्ताऽपि तस्य तव वीक्षणतःप्रजानाम् । सम्पत्तु किम्पुनरितो न वदान्यमन्यं मन्ये त्वमेव खलु मन्दिरमिन्दिरायाः ॥ ५७ ॥ पापैरनादिभवसंभववासनोत्थैर्दुःखेषु यः खलु मिमङ्क्षति हन्त जन्तुः । तं केवलं नु कृपयैव समुद्धरिष्यन् तद्दुष्कृतस्य ननु निष्कृतिमात्थ शास्त्रैः ॥ ५८ ॥ शास्त्रैरनादिनिधनैः स्मृतिभिस्त्वदीयदिव्यावतारचरितैश्शुभया च दृष्ट्या । निश्श्रेयसं यदुपकल्पयसि प्रजानां सा त्वत्कृपाजलधितल्लजवल्गितश्रीः ॥ ५९ ॥ हैं हन्त जन्तुषु निरन्तरसन्ततात्मा पाप्मा हि नाम बत ! कोऽयमचिन्त्यशक्तिः । यस्त्वत्कृपाजलधिमप्यतिवेलखेलमुल्लंघयत्यकृतभासुरभागधेयान् ॥ ६० ॥ यद्ब्रह्मकल्पनियुतानुभवेऽप्यनाश्यं तत्किल्बिषं सृजति जन्तुरिह क्षणार्धे । एवं सदा सकलजन्मसु सापराधं क्षाम्यस्यहो तदभिसन्धिविराममात्रात् ॥ ६१ ॥ क्षान्तिस्तवेयमियती महती कथन्नु मुह्येदहो त्वयि कृताञ्जलिपञ्जरेषु । इत्थं स्वतो निखिलजन्तुषु निर्विशेषं वात्सल्यमुत्सुकजनेषु कथं गुणस्ते ॥ ६२ ॥ विश्वं धियैव विरचय्य निचाय्य भूयस्सञ्जहुषस्सति समाश्रितवत्सलत्वे । आजग्मुषस्तव गजोत्तमबृंहितेन पादं परामृशुषोऽपि च का मनीषा ॥ ६३ ॥ यः कश्चिदेव यदि किञ्चन हन्त जन्तुर्भव्यो भजेत भगवन्तमनन्यचेताः । तं सोऽयमीदृश इयानिति वाऽप्यजानन् हे वैनतेयसममप्युररीकरोषि ॥ ६४ ॥ त्वत्साम्यमेव भजताममिवाञ्छसि त्वं तत्सात्कृतैर्विभवरूपगुणैस्त्वदीयैः । मुक्तिं ततो हि परमं तव साम्यमाहुस्त्वद्दास्यमेव विदुषां परमं मतं तत् ॥ ६५ ॥ तद्वै तथाऽस्तु कतमोऽयमहो स्वभावो यावान्यथाविधगुणो भजते भवन्तम् । तावांस्तथाविधगुणस्तदधीनवृत्तिस्संश्लिष्यसि त्वमिह तेन समानधर्मा ॥ ६६ ॥ नी-

लाञ्जनाद्रिनिभमुन्नसमायताक्षमाजानुजैत्रभुजमायतकर्णपाशम् । श्रीवत्सलक्षणमुदारगभीरनाभिं पश्येम देव ! शरदश्शतमीदृशं त्वाम् ॥ ६७ ॥ अम्भोरुहाक्षमरविन्दनिभांघ्रियुग्ममाताम्रतामरसरम्यकराग्रकान्ति । भृङ्गालकं भ्रमरविभ्रमकायकान्ति पीताम्बरं वपुरदस्तु वयं स्तवाम ॥ ६८ ॥ भ्रूविभ्रमेण मृदुशीतविलोकितेन मन्दस्मितेन मधुराक्षरया च वाचा । प्रेमप्रकर्षपिशुनेन विकासिना च संभावयिष्यसि कदा मुखपङ्कजेन ॥ ६९ ॥ वज्राङ्कुशध्वजसरोरुहशङ्खचक्रमत्सीसुधाकलशकल्पककल्पिताङ्कम् । त्वत्पादपद्मयुगलं विगलत्प्रभाङ्भिर्भूयोऽभिषेक्ष्यति कदानु शिरो मदीयम् ॥ ७० ॥ त्रैविक्रमक्रमकृताक्रमणत्रिलोकमुत्तंसमुत्तममनुत्तमभक्तिभाजाम् । नित्यं धनं मम कदा हि मदुत्तमाङ्गमङ्गीकरिष्यति चिरं तव पादपद्मम् ॥७१ ॥ उन्निद्रपत्रशतपत्रसगोत्रमन्तर्लेखारविन्दमभिनन्दनमिन्द्रियाणाम् । मन्मूर्ध्नि हन्त करपल्लवतल्लजं ते कुर्वन्कदा कृतमनोरथयिष्यसे माम् ॥ ७२ ॥ आङ्गी निसर्गनियता त्वयि हन्त कान्तिर्नित्यं तवालमियमेव तथापि चान्था । वैभूषणी भवति कान्तिरलन्तरां सा हे पुष्कलैव निखिलापि भवद्विभूतिः ॥ ७३ ॥ श्रीवत्सकौस्तुभकिरीटललाटिकाभिः केयूरहारकटकोत्तमकर्णिकाभिः । उद्दामदाममणिनूपुरनीविबन्धैर्भान्तं भवन्तमनिमेषमुदीक्षिषीय ॥ ७४ ॥ ऐन्दीवरी क्वचिदपि क्वचनारविन्दी चान्द्रातपी क्वचन च क्वचनाथ हैमी । कान्तिस्तवोढपरभागपरस्परश्रीः पार्येत पारणयितुं किमु चक्षुषोर्मे ॥७५॥ त्वां सेवितं जलजचक्रगदासिशार्ङ्गैस्तार्क्ष्येण सैन्यपतिनाऽनुचरैस्तथान्यैः । देव्या श्रिया सह वसन्तमनन्तभोगे भुञ्जीय साञ्जलिरसङ्कुचिताक्षिपक्ष्मा ॥ ७६ ॥ कैङ्कर्यनित्यनिरतैर्भवदेकभोगैर्नित्यैरनुक्षणनवीनरसार्द्रभावैः । नित्याभिवाञ्छितपरस्परनीचभावैर्मद्दैवतैः परिजनैस्तव सङ्गसीय ॥७७॥ यत्किञ्चिदुज्ज्वलमिदं यदुपाख्ययाऽऽहुस्सौन्दर्यमृद्धिरिति यन्महिमांशलेशः । नाम्नैव यां श्रियमुशन्ति यदीय-

धाम त्वामामनन्ति यतमा यतमानसिद्धिः ॥ ७८ ॥ या वै त्वयाऽप्युदधिमन्थनयत्नलभ्या याऽन्तर्हितेति जगदुन्मथनोद्यतोऽभूः । या च प्रतिक्षणमपूर्वरसानुबन्धैर्भावैर्भवन्तमभिनन्दयते सदैव ॥ ७९ ॥ रूपश्रिया गुणगणैर्विभवेन धाम्ना भावैरुदारमधुरैश्चतुरैश्चरित्रैः । नित्यं तवैव सदृशीं श्रियमीश्वरीं तां त्वां चाश्रितः परिचरेयमुदीर्णभावः ॥ ८० ॥ या बिभ्रती स्थिरचरात्मकमेव विश्वं विश्वम्भरा परमया क्षमया क्षमा च । तां मातरं च पितरं च भवन्तमस्य व्युच्छन्तु रात्रय इमा वरिवस्यतो मे ॥८१॥ भावैरुदारमधुरैर्विविधैर्विलासैर्भ्रूविभ्रमसितकटाक्षनिरीक्षणैश्च । या त्वन्मयी त्वमपि यन्मय एव सा मां नीला नितान्तमुररीकुरुतामुदारा ॥ ८२ ॥ भावैरनुक्षणमपूर्वरसानुविद्धैरत्यद्भुतैरभिनवैरभिनन्द्य देवीः । भृत्यान् यथोचितपरिच्छदिनो यथार्हं संभावयन्तमभितो भगवन् ! भवेयम् ॥ ८३ ॥ हा हन्त हन्त हतकोऽस्मि खलोऽस्मि धिङ् मां मुञ्चन्नहो अहमिदं किमुमाच वाचां । त्वामङ्ग ! मङ्गलगुणास्पदमस्तहेयम् आः स्मर्तुमेव कथमर्हति मादृगंहः ॥ ८४ ॥ अंहः प्रसह्य विनिगृह्य विशोध्य बुद्धिं व्यापूय विश्वमशिवं जनुपानुबद्धम् । आधाय सद्गुणगणानपि नाहमर्हस्त्वत्पादयोर्यदहमत्र चिरं निमग्नः ॥ ८५ ॥ जानेऽथवा किमहमङ्ग ! यदेव सङ्गादङ्गीकरोषि न हि मङ्गलमन्यदस्मात् । तेन त्वमेनमुररीकुरुषे जनं चेन्नैवामुतो भवति युक्ततरो हि कश्चित् ॥ ८६ ॥ यन्नाभवाम भवदीयकटाक्षलक्ष्यं संसारगर्तपरिवर्तमतोऽगमाम । आशंसि ये खलु सहस्रमजस्रमेव जन्मस्वतन्महि कथं त इमेऽनुकम्प्याः ॥८७॥ सत्कर्म नैव किल किञ्चन सञ्चिनोमि विद्याप्यवद्यरहिता न च विद्यते मे । किञ्च त्वदञ्चितपदाम्बुजभक्तिहीनः पात्रं भवामि भगवन् ! भवतो दयायाः ॥ ८८ ॥ किं भूयसा प्रलपितेन यदेव किञ्चित्पापादिमल्पमुरु वा तदशेषमेषः । जानन्नथवा शतसहस्रपरार्धकृत्वो योऽकार्षमेनमगतिं कृपया क्षमस्व ॥ ८९ ॥ देव ! त्वदीयचरणप्रण-

थप्रवीणरामानुजार्यविषयीकृतमप्यहो माम् । भूयः प्रधर्षयति वैषयिको विमोहो मत्कर्मणः कतरदत्र समानसारम् ॥ ९० ॥ गर्भेषु निर्भरनिपीडनखिन्नदेहः क्षोदीयसोऽतिमहतोऽप्यखिलस्य जन्तोः । जन्मान्तराण्यनुविचिन्त्य परस्सहस्राण्यत्राहमप्रतिविधिर्निहतश्चरामि ॥ ९१ ॥ भूयश्च जन्मसमयेषु सुदुर्वचानि दुःखानि दुःखमतिरिच्य किमप्यजानन् । मूढोऽनुभूय पुनरेव तु बालभावाद्दुःखोत्तरं निजचरित्रममुत्र सेवे ॥ ९२ ॥ भूयांसि भूय उपयन्विविधानि दुःखान्यन्यच्च दुःखमनुभूय सुखभ्रमेण । दुःखानुबन्धमपि दुःखविमिश्रमल्पं क्षुद्रं जुगुप्सितसुखं सुखमित्युपासे ॥ ९३ ॥ लोलद्भिरिन्द्रियहयैरपथेषु नीतो दुष्प्रापदुर्भगमनोरथमथ्यमानः । विद्याधनाभिजनजन्ममदेन कामक्रोधादिभिश्च हतधीर्न शमं प्रयामि ॥ ९४ ॥ लभ्येषु दुर्लभतरेष्वपि वाञ्छितेषु जाता सहस्रगुणतत्प्रतिलम्भनेऽपि । विघ्नैर्हृतेष्वपि च तेषु समूलघातं वर्धिष्णुरेव न तु शाम्यति हन्त तृष्णा ॥ ९५ ॥ त्वत्कीर्तनस्तुतिनमस्कृतिवेदनेषु श्रद्धा न भक्तिरपि शक्तिरथो न चेच्छा । नैवानुतापमतिरेष्वकृतेषु किन्तु भूयानहो परिकरः प्रतिकूलपक्षे ॥ ९६ ॥ एतेन वै सुविदितं बत मामकीनं दौरात्म्यमप्रतिविधेयमपारमीश ! । सम्मूर्च्छतोऽप्यपदमस्मि यतस्त्वदीयनिस्सीमभूमकरुणामृतवीचिवायोः ॥ ९७ ॥ ऐश्वर्यवीर्यकरुणागरिमक्षमाद्यास्स्वामिन्नकारणसुहृत्त्वमथो विशेषात् । सर्वे गुणास्सविषयास्तव मामपारघोराघपूर्णमगतिं निहतं समेत्य ॥ ९८ ॥ त्वत्पादसंश्रयणहेतुषु साधिकारानुगुञ्जतश्चरितकृत्स्नविधींश्च तांस्तान् । त्वं रक्षसीति महिमा न तवालमेष मां चेदनीदृशमनन्यगतिं न रक्षेः ॥ ९९ ॥ या कर्मणामधिकृतिर्य इहोद्यमस्तेष्वप्ययेष्वनुष्ठितिरशेषमिदं हि पुंसाम् । त्वामन्तरेण न कथञ्चन शक्यमाप्तुमेवं च तेषु मयि चास्ति न ते विशेषः ॥ १०० ॥ निर्बन्ध एष यदि ते यदशेषवैधसंसेविनो वरद !

रक्षसि नेतरांस्त्वम् । तर्हि त्वमेव मयि शक्त्यधिकारवाञ्छाः प्रत्यूहशान्तिमितरच्च विधेहि विश्वम् ॥ १०१ ॥

व्यक्तीकुर्वन्निगमशिरसामर्थमन्तर्निगूढं
श्रीवैकुण्ठस्तवमकृत यः श्रेयसे सज्जनानाम् ।
कूराधीशं गुरुतरदयादुग्धसिन्धुं तमीडे
श्रीवत्साङ्कं श्रुतिमतगुरुच्छात्रशीलैकधाम ॥

पञ्चस्तव्यां श्रीवैकुण्ठस्तवः समाप्तः

—०—

श्री श्रीवत्सचिह्नमिश्रैरनुगृहीतायां पञ्चस्तव्याम्

अतिमानुषस्तवः ।

श्रीवत्सचिह्नमिश्रेभ्योनम उक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

अतिमानुषशीलवृत्तवेषैरतिवृत्तामरविक्रमप्रतापैः । अतिलङ्घितसर्वलोकसाम्यं वरये वैष्णववैभवावतारम् ॥ १ ॥ श्रेयः किरन्तु किरणाश्चरणारविन्दनिष्यन्दमानमकरन्दरसौघदेश्याः । तज्जाः श्रुतेर्मधुन उत्स इति प्रतीता माङ्गल्यरङ्गनिलयस्य परस्य धाम्नः ॥ २ ॥ श्रीमत्पराङ्कुशमुनीन्द्रमनोनिवासात्तज्जानुरागरसमज्जनमञ्जसाऽऽप्य । अद्याप्यनारततदुत्थितरागयोगं श्रीरङ्गराजचरणाम्बुजमुन्नयामः ॥३॥ वज्रध्वजाङ्कुशसुधाकलशातपत्रपङ्केरुहाङ्कपरिकर्मपरीतमन्तः । आपादपङ्कजविशृङ्खलदीप्रमौलेश्श्रीरङ्गिणश्चरणयोर्युगमाश्रयामः ॥ ४ ॥ श्रीरङ्गराजचरणौ प्रणुमो ययोः खल्वेकस्त्रिविक्रमविधौ वसुधामशेषाम् । व्यक्रंस्त साचलकुलामपि विप्रकीर्णस्थूलावलग्नसिकतामिव निर्नतोच्चम् ॥ ५ ॥ ज्ञानं बलं विपुलमीशनवीर्यशक्तितेजांसि च त्रियुगभूयमुपागतानि । पूर्णानि षट्च परिगृह्य भवंश्चतुर्धा भक्तं जनं

त्वमनुजग्रहिथानुरागात् ॥ ६ ॥ एकान्तमङ्गलगुणास्पदमस्त हेयं नित्यं पदं तव यतस्तत एव देव ! । आम्नायते तदिह विश्वविरूपरूपं तेनैव नन्विदमशब्दमरूपमाहुः ॥ ७ ॥ शब्दादिहेय इह गोचर इन्द्रियाणां तत्प्रत्यनीकविभवस्त्वमतीन्द्रियोऽसि । तेनैव ते न वत दर्शनमस्ति किञ्चिद्वाचो धियश्च तत एव न गोचरोऽसि ॥ ८ ॥ एवं स्थिते त्वदुपसंश्रयणाभ्युपायो मानेन केनचिदलप्स्यत नोपलब्धुम् । नो चेदमर्त्यमनुजादिषु योनिषु त्वमिच्छाविहारविधिना समवातरिष्यः ॥ ९ ॥ शीलः क एष तव हन्त दयैकसिन्धो ! क्षुद्रे पृथग्जनपदे जगदण्डमध्ये । क्षोदीयसोऽपि हि जनस्य कृते कृती त्वमत्रावतीर्य ननु लोचनगोचरोऽभूः ॥ १० ॥ यं पातकात्सुमहतोऽप्युददधारयस्त्वं त्वत्पादवारिपरिपूतशिराश्च योऽभूत् । तं वन्दसे किल ततश्च वरं वृणीषे क्रीडाविधिर्वत ! विलक्षणलक्षणस्ते ॥ ११ ॥ क्रीडाविधेः परिकरस्तव या तु माया सा मोहनी न कतमस्य तु हन्त ! जन्तोः । हैं मर्त्यसिंहवपुषस्तव तेजसोंशे शम्भुर्भवन् हि शरभश्शलभो बभूव ॥ १२ ॥ यस्यात्मतां त्रिपुरभङ्गविधाववधास्त्वं त्वच्छक्तितेजितशरो विजयी च योऽभूत् । दक्षक्रतौ तु किल तेन विनिर्जितस्त्वं युक्तो विधेयविषयेषु हि कामचारः ॥ १३॥ मुग्धश्शिशुर्वटदले शयितोऽतितन्वा तन्वा जगन्ति बिभृषे सविकासमेव । ऐशीमिमां तु तव शक्तिमतर्कितव्यामव्याजतः प्रथयसे किमिहावतीर्णः ॥१४॥ ब्रह्मेशमध्यगणना गणनार्कप ङ्क्तौ इन्द्रानुजत्वमदितेस्तनयत्वयोगात् । इक्ष्वाकुवंशयदुवंशजनिश्च हन्त श्लाघ्यान्यशून्यनुपमस्य परस्य धाम्नः॥१५॥ त्वन्निर्मिता जठरगा च तव त्रिलोकी किं भिक्षणादियमृते भवता दुरापा। मध्ये कदा तु न विचक्रमिषे जगच्चेत् त्वद्विक्रमैः कथमिव श्रुतिरञ्चिता स्यात् ॥१६॥ पृच्छामि किं च न यद्रा किल राघवत्वे मायामृगस्य वशगो मनुजत्वमौग्ध्यात् । सीतावियोगविवशो न च तद्गतिज्ञः प्रादास्तदा परगतिं हि कथं खगाय ॥ १७ ॥ अक्षुण्णयोगपथमग्रचहतं जटायुं

तिर्यञ्चमेव बत ! मोक्षपथे नियोक्तुम् । शक्नोषि वेत्सि च यदा स तदा कथं त्वं देवीमवाप्तुमनलं व्यथितो विचिन्वन् ॥ १८ ॥ सालान् हि सप्त सगिरीन्सरसातलान्यानेकेषुमन्दजवतो निरपत्रयस्त्वम् । ते ऽनेकविव्यथनखिन्नकपिप्रणुन्नं शाखामृगं मृगयसे स्म कथं सहायम् ॥ १९ ॥ दासस्सखा समभवत्तव यः कपीन्द्रस्तद्विद्विषं कपिमसर्षवशाज्जिघांसुः । त्वत्स्नेहविक्लवधियं तमिमं कपीन्द्रं विस्रम्भयन् सपदि सालगिरीनविध्यः ॥ २० ॥ यद्वा मृगं मृगयुवन्मृगयापथेन छन्नो जघन्थ न तु शत्रुवदाभिमुख्यात् । तद्युक्तमेव तव राघववंशजस्य तिर्यक्षु नैव हि विपक्षतयोपचारः ॥ २१ ॥ मानुष्यकं चरितमाचरितुं प्रवृत्तो देवातिगं चरितमङ्ग ! किमङ्ग्यकार्षीः । यत्सागरे बत बबन्धिथ नाथ ! सेतुं शैलैः प्लवङ्गमसमिङ्गितसम्प्रणुन्नैः ॥ २२ ॥ यो विक्रमेण मनुजत्वविभूषणेन देवं वरं वरुणराजमज ! व्यजेष्ठाः । कृत्वोपदां दशरथं विधिरुद्रमुख्यैर्देवैस्स्तुतश्च स किलेन्द्रजिता जितोऽसि ॥ २३ ॥ अङ्घि न तेरिथ न जिग्यिथ राक्षसेन्द्रं नैवास्य जघ्निथ यदा च बलाबलं त्वम् । निस्संशयस्सपदि तस्य पदेऽभ्यषिश्चस्तस्यानुजं कथमिदं हि विभीषणं च ॥ २४ ॥ त्वं दक्षिणस्य निवसन्नुदधेस्तटेऽपि दूरान्तरोत्तरपयोधिमहान्तरीपे । दैत्यान्निजैकशरपारणयन् किमेतां लङ्कां स्थितोऽत्र कुरुषे किल न स भस्म ॥ २५ ॥ एतत्कथं कथय यन्मथितस्त्वयाऽसौ हित्वा स्वभावनियमं प्रथितं त्रिलोक्याम् । अश्वाप्सरोविषसुधाविधुपारिजातलक्ष्म्यात्मना परिणतो जलधिर्बभूव ॥ २६ ॥ यत्तादृशागसमरिं रघुवीर ! वीक्ष्य विश्रम्यतामिति मुमोचिथ मुग्धभाजौ । कोऽयं गुणः कतरकोटिगतः कियान्वा कस्य स्तुतेः पदमहो बत ! कस्य भूमिः ॥ २७ ॥ यल्लक्ष्मणस्त्वदनुजो रिपुशक्तिमुग्धश्शत्रोर्गुरुर्हनुमतस्तु लघुर्बभूव । एतेन वै सुविदितोऽभवदिन्द्रशत्रोर्मायास्त्रबन्धननिबन्धनजो विमोहः ॥ २८ ॥ हा हन्त हन्त भवतश्चरणारविन्दद्वन्द्वं कदा नु भविता विषयो

ममाक्ष्णोः । योऽहं निरर्गळविनिर्गळदन्धकारैर्वृक्षैस्तृणैश्च सुलभं समयं व्यतीतः ॥ २९ ॥ वंशं रघोरनुजिघृक्षुरिहावतीर्णो दिव्यैर्बबर्षिथ तथाऽत्र भवद्गुणौघैः । त्वत्सन्निधिप्रभवशैत्यजुषो यथा हि वृक्षाश्च तान्तिमलभन्त भवद्वियोगे ॥ ३० ॥ ये धर्ममाचरितुमभ्यसितुं च योगं बोद्धुं च किञ्चन न जात्वधिकारभाजः । तेऽपि त्वदाचरितभूतलबन्धगन्धाद्बन्धातिगाः परगतिं गमितास्तृणाद्याः ॥३१॥ तादृग्गुणो ननु बभूविथ राघव ! त्वं यस्तावकं चरितमन्वहमन्वभुङ्क्त । सोऽत्रैव हन्त हनुमान् परमां विमुक्तिं बुद्ध्याऽवधूय चरितं तव सेवतेऽसौ ॥ ३२ ॥ यत्त्वं कृतागसमपि प्रणतिप्रसक्तं तं वायसं परमया दययाऽक्षमिष्ठाः । तेनैव मादृशजनस्य महागसोऽपि युक्तं समाश्वसनमित्युपधारयामि ॥ ३३ ॥ सा पूतना शकटमर्जुनयोश्च युग्मं बाल्योचितेऽन्यपरचेष्टितविष्फुलिङ्गे । प्रस्यालभन्त शलभत्वमहो निगूढस्य त्वं व्रजे ववृधिषे किल कंसभीत्या ॥ ३४ ॥ पश्यत्सु सूरिषु सदा परमं पदं ते देव्या श्रिया सह वसन्परया विभूत्या । योगेन योगनिरतैः परिमृग्यमाणः किं त्वं व्रजेषु नवनीतमहो व्यमुष्णाः ॥ ३५ ॥ यं दुर्ग्रहं सुमनसो मनसाऽपि नित्यं बन्धच्छिदं परममीशमुदाहरन्ति । दाम्ना निबद्ध इति शुश्रुम तं भवन्तं नालं बभूविथ बत ! श्लथनाय तस्य ॥ ३६ ॥ ऐशं हि शैशवमपि व्यतिवेलखेलं यत्पूतना शकटमर्जुनयोश्च युग्मम् । बाल्योचितान्यपरसान्निचिचेष्टितेन हन्तालभन्त शलभायितमोजसस्ते ॥ ३७ ॥ सत्येव गव्यनिवहे निजधाम्नि भूम्ना पर्यन्तसद्मसु किमर्थमचूचुरस्त्वम् । मुष्णंश्च किं व्यजघटो घटशेषमग्रे गोपीजनस्य परिहासपदं किमासीः ॥ ३८ ॥ सन्नाम नाथ नवनीतमचूचुरस्त्वं तच्छादनाय यदि ते मतिराविरासीत् । किं मुग्ध ! दिग्धममुना करपल्लवं ते गात्रे प्रमृज्य निरगाः किल निर्विशङ्कः ॥ ३९ ॥ त्वामन्यगोपगृहगव्यमुषं यशोदा गुर्वी त्वदीयमवमानमसृष्यमाणा । प्रेम्णाऽथ दामपरिणामजुषा बबन्ध

तादृङ्न ते चरितमार्यजन स्सहन्ते ॥ ४० ॥ मात्रा यदि त्वमसि दामनि सन्निबद्धस्तच्छ्राविणामुदितचाक्षुषनिर्झराणाम् । बध्नासि हन्त हृदयं भगवन्कुतस्तत्सर्गो हि वश्यविषये विगुणोऽपि वीर्यस् ॥ ४१ ॥ कान्तालकान्तममलं कमलायताक्षमुद्भ्रूविलासमुदितासितमुग्धसं च । वक्त्रं वहन् परम ! गोपगृहेषु किं त्वं गोपीमनांसि नवनीतमुताभ्यमोपीः ॥ ४२ ॥ सर्वे गुणाय गुणिनामिति सत्यमेतद्यत्खल्विहेतरजने मलिनत्वहेतुः । यद्गोपवेषविनिवेशनमुत्तमं ते गोपालनं च गणयन्ति गुणं गुणेषु ॥ ४३ ॥ गोपालपोतकतया निभृतं धरित्रीं आवस्तुकाम इव सन्नपि बाल्यलौल्यात् । ऐन्द्रं निहत्य मखमद्रिमथो दधानः किं तस्थिषे सुरगणाय सवासवाय ॥ ४४ ॥ वेणुक्वणप्रणयिनि त्वयि लोकनाथ ! बृन्दावनं चरणसञ्चरणैः पुनाने । भावास्तदा वनभुवः किल कीदृशस्ते त्वद्गीतसिक्तसिकतासु वसुन्धरासु ॥ ४५ ॥ धन्यैश्श्रुतं तदिह तावकरासकाले गीतेन येन हि शिलास्सलिलाबभूवुः । पश्चापि किञ्च परिवृत्तगुणानि भूतान्युर्वीकृशानुमरुदम्बरशम्बराणि ॥ ४६ ॥ तेभ्यः कृती न किल कश्चिदिहास्ति ये वै रासोत्सवोत्सुकधियस्तव काननान्ते । वेणुस्वनस्रुतरसौघपरिप्लुतान्ते स्वे सृक्कणी रसनया लिलिहुर्भुजङ्गाः ॥ ४७ ॥ अम्भोदनीलमरविन्ददलायताक्षं पिञ्छावतंसमुररीकृतवेणुपाणिम् । त्वां गोपवेषपरिकर्मितकायकान्तिं धन्यास्तदा ददृशुरुन्मथितान्यभावाः ॥ ४८ ॥ गोवर्धनो गिरिवरो यमुना नदी सा बृन्दावनं च मधुरा च पुरी पुराणी । अद्यापि हन्त सुलभाः कृतिनां जनानामेते भवच्चरणचारजुषः प्रदेशाः ॥ ४९ ॥ बृन्दावने स्थिरचरात्मककीटदूर्वापर्यन्तजन्तुनिचये यत ! ये तदानीम् । नैवालभामहि जनिं हतकास्त एते पापाः पदं तव कदा पुनराश्रयामः ॥ ५० ॥ हा जन्म तासु सिकतासु मया न लब्धं रासे त्वया विरहिताः किल गोपकन्याः । यास्तावकीनपदपङ्क्तिजुषोऽजुषन्त निक्षिप्य

तत्र निजरङ्गमनङ्गतप्तम् ॥ ५१ ॥ आचिन्वतः कुसुममंघ्रिसरोरुहं ते ये भेजिरे बत! वनस्पतयो लता वा। अद्यापि तत्कुलभुवः कुलदैवतं मे वृन्दावनं मम धियं च सनाथयन्ति ॥ ५२ ॥ यत्त्वत्प्रियं तदिह पुण्यमपुण्यमन्यन्नान्यत्तयोर्भवति लक्षणमत्र जातु । धूर्तायितं तव हि यत्किल रासगोष्ठ्यां तत्कीर्तनं परमपावनमामनन्ति ॥ ५३॥ या कंसमुख्यनृपकीटनिबर्हणोत्था सा निर्जितत्रिजगतस्तव नैव कीर्तिः। गोपालनादि यदिदं भवदीयकर्मेत्यार्द्रीकरोति विदुषां हृदयं तदेतत् ॥ ५४॥ गोपालवेषपरिकर्म परावरेशं यद्धाम धाम परमं तमसः परस्तात् । तत्पिञ्छलाञ्छनसुदामकृतोपवीतं गोधूलिधूसरितकुन्तलमन्तरास्ताम् ॥ ५५ ॥ यद्वै जरासुतभयाद्विपलायथास्त्वं तच्चेन्मनुष्यचरितानुविधानजं ते । तर्हि त्रिलोकगुरुमीश्वरमीश्वराणां बाणाहवे किमिति शम्भुमजृम्भयस्त्वम् ॥ ५६ ॥ जातं कुतस्तदकृतज्ञविचेष्टितं ते पुत्रीयया किल वरं ववृषे वृषाङ्कात् । अक्षेषु सक्तमतिना च निरादरेण वाराणसी हरपुरी भवता विदग्धा ॥५७॥ सञ्जीवयन्नपि मृतं सुतमुत्तरायास्सान्दीपनेश्चिरमृतं सुतमानयंश्च । धाम्नो निजाद्द्विजसुतान्पुनरानयन्वा स्वामेव तां तनुमहो कथमानयस्त्वम् ॥ ५८ ॥ अद्यापि नास्त्युपरतिस्त्रिविधापचारात्पापः परे निपतितोऽस्मि तमस्यपारे। एतादृशोऽहमगतिर्भवतो दयायाः पात्रं त्वदीयचरणौ शरणं प्रपद्ये ॥ ५९॥ विस्रम्भगं त्वयि न यद्यपि मेऽस्ति नापि श्रद्धा यथोक्तवचनार्थगता तथापि । वाचं त्विमां सकृदथाप्यसकृन्मयोक्तां सत्यां कुरुष्व दययैव दयैकसिन्धो ॥ ६० ॥ पापीयसोऽपि शरणागतशब्दभाजो नोपेक्षणं मम तवोचितमीश्वरस्य । त्वज्ज्ञानशक्तिकरुणासु सतीषु नेह पापं पराक्रमितुमर्हति मामकीनम् ॥ ६१ ॥

पञ्चस्तव्यामतिमानुषस्तवस्समाप्तः

—०—

श्री श्रीवत्सचिह्नमिश्रैरनुगृहीतायां पञ्चस्तव्यां

सुन्दरबाहुस्तवः ।

श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

श्रीमन्तौ हरिचरणौ समाश्रितोऽहं श्रीरामावरजमुनीन्द्रलब्धबोधः । निर्भीकस्तत इह सुन्दरोरुबाहुं स्तोष्ये तच्चरणविलोकनाभिलाषी ॥ १ ॥ सुन्दरायतभुजं भजामहे वृक्षषण्डमयमद्रिमास्थितम् । यत्र सुप्रथितनूपुरापगातीर्थमर्थितफलप्रदं विदुः ॥ २ ॥ क्वचित्त्वरितगामिनी क्वचन मन्दमन्दालसा क्वचित्स्खलितविह्वला क्वचन फेनिला सारवा । पतन्त्यपि किल क्वचिद् व्रजति नूपुराह्वा नदी सुसुन्दरभुजाह्वयं मधु निपीय मत्ता यथा ॥ ३ ॥ उदधिगमन्दराद्रिमथिमन्थनलब्धपयोमधुररसेन्दिराह्वसुधसुन्दरदोःपरिघम् । अशरणमादृशात्मशरणं शरणार्थिजनप्रवणधियं भजेम तरुषण्डमयाद्रिपतिम् ॥ ४ ॥ शशधररिङ्गणाढ्यशिखमुच्छिखरप्रकरं तिमिरनिभप्रभूततरुषण्डमयं भ्रमदम् । वनगिरिमावसन्तमुपयामि हरिं शरणं भिदुरितसप्तलोकसुविशृङ्खलशङ्खरवम् ॥ ५ ॥ यत्तुङ्गशृङ्गविनिषङ्गिसुराङ्गनानां न्यस्तोर्ध्वपुण्ड्रमुखमण्डनमण्डितानाम् । दर्पण्यमूढ्घृतमपाङ्कशशाङ्कपृष्ठं तद्धाम सुन्दरभुजस्य महान् वनाद्रिः ॥ ६ ॥ यदीयशिखरागतां शशिकलां तु शाखामृगा निरीक्ष्य हरशेखरीभवनमामृशन्तस्ततः । स्पृशन्ति न हि देवतान्तरसमाश्रितेति स्फुटं स एष सुमहातरुव्रजगिरिर्गृहं श्रीपतेः ॥ ७ ॥ सुन्दरदोर्दिव्याङ्गालम्भनकातरवशानुयायिनि करिणि । प्रणयजकलहसमाधिर्यत्र वनाद्रिस्स एष सुन्दरदोष्णः ॥ ८ ॥ स एष सौन्दर्यनिधेर्धृतश्रियो वनाचलो नाम सुधाम यत्र हि । भुजङ्गराजस्य कुलस्य गौरवान्न खण्डिताः कु-

ण्डलिनश्शिखण्डिभिः ॥ ९ ॥ वृषगिरिरयमच्युतस्य यस्मिन् स्वमत-मलंघयितुं परस्परेभ्यः । खगपतिचरणौ खगाश्शपन्ते भुजगपतेर्भु-जगाश्च सर्व एव ॥ १० ॥ हरिकुलमखिलं हनूमदंघ्रिं स्वकुलपजा-म्बवतस्तथैव भल्लाः । निजकुलपजटायुषश्च गृध्राः स्वकुलपतेश्च गजा गजेन्द्रनाम्नः ॥ ११ ॥ वकुलधरसरस्वतीविषक्तस्वररसभाव-युतासु किन्नरीषु । द्रवति दृषदपि प्रसक्तगानास्विह वनशैलतटीषु सुन्दरस्य ॥ १२ ॥ भृङ्गी गायति हंसतालनिभृतं तत्पुष्णती को-किलाप्युद्गायत्यथ वल्लितल्लजमुखादास्रं मधु स्यन्दते । निष्पन्द-स्तिमिताः कुरङ्गततयश्शीतं शिलासैकतं सायाह्ने किल यत्र सुन्दर-भुजस्तस्मिन्वनक्ष्माधरे ॥ १३ ॥ पीताम्बरं वरदशीतलदृष्टिपातमा-जानुलम्बिभुजमायतकर्णपाशम् । श्रीमन्महावनगिरीन्द्रनिवासदीक्षं लक्ष्मीधरं किमपि वस्तु ममाविरस्तु ॥ १४ ॥ जनिजीवनाप्ययवि-मुक्तयो यतो जगतामिति श्रुतिशिरस्सु गीयते । तदिदं समस्तदुरि-तैकभेषजं वनशैलसम्भवमहं भजे महः ॥ १५ ॥ सद्ब्रह्मात्मपदैस्त्र-यीशिरसि यो नारायणोक्त्या तथा व्याख्यातो गतिसाम्यलब्धवि-षयानन्यत्वबोधोज्वलैः । निस्तुल्याधिकमद्वितीयममृतं तं पुण्डरीके-क्षणं प्रारूढश्रियमाश्रये वनगिरेः कुञ्जोदितं सुन्दरम् ॥ १६ ॥ पतिं विश्वस्यात्मेश्वरमिति परंब्रह्म पुरुषः परंज्योतिस्तत्वं परमिति च नारायण इति । श्रुतिर्ब्रह्मेशादींस्तदुदितविभूतींस्तु गृणती यमाहारू-ढश्रीस्स वनगिरिधामा विजयते ॥ १७ ॥ पृथिव्याद्यात्मान्तं नियम-यति यस्तत्वनिकरं तदन्तर्यामी तद्वपुरविदितस्तेन भगवान् । स एष स्वैश्वर्यं न विजहदशेषं वनगिरिं समध्यासीनो नो विशतु हृदयं सुन्दरभुजः ॥ १८ ॥ प्रत्यगात्मनि कदाप्यसंभवद्भूमभूमिमभिवक्ति यं श्रुतिः । तं वनाद्रिनिलयं सुसुन्दरं सुन्दरायतभुजं भजामहे ॥ १९ ॥ वन्देय सुन्दरभुजं भुजगेन्द्रभोगसक्तं महावनगिरिप्रणय-प्रवीणम् । यं तं विदुर्दहरमष्टगुणोपजुष्टं आकाशमौपनिषदीषु सर-

स्वतीत्रु ॥ २० ॥ यत्स्वायत्तस्वरूपस्थितिकृतिकनिजेच्छा नियाम्य-स्वशेषानन्ताशेषप्रपञ्चं ततत इह चिदिवाचिद्वपुर्वा चिशब्दैः । विश्वैश्शब्दैः प्रवाच्यो हतवृजिनतया नित्यमेवानवद्यस्तं वन्दे सुन्दराह्वं वनगिरिनिलयं पुण्डरीकायताक्षम् ॥ २१ ॥ गुणजं गुणिनो हि मङ्गलत्वं प्रमितं प्रत्युत यत्स्वरूपमेत्य । तमनन्तसुखावबोधरूपं विमलं सुन्दरबाहुमाश्रयामः ॥ २२ ॥ अतिपतितावधिस्वमहिमानुभवप्रभवत्सुखकृतनिस्तरङ्गजलधीयितनित्यदशम् । प्रतिभटमेव हेयनिकरस्य सदाऽप्रतिमं हरिमिह सुन्दराह्वमुपयामि वनाद्रितटे ॥ २३ ॥ सदा षाड्गुण्याख्यैः पृथुलबलविज्ञानशकनप्रभावीर्यैश्वर्यैरवधिविधुरैरेधितदशम् । द्रुमस्तोमक्ष्माभृत्परिसरमहोद्यानमुदितं प्रपद्येऽध्यारूढश्रियमिममहं सुन्दरभुजम् ॥ २४ ॥ सौशील्याश्रितवत्सलत्वमृदुतासौहार्दसाम्यार्जवैः धैर्यस्थैर्यसुवीर्यशौर्यकृतितागाम्भीर्यचातुर्यकैः । सौन्दर्यान्वितसौकुमार्यसमतालावण्यमुख्यैर्गुणैर्देवः श्रीतरुषण्डशैलनिलयो नित्यं स्थितस्सुन्दरः ॥ २५ ॥ येष्वेकस्य गुणस्य विप्रुडपि वै लोकोत्तरं स्वाश्रयं कुर्यात्तादृशवैभवैरगणितैर्निस्सीमभूमान्वितैः । नित्यैर्दिव्यगुणैस्ततोऽधिकशुभैस्त्रैकास्पदात्माश्रयैरिद्धं सुन्दरबाहुमस्मि शरणं यातो वनाद्रीश्वरम् ॥ २६ ॥ सदा समस्तं जगदीक्षते हि यः प्रत्यक्षदृष्ट्या युगपद्भुवा स्वतः । स ईदृशज्ञाननिधिर्निधिस्तु नस्सिंहाद्रिकुञ्जेषु चकास्ति सुन्दरः ॥ २७ ॥ ऐश्वर्यतेजोबलवीर्यशक्तयः कीदृग्विधास्सुन्दरबाहुसंश्रयाः । योऽसौ जगज्जन्मलयस्थितिक्रियास्सङ्कल्पतोऽल्पादुपकल्पयत्यजः ॥ २८ ॥ यत्कल्पायुतभोगतोऽपि कृशतां यायान्न तावत्फलं येष्वेकस्य तथाविधैस्सततजैरंहोभिरुत्सीमभिः । अस्तादाविह संसृतावुपचितैश्छन्नं सुसन्नं जनं सन्नत्या क्षमते क्षणाद्वनगिरिप्रस्थप्रियस्सुन्दरः ॥२९ ॥ यज्जातीयो यादृशो यत्स्वभावः पादच्छायां संश्रितो योऽपि कोऽपि । तज्जातीयस्तादृशस्तत्स्वभावः श्लिष्यत्येनं सुन्दरो वत्सलत्वात् ॥ ३० ॥

निहीनो जात्या वा भृशमकुशलैर्वा स्वचरितैः पुमान्वै यः कश्चिद् बहुतृणमपि स्यादगुणतः । भजन्तं तं पश्येद्भुजगपतिना तुल्यमपि यो वनाद्रिप्रस्थस्थस्स मम शरणं सुन्दरभुजः ॥ ३१ ॥ एकैकमङ्गल-गुणानुभवाभिनन्दमीदृक्त्वयानिति च सुन्दरदोष्णि कृष्णे । ते ये शतन्त्विति नियन्तुमनाश्श्रुतिर्हि नैवैष वाङ्मनसगोचर इत्युदाह ॥ ३२ ॥ अब्जपादमरविन्दलोचनं पद्मपाणितलमञ्जनप्रभम् । सुन्द-रोरुभुजमिन्दिरापतिं वन्दिषीय वरदं वनाद्रिगम् ॥ ३३ ॥ कनक-मरतकाञ्जनद्रवाणां मथनसमुत्थितसारमेलनोत्थम् । जयति किमपि रूपमस्य तेजो वनगिरिनन्दनसुन्दरोरुबाहोः ॥ ३४ ॥ किन्तु स्वयं स्वात्मविभूषणं भवन्नसावलङ्कार इतीरितो जनैः । वर्धिष्णुबालद्रुम-षण्डमण्डितं वनाचलं वा परितः प्रसाधयन् ॥ ३५ ॥ सुखस्पर्शै-र्नित्यैः कुसुमसुकुमाराङ्गसुखदैः सुसौगन्ध्यैर्दिव्याभरणगणदिव्यायुध-गणैः । अलङ्कार्यैस्सर्वैर्निगदितमलङ्कार इति यस्समाख्यानं धत्ते स वनगिरिनाथोऽस्तु शरणम् ॥ ३६ ॥ मकुटमुकुटमालोत्तंसचूडाल-लामस्वलकतिलकमालाकुण्डलैस्सोर्ध्वपुण्ड्रैः । मणिवरवनमालाहार-केयूरकण्ठयैस्तुलसिकटककाञ्चीनूपुराद्यैश्च भूषैः ॥ ३७ ॥ असिजल-जरथाङ्गैश्शार्ङ्गकौमोदकीभ्यामगणितगुणजालैरायुधैरप्यथान्यैः । स-ततविततशोभं पद्मनाभं वनाद्रेरुपवनसुखलीलं सुन्दरं वन्दिषीय ॥ ३८ ॥ आजानजस्वगतबन्धुरगन्धलुब्धभ्राम्यद्विदग्धमधुपालिस-देशकेशम् । विश्वाधिराज्यपरिबर्हकिरीटराजं हि सुन्दरस्य बत ! सुन्द-रमुत्तमाङ्गम् ॥ ३९ ॥ अन्धं तमस्तिमिरनिर्मितमेव यत्स्यात्तत्सार-साधितसुतन्त्वतिघ्न तयार्तम् । ईशस्य केशवहरेरलकालिजालं तत्तुल्य-कुल्यमधुपाढ्यमहावनस्य ॥ ४० ॥ जुष्टाष्टमीकृज्ज्वलदिन्दुसन्निभं धृतोर्ध्वपुण्ड्रं विलसद्विशेषकम् । भूम्ना ललाटं विमलं विराजते वना-द्रिनाथस्य समुच्छ्रितश्रियः ॥ ४१ ॥ सुचारुचापद्वयविभ्रमं भ्रुवोर्युगं सुनेत्राब्जसहस्रपत्रयोः । उपान्तगं वा मधुपावळीयुगं विराजते सुन्द-

रवाहुसंश्रयस् ॥ ४२ ॥ अदीर्घमप्रेमदुघं क्षणोज्ज्वलं नचोरमन्तःकरणस्य पश्यताम् । अनुज्जमञ्जं नु कथं निदर्शनं वनाद्रिनाथस्य विशालयोर्दृशोः ॥ ४३ ॥ प्रश्च्योतत्प्रेमसारामृतरसचुलकप्रक्रमप्रक्रियाभ्यां विक्षिप्तालोकितोर्मिप्रसरणमुषितस्वान्तकान्ताजनाभ्याम् । विश्वोत्पत्तिप्रवृत्तिस्थितिलयकरणैकान्तशान्तक्रियाभ्यां देवोऽलङ्कारनामा वनगिरिनिलयो वीक्षतामीक्षणाभ्याम् ॥४४॥ प्रेमामृतौघपरिवाहिमहाक्षिसिन्धुमध्ये प्रवद्धसमुदञ्चितसेतुकल्पा । ऋज्वी सुसुन्दरभुजस्य विभाति नासा कल्पद्रुमाङ्कुरनिभा वनशैलभर्तुः ॥४५॥न्याभाविताभ्यधिकनन्दनमन्दनार्द्धिमन्दस्मितामृतपरिस्रवसंस्तवाढयम् । आभाति विद्रुमसमाधरमास्यमस्य देवस्य सुन्दरभुजस्य वनाद्रिभर्तुः ॥ ४६ ॥ यशोदाङ्गुल्यग्रोन्नमितचुबुकाघ्राणमुदितौ कपोलावद्यापि ह्यनुपरततद्धर्षगमकौ । विराजेते विष्वग्वितततसहकारासवरसप्रमाद्यद्भृङ्गाढयद्रुमवनगिरेस्सुन्दरहरेः ॥ ४७ ॥ व्यालम्बिकुण्डलमुदग्रसुवर्णपुष्पनिष्पन्नकल्पलतिकायमलानुकारम् । यत्कर्णपाशयुगलं निगलं धियां नस्सोऽयं सुसुन्दरभुजो वनशैलभूषा ॥ ४८ ॥ सदंससंसञ्जितकुन्तलान्तिकावतीर्णकर्णाभरणाढयकन्धरः । सुबन्धुरस्कन्धनिवन्धनो युवा सुसुन्दरस्सुन्दरदोर्विजृम्भते ॥ ४९ ॥ व्यूढगूढभुजजत्रुमुल्लसत्कम्बुकन्धरधरं धराधरम् । वृक्षषण्डमयभूभृतस्तटे सुन्दरायतभुजं भजामहे ॥ ५० ॥ मन्दरभ्रमणविभ्रमोद्भटास्सुन्दरस्य विलसन्ति बाहवः । इन्दिरासमभिनन्दभन्दनाश्चन्दनागरुविलेपभूषिताः ॥ ५१ ॥ ज्याकिणाङ्कपरिकर्मधर्मिणो भान्ति सुन्दरभुजस्य बाहवः । पारिजातविटपायितर्द्धयः प्रार्थितार्थपरिदानदीक्षिताः ॥ ५२ ॥ सागराम्बरतमालकाननश्यामलर्द्धय उदारपीवराः । शेषभोगपरिभोगभागिनस्तन्निभा वनगिरीशितुर्भुजाः ॥ ५३ ॥ अहमहमिकाभाजो गोवर्धनोद्धृतिनर्मणि प्रमथनविधावब्धेर्लब्धप्रबन्धसमक्रियाः । अभिमतबहूभावाः कान्ताभिरम्भणसम्भ्रमे वनगिरिपते-

र्बाहाश्शुम्भन्ति सुन्दरदोर्हरेः ॥ ५४ ॥ श्रीमद्वनाद्रिपतिपाणितला-
ब्जयुग्ममारूढयोर्विमलशङ्खरथाङ्गयोस्तु । एकोऽब्जमाश्रित इवोत्तम-
राजहंसः पद्मप्रियोऽङ्क इव तत्समितो द्वितीयः ॥ ५५ ॥ लक्ष्म्याः
पदं कौस्तुभसंस्कृतं च श्रीवत्सभूमिर्विमलं विशालम् । विभाति वक्षो
वनमालयाढ्यं वनाद्रिनाथस्य सुसुन्दरस्य ॥ ५६ ॥ सौन्दर्यामृतसा-
रपूरपरिवाहावर्तगर्तायितं यातः किञ्च विरिञ्चसम्भवनभूम्यम्भोज-
संभूतिभूः । नाभिश्शुम्भति कुम्भिकुम्भनिभनिर्भातस्तनस्वर्वधूसम्भु-
क्तद्रुमषण्डशैलवसतेरारूढलक्ष्म्या हरेः ॥ ५७ ॥ सुन्दरस्य किल
सुन्दरबाहोः श्रीमहातरुवनाचलभर्तुः । हन्त ! यत्र निवसन्ति जगन्ति
श्रापितकृशिम तत्तनु मध्यम् ॥ ५८ ॥ पिष्टदुष्टमधुकैटभकीटौ हस्तिह-
स्तयुगळाभसुवृत्तौ । राजतः क्रमकृशौ च सदूरू सुन्दरस्य वनभूधर-
भर्तुः ॥ ५९ ॥ यौवनवृषककुदोद्भेदनिभं नितरां भाति विभोरुभयं जानु
शुभाकृतिकम् । सुन्दरभुजनाम्नो मन्दरमथिताब्धेश्चन्दनवनविलस-
त्कन्दरवृषभपतेः ॥ ६० ॥ अधोमुखं न्यस्तपदारविन्दयोरुदञ्चितो-
दात्तसुनालसन्निभे । विलंघ्य जङ्घे क्नु रंहतो दृशौ वनाद्रिनाथस्य
सुसुन्दरस्य मे ॥ ६१ ॥ सुसुन्दरस्यास्य पदारविन्दे पदारविन्दाधि-
कसौकुमार्ये । अतोऽन्यथा ते बिभृयात्कथन्नु तदासनं नाम सहस्र-
पत्रम् ॥ ६२ ॥ सौन्दर्यमार्दवसुगन्धरसप्रवाहैरेते हि सुन्दरभुजस्य
पदारविन्दे । अम्भोजडम्भपरिरम्भणमभ्यजैष्टां तद्वै पराजितमिसे
शिरसा बिभर्ति ॥ ६३ ॥ एते ते बत ! सुन्दराह्वयजुषः पादारविन्दे
शुभे यन्निर्णेजसमुत्थितत्रिपथगास्रोतस्सु किञ्चित्किल । धत्तेऽसौ
शिरसा भुवस्तदपरं स्रोतो भवानीपतिर्यस्यास्यालकनन्दिकेति निज-
गुर्नामैवमन्वर्थकम् ॥ ६४ ॥ आम्नायकल्पलतिकोत्थसुगन्धिपुष्पं योगी-
न्द्रहार्दसरसीरुहराजहंसम् । उत्पक्वधर्मसहकारफलप्रकाण्डं वन्देय
सुन्दरभुजस्य पदारविन्दम् ॥ ६५ ॥ सुसुन्दरस्यास्य तु वामनाकृतेः
क्रमत्रयप्रार्थिनि मम्नसे किल । इमे पदे तावदिहासहिष्णुनी विचक्रमाते

त्रिजगत् पद्द्वये ॥ ६६ ॥ सौन्दर्यसारामृतसिन्धुवीचिश्रेणीषु पादाङ्गुलिनामिकासु । न्यक्कृत्य चन्द्राश्रियमात्मकान्त्या नखावली शुम्भति सुन्दरस्य ॥ ६७ ॥ यो जातकाशिमा मली च शिरसा सम्भावितश्शम्भुना सोऽयं यच्चरणाश्रयी शशधरो नूनं नखव्याजतः । पूर्णत्वं विमलत्वमुज्ज्वलतया सार्धं बहुत्वं तथा यातस्तं तरुषण्डशैलनिलयं वन्दामहे सुन्दरम् ॥ ६८ ॥ यस्याः कटाक्षणमनुक्षणमीश्वराणामैश्वर्यहेतुरिति सार्वजनीनमेतत् । श्रीस्सेति सुन्दरनिषेवणतो निराहुस्त्वां हि श्रियश्श्रियमुदाहुरुदारवाचः ॥ ६९ ॥ दिव्याचिन्त्यमहाद्भुतोत्तमगुणैस्तारुण्यलावण्यकप्रायैरद्भुतभावगर्भसततापूर्वप्रियैर्विभ्रमैः । रूपाकारविभूतिभिश्च सदृशीं नित्यानपेतां श्रियं नीलां भूमिमपीदृशीं रमयिता नित्यं वनाद्रीश्वरः ॥ ७० ॥ अन्योन्यचेष्टितनिरीक्षणहार्दभावप्रेमानुभावमधुरप्रणयप्रभावः । आजस्रनव्यतरदिव्यरसानुभूतिस्त्वां प्रेयसीं रमयिता वनशैलनाथः ॥ ७१ ॥ सुन्दरस्य वनशैलवासिनो भोगमेव निजभोगमाभजन् । शेष एष इति शेषताकृतेः प्रीतिमानहिपतिस्स्वनामनि ॥ ७२ ॥ वाहनासनवितानचामराद्याकृतिः खगपतिस्त्रयीमयः । नित्यदास्यरतिरेव यस्य वै ह्येष सुन्दरभुजो वनाद्रिगः ॥ ७३ ॥ वनाद्रिनाथस्य सुसुन्दरस्य वै प्रभुक्तशिष्टाश्यथ सैन्यसत्पतिः । समस्तलोकैकधुरन्धरस्सदा कटाक्षवीक्ष्योऽस्य च सर्वकर्मसु ॥ ७४ ॥ छत्रचामरमुखाः परिच्छदास्सूरयः परिजनाश्च नैत्यगाः । सुन्दरोरुभुजमिन्धते सदा ज्ञानशक्तिमुखनित्यसद्गुणाः ॥ ७५ ॥ द्वारनाथगणनाथतद्धजाः पारिषद्यपदभागिनस्तथा । मामकाश्च गुरवः पुरातनास्सुन्दरं वनमहीध्रगं श्रिताः ॥७६ ॥ ईदृशैः परिजनैः परिच्छदैर्नित्यसिद्धनिजभोगभूमिगः । सुन्दरो वनगिरेस्तटीषु वै राजते सकलदृष्टिगोचरः ॥ ७७ ॥ आक्रीडभूमिषु सुगन्धिषु पौष्पिकीषु वैकुण्ठधामनि समृद्धसुवापिकासु । श्रीमल्लतागृहवतीषु यथा तथैव लक्ष्मीधरस्सजति सिंहगिरेस्तटीषु

॥ ७८ ॥ आनन्दमन्दिरमहामणिमण्टपान्तर्लक्ष्म्या भुवाप्यधिपती सह नीलया च । निस्संख्यनित्यनिजदिव्यजनैकसेव्यो नित्यं वसन् सजति सुन्दरदोर्वनाद्रौ ॥ ७९ ॥ प्रत्यर्थिनि त्रिगुणकप्रकृतेरसीम्नि वैकुण्ठधामनि परामृतनाम्नि नित्ये । नित्यं वसन्परमसत्त्वमयेऽप्यतीतयोगीन्द्रवाङ्मनस एष हरिर्वनाद्रौ ॥ ८० ॥ लोकांश्चतुर्दश दधत् किल सुन्दरस्य पङ्क्तीगुणोत्तरितसप्तवृतीदमण्डम् । अन्यानि चास्य सुसदृंशि परश्शतानि क्रीडाविधेरिह परिच्छदतामगच्छन् ॥८१॥ सुरनरतिर्यगादिबहुभेदकभिन्नमिदं जगदथ चाण्डमण्डवरणानि च सप्त तथा । गुणपुरुषौ च मुक्तपुरुषाश्च वनाद्रिपतेरुपकरणानि नर्मविधयेऽपि भवन्ति विभोः॥८२॥ ज्ञानिनस्सततयोगिनस्तु ये सुन्दरांघ्रिपरभक्तिभागिनः । मुक्तिमाप्य परमां परे पदे नित्यकिङ्करपदं भजन्ति ते ॥ ८३ ॥ देवस्य सुन्दरभुजस्य वनाद्रिभर्तुर्हि शीलवत्त्वमथवाऽऽश्रितवत्सलत्वम् । ऐशस्वभावमजहद्भिरिहावतारैर्योऽलञ्चकार जगदाश्रिततुल्यधर्मा ॥ ८४ ॥ सिंहाद्रिनाथ ! तव वाङ्मनसातिवृत्तं रूपं त्वतीन्द्रियमुदाह रहस्यवाणी । एवं च न त्वमिह चेत्समवातरिष्यस्त्वज्ज्ञानभक्तिविधयोऽद्य मुधाऽभविष्यन् ॥ ८५ ॥ ये भक्ता भवदेकभोगमनसोऽनन्यात्मसञ्जीवनाः तत्संश्लेषणतद्विरोधिनिधनाद्यर्थं वनाद्रीश्वर ! । मध्येऽण्डं यदवातरस्सुरनराद्याकारदिव्याकृतिस्तेनैव त्रिदशैर्नरैश्च सुकरं स्वप्रार्थितप्रार्थनम् ॥ ८६ ॥ श्रीमन्महावनगिरीशविधीशयोस्ते मध्ये तु विष्णुरिति यः प्रथमावतारः । तेनैव चेत्तव महिम्नि जनाः किलान्धास्त्वन्मत्स्यभावमवगम्य कथं भवेयुः ॥ ८७ ॥ हे देव ! सुन्दरभुज ! त्वमिहाण्डमध्ये सौलभ्यतो विसदृशं चरितं महिम्नः । अङ्गीकरोषि यदि तत्र सुरैरमीभिस्साम्यान्निकर्षपरिपालनमेव साधु ॥ ८८ ॥ इहावतीर्णस्य वनाद्रिनाथ ! ते निगूहतः स्वं महिमानमैश्वरम् । उमापतेः किं विजयः प्रियङ्करः प्रियङ्करा वेन्द्रजिदस्त्रबन्धना ॥ ८९ ॥ पुच्छोत्पुच्छनमू-

च्छेनोद्धतिधुतव्यावर्तितावर्तवत्संवर्तार्णवनीरपूरविलुठत्पाठीनदिव्या-कृतेः । सिंहाद्रीश ! न वैभवं तव कथं स्वालक्ष्यमालक्ष्यते पद्मा-क्षस्य जुगुक्षतोऽपि विभवं लक्ष्मीश्वराधोक्षज ! ॥ ९० ॥ साचलावटत-टाकदीर्घिकाजाह्नवीजलविवर्धितः क्षये । भृङ्गसङ्गमितनौर्मनोरभूर-ग्रतोऽण्डजवपुर्हि सुन्दर ! ॥ ९१ ॥ प्रलयजनीरपूरपरिपूरितस्वनिल-यावसन्नन्दनभ्रमदशरण्यभूतशरणार्थिनाकिशरणं भवन् स्वकृपया । चलदुदधीरिताम्बुकलुषीक्रियाढ्यगमनस्वपृष्ठविधृताचलकुल एष मी-नतनुरत्र सुन्दरभुजो वनाद्रिनिलयः ॥ ९२ ॥ स्वपृष्ठे प्रष्ठाद्रिभ्रमग-करणैः किञ्च फणिनः निकृष्टिव्याकृष्टिव्यतिविधुतदुग्धाब्धिचलितैः । अविस्पन्दो नन्दन् विकसदरविन्देक्षणरुचिः पुराऽभूस्सिंहाद्रेः प्रिय-तम ! हरे ! कच्छपवपुः ॥ ९३ ॥ जगत्प्रलीनं पुनरुद्दिधीर्षतस्सिं-हक्षितिक्षिन्निलयस्य ! सुन्दर ! । पुरा वराहस्य तवेयमुर्वरा दंष्ट्राह्वये-न्दोः किरु लक्ष्म लक्षिता ॥ ९४ ॥ न वायुः पस्पन्दे ययतुरथवाऽ-स्तं शशिरवी दिशोऽनश्यन् विश्वाप्यचलदचला साचलकुला । नभश्च प्रश्च्योति क्वथितमपि पाथो नरहरौ त्वयि स्तम्भे शुम्भद्वपुषि सति हे सुन्दरभुज ! ॥९५ ॥ अरालं पातालं त्रिदशनिलयः प्रापितलयो धरित्री निर्धूता ययुरपि दिशः कामपि दिशम् । अजृम्भिष्टाऽम्भो-धिर्गुमुवुमिति घूर्णन् सुररिपोः विभिन्दाने वक्षस्त्वयि नरहरौ सुन्द-रभुज ! ॥ ९६ ॥ नखक्रकचकप्राथिक्रथितदैत्यवक्षःस्थलीसमुत्थरुधि-रच्छटाच्छुरितबिम्बितं स्वं वपुः । विलोक्य रुषितः पुनः प्रतिमृगे-न्द्रशङ्कावशाद्य एष नरकेसरी स इह दृश्यते सुन्दरः ॥ ९७ ॥ क्षितिरियं जनसंहतिपालनैर्निगिरणोद्गिरणोद्धरणैरपि । वनगिरीश ! तवैव सती कथं वरद ! वामन ! भिक्षणमर्हति ॥ ९८ ॥ भार्गवः किल भवन् भवान्पुरा कुन्दसुन्दरवनाचलेश्वर !! अर्जुनस्य बलदर्पि-तस्य तु छेत्स्यति सरति बाहुकाननम् ॥ ९९ ॥ आज्ञा तवात्र भवती विदिता त्रयी सा धर्मं तदुक्तमखिलेन वनाद्रिनाथ ! । अन्यू

नमाचरितुमास्तिकशिक्षणार्थमत्रावतीर्य किल सुन्दर ! राघवोऽभूः ॥ १०० ॥ वनगिरिपतिरीशितेति देवैः त्रिपुरहरत्रिपुरघ्नचापभङ्गात् । व्यगणि परशुरामदर्शितस्य स्वकधनुषः परिमर्शदर्शनाच्च॥१०१॥ अनवाप्तमत्र किल लिप्स्यते जनैर्न च लब्धमेतदिह भोक्तुमिष्यते । अनवाप्तमत्र किल नास्ति राम ! तज्जगती त्वया तृणमवैक्षि सुन्दर ! ॥ १०२ ॥ शिखरिषु विपिनेष्वप्यापगास्वच्छतोयास्वनुभवसि रसज्ञो दण्डकारण्यवासान् । तदिह तदनुभूतौ साभिलाषोऽद्य राम ! श्रयसि वनगिरीन्द्रं सुन्दरीभूय भूयः ॥ १०३ ॥ उपवनतरुषण्डैर्मण्डिते गण्डशैलप्रणयिभवदुदन्तोद्गायिगन्धर्वसिद्धे । वनगिरितटभूमिप्रस्तरे सुन्दर ! त्वं भजसि नु मृगयानालुद्रवश्रान्तिशान्तिम्॥१०४॥ कूलेऽब्धेः किल दक्षिणस्य निवसन्दूरोत्तराम्भोधिगान् दैत्यानेकपतत्रिणाऽच्छिन इतीयं किंवदन्ती श्रुता । तत्रैवेश्वरमम्भसां व्यजयथास्तस्माद्वनाद्रीश्वर ! श्रीमन् ! सुन्दर ! सेतुबन्धनमुखाः क्रीडास्तवाडम्बरम् ॥ १०५ ॥ रघुकुलतिलकस्त्वं जातुचिद्यातुधानच्छलमृगमृगयायां सम्प्रसक्तः पुराऽभूः । तदुपजनितखेदच्छेदनायाद्य गायन्मधुकरतरुषण्डं रज्यसे किं वनाद्रिम् ॥ १०६ ॥ हे सुन्दरैकतरजन्मनि कृष्णभावे द्वे मातरौ च पितरौ च कुले अपि द्वे । एकक्ष्मादनुगृहीतवतः फलं ते नीला कुलेन सदृशी किल रुक्मिणी च ॥ १०७ ॥ त्वं हि सुन्दर ! यदा स्तनन्धयः पूतनास्तनमधास्तदा नु किम् । जीर्णमेव जठरे पयोविषं दुर्जरं वद तदात्मना सह ॥१०८ ॥ आश्रितेषु सुलभो भवन् भवान् मर्त्यतां यदि जगाम सुन्दर ! । अस्तु नाम तदुलूखले कियदामबद्ध इति किं तदाऽरुदः ॥ १०९ ॥ सुन्दरोरुभुज ! नन्दनन्दनस्त्वं भवन् भ्रमरविभ्रमालकः । मन्दिरेषु नवनीततक्रजं वल्लवीध्वियमुत व्यचूचुरः ॥११०॥ कालियस्य फणतां शिरस्तु मे सत्कदम्बशिखरत्वमेव वा । वष्टि जुष्टवनशैल ! सुन्दर ! त्वत्पदाब्जयुगमर्पितं ययोः ॥ १११ ॥ गूहितस्वमहिमाऽपि सुन्दर!

त्वं व्रजे किमिति शक्रमाक्रमीः । सप्तरात्रमदधाश्च किं गिरिं पृच्छतश्च सुहृदः किमक्रुधः ॥ ११२ ॥ हे नन्दनन्दन ! सुसुन्दर ! सुन्दराह्व ! वृन्दावने विहरतस्तव वल्लवीभिः । वेणुध्वनिश्रवणतस्तरुभिस्तदा वै सग्रावभिर्जतुविलायमहो ! विलिल्ये ॥ ११३ ॥ गायंगायं वनगिरिपते ! त्वं हि वृन्दावनान्तर्गोपीसंघैर्विहरसि यदा सुन्दर ! व्यूढवाहो ! । रासारम्भोत्सवबहुविधप्रेमसीमन्तिनीनां चेतश्चतस्तत्र च तु तदा कां दशामन्वभूताम् ॥ ११४ ॥ इङ्गितं निमिषितं च तावकं रम्यमद्भुतमतिप्रियङ्करम् । तेन कंससुखकीटशासनं सुन्दराल्पकमपि प्रशस्यते ॥ ११५ ॥ वाराणसीदहनपौण्ड्रकभौमभङ्गकल्पद्रुमाहरणशङ्करजृम्भगाद्याः । अन्याश्च भारतबलक्षथनादयस्ते क्रीडास्सुसुन्दरभुज ! श्रवणामृतानि ॥ ११६ ॥ त्वं हि सुन्दर ! वनाद्रिनाथ ! हे वेङ्कटाह्वयनगेन्द्रमूर्धनि । देवसेवितपदाम्बुजद्वयः संश्रितेभ्य इह तिष्ठसे सदा ॥ ११७ ॥ हस्तिशैलनिलयो भवन् भवान् साम्प्रतं वरदराजसाह्वयः । इष्टमर्थमनुकम्पया ददद्विश्वमेव दयते हि सुन्दर ! ॥ ११८ ॥ मध्ये क्षीरपयोधिशेषशयने शेषे सदा सुन्दर ! त्वं तद्वैभवमात्मनो भुवि भवद्भक्तेषु वात्सल्यतः । विश्राण्याखिलनेत्रपात्रमिह सन् सह्योद्भवायास्तटे श्रीरङ्गे निजधाम्नि शेषशयने शेपे वनाद्रीश्वर ! ॥ ११९ ॥ कल्कीभविष्यन् कलिकल्कदूषितान्दुष्टानशेषान् भगवन् ! हनिष्यसि । स एष तस्यावसरस्सुसुन्दर ! प्रशाधि लक्ष्मीश ! समक्षमेव नः ॥ १२० ॥ ईदृशास्त्वदवतारसञ्चयास्सर्व एव भवदाश्रिताञ्जनान् । त्रातुमेव न कदाचिदन्यथा तेन सुन्दर ! भवन्तमाश्रये ॥ १२१ ॥ त्वामामनन्ति कवयः करुणामृताब्धिं त्वामेव संश्रितजलिघ्नमुपप्नसेषाम् । येषां व्रजन्निह हि लोचनगोचरत्वं हे सुन्दराह्व ! परिचस्करिषे वनाद्रिम् ॥ १२२ ॥ अशक्यं नो किञ्चित्तव न च न जानासि निखिलं दयालुः क्षन्ता चास्यहमपि न चागांसि तरितुम् । क्षमोऽतस्त्वच्छेपो ह्यगतिरिति च

क्षुद्र इति च क्षमस्वैतावन्नोऽबलमिह हरे ! सुन्दरभुज ! ॥ १२३ ॥ लङ्कायुद्धहतान् हरीन् द्विजसुतं शम्बूकदोषान्मृतं सान्दीपिन्यभिजं मृतं द्विजसुतान् बालांश्च वैकुण्ठगान् । गर्भस्थाऽऽर्जुनिसम्भवं व्युदधर स्स्वेनैव रूपेण यः स्वाभीष्टं मम मद्गुरोश्च ददसे नो किं वनाद्रीश्वर ! ॥ १२४ ॥ आयोध्यिकान् सपशुकीटतृणांश्च जन्तून् किङ्कर्मणो नु बत ! कीदृशवेदनाढ्यान् । सायुज्यलभ्यविभवान्निजनित्यलोकान् सान्तानिकानगमयो वनशैलनाथ ! ॥ १२५ ॥ हरितवारणभृत्यसमाह्वयं करिगिरौ वरदस्त्वसपूर्विकाम् । दृशलम्भय एव हि सुन्दर ! स्फुटमदाश्च परश्शतमीदृशम् ॥ १२६ ॥ इह च देव ! ददासि वरान् परान् वरद ! सुन्दर ! सुन्दरदोर्धर ! । वनगिरेरभितस्तटमावसन्नखिललोचनगोचरवैभवः ॥ १२७ ॥ इदमिमे शृणुमो मलयध्वजं नृपमिह स्वयमेव हि सुन्दर ! । चरणसात्कृतवानिति तद् वयं वनगिरीश्वर ! जातमनोरथाः ॥ १२८ ॥ विज्ञापनां वनगिरीश्वर ! सत्यरूपामङ्गीकुरुष्व करुणार्णव ! मामकीनाम् । श्रीरङ्गधामनि यथापुरमेव सोऽहं रामानुजार्यवशगः परिवर्तिषीय ॥ १२९ ॥ किञ्चेदं च विरिञ्चिभावन ! वनाद्रीश ! प्रभो ! सुन्दर ! प्रत्याख्यानपराङ्मुखो वरदतां पश्यन्नवश्यं शृणु । श्रीरङ्गश्रियमन्वहं प्रगुणयंस्त्वद्भक्तभोग्यां कुरु प्रत्यक्षं सुनिरस्तमेव विदधत्प्रत्यर्थिनां प्रार्थनम् ॥ १३० ॥ कारुण्यामृतवारिधे ! वृषपते ! हे सत्यसङ्कल्पन ! श्रीमन् ! सुन्दर ! योग्यताविरहितानुत्सार्य सद्वत्सल ! । क्षाम्यन् साधुजनैः कृतांस्तु निखिलानेवापचारान् क्षणात् तद्भोग्यामनिशं कुरुष्व भगवन् ! श्रीरङ्गधामश्रियम् ॥ १३१ ॥ इदं भूयो भूयः पुनरपि च भूयः पुनरपि स्फुटं विज्ञीप्सामीत्यगतिरबुधोऽनन्यशरणः । कृतागा दुष्टात्मा कलुषमतिरस्मीत्यनवधेः दयायास्ते पात्रं वनगिरिपते ! सुन्दरभुज ! ॥ १३२ ॥

पञ्चस्तव्यां सुन्दरबाहुस्तवस्समाप्तः ।

श्रीश्रीवत्सचिह्नमिश्रैरनुगृहीतायां पञ्चस्तव्यां

वरदराजस्तवः ।



श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

स्वस्ति हस्तिगिरिमस्तशेखरस्सन्तनोतु मयि सन्ततं हरिः । निस्समाभ्यधिकमभ्यधत्त यं देवमौपनिषदी सरस्वती ॥ १ ॥ श्रीनिधिं निधिमपारमर्थिनामर्थितार्थपरिदानदीक्षितम् । सर्वभूतसुहृदं दयानिधिं देवराजमधिराजमाश्रये ॥ २ ॥ नित्यमिन्द्रियपथातिगं महो योगिनामपि सुदूरगं धियः । अप्यनुश्रवशिरस्सु दुर्ग्रहं प्रादुरस्ति करिशैलमस्तके ॥ ३ ॥ वल्लिका श्रुतिमतल्लिकामयी येन पल्लवितविश्वशाखया । स्वश्रिया करिगिरेरलुङ्क्रियां वष्टि मृष्टवरदं तमाश्रये ॥ ४ ॥ यं परोक्षमुपदेशतस्त्रयी नेति नेति परपर्युदासतः । वक्ति यस्तमपरोक्षमीक्षयत्येष तं करिगिरिं समाश्रये ॥ ५ ॥ एष ईश इति निर्णयं त्रयी भागधेयरहितेषु नोदिशेत् । हस्तिधामनि न निर्णयेत को देवराजमयमीश्वरस्त्विति ॥ ६ ॥ हे कुदृष्ट्यभिनिविष्टचेतसां निर्विशेषसविशेषताश्रयम् । संशयं करिगिरिर्नुदत्यसौ तुङ्गमङ्गलगुणास्पदे हरौ ॥ ७ ॥ न्यायतर्कमुनिमुख्यभाषितैश्शोधितैस्सह कथञ्चन त्रयी । जोषयेद्धरिमनंहसो जनान् हस्तिधाम सकलं जनं स्वयम् ॥ ८ ॥ अद्भुतं महदसीमभूमकं किञ्चिदस्ति किल वस्तु निस्तुलम् । इत्यघोषि यदिदं तदग्रतस्तथ्यमेव करिधाम्नि दृश्यते ॥ ९ ॥ संवदेत किल यत्प्रमान्तरैस्तत्प्रमाणमिति ये हि मेनिरे । तन्मतेऽपि किल मानतां गता हस्तिनाऽद्य परवस्तुनि त्रयी ॥ १० ॥ गुणायत्तं लोके गुणिषु हि मतं मङ्गलपदं विपर्यस्तं हस्तिक्षितिधरपते ! तत्त्वयि पुनः । गुणास्सत्यज्ञानप्रभृतय उत त्वद्गततया शुभी-

भूयं याता इति हि निरणैष्म श्रुतिवशात् ॥ ११ ॥ निराबाधं नित्यं निरवधि निरंहो निरुपमं सदा शान्तं शुद्धं प्रतिभटमवद्यस्य सततम् । परं ब्रह्माम्नातं श्रुतिशिरसि यत्तद्वरद ! ते परं रूपं साक्षात्तदिदमपदं वाङ्मनसयोः ॥ १२ ॥ प्रशान्तानन्तात्मानुभवजमहानन्दमहिमप्रसक्तस्तैमित्यानुकृतवितरङ्गार्णवदशम् । परं यत्ते रूपं स्वसदृशदरिद्रं वरद ! तत्त्रयी पिस्प्रक्षन्ती परनिरसने श्राम्यति परम् ॥१३॥ न वक्तुं न श्रोतुं न मनितुमथोपासिसिषितुं न च द्रष्टुं स्प्रष्टुं तदनु न च भोक्तुं हि सुशकम् । परं यद्वस्तूक्तं ननु वरद ! साक्षात्तदसि भोः कथं विश्वस्मै त्वं करिगिरिपुरस्तिष्ठस इह ॥ १४ ॥ प्रकृष्टं विज्ञानं बलमतुलमैश्वर्यमखिलं विमर्यादं वीर्यं वरद ! परमा शक्तिरपि च । परं तेजश्चेति प्रवरगुणषट्कं प्रथमजं गुणानां निस्सीम्नां गणनविगुणानां प्रसवभूः ॥ १५ ॥ गुणैष्षड्भिस्त्वेतैः प्रथमतरमूर्तिस्तव बभौ ततस्तिस्रस्तेषां त्रियुग ! युगलैर्हि त्रिभिरभुः । व्यवस्था या चैषा ननु वरद ! साऽऽविष्कृतिवशाद्भवान् सर्वत्रैव त्वगणितमहामङ्गलगुणः ॥ १६ ॥ इयं वैयूही वै स्थितिरथ किलेच्छाविहृतये विभूतीनां मध्ये सुरनरतिरश्चामवतरन् । सजातीयस्तेषामिति तु विभवाख्यामपि भजन् करीश ! त्वं पूर्णो वरगुणगणैस्तान् स्थगयसि ॥ १७ ॥ परो वा व्यूहो वा विभव उत वाऽर्चावतरणो भवन् वाऽन्तर्यामी वरवरद ! यो यो भवसि वै । स स त्वं सन्नेशान् वरगुणगणान् बिभ्रदखिलान् भजद्भ्यो भास्येवं सततमितरेभ्यस्त्वितरथा ॥ १८ ॥ दयाक्षान्त्यौदार्यप्रदिमसमतासौहृदधृतिप्रसादप्रेमाज्ञाऽऽश्रितसुलभताद्या वरगुणाः । तथा सौन्दर्याद्यास्तव वरदराजोत्तमगुणाः विसीमानोऽसंख्याः प्रणतजनभोग्यं प्रसुवते ॥ १९ ॥ अनन्याधीनत्वं तव किल जगुर्वैदिकगिरः पराधीनं त्वां तु प्रणतपरतन्त्रं मनुमहे । उपालम्भोऽयं भोः श्रयति बत ! सार्वज्ञ्यमपि ते यतो दोषं भक्तेष्विह वरद ! नैवाकलयसि ॥ २० ॥ पाणिपादवदनेक्षण-

शब्दैरम्बुजान्यपदिशन् वरद ! त्वम् । बाहुभिस्त्वतिविशालतमालानाञ्जनं करिगिरेरसि भृङ्गम् ॥ २१ ॥ त्वामुदारभुजमुन्नसमायत्कर्णपाशपरिकर्मसदंसम् । आयताक्षमभिजातकपोलं पारणीयति वरप्रद ! दृङ्मे ॥ २२ ॥ नीलमेघनिभमञ्जनपुञ्जश्यामकुन्तलमनन्तशयं त्वाम् । अब्जपाणिपदमम्बुजनेत्रं नेत्रसात्कुरु करीश ! सदा मे ॥ २३ ॥ त्वक्च दृक्च निपिपासति जिह्वा विह्वला श्रवणवत्परवृत्तौ । नासिका त्वयि करीश ! तथेति प्राप्नुयां कथमिमां स्विदवस्थाम् ॥ २४ ॥ आधिराज्यमधिकं भुवनानामीश ! ते पिशुनयन् किल मौलिः । चूलिकामणिसहस्रमरीचैर्हस्तिभूषण ! भवत्युदयाद्रिः ॥ २५ ॥ उद्धरत्युपरि भक्तजनानित्यूर्ध्वताश्रयणसूचितशक्तिम् । ऊर्ध्वपुण्ड्रतिलकं बहुमानात्किं बिभर्षि वरद ! स्वललाटे ॥२६॥ कर्णिका तव करीश ! किमेषा कर्णभूषणमुतांसविभूषा । अंसलम्ब्यलकभूषणमाहो मानसस्य मम वा परिकर्म ॥ २७ ॥ पारिजातविटपानभितो या पुष्पसम्पदुदियात्करिनाथ ! । तां विडम्बयति तावकबाहुव्रातता तु कटकाङ्गदलक्ष्मीः ॥ २८ ॥ मथ्यमानचलफेनिलसिन्धुप्रोत्थितिक्षणदशां गमितौ ते । वक्षसि स्फुरितमौक्तिकहारे कौस्तुभश्च कमला च करीश ! ॥ २९ ॥ अञ्जनक्षितिभृतो यदि नामोपत्यका वरद ! हेममयी स्यात् । तादृशी तव विभाति तु लक्ष्मीराम्बरी वत ! विडम्बितविद्युत् ॥ ३० ॥ पारभागमियाद्ववेस्तमिस्रा वरदाद्य त्वयि तन्निशामयामः । गमिता तव वक्त्रचित्रभानोः परभागं ननु कौन्तली तमिस्रा ॥ ३१ ॥ उभयोरपि पक्षयोस्तिथिर्या विषमीभावनिरासदाऽष्टमीति । उपमानजसम्पदे हि सेन्दोर्वरदाभूद्भवतो ललाटलक्ष्म्या ॥ ३२ ॥ अलकालिचिकीर्षया किलात्ता सुपरीचिक्षिषया ललाटपट्टे । सुमषी निकषीकृता भ्रुवौ ते वरद ! स्यादकृतत्वतस्तु नैवम् ॥ ३३ ॥ श्रवसश्च दृशश्च शब्दरूपग्रहणे ते नहि जीववद्व्यवस्था । उभयोरखिलेक्षणक्षमत्वाद्वरदातः श्रवणाश्रये

दर्शौ ते ॥ ३४ ॥ करुणारसवाहिवीक्षणोर्मेर्वरद ! प्रेममयप्रवाह-भाजः । तततीरवनावली भ्रुवौ द्वञ्चलसिन्धोस्तव नासिकेव सेतुः ॥ ३५ ॥ विभवं विवृणोति विस्तृणीते रुचमाविष्कुरुते कृपामपाराम् । अभिवर्षति हर्षमार्द्रभावं तनुते ते वरदैष दृष्टिपातः ॥ ३६ ॥ अरुणाधरपल्लवे लसन्ती वरदासौ द्विजचन्द्रचन्द्रिका ते । अधिविद्रुममस्तनिस्तलालीरुचमाविष्कुरुते हि पुष्कराक्ष ! ॥ ३७ ॥ स्मितनिर्झरिका विनिष्पतन्ती तव वक्षःस्थलभूतले विकीर्णा । वरद ! प्रविभाति हारलक्ष्मीमपि मुक्तावलिका नदीव तज्जा ॥ ३८ ॥ परिमण्डितरासमण्डलाभिर्वरदाघ्रातमभीष्टगोपिकाभिः । अनुवर्तितदातनप्रहर्षादिव फुल्लं हि कपोलयोर्युगं ते ॥ ३९ ॥ मुखमुन्नसमायताक्षमुद्यत्स्मितदन्तं रुचिराधरं नतभ्रु । लसदंसविलम्बिकर्णपाशं मयि ते निश्चलमस्तु हस्तिनाथ ! ॥ ४० ॥ पद्मायाः प्रणयरसात्समासजन्त्यास्स्वं बाहुं सुबहुमतो भुजेन तेन । कां नामान्वभवद्हो ! दशां तदात्वे कण्ठस्ते करिगिरिनाथ ! कम्बुकान्तः ॥४१॥ सायामा धृतपरिणद्धयोऽधयो वा तादृश्यः स्फुटमथवा दिशश्चतस्रः । चत्वारो वरद ! वरप्रदास्त्वदीया भासन्ते भुजपरिघास्तमालनीलाः ॥ ४२ ॥ आश्लेषे वरद ! भुजास्तवेन्दिरायाः गोपीनामभिनतरासबन्धने वा । बन्धे वा मुदमधिकां यशोदयाऽहो सम्प्राप्तास्तव नवनीतमोषदोषात् ॥ ४३ ॥ सालीया इव विटपास्सपल्लवाग्राः कल्लोला इव जलधेस्सविद्रुमाग्राः । भोगीन्द्रा इव च फणामणीद्धवक्त्रा भासन्ते वरद ! भुजास्तवारुणाग्राः ॥ ४४ ॥ अम्भोधेस्त्वथमभिमन्थनं चकर्थ क्षोणीध्रं पुनरबिभश्च सप्तरात्रम् । सप्तानां विवलयसिस्म कण्ठमुक्ष्णामम्लाना वरद ! तथापि पाणयस्ते ॥ ४५ ॥ रिङ्खातो व्रजसदनाङ्गणेषु किं ते गोयष्टिग्रहणवशान्नु गोपगोष्ठ्याम् । आलम्बाद्ध्यनयसूत्रतोत्रयोर्वा पाणीनां वरद ! तवारुणत्वमासीत् ॥ ४६ ॥ सर्वज्ञास्समुचितशक्तयस्सदैव त्वत्सेवानियमजुषस्त्वदेक-

भोगाः । हेतीनामधिपतयस्सदा किमेतान् शोभार्थं वरद ! बिभर्षि हर्षतो वा ॥ ४७ ॥ किं धातुर्गगनविधानमातृकाऽभूद्वक्षस्ते वरद ! वरेण्य ! यत्र नाम । पद्मायाः मुखमथ कौस्तुभश्च जातौ चन्द्रार्का-बुडुनिकरायते तु हारः ॥ ४८ ॥ अण्डानां त्वदुदरमामनन्ति सन्तः स्थानं तद्वरद ! कथन्नु कार्श्यमस्य । माहात्म्यं स्वत इह येषु नून-मेषामृद्धिस्स्यान्महिमकरी न हीतरेषाम् ॥ ४९ ॥ सौन्दर्यामृतरस-वाहवेगजस्स्यादावर्तस्तत्र किल पद्मनाभनाभिः । तत्पद्मं वरद ! विभाति कान्तिमध्या लक्ष्म्यास्ते सकलवपुर्जुषो नु सद्म ॥ ५० ॥या दामोदर इति नामदा तवासीत्सा दामा किल किणकारिणीबभूव । तन्नूनं वरद ! वलित्रयच्छलेन त्वन्मध्यप्रथमविभूषणीबभूव ॥५१॥ शाद्गबीजाध्युषितभुवि यद्वस्तु हस्तीश ! जातं तत्तादृक्षं फलति हि फलं त्वय्यपीक्षामहे तत् । यस्मादण्डाध्युषित उदरे तावके जाय-मानं पद्मं पद्मानन ! किल फलत्यण्डषण्डानखण्डान् ॥५२॥ अङ्गे यज्ञे-श्वर ! किल जने काप्यदर्शि विमर्शि विश्वाधीशः कतम इति तन्निर्णयं वर्णयामः । व्याचक्रोशी नृषु समुदिता गात्रुपाश्रित्य तेऽपि ब्रह्माद्या-स्ते वरद ! जनितास्तुन्दकन्दारविन्दे ॥ ५३ ॥ मुष्णन्कृष्णः प्रिय-निजजनैर्जय्यहैयङ्गवीनं दाम्ना भूम्ना वरद ! हि यया त्वं यशोदाकराभ्याम् । बद्धो बन्धक्षपणकरणीं तां किल द्यापि मातुः प्रेम्णा गात्राभरणमुदराबन्धनाख्यं बिभर्षि ॥ ५४ ॥ सौन्दर्याख्या सरिदुरसि विस्तीर्य मध्यावरुद्धा स्थानाल्पत्वाद्विषमगतिजावर्तगर्ता-भनाभिः । प्राप्य प्राप्तप्रथिम जघनं विस्तृता हस्तिनाथ ! स्रोतो-भेदं भजति भवतः पाददेशापदेशात् ॥ ५५ ॥ रम्भास्तम्भाः करि-वरकराः कारभास्सारभाजो वेषाश्लेषा अपि मरकतस्तम्भमुख्यास्तु-लाख्याः । साम्यं सम्यग्वरद ! न दधुस्सर्वमुर्वोस्त्वदूर्वोर्न ह्यैश्वर्यं द[illegible]ति न तथा यौवनारम्भजृम्भाः ॥ ५६ ॥ या ते गात्रे वरद ! [illegible]निता कान्तिमय्यापगाऽभूत्तस्यास्स्रोतोयुगलमिह यद्याति पादप्र-

पादम् । तज्जातोर्ध्वभ्रमियुगमिवोद्भाजानुनी जानुनी ते स्यादुक्ष्णोर्वा ककुदयुगलं यौवनैश्वर्यनाम्नोः ॥ ५७ ॥ प्रेम्णाऽऽघ्रातुं करिगिरिशिरोऽधोमुखीभावभाजोरङ्घ्रिद्वन्द्वाह्वयकमलयोर्दण्डकाण्डायमाने । अद्रिस्पर्शोद्भवसुखत उत्कण्टके रोमहर्षाद्दृष्टुर्दृष्टिर्वरद ! किमलं लङ्घितुं जङ्घिके ते ॥ ५८ ॥ भक्तानां यद्वपुषि दहरं पण्डितं पुण्डरीकं यच्चाम्लानं वरद ! सतताध्यासनादासनाब्जम् । आम्नायानां यदपि च शिरो यश्च मूर्धा शठारेर्हस्त्यद्रेर्वा किमतिसुखदं तेषु पादाब्जयोस्ते ॥ ५९ ॥ पद्यास्वद्याङ्गुलिषु वरद ! प्रान्ततः कान्तिसिन्धोर्वीचीवीथीविभवसुभगीष्वम्भसो लम्भितासु । विन्दन्निन्दुः प्रतिफलनजां सम्पदं किं पदं ते छायाच्छन्ना नखविततितां लम्भितश्शुम्भितस्सन् ॥ ६० ॥ शम्भोरम्भोरुहसुख ! सखा सन् सहाङ्कश्शशाङ्कः कुर्वन्सेवां वरद ! विकलो वृत्तहीनस्सुवक्रः । त्वत्पादाब्जे प्रियमख ! नखच्छद्मनाऽऽश्रित्य नित्यं सद्वृत्तोऽभूत्स च दशगुणः पुष्कलो निष्कलङ्कः ॥ ६१ ॥ त्वत्पादाब्जे प्रजाता सुरसरिदभवत्प्राक् चतुर्धा ततस्तास्वेका धत्ते ध्रुवस्सा त्रिभुवनमपुनात्त्रीन्पथो भावयन्ती । तत्रैका खं व्रजन्ती शिवयति तु शिवं सा पुनस्सप्तधाऽभूत्तास्वेका गां पुनाना वरद ! सगरजस्वर्गसर्गं चकार ॥ ६२ ॥ परिजनपरिबर्हाभूषणान्यायुधानि प्रवरगुणगणाश्च ज्ञानशक्त्यादयस्ते । परमपदमथाण्डान्यात्मदेहस्तथात्मा वरद ! सकलमेतत्संश्रितार्थं चकर्थ ॥ ६३ ॥ अनाप्तं ह्याप्तव्यं न तव किल किञ्चिद्वरद ! ते जगज्जन्मस्थेमप्रलयविधयो धीविलसितम् । तथापि क्षोदीयस्सुरनरकुलेष्वाश्रितजनान्समाश्लेष्टुं पेष्टुं तदसुखकृतां चावतरसि ॥ ६४ ॥ विवेकधियमेकतो ह्यभिनिवेशलेशो हरेन्महत्त्वभिनिवेशनं किमुत तन्महिम्नस्तव । अहो ! विसदृशे जगत्यवततर्थ पार्थादिकं निजं जनमुदश्चयन्वरद ! तं समाश्लेषकः ॥ ६५ ॥ संश्लेषे भजतां त्वरापरवशः कालेन संशोध्य ताननीय स्वपदे स्वस-

ङ्गमकृतं सोढुं विलम्बं बत !। अक्षाम्यन् क्षमिणां वरो वरद ! सभ्र-त्रावतीर्णो भवेः किंनाम त्वमसंश्रितेषु वितरन् वेषं वृणीषे तु तान् ॥ ६६ ॥ वरद ! यदि न शुन्ध्यवातरिष्यश्श्रुतिविहितास्त्वदुपसनार्चनाद्याः । करणपथविदूरगे सति त्वयि अविषयतानिकृताः किलाभविष्यन् ॥ ६७॥ यदपराधसहस्रमजस्रजं त्वयि शरण्य ! हिरण्य उपावहत् । वरद ! तेन चिरं त्वमविक्रियो विकृतिमर्भकनिर्भजनादगाः ॥ ६८ ॥ त्वामामनन्ति कवयः करुणामृताब्धे ! ज्ञानक्रियाभजनलभ्यमलभ्यमन्यैः । एतेषु केन वरदोत्तरकोसलस्थाः पूर्वं सदूर्वमभजन्त हि जन्तवस्त्वाम् ॥ ६९ ॥ भजत्सु वात्सल्यवशात्समुत्सुकः प्रकाममत्रावतरेर्वरप्रद ! । भवेश्च तेषां सुलभोऽथ किन्त्विदं यदङ्गदाज्ञा नियतः पुराऽरुदः ॥ ७० ॥ नरसिंहतनुरगौणी समसमयसमुद्भवश्च भक्तगिरः । स्तम्भे च सम्भवस्ते पिशुनयति परेशतां वरद ! ॥ ७१ ॥ तापत्रयीमयदवानलदह्यमानं मुह्यन्तमन्तमवयन्तमनन्त ! नैव । स्नातुं प्रयातुमुपयातुमनीशमीश ! हस्तीश ! दृष्ट्यमृतवृष्टिभिराभजेथाः ॥ ७२ ॥ नानाविरुद्धविदिशासु दिशासु चाहो वन्ध्यैर्मनोरथशतैर्युगपद्विकृष्टः । त्वत्पादयोरनुदितस्पृह एष सोऽहं न स्वस्ति हस्तिगिरिनाथ ! निशामयामि ॥ ७३ ॥ हे निर्भयोऽस्म्यविनयोऽस्मि यतस्त्वदंघ्रौ लिप्सामलब्धवति चेतसि दुर्विनीते । दुष्कर्मवर्मपरिकर्मित एष सोऽहमग्रे वरप्रद ! तव प्रलपामि किञ्चित् ॥ ७४ ॥ सव्याधिराधिरवितुष्टिरनिष्टयोगस्स्वाभीष्टभञ्जनममर्षकरो निकर्षः । कृन्तन्ति सन्ततमिमानि मनो मदीयं हस्तीश ! न त्वदभिलाषनिधिप्रहाणिः ॥ ७५ ॥ विद्वेषमानमदरागविलोभमोहाद्याज्ञानभूमिरहमत्र भवे निमज्जन् । निर्द्वन्द्व ! नित्यनिरवद्यमहागुणं त्वां हस्तीश ! कश्रयितुमीक्षितुमीप्सितुं वा ॥७६॥ पुत्रादयः कथममी मयि संस्थिते स्युरित्यप्रतिक्रियनिरर्थकचिन्तनेन । दूये न तु स्वयमहं भवितास्मि कीदृगित्यस्ति हस्तिगिरिनाथ !

विमर्शलेशः ॥ ७७ ॥ शम्पाचलं बहुलदुःखमनर्थहेतुरल्पीय इत्यपि विमृष्टिषु दृष्टदोषम् । दुर्वासनादृढिमतस्सुखमिन्द्रियोत्थं हातुं न मे मतिरलं वरदाधिराज ! ॥ ७८ ॥ बुद्ध्वा च नो च विहिताकरणैर्निषिद्धसंसेवनैस्त्वदपचारशतैरसह्यैः । भक्तागसामपि शतैर्भवताऽप्यगण्यैर्हस्तीश ! वाक्तनुमनोजनितैर्हतोऽस्मि ॥ ७९ ॥ त्वद्दास्यमस्य हि मम स्वरसप्रसक्तं तच्चोरयन्नयमहं किल चस्खलं प्राक् । त्वं मामकीन इति मामभिमन्यसे स्म हस्तीश ! संशमय नस्तमिमं विवादम् ॥ ८० ॥ भोगा इमे विधिशिवादिपदं च किञ्च स्वात्मानुभूतिरिति या किल मुक्तिरुक्ता । सर्वं तदूषजलजोषमहं जुषेय हस्त्यद्रिनाथ ! तव दास्यमहारसज्ञः ॥ ८१ ॥ विषयविषधरव्रजव्याकुले जननमरणनक्रचक्रास्पदे । अगतिरशरणो भवाब्धौ लुठन् वरद ! शरणमित्यहं त्वां वृणे ॥ ८२ ॥ अकृतसुकृतकस्सुदुष्कृत्तरः शुभगुणलवलेशदेशातिगः । अशुभगुणपरस्सहस्रावृतो वरदगुरुदयं गतिं त्वां वृणे ॥ ८३ ॥ शरणवरणवागियं योदिता न भवति बत ! साऽपि धीपूर्विका । इति यदि दयनीयता मय्यहो ! वरद ! तव भवेत्ततः प्राणिमि ॥ ८४ ॥ निरवधिषु कृतेषु चागस्स्वहो ! मतिरनुशयिनी यदि स्यात्ततः । वरद ! हि दयसे न संशेमहे निरनुशयधियो हता हे ! वयम् ॥ ८५॥ शरणवरणवागियं याच मे वरद ! तदधिकं न किञ्चिन्मम । सुलभमभिमतार्थदं साधनं तदयमवसरो दयायास्तव ॥ ८६ ॥ विषयविषयिणी स्पृहा भूयसी तव तु चरणयोर्न साऽल्पापि मे । वरद ! ननु भरस्तवैव त्वयं यदुत तव पदस्पृहा जन्म मे ॥ ८७ ॥ इयमिह मतिरस्मदुज्जीवनी वरद ! तव खलु प्रसादादृते । शरणमिति वचोऽपि मे नोदियात्त्वमसि मयि ततः प्रसादोन्मुखः ॥ ८८ ॥ वरद ! यदिह वस्तु वाञ्छाम्यहं तव चरणलभाविरोधस्ततः । यदि न भवति तच्च देहि प्रभो ! झटिति वितर पादमेवान्यथा ॥ ८९ ॥ तदपि किमपि

हन्त ! दुर्वासनाशतविवशतया यदभ्यर्थये । तदतुलदय ! सार्व ! सर्वप्रद ! प्रवितर वरद ! क्षमाम्भोनिधे ! ॥ ९० ॥ प्रियमितरद्-थापि वा यद्यथा वितरसि वरदप्रभो ! त्वं हि मे । तदनुभवनमेव युक्तं तु मे त्वयि निहितभरोऽस्मि सोऽहं यतः ॥ ९१ ॥ यथासि यावानसि योऽसि यद्गुणः करीश ! यादृग्विभवो यदिङ्गितः । तथाविधं त्वाऽहमभक्तदुर्ग्रहं प्रपत्तिवाचैव निरीक्षितुं वृणे ॥ ९२ ॥ अये ! दयालो ! वरद ! क्षमानिधे ! विशेषतो विश्वजनीन ! वि-श्वद ! । हितज्ञ ! सर्वज्ञ ! समग्रशक्तिक ! प्रसह्य मां प्रापय दा-स्यमेव ते ॥ ९३ ॥ स्वकैर्गुणैस्स्वैश्चरितैस्स्ववेदनाद्भजन्ति ये त्वां त्वयि भक्तितोऽथवा । करीश ! तेषामपि तावकी दया तथात्वकृत्-सैव तु मे बलं मतम् ॥ ९४ ॥ यदि त्वभक्तोऽप्यगुणोऽपि निष्क्रि-यो निरुद्यमो निष्कृतदुष्कृतो न च । लभेय पादौ वरद ! स्फुटा-स्ततः क्षमादयाद्यास्तव मङ्गला गुणाः ॥ ९५ ॥ विलोकनैर्विभ्रम-णैरपि भ्रुवोः स्मितामृतैरिङ्गितमङ्गलैरपि । प्रचोदितस्ते वरद ! प्रहृष्टधीः कदा विधास्ये वरिवस्यनं तव ॥ ९६ ॥ विविश्य विश्वे-न्द्रियतर्षकर्षणीर्मनःस्थले नित्यनिखातनिश्चलाः । सुधासखीर्ह-स्तिपते ! सुशीतलाः गिरः श्रवस्याऽशृणुयाम तावकीः ॥ ९७ ॥ अशेषदेशाखिलकालयोगिनीष्वहं त्ववस्थास्वखिलास्वनन्यधीः । अ-शेषदास्यैकरतिस्तदाचरन् करीश ! वर्तेय सदा त्वदन्तिके ॥ ९८ ॥ इमं जनं हन्त ! कदाऽभिपेक्ष्यति त्वदक्षिनद्योर्वरद ! श्रमापहा । अकृत्रिमप्रेमरसप्रवाहजा विसृत्वरी वीक्षणवीचिसन्ततिः ॥ ९९ ॥ सदातनत्वेऽपि तदातनत्ववन्नवीभवत्प्रेमरसप्रवाहया । निषेवितं त्वां सततोत्कया श्रिया करीश ! पश्येम परश्शतं समाः ॥ १०० ॥ समाहितैस्साधु सनन्दनादिभिस्सुदुर्लभं भक्तजनैरदुर्लभम् । अचि-न्त्यमत्यद्भुतमप्रतर्क्यणं वरप्रद ! त्वत्पदमाप्नुयां कथम् ॥ १०१ ॥

रामानुजांघ्रिशरणोऽसि कुलप्रदीपस्त्वासीत्स यामुनमुनेस्स च नाथवंश्यः । वंश्यः पराङ्कुशमुनेस्स च सोऽपि देव्याः दासस्तवेति वरदासि तवेक्षणीयः ॥ १०२ ॥

पञ्चस्तव्यां वरदराजस्तवस्समाप्तः ॥

—०—

श्रीश्रीवत्सचिह्नमिश्रैरनुगृहीतायां पञ्चस्तव्यां

श्रीस्तवः ।

श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

स्वस्ति श्रीर्दिशतादशेषजगतां सर्गोपसर्गस्थितीः स्वर्गं दुर्गतिमापवर्गिकपदं सर्वं च कुर्वन् हरिः । यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलं क्रीडेयं खलु नान्यथाऽस्य रसदा स्यादैकरस्यात्तया ॥ १ ॥ हे श्रीर्देवि ! समस्तलोकजननीं त्वां स्तोतुमीहामहे युक्तां भावय भारतीं प्रगुणय प्रेमप्रधानां धियम् । भक्तिं भन्दय नन्दयाश्रितमिमं दासं जनं तावकं लक्ष्यं लक्ष्मि ! कटाक्षवीचिविसृतेस्ते स्याम चामी वयम् ॥ २ ॥ स्तोत्रंनाम किमामनन्ति कवयो यद्यन्यदीयान्गुणानन्यत्र त्वसतोऽधिरोप्य फणितिस्सा तर्हि वन्ध्या त्वयि । सम्यक्सत्यगुणाभिवर्णनमथो ब्रूयुः कथं तादृशी वाग्वाचस्पतिनापि शक्यरचना त्वत्सद्गुणार्णोनिधौ ॥ ३ ॥ ये वाचां मनसां च दुर्ग्रहतया ख्याता गुणास्तावकास्तानेव प्रति साम्बुजिह्वमुदिता हे ! मामिका भारती । हास्यं तत्तु न मन्महे न हि चकोर्येकाऽखिलां चन्द्रिकां नालं पातुमिति प्रगृह्य रसनामासीत सत्यां तृषि ॥ ४ ॥ क्षोदीयानपि दुष्टबुद्धिरपि निस्स्नेहोऽप्यनीहोऽपि ते कीर्तिं देवि ! लिहन्नहं न च बिभेम्यज्ञो न जिह्रेमि च । दुष्येत्सा

तु न तावता न हि शुना लीढापि भागीरथी दुष्येच्छ्वाऽपि न लज्जते न च बिभेत्यार्तिस्तु शाम्येच्छुनः ॥ ५ ॥ ऐश्वर्यं महदेव वाऽल्पमथवा दृश्येत पुंसां हि यत्तल्लक्ष्म्यास्समुदीक्षणात्तव यतस्सार्वत्रिकं वर्तते । तेनैतेन न विस्मयेमहि जगन्नाथोऽपि नारायणो धन्यं मन्यत ईक्षणात्तव यतस्त्वात्मानमात्मेश्वरः ॥ ६ ॥ ऐश्वर्यं यदशेषपुंसि यदिदं सौन्दर्यलावण्ययोः रूपं यच्च हि मङ्गलं किमपि यल्लोके सदित्युच्यते । तत्सर्वं त्वदधीनमेव यदतः श्रीरित्यभेदेन वा यद्वा श्रीमदितीदृशेन वचसा देवि ! प्रथामश्नुते ॥ ७ ॥ देवि ! त्वन्महिमावधिर्न हरिणा नापि त्वया ज्ञायते यद्यप्येवमथापि नैव युवयोस्सर्वज्ञता हीयते । यन्नास्त्येव तदज्ञतामनुगुणां सर्वज्ञताया विदुर्व्योमाम्भोजमिदन्तया किल विदन् भ्रान्तोऽयमित्युच्यते ॥ ८ ॥ लोके वनस्पतिबृहस्पतितारतम्यं यस्याः प्रसादपरिणाममुदाहरन्ति । सा भारती भगवती तु यदीयदासी तां देवदेवमहिषीं श्रियमाश्रयामः ॥ ९ ॥ यस्याः कटाक्षमृदुवीक्षणदीक्षणेन सद्यस्समुल्लसितपल्लवमुल्ललास । विश्वं विपर्ययसमुत्थविपर्ययं प्राक् तां देवदेवमहीषीं श्रियमाश्रयामः ॥ १० ॥ यस्याः कटाक्षवीक्षाक्षणलक्षं लक्षिता महेशास्स्युः । श्रीरङ्गराजमहिषी सा मामपि वीक्षतां लक्ष्मीः ॥ ११ ॥

अर्वाञ्चो यत्पदसरसिजद्वन्द्वमाश्रित्य पूर्वे
मूर्ध्ना यस्यान्वयमुपगता देशिका मुक्तिमापुः ।
सोऽयं रामानुजमुनिरपि स्वीयमुक्तिं करस्थां
यत्संबन्धादमनुत कथं वर्ण्यते कूरनाथः ॥

पञ्चस्तव्यां श्रीस्तवस्समाप्तः

॥ पञ्चस्तवी च समाप्ता ॥



श्रीपराशरभट्टार्यैरनुगृहीते

श्रीरंगराजस्तवे पूर्वशतकम् ।

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतश्श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे । यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥ १ ॥ रामानुजपदच्छाया गोविन्दाह्वाऽनपायिनी । तदायत्तस्वरूपा सा जीयान्मद्विश्रमस्थली ॥ २ ॥ रामानुजमुनिर्जीयाद्यो हरेर्भक्तियन्त्रितात् । कलिकोलाहलक्रीडामुधाग्रहमपाहरत् ॥ ३ ॥ विधाय वैदिकं मार्गमकौतुस्कुतकण्टकम् । नेतारं भगवद्भक्तेर्यामुनं मनवामहे ॥ ४ ॥ नौमि नाथमुनिं नाम जीमूतं भक्त्यवग्रहे । वैराग्यभगवत्तत्त्वज्ञानभक्त्यभिवर्षुकम् ॥ ५ ॥ ऋषिं जुषामहे कृष्णतृष्णातत्त्वमिवोदितम् । सहस्रशाखां योऽद्राक्षीद्द्राविडीं ब्रह्मसंहिताम् ॥ ६ ॥ नमः श्रीरङ्गनायक्यै यद्भ्रूविभ्रमभेदतः । ईशेशितव्यवैषम्यनिम्नोन्नतमिदं जगत् ॥ ७ ॥ श्रीस्तनाभरणं तेजः श्रीरङ्गेशयमाश्रये । चिन्तामणिमिवोद्वान्तमुत्सङ्गेऽनन्तभोगिनः ॥ ८ ॥ अस्ति वस्त्विदमित्थन्त्वप्रसंख्यानपराङ्मुखम् । श्रीमत्यायतने लक्ष्मीपदलाक्षैकलक्षणम् ॥ ९ ॥ लक्ष्मीकल्पलतोत्तुङ्गस्तनस्तबकचञ्चलः । श्रीरङ्गराजभृङ्गो मे रमतां मानसाम्बुजे ॥ १० ॥ स्वस्ति श्रीस्तनकस्तूरीमकरीमुद्रितोरसः । श्रीरङ्गराजाच्छरदश्शतमाशास्महेतराम् ॥ ११ ॥ पातु प्रणतरक्षायां विलम्बमसहन्निव । सदा पञ्चायुधीं बिभ्रत्स नः श्रीरङ्गनायकः ॥ १२ ॥ अमतं मतं मतमथामतं स्तुतं परिनिन्दितं भवति निन्दितं स्तुतम् । इति रङ्गराजमुदजूघुषत्त्रयी स्तुमहे वयं किमिति तन्न शक्नुमः ॥ १३ ॥ यदि मे सहस्रवदनादिवैभवं निजमर्पयेत्स किल रङ्गचन्द्रमाः । अथ

शेषवन्मम च तद्वदेव वा स्तुतिशक्त्यभावविभवेऽपि भागिता॥१४॥ सो अङ्ग ! वेद यदि वा न किलेति वेदस्सन्देग्ध्यनर्घचिदमात्मनि रङ्गनाथम् । स्थाने यदेष खलु दोषमलीमसाभिर्मद्वाग्भिरेशमतिशायनमावृणोति ॥ १५ ॥ स्वं संस्कृतद्राविडवेदसूक्तैर्भान्तं मदुक्तैर्मलिनीकरोति । श्रीरङ्गकम्रः कलभं क एव स्नात्वापि धूळीरसिकं निषेद्धा ॥ १६ ॥ किन्तु प्रपत्तिबलतारितविष्णुमायमद्वंश्यराजकुलदुर्ललितं किलैवम् । श्रीरङ्गराजकमलापदलालितत्वं यद्वाऽपराध्यति मम स्तुतिसाहसेऽस्मिन् ॥ १७ ॥ नाथस्य च स्वमहिमार्णवपारदृश्वविज्ञानवाग्विलसितं सहते न वेदः । आपेक्षिकं यदि तदस्ति ममापि तेन श्रीरङ्गिणस्स्तुतिविधावहमध्यकार्षम् ॥ १८ ॥ अन्यत्रातद्गुणोक्तिर्भगवति न तदुत्कर्षचौर्यैः परेषां स्तुत्यत्वाद्यावदर्थो फणितिरपि तथा तस्य निस्सीमकत्वात् । आम्नायानामसीम्नामपि हरिविभवे वर्षबिन्दोरिवाब्धौ सम्बन्धात्स्वात्मलाभो न तु कवलनतः स्तोतुरेवं न किं मे ॥ १९ ॥ कावेरीमवगाहिषीय भगवद्भोगान्तरायीभवत्कर्मक्लेशफलाशयप्रशमनोद्वेलामलस्रोतसम् । जन्तोस्संसरतोऽर्चिरादिसरणिव्यासङ्गभङ्गाय या लोकेऽस्मिन् विरजेव वेल्लितजला श्रीरङ्गमालिङ्गति ॥ २० ॥ दुग्धाब्धिर्जनको जनन्यहमियं श्रीरेव पुत्री वरश्श्रीरङ्गेश्वर एतदर्हमिह किं कुर्यामितीवाकुला । चञ्चच्चामरचन्द्रचन्दनमहामाणिक्यमुक्तोत्करान् कावेरी लहरीकरैर्विदधती पर्येति सा सेव्यताम् ॥ २१ ॥ तीर्थं शुन्धति पाति नन्दनतरून् रथ्याङ्गणान्युक्षति स्नानीयार्हणपानवारि वहति स्नातः पुनीते जनान् । श्यामं वेदरहो व्यनक्ति पुलिने फेनैर्हसन्तीव तद्गङ्गां विष्णुपदीत्वमात्रमुखरां हेमापगा हन्त्वघम् ॥ २२ ॥ अगणितगुणावद्यं सर्वं स्थिरत्रसमप्रतिक्रियमपि पयःपूरैराप्याययन्त्यनुजाग्रती । प्रवहति जगद्धात्री भूत्वेव रङ्गपतेर्दया शिशिरमधुराऽगाधा सा नः पुनातु मरुद्वृधा ॥ २३ ॥

तरलतनुतरङ्गैर्मन्दमान्दोल्यमानस्वतटविटपिराजीमञ्जरीसुप्तभृङ्गा ।
क्षिपतु कनकनाम्नी निम्नगा नारिकेलक्रमुकजमकरन्दैर्मांसलापा मदंहः
॥ २४ ॥ कदलवकुलजम्बूपूगमाकन्दकण्ठद्वयससरसनीरामन्तरां स-
ह्यकन्याम् । प्रबलजलपिपासालम्बमानाम्बुदौघभ्रमकरतरुबृन्दं वन्द्य-
तामन्तरीपम् ॥ २५ ॥ यद्विष्णोः पदमतमः परोरजोऽग्र्यं मुक्ता-
नामनुविरजं विदीप्रमाहुः । तत्पुण्यं पुलिनमिदन्तयाद्य मध्येकावेरि
स्फुरति तदीक्षिषीय नित्यम् ॥ २६ ॥ अत्यन्तप्रहतिमतीषु वैष्णवानां
प्राप्यासु प्रचुरभवश्रमापहासु । कावेरीपरिचरितासु पावनीषु श्री-
रङ्गोपवनतटीषु वर्तिषीय ॥ २७ ॥ स्फुरितशफरदीर्घनालिकेरीगु-
लुच्छप्रसृमरमधुकुल्यावर्धितानोकहानि । रतिमविरति रङ्गारामरम्य-
स्थलानि क्रमुकपनसमोचामेचकानि क्रियासुः ॥ २८ ॥ अधिपरम-
पदं पुरीमयोध्याममृतवृतामपराजितामुशन्ति । पुलिनमुपरि रङ्गरा-
जधानी पिशितदृशामपि सा पुरश्चकास्ति ॥ २९ ॥ भवपदमपि
दिव्यधाम कर्तुं तदुभयतन्त्रितहर्म्यमालिकेव । भवनमणितलैर्विजृ-
म्भमाणा जयतितरामिह रङ्गराजधानी ॥ ३० ॥ मणिमकररुचीर्वि-
तत्य पाशान् विसृमरकेतुकरैर्मृगं हिमांशोः । श्रिय इव नवकेलये जि-
घृक्षुस्सुखयतु रङ्गपुरी चकासती नः ॥ ३१ ॥ जनपदसरिदन्तरी-
पपुष्यत्पुरपरिपालननित्यजागरूकान् । प्रहरणपरिवारवाहनाढ्यान्
कुमुदमुखान् गणनायकान् नमामि ॥ ३२ ॥ अहृतसहजदास्या
स्सूरयस्स्रस्तबन्धा विमलचरमदेहा इत्यमी रङ्गधाम । महितमनुज-
तिर्यक्स्थावरत्वाश्श्रयन्ते सुनियतमिति ह स्म प्राहुरेभ्यो नमः स्तात्
॥ ३३ ॥ श्रीरङ्गदिव्यभवनं भुवि गोपुराणां प्राकारितेन निकरेण
गरुत्मतेव । पार्श्वप्रसारितपतत्त्रपुटेन भक्त्या नानातनूभिरुपगूढमुप-
श्रयामः ॥ ३४ ॥ प्राकारमध्याजिरमण्टपोक्त्या सद्वीपरत्नाकररत्न-
शैला । सर्वंसहा रङ्गविमानसेवां प्राप्तेव तन्मन्दिरमाविरस्ति ॥३५॥
जितबाह्यजिनादिमणिप्रतिमा अपि वैदिकयन्त्रित रङ्गपुरे । मणि-

मण्टपवप्रगणान् विदधे परकालकविः प्रणमेमहि तान् ॥ ३६ ॥ स्मेराननाक्षिकमलैर्नमतः पुनानान् दंष्ट्रागदाभ्रुकुटिभिर्द्विषतो धुनानान् । चण्डप्रचण्डमुखतः प्रणमामि रङ्गद्वारावलीषु चतसृष्वधिकारभाजः ॥ ३७ ॥ सर्वात्मसाधारणनाथगोष्ठीपूरेऽपि दुष्पूरमहावकाशम् । आस्थानमानन्दमयं सहस्रस्थूणादिनाऽऽम्नातमवाप्नवानि ॥ ३८ ॥ विहरति हरौ लक्ष्म्या लीलातत्रपरिष्क्रियया विनिमयविधासूनासूनिक्रियासफलोत्पलाम् । अथ मुनिमनःपद्मेष्वब्जासहायविहारजश्रमहरतटीं यामस्तामैन्दवीमरविन्दिनीम् ॥ ३९ ॥ तापत्रयीमैन्दवपुष्करिण्यां निमज्ज्य निर्वापयिताऽस्मि यस्याः । अभ्यासतोऽपामघमर्षणीनां चन्द्रस्सुधादीधितितामवाप ॥ ४० ॥ पूर्वेण तां तद्वदुदारनिम्नप्रसन्नशीताशयमम्बनाथाः । पराङ्कुशाद्याः प्रथमे पुमांसो निषेदिवांसो दश मां दयेरन् ॥ ४१ ॥ आधारशक्तिमुपरि प्रकृतिं परेण तां कूर्ममत्र फणिनं पृथिवीं फणासु । पृथ्व्यां पयोधिमधितन्नलिनं निधाय श्रीरङ्गधाम सुनिविष्टमभिष्टवानि ॥ ४२ ॥ परेण नाकं पुरि हेममय्यां यो ब्रह्मकोशोऽस्त्यपराजिताख्यः । श्रीरङ्गनाम्ना तमपौरुषेयं विमानराजं भुवि भावयानि ॥ ४३ ॥ अनाघ्रातत्वात्पुरुषरचनादोषरहितं जने तांस्तान् कामान् विदधदपि सायुज्यहृदयम् । असन्देहाभ्यासं भगवदुपलम्भस्थलममी प्रतीमः श्रीरङ्गं श्रुतिशतसमानर्द्धि शरणम् ॥ ४४ ॥ अपि फणिपतिभावाच्छुभ्रमन्तश्शयालोर्मरकतसुकुमारैः रङ्गभर्तुर्मयूखैः । सकलजलधिपानश्यामजीमूतजैत्रं पुलकयति विमानं पावनं लोचने नः ॥ ४५ ॥ व्यापि रूपमपि गोष्पदयित्वा भक्तवत्सलतयोज्झितवेलम् । तद्द्विषन्तपनृकेसरिरूपं गोपुरोपरि विजृम्भितमीडे ॥ ४६ ॥ अहमलमत्रलम्बस्सीदतामित्यजस्रं निवसदुपरिभागे गोपुरं रङ्गधाम्नः । क्वचन नृपरिपाटीवासितं क्वापि सिंहक्रमसुरभितमेकं ज्योतिरग्रे चकास्ति ॥४७॥ संशोध्य पावनमनोहरदृष्टिपातैर्देवाय मामपि निवेदयतां गुरूणाम् ।

सव्योत्तरे भगवतोऽस्य कटाक्षवीक्षापङ्क्तिं प्रपद्य परितः परितो भवेयम् ॥ ४८ ॥ श्रीरङ्गराजकरनन्दितशाखिकाभ्यो लक्ष्म्या स्वहस्तकलितश्रवणावतंसम् । पुन्नागतल्लजमजस्रसहस्रगीतिसेकोत्थदिव्यनिजसौरभमामनामः ॥४९॥ श्रीरङ्गचन्द्रमसमिन्दिरया विहर्तुं विन्यस्य विश्वचिदचिन्नयनाधिकारम् । यो निर्वहत्यनिशमङ्गुलिमुद्रयैव सेनान्यमन्यविमुखास्तमशिश्रियाम ॥ ५० ॥ सैन्यधुरीणप्राणसहायां सूत्रवतीमाशिश्रियमम्बाम् । श्रीपदलाक्षालाञ्छितसेवाप्रोतलसद्दोर्वल्लिविलासाम् ॥ ५१ ॥ विदधतु सुखं विष्वक्सेनस्य ते प्रथमे भटाः करिमुखजयत्सेनौ कालाह्वसिंहमुखौ च नः । जगति भजतां तत्तत्प्रत्यूहतूलदवानलाः दिशिदिशि दिवारात्रं श्रीरङ्गपालनकर्मठाः ॥५२॥ श्रुतिमयमतिहर्षप्रश्रयस्मेरवक्त्रं मणिमुकुरमिवाग्रे मङ्गलं रङ्गधाम्नः । शरणमभिगताः स्मो यत्र रूपस्वरूपस्वगुणमहिमदर्शी मोदते रङ्गशायी ॥५३॥ तार्क्ष्यपक्षतिवदस्य वल्लभां रुद्रया सह सुकीर्तिमर्चये । हर्षबाष्पमपि कीर्तिमर्थिनां यन्मुखेन कमला कटाक्षयेत् ॥५४॥ स्वात्मरूपस्फुरन्मौळिं मा शब्द इत्युङ्गुनानान् सुरांस्तर्जनीमुद्रयानाथनिद्रोचितोन्निद्रताप्रेक्षणां सञ्चरन्तीं स्तुमस्तां च पञ्चायुधीम् ॥५५॥ अस्त्रग्रामाग्रेसरं नाथवीक्षाशीधुक्षीबोद्वेलनृत्ताभिरामम् । चक्रं दैत्यच्छेदकल्माषिताङ्गं भ्राम्यज्ज्वालामालभारि प्रपद्ये ॥५६॥ हनुभूषविभीषणयोः स्वां यतमाविह मोक्षमुपेक्ष्य । रघुनायकनिष्क्रियभूतं भुवि रङ्गधनं रमयेते ॥ ५७ ॥ इतो बहिः पञ्च पराञ्चि खानि प्रत्यञ्चि तानि स्युरितोऽन्तरित्थम् । औपाधिकेभ्यो निरुपाधिभोग्ये प्रत्याहरद्वेत्रवरं व्रजामि ॥ ५८ ॥ शेषशयलोचनामृतनदीरयाकुलितलोलमानानाम् । आलम्बमिवामोदस्तम्भद्वयमन्तरङ्गमभियामः ॥ ५९ ॥ श्रीरङ्गान्तर्मन्दिरं दीप्रशेषं श्रीभूमीतद्रम्यजामातृगर्भम् । पश्येम श्रीदिव्यमाणिक्यभूषामञ्जूषायास्तुल्यमुन्मीलितायाः ॥६०॥ लीलालताकृपाणीभृङ्गारपतद्ग्रहार्पितकराग्राः । प्रोतावतंसितकुचाः

पदाब्जसंवाहिनीर्वयं स्तुमहे ॥ ६१ ॥ मुकुलितनलिनास्सकौमुदीका इव सुनिशा विमलांदिका नवापि । शिरसिकृतनमस्यदेकहस्ता इतरकरोच्चलचामरा: श्रयेयम् ॥ ६२ ॥ उत्फुल्लपङ्कजतटाकमिवोपयानि श्रीरङ्गराजमिह दक्षिणसव्यसीम्नो: । लक्ष्मीं विहाररसिकामिव राजहंसीं छायामिवाभ्युदयिनीमवनीं च तस्या: ॥ ६३ ॥ पिब नयन ! पुरस्ते रङ्गधुर्याभिधानं स्थितमिव परिफुल्लत्पुण्डरीकं तटाकम् । श्रियमपि विहरन्तीं राजहंसीमिवास्मिन् प्रतिफलनमिवास्या: पश्य विश्वंभरां च ॥ ६४ ॥ सौशील्यशीतलमवेलकृपातरङ्गसंप्लाविताखिलमकृत्रिमभूम निम्नम् । लक्ष्म्या च वासितमभूम विगाहमाना: श्रीरङ्गराजमिपपद्मसर: प्रसन्नम् ॥ ६५ ॥ सिंहासने कमलया क्षमया च विश्वमेकातपत्रयितुमस्मदसून्निपण्णम् । लक्ष्मीस्वयंवरसनाथितयौवनश्रीसौन्दर्यसम्पदवलिप्तमिवालिहीय ॥ ६६ ॥ आपादमूलमणिमौलि समुल्लसन्त्या स्वातन्त्र्यसौहृदतरङ्गितयाऽङ्गभङ्ग्या । सख्यं समस्तजनचेतसि सन्दधानं श्रीरङ्गराजमनिमेषमनुस्मियास्म ॥ ६७ ॥ क्षितिकमलनिवासाकल्पवल्लीसलीलोल्लुठनदशदिशोद्यद्यौवनारम्भजृम्भ: । श्रममपहरतां मे रङ्गधामेति तत्तद्रमयफलनम्र: पत्रल: पारिजात: ॥ ६८ ॥ संभाषमाणमिव सर्ववशंवदेन मन्दस्मितेन मधुरेण च वीक्षणेन । दिव्यास्त्रपुष्पितचतुर्भुजमत्युदारं रङ्गास्पदं मम शुभाश्रयमाश्रयाणि ॥ ६९ ॥ एते शङ्खगदासुदर्शनभृत: क्षेमङ्करा बाहव: पादद्वन्द्वमिदं शरण्यमभयं भद्रं च वो हे जना: !। इत्यूचुष्यभयङ्करे करतले सेरेग वक्त्रेण तद् व्याकुर्वन्निव निर्वहेन्मम धुरं श्रीरङ्गसर्वंसह: ॥ ७० ॥ अङ्गैरहंप्रथमिकाचरितात्मदानैरामोदमाननवयौवनसावलेपै: । हे ! पारिजातमिव नूतनतायमानं शाश्वतं कथमधीमहि रङ्गधुर्यम् ॥ ७१ ॥ आलोका हृदयालवो रसवशादीशानमीषत्स्मितं प्रच्छायानि वचांसि पद्मनिलयाचेतश्शरव्यं वपु: । चक्षुष्मन्ति, गतागतानि त इमे श्री-

रङ्गभृङ्गार ! ते भावा यौवनगन्धिनः किमपरं सिञ्चन्ति चेतांसि नः ॥ ७२ ॥ आयत्किरीटमलिकोल्लसदूर्ध्वपुण्ड्रमाकर्णलोचनमनङ्कुशकर्णपाशम् । उत्फुल्लवक्षसमुदायुधबाहुमर्हन्नीविं च रङ्गपतिमब्जपदं भजामः ॥ ७३ ॥ अब्जन्यस्तपदाब्जमञ्चितकटीसंवादिकौशेयकं किञ्चित्ताण्डवगन्धिसंहननकं निर्व्याजमन्दस्मितम् । चूडाचुम्बिमुखाम्बुजं निजभुजाविश्रान्तदिव्यायुधं श्रीरङ्गे शरदश्शतं तत इतः पश्येम लक्ष्मीसखम् ॥ ७४ ॥ अग्रे तार्क्ष्येण पश्चादहिपतिशयनेनात्मना पार्श्वयोश्च श्रीभूमिभ्यामतृप्त्या नयनचुलकनैस्सेव्यमानामृतौघम् । वक्त्रेणाविःस्मितेन स्फुरदभयगदाशङ्खचक्रैर्भुजाग्रैर्विश्वस्मै तिष्ठमानं शरणमशरणा रङ्गराजं भजामः ॥ ७५ ॥ आर्तापाश्रयमर्थिकल्पकमसह्यागस्करक्ष्मातलं सद्यस्संश्रितकामधेनुमभियत्सर्वस्वमस्त्रद्रुमम् । श्रीरङ्गेश्वरमाश्रयेम कमलाचक्षुर्महीजीवितं श्रीरङ्गे स सुखाकरोतु सुचिरं दास्यं च धत्तां मयि ॥ ७६ ॥ स्वफणवितानदीप्रमणिमालि सुदामरुचिप्रदिमसुगन्धिभोगसुखशायितरङ्गधनम् । मदभरमन्थरोच्छ्वसितनिश्श्वसितोत्तरलं फणिपतिडोलिकातलिममाश्वसिमः प्रणताः ॥ ७७ ॥ वटदलदेवकीजठरवेदशिरःकमलास्तनशठकोपवाग्वपुषि रङ्गगृहे शयितम् । वरदमुदारदीर्घभुजलोचनसंहननं पुरुषमुपासिषीय परमं प्रणतार्तिहरम् ॥ ७८ ॥ उदधिपरमव्योम्नोर्विस्मृत्य पत्रचनालयाविनिमयमयीं निद्रां श्रीरङ्गनामनि धामनि । फणिपरिवृढस्फारश्वासनिश्श्वसितक्रमस्खलितनयनं तन्वन् मन्वीत नः परमः पुमान् ॥ ७९ ॥ जलधिमिव निपीतं नीरदेनाद्रिमध्यौ निहितमिव शयानं कुञ्जरं वाऽद्रिकुञ्जे । कमलपदकराक्षं मेचकं धाम्नि नीले फणिनमधिशयानं पूरुषं वन्दिषीय ॥ ८० ॥ श्रीरङ्गेशय इह शर्म निर्मिमीतामाताम्राधरपदपाणिविद्रुमो नः । कावेरीलहरिकरोपलाल्यमानो गम्भीराङ्कुत इव तर्णकोऽर्णवस्य ॥ ८१ ॥ सिञ्चेदिमं च जनमिन्दिरया तटित्वान्

भूषामणिद्युतिभिरिन्द्रधनुर्दधानः । श्रीरङ्गधामनि दयारसनिर्भरत्वा-दद्रौ शयालुरिव शीतलकालमेघः ॥८२॥ आमौलिरत्नमकरात्पुनरा च पद्भ्यां धामक्रमोन्नमदुदारमनोहराङ्गम् । श्रीरङ्गशेषशयनं नयनैः पिबामः पश्यन्मनःश्रवणसोघमिवामृतस्य ॥ ८३ ॥ अरविन्दित-मंघ्रिपाणिवक्त्रैरपि तापिञ्छितमश्चिताङ्गकान्त्या । अधरेण च बन्धुजीवितं श्रीः नियतं नन्दनयेत रङ्गचन्द्रम् ॥ ८४ ॥ अन्योन्य-रञ्जकरुचोऽनुपमानशोभाः दिव्यस्रगम्बरपरिष्करणाङ्गरागाः । संस्पर्शतः पुलकिता इव चिन्मयत्वाद्रङ्गेन्दुकान्तिमधिकामुपबृंहयन्ति ॥ ८५ ॥ द्रुतकनकजगेरिपरिमिलदुदधिप्रचलितलहरिवदहमहमि-कया । स्नपयति जनमिममपहरति तमः फणिशयमरकतमणिकि-रणगणः ॥ ८६ ॥ भोगीन्द्रनिःश्वसितसौरभवर्धितं श्रीनित्यानुषक्त-परमेश्वरभावगन्धि । सौरभ्यमाप्लुतदिशावधि रङ्गनेतुरानन्दसंपदि निमज्जयते मनांसि ॥ ८७ ॥ रङ्गभर्तुरपि लोचनचर्चां साहसाव-लिपु लेखयमानम् । पुष्पहास इति नाम दुहानं सौकुमार्यमतिवा-ङ्मनसं नः ॥ ८८ ॥ एकैकस्मिन्परमवयवेऽनन्तसौन्दर्यभग्नं सर्वं द्रक्ष्ये कथमिति मुधा मामथः सन्दचक्षुः ॥ तां सौभ्रात्रव्यतिकरकरं रङ्गराजाङ्गकानां तल्लावण्यं परिणमयिता विश्वपारीणवृत्ति ॥ ८९ ॥ वपुर्मन्दारस्य प्रथमकुसुमोद्भासमयः क्षमालक्ष्मीभृङ्गीसकलकरणो-न्मादनमधु । निकासस्सौन्दर्यं लजि रसिकताशीधुचुलको युवत्वं रङ्गेन्दोस्सुरभयति नित्यं सुभगताम् ॥ ९० ॥ किरीटचूडरत्नराजि-राधिराज्यजल्पिका । मुखेन्दुकान्तिरुन्मुखं तरङ्गितेव रङ्गिणः॥९१॥ शिखारत्नोद्दीप्रं दिशिदिशि च माणिक्यमकरीलसच्छ्रृङ्गं रङ्गप्रभु-मणिकिरीटं मनुमहे । समुत्तङ्गस्फीतं चिदचिदधिराज्याश्रिय इव प्रिया-क्रीडं चूडामणिमपि नितम्बं तमभितः ॥ ९२ ॥ विहरतु मयि रङ्गिणश्चूलिकाभ्रमरकातिलकोर्ध्वपुण्ड्रोज्ज्वलम् । मुखममृततटाक-चन्द्राम्बुजमयहरशुचिमुग्धमन्दस्मितम् ॥ ९३ ॥ मुखपुण्डरीकमुपरि

त्रिकण्टकं तिलकाश्च केसरसमास्समौक्तिकाः । इह रङ्गभर्तुरभिय-न्मधुव्रतप्रकरश्रियं प्रसरकाणि बिभ्रति ॥ ९४ ॥ हृदयं प्रसादयति रङ्गपतेः मुहुरोर्ध्वपुण्ड्रतिलकं ललितम् । अलिकार्धचन्द्रदलसंवलि-तामसृतस्रुतिं यदभिशङ्क्यते ॥ ९५ ॥ सरसीरुहे समवनाम्य मदा-दुपरिप्रनृत्यदलिपंक्तिनिभे । स्फुरतो भ्रुवावुपरि लोचनयोः सवि-लासलास्यगति रङ्गभृतः ॥ ९६ ॥ स्मरक्षरनलिनप्रणालेत्रयोः परि-सरनमदिक्षुचापच्छवि । युगमुदयति रङ्गभर्तुर्भ्रुवोः गुरुकुलमिव शा-र्ङ्गनृत्तश्रियः ॥ ९७ ॥ कृपया परया करिष्यमाणे सकलाङ्गं किल सर्वतोऽक्षि नेत्रे । प्रथमं श्रवसी समास्तृणाते इति दैर्घ्येण विदन्ति रङ्गनेतुः ॥ ९८ ॥ श्रोणीनासारोधात्तदवधिकडोलायितगवे विशाल-स्फीतायद्भुचिरशिशिराताम्रधवळे । मिथोबद्धस्पर्धस्फुरितशफरद्वन्द्व-ललिते क्रियास्तां श्रीरङ्गप्रणयिनयनाब्जे मयि दयाम् ॥ ९९ ॥ करुणामृतकूलमुद्वहैषा प्रणमत्स्वागतिकी प्रसन्नशीता । मयि रङ्ग-धनोपकर्णिकाऽक्ष्णोः सरितेर्वीक्षणवीचिसन्ततिस्स्यात् ॥ १०० ॥ विलसति नासा कल्पकवल्ली मुग्धेव रङ्गनिलयस्य । स्मितम-पि तन्नवकुसुमं चुबुककपोलं च पल्लवोल्लसितम् ॥ १०१ ॥ नयनशफरविद्धौ कर्णपाशावरुद्धौ रुष इव लुठतोऽर्चिर्मञ्जरी-रुद्गिरन्तौ । परिमिलदलकालीशैवलांसवेलां अनुमणिमकरोद्यौ रङ्गधुर्यामृताब्धेः ॥ १०२ ॥ अधरमधुराम्भोजं तत्कर्णपा-शमृणालिकावलयमभि मामास्तां रङ्गेन्दुवक्त्रसरश्चिरम् । नयनश-फरं नासाशैवालवल्लरिकर्णिकामकरमलकश्रेणीपर्यन्तनीलवनावलि ॥ १०३ ॥ रमयतु स मां कण्ठः श्रीरङ्गनेतुरुदञ्चितक्रमुकतरुणग्री-वाकम्बुप्रलम्बमलिम्लुचः । प्रणयविलगल्लक्ष्मीविश्वम्भराकरकन्दली-कनकवलयक्रीडासंक्रान्तरेख इवोल्लसन् ॥ १०४ ॥ अधि दृढनस्तम्भौ भुवनपृथुयन्त्रस्य कमलाकरेणोरालाने अरिकरिघटोन्माथमुसलौ । फणीन्द्रस्फीतस्रग्व्यतिकरितसन्दिग्धविभवौ भुजौ मे भूयास्तामभ र

ममि रङ्गप्रणयिनः ॥ १०५ ॥ प्रतिजलधितो वेलाशय्यां विभीषण-कौतुकात् पुनरिव पुरस्कर्तुं श्रीरङ्गिशः फणिपुङ्गवे । समुपदधतः कश्चित्कश्चित्प्रसारयतो भुजद्वयमपि सदा दानश्रद्धालु दीर्घमुपास्महे ॥ १०६ ॥ कुसुमभरालसौ स्फटिकवेदिशयौ विटपाविमरतरोः परं परिहसत् पृथु रङ्गभुजः । बहुमणिमुद्रिकाकनककङ्कणदोर्वलयैः किसलयि दोर्द्वयं फणिनि निर्भरसुप्तमिमः ॥ १०७ ॥ मद्रक्षाव्रतकौतुके मुकटके विक्रान्तिकर्णेजपे शार्ङ्गज्याकिणकर्कशिम्नि सुमनस्स्रङ्मोहने मार्दवे । दोर्द्वन्द्वं बहुशः प्रलोभ्य कमलालीलोपधानंभवत्-चित्रालकमुद्रितं विजयते श्रीरङ्गसंसङ्गिनः ॥ १०८ ॥ भवार्तानां वक्त्रामृतसरसि मार्गं दिशदिव स्वयं वक्त्रेणेदं वरदमिति सन्दर्शितमिव । कराम्भोजं पङ्केरुहवनरुषा पाटलमिव श्रयामि श्रीरङ्गेश-शयितुरुपधानीकृतमहम् ॥ १०९ ॥ किरीटं श्रीरङ्गेशयितुरुपधानीकृतभुजः विधीशाधीशत्वाद्धटत इति संस्पृश्य वदति । निहीनानां मुख्यं शरणमिति बाहुस्तदितरः स्फुटं ब्रूते पादाम्बुजयुगलमाजानु निहितः ॥ ११० ॥ मलयजशशिलिप्तं मालतीदामतल्पं सुमणिसरवितानं कौस्तुभस्वस्तिदीपम् । दनुजवृषविषाणोल्लेखचित्रं च लक्ष्मीललितगृहमुपासे रङ्गसर्वंसहोरः ॥ १११ ॥ हारस्फारितफेनमंशुलहरीमालर्द्धिमुक्ताफलश्रेणीशीकरदुर्दिनं तत इतो व्याकीर्णरत्नोत्करम् । आविःकौस्तुभलक्ष्मि रङ्गवसतेर्निस्सीमभूमाद्भुतं वक्षो मन्दरमथ्यमानजलधिश्लाघं विलोकेमहि ॥ ११२ ॥ वक्षःस्थल्यां तुलसिकमलाकौस्तुभैर्वैजयन्ती सर्वेशत्वं कथयतितरां रङ्गधाम्नस्तदास्ताम् । कूर्मव्याघ्रीनखपरिमिलत्पञ्चहेती यशोदानद्धा मौग्ध्याभरणमधिकं नस्समाधिं धिनोति ॥ ११३ ॥ कियान् भरो मम जगदण्डमण्डलीत्यवृप्तितः कृशितमिवोदरं विभोः । रिरिक्षिषोचितजगतीपरम्परां परामिव प्रथयति नाभिपङ्कजम् ॥ ११४ ॥ त्रिविधचिदचिद्वृन्दं तुन्दावलम्बि वलित्रयं विगणयदिवैश्वर्यं व्याख्याति

रङ्गमहेशितुः । प्रणतवशतां ब्रूते दामोदरत्वकरः किणः तदुभयगुणाकृष्टं पट्टं किलोदरबन्धनम् ॥ ११५ ॥ त्रयो देवास्तुल्यास्त्रितयमिदमद्वैतमधिकं त्रिकादस्मात्तत्त्वं परमिति वितर्कान् विघटयन् । विभोर्नाभीपद्मो विधिशिवनिदानं भगवतस्तदन्यद्भ्रूभङ्गीपरवदिति सिद्धान्तयति नः ॥ ११६ ॥ गर्भे कृत्वा गोप्तुमनन्तं जगदन्तर्मज्जद्भ्रम्या वाञ्छति साम्यं ननु नाभिः । उत्क्षिप्यैतत्प्रेक्षितुमुद्यद्भ्रमिभूयं नाभीपद्मो रंहति रङ्गायतनाब्धेः ॥ ११७ ॥ मदमिव मधुकैटभस्य रम्भाकरमकरीन्द्रकराभिरूप्यदर्पम् । स्फुटमिव परिभूय गर्वगुर्वोः किमुपमिमीमहि रङ्गकुञ्जरोर्वोः ॥ ११८ ॥ कटीकान्तिसंवादिचातुर्यनीवीलसद्रत्नकाञ्चीकलापानुलेपम् । महाभ्रंलिहन्मेरुमाणिक्यसानूरिवाभाति पीताम्बरं रङ्गबन्धोः ॥ ११९ ॥ भर्मस्थलांशुपरिवेष इवाम्बुराशेस्सन्ध्याम्बुवाहनिकुरुम्बमिवाम्बरस्य । शम्पाकदम्बकमिवाम्बुमुचो क्रमो नः पीताम्बरं पिबति रङ्गधुरन्धरस्य ॥ १२० ॥ वैभूयण्यां कान्तिराङ्गी निमग्ना विष्वग्ध्रीची क्वापि सोन्मादवृत्तिः । जाने जानुद्वन्द्ववार्ताविवर्तो जातः श्रीमद्रङ्गतुङ्गालयस्य ॥१२१॥ श्रीरङ्गेशयजङ्घे श्रीभूम्यामर्शहर्षकण्टकिते । तत्केलिनलिननालद्वयललिसमाचरतः ॥ १२२ ॥ वन्दारुवृन्दारकमौलिमालापुञ्जागचेतःकमलाकरेभ्यः । सङ्क्रान्तरागाविव पादपद्मौ श्रीरङ्गभर्तुर्मनवे नवे च ॥ १२३ ॥ यद्वृन्दावनपण्डितं दधिरवैर्यत्ताण्डवं शिक्षितं यल्लक्ष्मीकरसौख्यसाक्षि जलजप्रस्पर्धमानर्द्धि यत् । यच्छ्रुतेऽप्यजलस्थलञ्जमपि यद्दूत्यप्रसङ्गोत्सुकं तद्विष्णोः परमं पदं वहतु नः श्रीरङ्गिणो मङ्गलम् ॥ १२४ ॥ शिञ्जानश्रुतिशिञ्जिनीमणिरवैर्वज्रारविन्दध्वजच्छत्रीकल्पकशङ्खचक्रमुकुरैस्तैस्तैश्च रेखामयैः । ऐश्वर्येण जयं त्रिविक्रममुखं घुष्यद्भिराम्रेडितं श्रीरङ्गेशयपादपङ्कजयुगं वन्दामहे सुन्दरम् ॥ १२५ ॥ पुनानि भुवनान्यहं बहुभुक्षीति सर्वाङ्गुलीझलज्झलितजाह्नवीलहरिवृन्द-

सन्देहदाः । दिवा निशि च रञ्जिणश्चरणचारुकल्पद्रुमप्रवालनवमञ्जरीः नखरुचीर्दिगाहेमहि ॥ १२६ ॥ श्रीरङ्गेन्दोः पदकिसलये नीलमञ्जीरमैत्र्या वन्दे वृन्तप्रणयिमधुपव्रातराजीवजैत्रे । नित्याभ्यर्चानतविधिमुखस्तोमसंशब्यमानैः हेमाम्भोजैर्निबिडनिकटे रामसीतोपनीतैः ॥ १२७ ॥

श्रीरङ्गराजस्तवे पूर्वशतकं समाप्तम् ।

श्रीपराशरभट्टार्यैरनुगृहीते

श्रीरंगराजस्तवे उत्तरशतकम् ।

——(०)——

..पराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतश्श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

हर्तुं तमस्सदसती च विवेक्तुमीशो मानं प्रदीपमिव कारुणिको ददाति । तेनावलोक्य कृतिनः परिभुञ्जते तं तत्रैव केऽपि चपलाश्शलभीभवन्ति ॥ १ ॥ या वेदबाह्याः स्मृतयोऽर्हदादेर्वेदेषु याः काश्च कुदृष्टयस्ताः । आगस्कृतां रङ्गनिधे । त्वदध्वन्यन्धङ्करण्यः स्मृतवान् मनुस्तत् ॥ २ ॥ प्रत्यक्षप्रमथनपश्यतोहरत्वाभिर्दोषकृतिनिमितेश्च बाह्यवर्त्म । दुस्तर्कप्रभवतया च वक्तृदोषस्पृष्टया च प्रजहति रङ्गविन्द ! वृद्धाः ॥ ३ ॥ अनयन्नितवेदङ्कुर्वाणैर्वहिष्करणैर्वपुर्निरवयवकोऽहङ्काराद्यैः पुमान् करणातिगः । स्फुरति हि जनाः प्रत्यासत्तेरिमौ न विविञ्चते तदधिकुरुतां शास्त्रं रङ्गेश ! ते परलोकिनि ॥ ४ ॥ प्रत्यक्षा श्रुतिरर्थधीश्च न तथा दोषस्तदर्थः पुनः धर्माधर्मपरावरेश्वरमुखः प्रत्यक्षबाध्यो न च । तच्चार्वाकमतेऽपि रङ्गरमण ! प्रत्यक्षवत् सा प्रमा योगोन्मीलितधीस्तदर्थमथवा प्रत्यक्षमीक्षेत सः ॥ ५ ॥ न सदसदुभयं वा नोभयस्माद्बहिर्वा जग-

दिति न किलैका कोटिमाटीकते तत् । इति निरुपधि सर्वसर्वं कातो निषेधन् वरद ! सुगतपाशश्चोरलावं चिलाव्यः ॥ ६ ॥ प्रतीतिश्चेदिष्टा न निखिलनिषेधो यदि न को निषेद्धाऽन्यो नेष्टो निरुपधिनिषेधस्सदुपधौ । निषेधेऽन्यत्सिध्येत् वरद ! घटभङ्गे शकलवत् प्रमाशून्ये पथे श्रुतिरपि मतेऽस्मिन्विजयताम् ॥ ७ ॥ योगाचारो जगदपलपत्यत्र सौत्रान्तिकस्तद्वैचित्र्यादनुमितिपदं वक्ति वैभाषिकस्तु । प्रत्यक्षं तत्क्षणिकयति ते रङ्गनाथ ! त्रयोऽपि ज्ञानात्मत्वक्षणभिदुरते चक्षते तान् क्षिपामः ॥ ८ ॥ जगद्भङ्गुरं भङ्गुरा बुद्धिरात्मेत्यसद्वेत्तृभावे तथा वेद्यसिद्धेः । क्षणध्वंसतश्च स्मृतिप्रत्यभिज्ञादरिद्रं जगत्स्यादिदं रङ्गचन्द्र ! ॥ ९ ॥ अहमिदमभिवेद्मीत्यात्मचित्त्योर्विभेदे स्फुरति यदि अदैक्यं वाद्यमप्येकमस्तु । प्रमितिरपि मृषा स्यान्मेयमिथ्यात्ववादे यदि तदपि रहेरन् दीर्घमस्मन्मतायुः ॥ १० ॥ एतद्ग्रासास्त्रं दलयतु कलिब्रह्ममीमांसकांश्च ज्ञप्तिर्ब्रह्मैतज्ज्वलदपि निजाविद्यया बम्भ्रमीति । तस्य भ्रान्तिं तां श्लथयति जिताद्वैतविद्यस्तु जीवो यद्यद् दृश्यं तद्वितथमिति ये ज्ञापयांचक्रुरज्ञाः ॥ ११ ॥ अङ्गीकृत्य तु सप्तभङ्गिकुसृतिं स्याद्स्तिनास्त्यात्मिकां विश्वं त्वद्भिभयं जगज्जिनमतं नैकान्तमाचक्षते । भिन्नाभिन्नमिदं तथा जगदुषे वन्ध्या ममाम्बेतिवन्नूत्नब्रह्मविदे रहः परमिदं रङ्गेन्द्र ! ते चक्षताम् ॥ १२ ॥ कणचरचरणाक्षौ भिक्षमाणौ कुतर्कैः श्रुतिशिरसि सुभिक्षं त्वज्जगत्कारणत्वम् । अणुपु विपरिणाम्य व्योमपूर्वं च कार्यं तव भवदनपेक्षं रङ्गभर्तुर्दुवारौ ॥ १३ ॥ वेदे कर्त्राद्यभावाद्बलवति हि नयैस्त्वन्मुखे नीयमाने तन्मूलत्वेन मानं तदितरदखिलं जायते रङ्गधामन् ! । तस्मात्सांख्यं सयोगं सपशुपतिमतं कुत्रचित्पञ्चरात्रं सर्वत्रैव प्रमाणं तदिदमवगतं पञ्चमादेव वेदात् ॥ १४ ॥ सञ्चष्टे नेश्वरं त्वां पुरुषपरिषदि न्यस्य यद्वाऽन्यपर्यात् सांख्यो योगी च काका प्रतिफलनमिवैश्वर्यमचे

कयाचित् । भिक्षौ शैवस्सुराजम्भवमभिमनुते ! रङ्गराजातिरागात् त्वां त्वामेवाभ्यधास्त्वं ननु परविभवव्यूहनाढ्यम्भविष्णुम्।। १५ ।। इति मोहनवर्त्मना त्वयापि प्रथितं वाह्यमतं तृणाय मन्ये । अथ वैदिकनर्मवर्मितानां मनिताहे कुदृशां किमीश ! वर्त्म ।। १६ ।। संस्कारं प्रतिसञ्चरेषु निदधत्सर्गेषु तत्सारितं रूपं नाम च तत्तदर्ह-निवहे व्याकृत्य रङ्गास्पद ! । सुप्तोद्बुद्धविरिञ्चपूर्वजनतामध्याप्य तत्तद्धितं शासन्नस्मृतकर्तृकान् वहसि यद्वेदाः प्रमाणं ततः ।। १७ ।। शीक्षायां वर्णशिक्षा पदसमधिगमो व्याक्रियानिर्वचोभ्यां छन्दश्छ-न्दश्चितौ स्वाङ्गमयति समयं ज्यौतिषं रङ्गनाथ ! । कल्पेऽनुष्ठानमुक्तं ह्युचितगमितयोर्न्यायमीमांसयोस्स्यात् अर्थव्यक्तिः पुराणस्मृतिषु तदनुगास्त्वां विचिन्वन्ति वेदाः ।। १८ ।। आदौ वेदाः प्रमाणं स्मृतिरुपकुरुते सेतिहासैः पुराणैः न्यायैस्साधं त्वदर्चाविधिमुपरि परिक्षीयते पूर्वभागः । ऊर्ध्वो भागस्त्वदीहागुणविभवपरिज्ञापनै-स्त्वत्पदाप्तौ वेद्यो वेदैश्च सर्वैरहमिति भगवन् ! स्वेन च व्याच-कर्थ ।। १९ ।। क्रिया तच्छक्तिर्वा किमपि तदपूर्वं पितृसुरप्रसादो वा कर्तुः फलद इति रङ्गेश ! कुदृशः । त्वदर्चेष्टापूर्ते फलमपि भव-त्प्रीतिजमिति त्रयीवृद्धास्तत्तद्विधिरपि भवत्प्रेरणमिति ।। २० ।। आज्ञा ते सनिमित्तनित्यविधयः स्वर्गादिकाम्यद्विधिः सोऽनुज्ञा शठ-चित्तशास्त्रवशतोपायोऽभिचारश्रुतिः । सत्रीयस्य समस्तशासितुरहो ! श्रीरङ्गसर्वस्व ! ते रक्षाऽऽकूतनिवेदिनी श्रुतिरसौ त्वन्नित्यशास्ति-स्ततः ।। २१ ।। अत्रास्ते निधिरितिवत्पुमर्थभूते सिद्धार्था अपि गुण-रूपवृत्तवादाः । रङ्गेश ! त्वयि सकलास्समन्वयन्ते नोपासाफलवि-धिभिर्विशेष एषाम् ।।२२।। देहो देहिनि कारणे विकृतयो जातिर्गु-णाः कर्म च द्रव्ये निष्ठितरूपबुद्धिवचनास्तात्स्थ्यात् तथेदं जगत् विश्वं त्वय्यभिमन्यसे जगदिषे तेनाद्वितीयस्ततः मायोपाधिवि-कारसङ्करकथा का नाम रङ्गेश्वर ! ।। २३ ।। स्थित्युत्पत्तिप्रवृत्तिग्र-

सननियमनव्यापनैरात्मनस्ते शेषोऽशेषः प्रपञ्चो वपुरिति भगतस्त-
स्य चाभेदवादाः । सर्वं खल्वैतदात्म्यं सकलमिदमहं तत्त्वमस्येवमा-
द्याः व्याख्याता रङ्गधामप्रवण ! विजयिभिर्वैदिकैस्सार्वभौमैः॥२४॥
सराजकमराजकं पुनरनेकराजं तथा यथाभिमतराजकं जगदिदं जज-
ल्पुर्जडाः । जगाववशचित्रतातरतमत्वतर्काङ्क्षिका श्रुतिश्चिदचिती
त्वया वरद ! नित्यराजन्वती ॥ २५ ॥ ब्रह्माद्यास्सृज्यवर्गे भ्रुकुटि-
भटतयोद्घाटिता नावतारप्रस्तावे तेन न त्वं न च तव सदृशा वि-
श्वमेकातपत्रम् । लक्ष्मीनेत्रा त्वयेति श्रुतिमुनिवचनैस्त्वत्परैर्पयामः
श्रीरङ्गाम्भोधिचन्द्रोदय ! जलमुचितं वादिकौतस्कुतेभ्यः ॥ २६ ॥
दोषोपधावधिसमातिशयानसंख्यानिर्लेपमङ्गलगुणौघदुघाष्षडेताः ।
ज्ञानैश्वरीशकनवीर्यबलार्चिषस्त्वां रङ्गेश ! भास इव रत्नमनर्घयन्ति
॥ २७ ॥ युगपदनिशमक्षैः स्वैः स्वतो वाऽक्षकार्ये नियममनियमं
वा प्राप्य रङ्गाधिराज ! । करतलवदशेषं पश्यसि स्वप्रकाशं तदवरण-
ममोघं ज्ञानमाम्नासिषुस्ते ॥ २८ ॥ नयनश्रवणो दृशा शृणोपि अथ
ते रङ्गपते ! महेशितुः । करणैरपि कामकारिणः घटते सार्वपथीन-
मीक्षणम् ॥ २९ ॥ सार्वज्ञ्येनाङ्गमूलं जगदभिदधतो वारितास्साक्षि-
मात्रात् सांख्योक्तात्कारणं त्वां परयति भगवन्नैश्वरी रङ्गशायिन् ! ।
अप्रेर्योऽन्यैः स्वतन्त्रोऽप्रतिहति सदसत्कर्मचैत्या विचित्रं यत्रेच्छा-
लेशतस्त्वं युगपदगणयन् विश्वमाविश्वकर्थ ॥ ३० ॥ कार्येऽनन्ते
स्वतनुमुखतस्त्वामुपादानमाहुः सा ते शक्तिस्सुकरमितरच्चेति वेलां
विलंघ्य । इच्छा यावद्विहरति सदा रङ्गराजानपेक्षा सैवेशानादति-
शयकरी सोर्णनाभौ विभाव्या ॥ ३१ ॥ स्वमहिमस्थितिरीश !
भृशक्रियोऽप्यकलितश्रम एव बिभर्षि यत् । वपुरिव स्वमशेषमिदं
बलं तव पराश्रितकारणवारणम् ॥ ३२ ॥ मृगनाभिगन्ध इव यत्स-
कलार्थान् निजसन्निधेरविकृतो विकृणोषि । प्रियरङ्ग ! वीर्यमिति तत्तु
वदन्ते सविकारकारणमितो विनिवार्यम् ॥ ३३ ॥ सहकार्यनपेक्षमपि

ज्ञातुमिह तदनपेक्षकर्तृता । रङ्गधन ! जयति तेज इति प्रणतार्ति-जित् प्रतिभटाभिभावुकम् ॥ ३४ ॥ मर्त्योत्थायं विरिञ्चावधिकमुपरि चोत्प्रेक्ष्य मीमांसमाना रङ्गेन्द्रानन्दवल्ली तत्र गुणनिवहं यौवनानन्दपूर्वम् । न स्वार्थं स्प्रष्टुमीष्टे स्खलति पथि परं मूकलायं निलिल्ये हन्तैवं त्वद्गुणानामवधिगणनयोः का कथा चित्तवाचोः ॥ ३५ ॥ न्यधायिषत ये गुणा निधिनिधायमारण्यकेष्वमी श्रदिमचातुरीप्रणतचापलक्षान्तयः । दयाविजयसौन्दरीप्रभृतयोऽपि रत्नौघवत् जगद्व्यवहृते क्षमा वरद ! रङ्गरत्नापणे ॥ ३६ ॥ यमाश्रित्यैवान्यंभरय इव ते सद्गुणगणाः प्रथन्ते सोऽनन्तस्त्ववशघनशान्तोदितदशः । त्वमेव त्वां वेत्थ स्तिमितवितरङ्गं वरद ! भोः स्वसंवेद्यस्वात्मद्वयसवहुलानन्दभरितम् ॥ ३७ ॥ आघ्रायेश्वरगन्धमीशमदर्शमन्यास्तवेन्द्रादयो मुञ्चन्ति त्वमनाविलो निरवधेर्भूम्नः कणेहत्य यत् । चित्रीयेमहि नात्र रङ्गरसिक ! त्वं त्वन्महिम्नः परः वैपुल्यान्महितः स्वभाव इति वा किन्नाम सात्म्यं न ते ॥ ३८ ॥ षाड्गुण्याद्वासुदेवः पर इति स भवान् मुक्तभोग्यो बलाढ्यात् बोधात् सङ्कर्षणस्त्वं हरसि वितनुषे शास्त्रमैश्वर्यवीर्यात् । प्रद्युम्नस्सर्गधर्मौ नयसि च भगवञ्छक्तितेजोऽनिरुद्धः विभ्राणः पासि तत्त्वं गमयसि च तथा व्यूह्य रङ्गाधिराज ! ॥ ३९ ॥ जाग्रत्स्वप्नात्यलसतुरीयप्रायध्यातृक्रमवदुपास्यः । स्वामिंस्तत्तत्सहपरिवर्हैः चातुर्व्यूहं वहसि चतुर्धा ॥ ४० ॥ अचिदविशेषितान् प्रलयसीमनि संसरतः करणकलेवरैर्घटयितुं दयमानमनाः । वरद ! निजेच्छयैव परवानकरोः प्रकृतिं महदभिमानभूतकरणावलिकोरकिणीम् ॥ ४१ ॥ निम्नोन्नतं च करुणं च जगद्विचित्रं कर्म व्यपेक्ष्य सृजतस्तव रङ्गशेषिन् । वैषम्यनिर्घृणतयोर्न खलु प्रसक्तिः तद्ब्रह्मसूत्रसचिवाः श्रुतयो गृणन्ति ॥४२॥ स्वाधीने सहकारिकारणगणे कर्तुश्शरीरेऽथवा भोक्तुः स्वानुविधापरायविधये राज्ञो यथा शासितुः । दातुर्वाऽर्थिजने कटाक्षणमिव

श्रीरङ्गसर्वस्व ! ते स्वं दुस्सृज्यदशाव्यपेक्षणमपि स्वातन्त्र्यमेवावहेत् ॥ ४३ ॥ प्रलयसमयसुप्तं स्वं शरीरैकदेशं वरद ! चिदचिदाख्यं स्वेच्छया विस्तृणानः । खचितमिव कलापं चित्रमाततय धून्वन् अनुशिखिनि शिखीव क्रीडसि श्रीसमक्षम् ॥ ४४ ॥ भूयो भूयस्त्वयि हितपरेऽप्युत्पथाऽनात्मनीनस्रोतोमग्नानपि पथि नयंस्त्वं दुराशावशेन । रुग्णे तोके स्व इव जननी तत्कषायं पिबन्ती तत्तद्वर्णाश्रमविधिवशः क्लिश्यसे रङ्गराज ! ॥ ४५ ॥ सार्व ! त्वत्कं सकलचरितं रङ्गधामन् ! दुराशापाशेभ्यस्स्यान्न यदि जगतां जातु मूर्खोत्तराणाम् । निस्तन्द्रालोस्तव नियमतो नर्तुलिङ्गप्रवाहा सर्गस्थेमप्रभृतिषु सदाजागरा जाघटीति ॥ ४६ ॥ सुहृदिव निगलाद्यैरुन्मदिष्णुं नृशंसं त्वमपि निरयपूर्वैर्दण्डयन् रङ्गनेतः ! । तदितरमपि बाधात्त्रायसे भोगमोक्षप्रदिरपि तव दण्डापूपिकातस्सुहृत्त्वम् ॥ ४७ ॥ धृतिनियमनरक्षावीक्षणैश्शास्त्रदानप्रभृतिभिरचिकित्स्यान् प्राणिनः प्रेक्ष्य भूयः । सुरमनुजतिरश्चां लीलया तुल्यधर्मा त्वमवतरसि देवोऽजोऽपि सन्नव्ययात्मा ॥ ४८ ॥ अनुजनुरनुरूपरूपचेष्टा न यदि समागममिन्दिराऽकरिष्यत् । असरसमथवाऽप्रियम्भविष्णु ध्रुवमकरिष्यत रङ्गराजनर्म ॥ ४९ ॥ गरीयस्त्वं परिजानन्ति धीराः परं भावं मनुजत्वादिभूष्णुम् । अजानन्तस्त्ववजानन्ति मूढाः जनिघ्नं ते भगवञ्जन्म कर्म ॥ ५० ॥ मध्येविरिञ्चगिरिशं प्रथमावतारः तत्साम्यतः स्थगयितुं तव चेत् स्वरूपम् । किं ते परत्वपिशुनैरिह रङ्गधामन् ! सत्त्वप्रवर्तनकृपापरिपालनाद्यैः ॥ ५१ ॥ मधुः कैटभश्चेति रोधं विधूय त्रयीदिव्यचक्षुर्विधातुर्विधाय । सरस्सङ्ग ! रङ्गिस्तुरङ्गावतारः समस्तं जगज्जीवयिष्यस्यकस्मात् ॥ ५२ ॥ रङ्गधे ! तिमिरघस्मरशीतस्वच्छहंसतनुरिन्दुरिवोद्यन् । वेदभाभिरनुजग्रहिथाऽऽर्तान् ज्ञानयज्ञसुधयैव समृद्धयन् ॥ ५३ ॥ वटदलमधिशय्य रङ्गधामन् ! शयित इवार्भवतर्णकः पदाब्जम् । अधिमुखमुदरे जगन्ति मातुं निदधिथ

वैष्णवभोग्यलिप्सया वा ॥ ५४ ॥ उन्मूल्याऽऽहर सन्दराद्रिमहिना तं सम्बधानाऽमुना दोर्भिश्चश्चरुमालिकैश्च दधिनिर्माथं मथनाऽम्बुधिम् । श्रीरङ्गेश्वर ! चन्द्रकौस्तुभसुधापूर्वं गृहाणेति ते कुर्वाणस्य फलेग्रहिर्हि कमलालाभेन सर्वः श्रमः ॥ ५५ ॥ देवीहस्ताम्बुजेभ्यश्चरणकिसलये संवहद्भ्योऽपहृत्य प्रत्यस्यानन्तभोगं झटिति चलपुटे चक्षुषी विस्तृणानः । आक्षिप्योरश्च लक्ष्म्याः स्तनकलशकनत्कुङ्कुमस्तोमपङ्कादेवः श्रीरङ्गधामा गजपतिघुषिते व्याकुलः स्तात् पुरो नः ॥ ५६ ॥ अतन्त्रितचमूपतिप्रहितहस्तमस्वीकृतप्रणीतमणिपादुकं किमिति चाकुलान्तःपुरम् । अवाहनपरिष्क्रियं पतगराजमारोहतः करिप्रवरबृंहिते भगवतस्त्वरायै नमः ॥ ५७ ॥ यं पश्यन्विश्वधुर्यां धियमसकृदथो मन्थरां मन्यमानः हुंकारास्फालनांघ्रिप्रहतिभिरपि तं तार्क्ष्यमभ्यक्षिपस्त्वम् । किञ्चोदश्चन्नुदस्थास्तमथ गजपतेर्बृंहिते जृम्भमाणे देव ! श्रीरङ्गबन्धो ! प्रणमति हि जने कान्दिशीकी दशा ते ॥ ५८ ॥ श्रीरङ्गेशय ! शरणं ममासि वात्याव्यालोलत्कमलतटाकताण्डवेन । स्रग्भूषाम्बरमयथायथं दधानः धिङ्मामित्यनुगजगर्जमाजगन्थ ॥ ५९ ॥ मीनतनुस्त्वं नावि निधाय स्थिरचरपरिक्रमनुमनु भगवन् ! । वेदसनाभिस्वोक्तिविनोदैरकलितलयभयलवमभ्रमवहः ॥ ६० ॥ श्रीनयनाभोद्भासुरदीर्घप्रविपुलमुरुचिरशुचिशिशिरवपुः । पक्षनिगीर्णोद्गीर्णमहाब्धिस्थलजलविहरणरतगतिरचरः ॥ ६१ ॥ चकर्थ श्रीरङ्गिन्निखिलजगदाधारकमठो भवन् धर्मान् कूर्मः पुनरमृतमन्थाचलधरः । जगन्थ श्रेयस्त्वं मरकतशिलापीठललितं जलादुद्यल्लक्ष्मीपदकिसलयन्याससुलभम् ॥ ६२ ॥ हृदि सुररिपोर्दंष्ट्रोत्खाते क्षिपन् प्रलयार्णवं क्षितिकुचतटीमर्चन् दैत्यास्रकुङ्कुमचर्चया । स्फुटधुतसटाभ्राम्यद्ब्रह्मस्तवोन्मुखबृंहितः शरणमसि मे रङ्गिंस्त्वं मूलक्रोलतनुर्भवन् ॥ ६३ ॥ नृहरिदशयोः पश्यन्नौत्पत्तिकं घटनाद्भुतं नरमुत हरिं दृष्ट्वैकैकं समुद्विजतां जनः । इति किल

सिताक्षीरन्यायेन सङ्गमिताङ्गकं स्फुटसटमहादंष्ट्रं रङ्गेन्द्रसिंहमुपास्महे ॥ ६४ ॥ द्विषाणद्रेपोद्यन्नयनवनवह्निप्रशमनभ्रमल्लक्ष्मीवक्त्रप्रहितमधुगण्डूषसुषमैः । नखक्षुण्णारातिक्षतजपटलैराप्लुतसटाच्छटास्कन्धो रुन्धे दुरितमिह पुंस्पश्ववदनः ॥६५॥ नखाग्रग्रस्तेऽपि द्विपति निजभक्तद्रुहि रुषः प्ररूर्पाङ्गिष्णुत्वद्विगुणपरिणाहोत्कटतनुः । विरुद्धे वैयश्रीसुघटितसमानाधिकरणे नृसिंहत्वे निश्चद्वरद ! बिभरामासिथ जगत् ॥ ६६ ॥ दैत्यौदार्येन्द्रयाच्ञाविहतिमपनयन् वामनोऽर्थी त्वमासीः विक्रान्ते पादपद्मे त्रिजगदणुसमं पांसुलीकृत्य लिल्ये । नाभीपद्मश्च गानक्षममिव भुवनग्राममन्यं सिसृक्षुः तस्थौ रङ्गेन्द्र ! वृत्ते तव जयमुखरो डिण्डिमस्तत्र वेदः ॥ ६७ ॥ भवान् रामो भूत्वा परशुपरिकर्मा भृगुकुलादलावीत्क्ष्मापालान् पितृगणमताप्सीत्तदसृजा । भुवो भाराक्रान्तं लघु तलमुपाचीक्लृपदिति द्विपामुग्रंपश्योऽप्यनघ ! मम माजीगणदघम् ॥६८॥ मनुजसमयं कृत्वा नाथानतेरिथ पन्नगा क्वचन विपिने सा चेदन्तर्धिं नर्म विनिर्ममे । किमथ जलधिं बध्वा रक्षोविधीश्वरोद्धतं बलिमुखकुलोच्छिष्टं कुर्वन् रिपुं निरपत्रयः ॥ ६९ ॥ यद्भूते विजयापदानगणना कालिङ्गदन्ताङ्कुरैः यद्विश्लेषलवोऽपि कालियभुवे कोलाहलायाभवत् । दूत्येनापि च यस्य गोपवनिताः कृष्णागसां व्यसरन् तं त्वां क्षेमकृषीवलं हलधरं रङ्गेश ! भक्तास्महे ॥ ७० ॥ आकण्ठवारिभरमन्थरमेघदेश्यं पीताम्बरं कमललोचनपश्यहेति । ब्रह्मस्तनंधयमयाचत देवकी त्वां श्रीरङ्गकान्त ! सुतकाम्यति काऽपरैवम् ॥ ७१ ॥ शैलोग्निश्च जलांबभूव मुनयो मूढांबभूवुर्जडाः प्राज्ञासासुरगास्सगोपममृतामासुर्महाशीविषाः । गोव्याघ्रास्सहजांबभूवुरपरे त्वन्यांबभूवुः प्रभो ! त्वं तेष्वन्यतमांबभूविथ भवद्वेणुक्वणोन्माथने ॥ ७२ ॥ कल्कितनुर्धरणीं लघयिष्यन् कलिकलुपान् विलुनासि पुरा त्वम् । रङ्गनिकेत ! लुनीहि लुनीहीत्यखिलमरुन्तुदमद्य लुनीहि ॥७३॥ आस्तां ते गुणराशिवद्गुणपरीवाहात्मनां

जन्मनां संख्या भौमनिकेतनेष्वपि कुटीकुञ्जेषु रङ्गेश्वर ! । अर्च्यस्सर्वसहिष्णुरर्चकपराधीनाखिलात्मस्थितिः प्रीणीषे हृदयालुभिस्तव ततश्शीलाज्जडीभूयते ॥ ७४ ॥ श्रीमद्व्योम न सीम वाङ्मनसयोस्सर्वेऽवताराः क्वचित् काले विश्वजनीनमेतदिति धीःश्रीरङ्गधामन्यथ । आर्तस्वागतिकैः कृपाकलुषितैरालोकितैरार्द्रयन् विश्वत्राणविमर्शनस्खलितया निद्रासि जागर्यया ॥ ७५ ॥ सर्गाभ्यासविशालया निजधिया ज्ञानन्ननन्तेशयं भारत्या सहधर्मचाररतया स्वाधीनसङ्कीर्तनः । कल्पानेव बहून् कमण्डलुगलद्गङ्गाऽऽप्लुतोऽपूजयद्ब्रह्मा त्वां मुखलोचनाञ्जलिपुटैः पद्मैरिवाऽऽवर्जितैः ॥ ७६ ॥ मनुकुलमहीपालव्यानम्रमौलिपरम्परामणिमकरिकारोचिर्नीराजितांघ्रिसरोरुहः । स्वयमथ विभो ! स्वेन श्रीरङ्गधामनि मैथिलीरमणवपुषा स्वार्हाण्याराधनान्यसि लम्भितः ॥ ७७ ॥ मन्वन्ववाये द्रुहिणे च धन्ये विभीषणेनैव पुरस्कृतेन । गुणैर्दरिद्राणमिमं जनं त्वं मध्येसरिन्नाथ ! सुखाकरोषि ॥ ७८ ॥ तेजः परं तत्सवितुर्वरेण्यं धाम्ना परेणाप्रगखारसुवर्णम् । त्वां पुण्डरीकेक्षणमामनन्ति श्रीरङ्गनाथं तमुपासिषीय ॥ ७९ ॥ आत्माऽस्य गन्तुः परितस्थुषश्च मित्रस्य चक्षुर्वरुणस्य चाग्नेः । लक्ष्म्या सहोत्पत्तिकगाढबन्धं पश्येम रङ्गे शरदश्शतं त्वाम् ॥ ८० ॥ यस्यास्मि पत्युर्न तमन्तरेमि श्रीरङ्गतुङ्गायतने शयानम् । स्वभावदास्येन च योऽहमस्मि स सन् यजे ज्ञानमयैर्मखैस्तम् ॥८१॥ आयुः प्रजानाममृतं सुराणां रङ्गेश्वरं त्वां शरणं प्रपद्ये । मां ब्रह्मणेऽस्मै महसे तदर्थं प्रत्यञ्चमेनं युनजै परस्मै ॥८२॥ आर्ति तितीर्षुरथ रङ्गपते ! धनायन् आत्मम्भरिर्विविदिषुर्निजदास्यकाम्यन् । ज्ञानीत्यमून् सममथास्समत्युदारान् गीतासु देव ! भवदाश्रयगोपकारान् ॥ ८३ ॥ नित्यं काम्यं परमपि कतिचित्त्वय्यध्यात्मस्वमतिभिरममाः । न्यस्तसङ्गा विदधति विहितं श्रीरङ्गेन्दो ! विदधति न च ते ॥ ८४ ॥ प्रत्यञ्चं स्वं पश्च विश्वं पराचस्सश्चक्षाणास्तत्त्रराशेर्विविच्य । युञ्जा

नाश्वतंभरायां स्वबुद्धौ स्वं वा त्वां वा रङ्गनाथाऽऽनुवन्ति ॥८५॥ अथ मृदितकषायाः केचिदाजानदास्यत्वरितशिथिलचित्ताः कीर्तिचिन्तानमस्याः । विदधति ननु पारं भक्तिनिघ्ना लभन्ते त्वयि किल ततमे त्वं तेषु रङ्गेन्द्र ! किं तत् ॥८६॥ उपादत्ते सत्तास्थितिनियमनाद्यैश्चिदचितौ स्वमुद्दिश्य श्रीमानिति वदति वागौपनिषदी। उपायोपेयत्वे तदिह तव तत्त्वं न तु गुणौ अतस्त्वां श्रीरङ्गेशय! शरणमव्याजमभजम् ॥८७॥ पङ्गुनैकवराटिकेव क्लसा स्थलयोः काकणिकासुवर्णकोट्योः । भवमोक्षणयोस्त्वयैव जन्तुः क्रियते रङ्गनिधे ! त्वमेव पाहि ॥८८॥ ज्ञानक्रियाभजनसम्पदकिञ्चनोऽहमिच्छाधिकारशकनानुशयानभिज्ञः । रङ्गेश! पूर्णवृजिनश्शरणं भवेति मौर्ख्याद् ब्रवीमि मनसा विषयाकुलेन ॥८९॥ त्वयि सति पुरुषार्थे मत्परे चाहमात्मक्षयकरकुहनार्थाञ्छृद्दधद्रङ्गचन्द्र! । जनमखिलमहं गुर्वञ्चयामि त्वदात्मप्रतिभवदनन्यज्ञानिवद्-शिकस्सन् ॥९०॥ अतिक्रामन्नाज्ञां तव विधिनिषेधेषु भवतेऽपि अभिद्रुह्यन्वाग्धीकृतिभिरपि भक्ताय सततम् । अजानन् जानन् वा भवदसहनीयागसि रतस्सहिष्णुत्वाद्रङ्गप्रवण! तव माभूवमभरः ॥९१॥ प्रकुपितभुजगफणानामिव विषयाणामहं छायाम् । सति तव भुजगसुरविटपिप्रच्छाये रङ्गजीवित ! भजामि ॥९२॥ त्वत्सर्वशक्तेरधिकाऽस्मदादेः कीटस्य शक्तिर्बत रङ्गबन्धो! । यस्त्वत्कृपामप्यति कोशकारन्यायादसौ नश्यति जीवनाशम् ॥९३॥ श्रीरङ्गेश! त्वद्गुणानामिवास्मद्दोषाणां कः पारदृश्वा यतोहम् । ओघे मोघोदन्यवत् त्वद्गुणानां तृष्णापूरं वर्षतां नाऽस्मि पात्रम् ॥९४॥ त्वं चेन्मनुष्यादिषु जायमानस्तत्कर्मपाकं कृपयोपभुंक्षे । श्रीरङ्गशायिन्! कुशलेतराभ्यां भूयोऽभिभूयेमहि कस्य हेतोः ॥९५॥ क्षमा सापराधेऽनुतापिन्युपेया कथं सापराधेऽधि

इते मयि स्यात्। तथाऽप्यत्र रङ्गाधिनाथाऽनुतापव्यपायं क्षमेताऽतिवेला क्षमा ते ॥९६॥ बलिभुजि शिशुपाले तादृगागस्करे वा गुणलवसहवासात्त्वत्क्षमा संकुचन्ती। मयि गुणपरमाणूदन्तचिन्तानभिज्ञे निहरतु वरदाऽसौ सर्वदा सार्वभौमी ॥९७॥ दया परव्यसनहरा भवत्यथा लुप्यते मम तदहं दयातिगः। तथाप्यसौ सुखयति दुःखमित्यतः दयस्व मां गुणमय! रङ्गमन्दिर! ॥९८॥ गर्भजन्मजरामृतिक्लेशकर्मशृङ्खलिनः। त्वदेव देवपदक्षतं त्वां श्रियोऽहमकामये ॥९९॥ अहंकृत्य पूर्वपुंसः रङ्गनिधे! विनयडम्भतोऽमुष्मात्। शुन इव मम वरमद्धेः उपभोगस्त्वद्विलीर्णथाः ॥१००॥ सकृत्प्रपन्नाय तवाहमस्मीति आयाचते चाभयदीक्षमाणम्। त्वामप्यपास्याऽहमहम्भवामि रङ्गेश! विस्रम्भविवेकरेकात् ॥१०१॥ तवभरोऽहमकारिषि धार्मिकैश्शरणमित्यपि वाचमुदैरिरम्। इति समाक्षिकयन्निदमद्य मां कुरु भरं तव रङ्गधुरन्धर! ॥१०२॥ दयाऽन्येषां दुःखाऽसहनमनन्योऽसि सकलैः दयालुस्त्वं नाऽतः प्रणमदपराधानविदुषः। क्षमा ते रङ्गेन्दो! भवति न तरां नाथ! न तमां तवौदार्यं यस्मात्तव विभवमर्थिस्वममथाः ॥१०३॥ गुणतुङ्गतया तव रङ्गपते! भृशनिम्नमिमं जनमुन्नमय। यदपेक्ष्यमपेक्षितुरस्य हि तत्परिपूरणमीशितुरीश्वरता ॥१०४॥ त्वं मीनपानीयनयेन कर्मधीभक्तिवैराग्यजुषो बिभर्षि। रङ्गेश! मां पासि मितम्पचं यत्पानीयशालं मरुभूषु तत्स्यात् ॥१०५॥

श्रीरङ्गराजस्तवे उत्तरशतकं समाप्तम्।

श्रीरङ्गराजस्तवश्च समाप्तः।

श्रीपराशरभट्टार्यैरनुगृहीतः
श्रीगुणरत्नकोशः ।

—०—

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

श्रियै समस्तचिदचिद्विधानव्यसनं हरेः । अङ्गीकारिभिरालोकैः सार्थयन्त्यै कृतोऽञ्जलिः ॥१॥ उल्लास—पल्लवितपालितसप्तलोकीनिर्वाहकोरकितनेमकटाक्षलीलाम् । श्रीरंग—हर्म्यतलमङ्गलदीपरेखां श्रीरङ्गराजमहिषीं श्रियमाश्रयामः ॥२॥ अनुकूलतनुकाण्डालिङ्गनारम्भशुम्भत्प्रतिदिशभुजशाखश्रीसखानोकहर्द्धिः । स्तननयनगुलुच्छस्फारपुष्पद्विरेफा रचयतु मयि लक्ष्मीकल्पवल्ली कटाक्षान् ॥३॥ यद्भ्रूभङ्गाः प्रमाणं स्थिरचररचनातारतम्ये मुरारेः,वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति । भोगोपोद्घातकेलीचुलकितभगवद्वैभवानुभावा, सा नः श्रीरास्तृणीतामभृतलहरिधीलङ्घनीयैरपाङ्गैः ॥४॥ यद्यावत्तव वैभवं तदुचितस्तोत्राय दूरे स्पृहा, स्तोतुं के वयमित्यदश्च जगृहुः प्राञ्चो विरिञ्चादयः । अप्येवं तव देवि! वाङ्मनसयोर्भापानभिज्ञं पदं कावाचः प्रयतामहे कवयितुं स्वस्ति प्रशस्त्यै गिराम् ॥५॥ स्तोतारं तमुशन्ति देवि! कवयो यो विस्तृणीते गुणान्, स्तोतव्यस्य ततश्च ते स्तुतिधुरा मय्येव विश्राम्यति । यस्मादस्मदमर्पणीयफणितिस्वीकारतस्ते गुणाः, क्षान्त्यौदार्यदयादयो भगवति ! स्वां प्रस्नुवीरन् प्रथाम् ॥६॥ सूक्तिं समग्रयतु नः स्वयमेव लक्ष्मीः श्रीरङ्गराजमहिषी मधुरैः कटाक्षैः । वैदग्ध्यवर्णगुणगुम्भनगौरवैर्या कण्डूलकर्णकुहराः कवयो धयन्ति ॥७॥ अनाघ्रातावद्यं बहुगुणपरीणाहि मनसः दुहानं सौहार्दं परिचितमिवाऽथापि गहनम् । पदानां सौभ्रात्रादनि

मिषनिषेव्यं श्रवणयोः त्वमेव श्रीर्मह्यं बहुमुखय वाणीविलसितम् ॥८॥ श्रियःश्रीः! श्रीरङ्गेशय! तव च हृद्यां भगवतीं श्रियं त्वत्तोऽप्युच्चैर्वय-मिह फणामः शृणुतराम् । दृशौ ते भूयास्तां सुखतरलतारे श्रव-णतः, पुनर्हर्षोत्कर्षात्स्फुटतु भुजयोः कञ्चुकशतम् ॥९॥ देवि! श्रुतिं भगवतीं प्रथमे पुमांसः त्वत्सद्गुणौघमणिकोशगृहं गृणन्ति । तद्द्वारपाटनपटूनि च सेतिहाससन्तर्कणस्मृतिपुराणपुरस्सराणि॥१०॥ आहुर्वेदानमानं कतिचन कतिचाऽराजकं विश्वमेतद्राजन्वत्केचिदीशं गुणिनमपि गुणैस्तं दरिद्राणमन्ये । भिक्षावन्ये सुराजम्भवमिति च जडास्ते तलातल्यकार्षुः ये ते श्रीरङ्गहर्म्याङ्गणकनकलते! न क्षणं ल-क्ष्यमासन् ॥११॥ मनसि विलसताऽक्ष्णा भक्तिसिद्धाञ्जनेन श्रुति-शिरसि निगूढं लक्ष्मि! ते वीक्षमाणाः । निधिमिव महिमानं भुञ्जते येऽपि धन्याः ननु भगवति! दैवीं सम्पदं तेऽभिजाताः ॥१२॥ अस्येशाना जगत इति तेऽधीमहे यां समृद्धिं श्रीः! श्रीसूक्तं बहुमुखयते तां च शाखानुशाखम् । ईष्टे कश्चिज्जगत इति यः पौरुषे सूक्त उक्तः तं च त्वत्कं पतिमधिजगावुत्तरश्चाऽनुवाकः ॥१३॥ उद्बाहुस्त्वामु-पनिषदसावाह नैका नियन्त्रीं श्रीमद्रामायणमपि परं प्राणिति त्व च-रितैः । सर्तारोऽसज्जननि! यतमे सेतिहासैः पुराणैः निन्युर्वेदानपि च ततमे त्वन्महिम्नि प्रमाणम् ॥१४॥ आकुग्रामनियामकादपि नि-भोरासर्वनिर्वाहकादैश्वर्यं यदिहोत्तरोत्तरगुणं श्रीरङ्गभर्तुःप्रिये! । तुङ्ग-मङ्गलमुज्ज्वलं गरिमवत्पुण्यं पुनः पावनं धन्यं यत्तददश्च वीक्षणभु-वस्ते पश्यत विप्रुषः ॥१५॥ एको मुक्तातपत्रप्रचलमणिघणात्कारि-मौलिर्मनुष्यः, हर्म्यद्दन्तावलस्थो न गणयति नतान्यत्क्षणं क्षोणि-पालान् । यत्तस्मै तिष्ठतेऽन्यः कृपणमशरणो दर्शयन्दन्तपङ्क्ती,

तत्त श्रीरङ्गराजप्रणयिनि! नयनोदञ्चितन्यञ्चिताभ्याम् ॥१६॥ रति-र्मतिः सरस्वती धृतिसमृद्धिसिद्धिश्रियः सुधासखि! यतोमुखं विचलितेत-व भ्रूलता । ततोमुखमथेन्दिरे! बहुमुखीमहम्पूर्विकां विगाह्य च वशं वदाः परिवहन्ति कूलङ्कषाः ॥ १७ ॥ सहस्थिरपरित्रसत्रजविरि ञ्चनाकिञ्चनैः अनोकहबृहस्पतिप्रचलविक्लवप्रक्रियम् । इदं सद सदात्मना निखिलमेव निम्नोन्नतं कटाक्षतदुपेक्षयोस्तव हि लक्ष्मि! तत्ताण्डवम् ॥ १८ ॥ काले शंसति योग्यतां चिदचितोरन्योन्यमालि-ङ्गतोः, भूताहङ्कृतिबुद्धिपञ्चकरणीस्वान्तप्रवृत्तीन्द्रियैः । अण्डाना वरणैस्सहस्रमकरोत्तान्भूर्भुवःस्वर्वतः, श्रीरङ्गेश्वरदेवि! ते विहृतये सङ्कल्पमानः प्रियः ॥ १९ ॥ शब्दादीन् विषयान् प्रदर्श्य विभवं विस्मार्य दास्यात्मकम्, वैष्णव्या गुणमायया ऽऽत्मनिवहान् विप्लाव्य पूर्वः पुमान् । पुंसा पण्यवधूविडम्बिवपुषा धूर्तानिवाऽऽयासयन्, श्री रङ्गेश्वरि! कल्पते तव परीहासात्मने केलये ॥ २० ॥ यद्दूरे मनसो यदेव तमसः पारे यदत्यद्भुतं यत्कालादपचेलिमं सुरपुरी यद्गच्छतो दुर्गतिः । सायुज्यस्य यदेव सूतिरथवा यद्दुर्ग्रहं मद्गिरां तद्विष्णोः परमं पदं तव कृते मातस्समाम्नासिषुः ॥२१॥ हेलायामखिलं चरा चरमिदं भोगे विभूतिः परा पुण्यास्ते परिचारकर्मणि सदा पश्यन्ति ये सूरयः । श्रीरङ्गेश्वरदेवि! केवलकृपानिर्वाह्यवर्गे वयम्, शेषित्वे परमः पुमान्परिकरा ह्येते तव स्फारणे ॥२२॥ आज्ञानुग्रहभीमकोमलपुरीपाली फलं भेजुषां याऽयोध्येत्यपराजितेति विदिता नाकं परेण स्थिता । भावैरद्भुतभोगभूमगहनैस्सान्द्रा सुधास्यन्दिभिः श्रीरङ्गेश्वरगेहलक्ष्मि! युवयोस्तां राजधानीं विदुः ॥२३॥ तस्यां च त्व-त्कृपावन्निरवधिजनताविश्रमार्हावकाशं सङ्कीर्णं दास्यतृष्णाकलितपरिकरैः पुम्भिरानन्दनिघ्नैः । स्नेहादस्थानरक्षाव्यसनिभिरभयं शार्ङ्गच-

कासिगु...ैः आनन्दैकार्णवं श्रीभगवति! युवयोराहुरास्थानरत्नम् ॥२४॥ तव सक्स्पशगन्ध स्फुरदुपरिकृणारत्नशोचिर्वितानं, विस्तीर्योऽनन्तभोगं तदुपरि नयता विश्वमेकातपत्रम् । तैस्तैः कान्तेन शान्तोदितगुणविभवैरर्हता त्वामसंख्यैः, अन्योन्याद्वैतनिष्ठाघनरसगहनान् देवि! वञासि भोगान् ॥२५॥ भोग्या-नामपि नान्तरीयकतया पुष्पाङ्गरागैस्समं निर्वृत्तप्रणयातिवाहनविधौ नीताः परीवाहताम् । देवि! त्वामनु नीलया सह मही देव्यस्सहस्रं तथा याभिस्त्वं स्तनबाहुदृष्टिभिरिव स्वाभिःश्रियं श्लाघसे ॥२६॥ ते साध्यास्सन्ति देवा जननि! गुणवपुर्वेषवृत्तस्वरूपैः भोगैर्वा निर्विशेषास्सवयस इव ये नित्य निर्दोषगन्धाः । हेश्रीः! श्रीरङ्गभर्तुस्तव च पदपरीचारवृत्त्यै सदाऽपि प्रेमप्राणभावाविलहृदयहठात्कारकैङ्कर्यभोगाः ॥२७॥ स्वरूपं स्वातन्त्र्यं भगवत इदं चन्द्रवदने! त्वदाश्लेषोत्कर्षाद्भवति खलु निष्कर्षसमये । त्वमासीर्मातः! श्रीः! कमितुरिदमित्थन्त्वविभवस्तदन्तर्भावात्त्वां न पृथगभिधत्ते श्रुतिरपि ॥२८॥ तव स्पर्शादीशं स्पृशति कमले! मङ्गलपदं तवेदं नोपाधेरुपनिपतितं श्रीरसि यतः । प्रसूनं पुष्यन्तीमपि परिमलर्द्धिं जिगदिषुः न चैवन्त्वादेवं स्वदत इति कश्चित्कथयते ॥२९॥ अपाङ्गा भूयांसो यदुपरि परं ब्रह्म तदभूदमी यत्र द्वित्रास्स च शतमखादिस्तदधरात् । अतः श्रीराम्नायस्तदुभयमुशंस्त्वां प्रणिजगौ प्रशस्तिस्सा राज्ञो यदपिच पुरीकोशकथनम् ॥३०॥ स्वतः श्रीस्त्वं विष्णोः स्वमसि तत एवैष भगवान् त्वदायत्तर्द्धित्वेऽप्यभवदपराधीनविभवः । स्वया दीप्त्या रत्नं भवदपि महार्घं न विगुणं नकुण्ठस्वातन्त्र्यं भवति च न चाऽन्याहितगुणम् ॥३१॥ प्रशकनबलज्योतिर्ज्ञानैश्वरीविजयप्रथा प्रणतवरणप्रेमक्षेमङ्करत्वपुरस्सराः । अपि परिमलः कान्तिर्लावण्यमर्चिरिन्दिरे! तव भगवतश्चैते साधारणा

गुणराशयः ॥३२॥ अन्येऽपि यौवनमुखा युवयोस्तमानाः श्रीरङ्गमङ्गलविजृम्भणवैजयन्ति! । तस्मिंस्तव त्वयि च तस्य परस्परेण संस्पर्धं दर्पण इव प्रचुरं स्वदन्ते ॥३३॥ मुग्धत्वादौ तुल्येऽप्यपरव गतावनुगाननस्थिरत्वादीन्कृत्वा भगवति ते गुणान्पुंस्त्वमुलभान् । त्वयि क्षीरैकान्ताद् अदिमपतिपारार्थ्यकरुणाक्षमादीन्वा भोक्तुं भवति युवयोरात्मनि भिदा ॥३४॥ घनकनकद्युती युवदशामपि मुग्धदशां युवतरुणत्वयोरुचितमाभरणादि परम् । भुवनसमानदेशविनिवेशि विभज्य हरौ त्वयि च कुशेशयोदरविहारिणि! निर्विशसि ॥३५॥ अङ्गं ते मृदुशीतमुग्धमधुरोदारैर्गुणैर्गुम्भतः, क्षीराब्धेः किमजीवताममुपगता रन्ये महार्घारतः । इन्दुः कल्पलतासुधामधुमुखा इत्याखिलां वर्णनां, श्रीरङ्गेश्वरि ! शान्तकान्तिमकथं दिव्यं वपुर्नार्हति ॥३६॥ अगमदनुविधित्सावासनालम्नभवे प्रणिधिपरिचितापाकुञ्चितं पार्श्वकेन । कनकनिकषचञ्चच्चम्पकस्रक्समानप्रवरमिदमुदारं वर्ष्म वाचामभूमिः ॥३७॥ एकं न्यञ्च नतिक्षमं सम परं चाकुञ्च्य पादाम्बुजं मध्येविष्टरपुण्डरीकमभयं विन्यस्य हस्ताम्बुजम् । त्वां पश्येम निषेदुषीं प्रतिकलं कारुण्यकूलङ्कषस्फारापाङ्गतरङ्गमम्ब! मधुरं मुग्धं मुखं बिभ्रतीम् ॥३८॥ सुरभितनिगमान्तं वन्दिषीयेन्दिरायाः, तव कमलपलाशप्रक्रियं पादयुग्मम् । वहति मदुपमर्दवैजयन्ती हिमाम्भः प्लुतिभिरिव नवत्वं कान्तवाहान्तराले ॥३९॥ त्वत्स्वीकारकलावलेपकलुषा राज्ञां दशो दुर्वचाः नित्यं त्वन्मधुपानमत्तमधुपश्रीनिर्भराभ्यां पतिम् । दृग्भ्यामेव हि पुण्डरीकनयनं वेदो विदामास ते साक्षाल्लक्ष्मि! तवाऽवलोकविभवः काका कया वर्ण्यते ॥४०॥ आनन्दात्ममिरीशमज्जनमदक्षीबालसौरागलप्रेमार्द्रैरपिकूलमुद्रहकृपासम्प्लावितास्वादशैः । पद्मे ! ते प्रतिबिन्दु-


चद्रकलिकब्रह्मादिविष्कम्भकैः, ऐश्वर्योद्गमगद्गदैरशरणं मां पालया-ऽऽलोकितैः ॥४१॥ पादारुन्तुदमेव पङ्कजरजश्चेटीभृशालोकितैः अङ्ग-म्लानिरथाम्ब! साहसविधौ लीलारविन्दग्रहः । डोला ते वनमा-लया हरिभुजे हाकष्टशब्दास्पदं केन श्रीरतिकोमला तनुरियं वाचां विमर्दक्षमा ॥४२॥ आमर्यादमकण्टकं स्तनयुगं नाऽद्यापि नाऽऽलो-कितभ्रूभेदस्मितविभ्रमा जहति वा नैसर्गिकत्वाऽयशः । सूते शैश-वयौवनव्यतिकरो गात्रेषु ते सौरभं भोगस्रोतसि कान्तदेशिककरग्राहेण गाहक्षमः ॥४३॥ आमोदाङ्कुतशालि यौवनदशाव्याकोचमम्लानिग-त्सौन्दर्यामृतसेकशीतलमिदं लावण्यसूत्रार्पितम् । श्रीरङ्गेश्वरि! को-मलाङ्गसुमनस्सन्दर्भगं देवि! ते कान्तोरःप्रतियत्नमर्हति कथं धि-ङ्मामकाण्डाकुलम् ॥४४॥ मर्मस्पृशो रससिरा व्यतिविध्यवृत्तः कान्तोपभोगललितैर्ललिताङ्गयष्टिः । पुष्पावलीव रसिकभ्रमरोपभुक्ता त्वं देवि! नित्यमभिनन्दयसे मुकुन्दम् ॥४५॥ कनकरशनामुक्ता-ताटङ्कहारललाटिका मणिसरतुलाकोटिप्रायैर्जनार्दनजीविके! । प्रकृ-तिमधुरं गात्रं जागर्ति मुग्धविभूषणैर्वलयशकलैर्दुग्धं पुष्पैश्च कल्प-लता यथा ॥४६॥ सामान्यभोग्यमपि कौस्तुभवैजयन्ती पञ्चायु-धादि रमणः स्वयमेव बिभ्रत् । तद्भारखेदमिव ते परिहर्तुकामः श्रीरङ्गधाममणिमञ्जरि ! गाहते त्वाम् ॥४७॥ यदि मनुजतिरश्चां लीलया तुल्यवृत्तेः अनुजनुरनुरूपा देवि! नाऽवातरिष्यः । असर-समभविष्यन्नर्म नाथस्य मातः! दरदलदरविन्दोदन्तकान्तायताक्षि४८ स्खलितकटकमाल्यैर्दोर्भिरङ्घ्रि मुरारेः भगवति! दधिमाथं मथ्नतः श्रान्तिशान्त्यै । श्रमदमृततरङ्गावर्ततः प्रादुरासीः स्मितनयनसुधा-भिस्सिञ्चती चन्द्रिकेव ॥४९॥ मातर्मैथिलि! राक्षसीस्त्वयि तदैवार्द्रा-पराधास्त्वया रक्षन्त्या पवनात्मजाल्लघुतरा रामस्य गोष्ठी कृता ।

काकं तं च विभीषणं शरणमित्युक्तिक्षमौ रक्षतः सा नस्सान्द्रमहागसस्सुखयतु क्षान्तिस्तवाऽऽकस्मिकी ॥ ५० ॥ मातर्लक्ष्मि ! यथैव मैथिलजनस्तेनाऽध्वना ते वयं त्वद्दास्यैकरसाभिमानसुभगैर्भावैरिहाऽमुत्र च । जामाता दयितस्तवेति भवतीसम्बन्धदृष्ट्या हरिं पश्येम प्रतियाम याम च परीचारान् प्रहृष्येम च ॥ ५१ ॥ पितेव त्वत्प्रेयाञ्जननि ! परिपूर्णागसि जने हितस्रोतोवृत्त्या भवति च कदाचित् कलुषधीः । किमेतन्निर्दोषः क इह जगतीति त्वमुचितैः, उपायैर्विस्मार्य स्वजनयसि माता तदसि नः ॥ ५२ ॥ नेतुर्नित्य सहायिनी जननि! नस्त्रातुं त्वमत्राऽऽगता, लोके त्वन्महिमावबोधबधिरे प्राप्ता विमर्दं बहु । क्लिष्टं ग्रावसु मालतीमृदु पदं विश्लिष्य वासो वने, जातो धिक् करुणां धिगस्तु युवयोः स्वातन्त्र्यमत्यङ्कुशम् ॥ ५३ ॥ अधिशयितवानब्धिं नाथो ममन्थ बबन्ध तं, हरधनुरसौ वल्लीभङ्गं बभञ्ज च मैथिलि । अपि दशमुखीं लूत्वा रक्षःकबन्धमनर्तयत्, किमिव न पतिः कर्ता त्वच्चाटुचुञ्चु मनोरथः ॥ ५४ ॥ दशशतपाणिपादवदनाक्षिमुखैरखिलैः, अपि निजवैश्वरूप्यविभवैरनुरूपगुणैः । अवतरणैस्तैश्च रसयन् कमिता कमले! क्वचन हि विभ्रमभ्रमिमुखे विनिमज्जति ते ॥ ५५ ॥ जननभवनप्रीत्या दुग्धार्णवं बहुमन्यसे, जननि! दयितप्रेम्णा पुष्णासि तत्परमं पदम् । उदधिपरमव्योम्नोर्विस्मृत्यमादृशरक्षणक्षममिति धिया भूयः श्रीरङ्गधामनि मोदसे ॥ ५६ ॥ औदार्यकारुणिकताश्रितवत्सलत्वपूर्वेषु सर्वमतिशायितमत्र मातः! । श्रीरङ्गधाम्नि यदुताऽन्यदुदाहरन्ति, सीतावतारमुखमेतदमुष्य योग्या ॥ ५७ ॥ ऐश्वर्यमक्षरगतिं परमं पदं वा, कस्मैचिदञ्जलिभरं वहते वितीर्य । अस्मै न किञ्चिदुचितं कृतमित्यथाम्ब!, त्वं लज्जसे कथय कोऽयमुदारभावः ॥ ५८ ॥ ज्ञानक्रियाभजनसम्पद्

किञ्चनोहं इच्छाधिकारशकनानुशयानभिज्ञः । आगांसि देवि! युवयोरपि दुस्सहानि, बध्नामि मूर्खचरितस्तव दुर्भरोऽस्मि ॥५९॥ इत्युक्तिकैतवशतेन विडम्बयामि, तानम्ब! सत्यवचसः पुरुषान् पुराणान् । यद्वा न मे भुजबलं तवपादपद्मलाभे त्वमेव शरणं विधितः कृताऽसि ॥ ६० ॥ श्रीरंगे शरदश्शतं सह सुहृद्वर्गेण नि-ष्कण्टकं, निर्दुःखं सुसुखं च दास्यरसिकां भुक्त्वा समृद्धिं पराम् । युष्मत्पादसरोरुहान्तररजः स्याम त्वमम्बा पिता, सर्वं धर्ममपि त्वमेव भवनः स्वीकुर्वकस्मात्कृपाम् ॥ ६१ ॥

॥ श्रीगुणरत्नकोशः समाप्तः ॥

श्रीकूरनारायणमुनिभिरनुगृहीतं
श्रीसुदर्शनशतकम् ।



रङ्गेशविज्ञप्तिकरामयस्य चकार चक्रेशनुतिं निवृत्तये ।
समाश्रयेऽहं वरपूरणीं यः तं कूरनारायणनामकं मुनिम् ॥

ज्वालावर्णनं प्रथमम्—

सौदर्शन्युज्जिहाना दिशिविदिशि तिरस्कृत्यसावित्रमर्चिःबाह्या बाह्यान्धकारक्षतजगदगदङ्कारभूम्ना स्वधाम्ना। दोः खर्जूदुरगर्ज द्विबुध-रिपुवधूकण्ठवैकल्यकल्या ज्वाला जाज्वल्यमाना वितरतु भवतां वीप्सयाऽभीप्सितानि ॥१॥ प्रत्युद्यातं मयूखैर्नभसि दिनकृतः प्राप्तसेवं प्रभाभिः, भूमौ सौमेरवीभिर्दिवि वरिवसितं दीप्तिभिर्देवधाम्नाम् । भूयस्यै भूतये वःस्फुरतु सकलदिग्भ्रान्तसान्द्रस्फुलिङ्गं, चाक्रं जा-ग्रत्प्रतापं त्रिभुवनविजयव्यग्रमुग्रं महस्तत् ॥ २ ॥ पूर्णे पूरैस्सुधानां सुमहति लसतस्सोमबिम्बालवाले, बाहाशाखावरुद्धक्षितिग-

गनदिवश्चक्रराजद्रुमस्य । ज्योतिश्छन्ना प्रवालः प्रकटितसुमनस्स-स्पदुत्तंसलक्ष्मीं, पुष्णन्नाशामुखेषु प्रदिशतु भवतां सप्रकर्षं प्रहर्षम् ॥३॥ अरादारात् सहस्राद्विसरति विमतक्षेपदक्षाघदक्षात्, नाभेर्भास्वत्सनाभेर्निजविभवपरिच्छिन्नभूमेश्च नेमेः । आम्नायैरेककण्ठैः स्तुतमहिममहो माधवीयस्य हेतेः, तद्वो दिक्ष्वेधमानं चतसृषु चतुरः पुष्यतात् पूरुषार्थान् ॥ ४ ॥ श्यामं धामप्रसूत्या कचन भगवतः क्वापि बभ्रु प्रकृत्या, शुभ्रं शेषस्य भासा क्वचन मणिरुचा क्वापि तस्यैव रक्तम् । नीलं श्रीनेत्रकान्त्या क्वचिदपि मिथुनस्याऽऽदिमस्येव चित्रां, व्यातन्वानं वितानश्रियमुपचिनुताच्छर्म वश्चक्रभानम् ॥ ५ ॥ शंसन्त्युन्मेषमुच्छोपितपरमहसो भास्वतः कैटभारेः इन्धे सन्ध्येव नक्तञ्चरविलयकरी या जगद्वन्दनीया । बन्धूकच्छायबन्धुच्छविघटितघनच्छेदमेदस्विनी सा, राथाङ्गी रश्मिभंगी प्रणुदतु भवतां प्रत्यहोत्थानमेनः ॥ ६ ॥ साम्यं धूम्या प्रवृद्ध्या प्रकटयति नभस्तारकाजालकानि, स्फौलिङ्गीं यान्ति कान्तिं दिशति यदुदये मेरुरङ्गारशङ्काम् । अग्निर्भग्नार्चिरैक्यं भजति दिननिशावल्लभौ दुर्लभाभौ, ज्वालावर्ताविव स्तः प्रहरणपतिजं धाम वस्तद्धिनोतु ॥ ७ ॥ दृष्टेऽधिव्योम चक्रे विकचनवजपासन्निकाशे सकाशं, स्वर्भानुर्भानुरेष स्फुटमिति कलयन्नागतो वेगतोऽस्य । निष्टप्तो यैर्निवृत्तो विधुमिव सहसा स्प्रष्टुमद्यापि नेष्टे, घर्मांशुं ते घटन्तामहितविहतये भानवो भास्वरा वः ॥ ८ ॥ देवं हेमाद्रितुंगं पृथुभुजशिखरं बिभ्रतीं मध्यदेशे, नाभिद्वीपाभिरामामरविपिनवतीं शेषशीर्षासनस्थाम् । नेमिं पर्यायभूमिं दिनकरकिरणादृष्टसीमः परीत्य, प्रीत्यै वश्चक्रवालाचल इव विलसन्नस्तु दिव्यास्त्ररश्मिः ॥९॥ एकं लोकस्य चक्षुर्द्विविधमपनुदत्कर्म नम्रत्रिनेत्रं, दात्रर्थानां चतुर्णां गमयदरिगणं पञ्चतां षड्गुणाढ्यम् । सप्तार्चिश्शोचिताष्टापदनवकिरणश्रेणिरज्यद्दशाशं पर्यस्याद्वश्शताङ्गावयवपरि-

बृढज्योतिरीतीस्सहस्रम् ॥ १० ॥ उच्चण्डे यच्छिखण्डे निविडयति नभःक्रोडमक्रोंऽटति द्याम्, अभ्यस्य प्रौढतापग्लपितवपुरपो बिभ्रतीरभ्रपंक्तीः। धत्ते शुष्यत्सुधोत्सो विधुरपमधुनः क्षौद्र कोशस्य साम्यं, रक्षन्त्वब्जभोस्ते रचितसुचरितव्युष्टयो घृष्टयो वः ॥ ११ ॥ पद्मौघोदीर्धिकाम्भस्यवनिधरतटे गैरिकाम्बु प्रपातः, सिन्दूरं कुञ्जराणां दिशिदिशि गगने सान्ध्यमेघप्रबन्धः। पारावारे प्रवालो वनभुवि च तथा प्रेक्ष्यमाणः प्रमुग्धैः, साधिष्ठं वः प्रमोदं जनयतु दनुजद्वेषिणस्त्वैपराशिः ॥ १२ ॥ भानो भा नो त्वदीया स्फुरति कुमुदिनीमित्र! ते कुत्र तेजः, तारा:! स्ताऽऽराद्धी रोस्यनल! न भवतः स्वैरमेस्म्मदार्चिः!। शंसन्तीत्थं नभःस्था यदुदयसमये चक्रराजांशवस्ते, युष्माकं प्रौढतापप्रभवभवगदापक्रमाय क्रमन्ताम् ॥ १३ ॥ जग्ध्वा कर्णेषु दूर्वाङ्कुरमरिसुदृशामक्षिपु स्वर्वधूनां, पीत्वा चाऽम्भश्चरन्त्यः सवृषमनुगता वल्लवेनाऽऽदिसेन। गावो वश्चक्रभर्तुः परममृतरसं प्रश्रितानां दुहानाः, ऋद्धिं स्वालोकलुप्तत्रिभुवनतमसः सानुबन्धां ददन्ताम् ॥ १४ ॥ सेनां सेनां मघोनो महति रणमुखेऽलं भयंलम्भयन्तीः उत्सेकोष्णालुदोष्णां प्रथमदिविषदामावलीर्याऽवलीढे। विश्वं विश्वम्भराद्यं रथपदधिपतेलीलया पालयन्ती, वृद्धिस्सा दीधितीनां वृजिनमनुजनुर्मार्जयत्वार्जितं वः॥१५॥ तप्ता स्वेनोष्मणेव प्रतिभटवपुषामस्रधारा धयन्ती, प्रागेव क्षीबभावं प्रतिदिशमसकृत् तन्वती घूर्णितानि। वंशास्थिस्फोटशब्दं प्रकटयति पटून् याऽऽवहन्त्यट्टहासान्, भासा वः स्यन्दनाङ्गप्रभुसमुदयिनी स्पन्दतां चिन्तताय ॥ १६ ॥ देवैरासेव्यमानो दनुजभटभुजादण्डदर्पोष्मतप्तैः, आशारोधोतिलङ्घी लुठदुडुपटलीलक्ष्य डिण्डीरपिण्डः। रिङ्गज्ज्वालातरङ्गत्रुटितरिपुतरुव्रातपातोग्रमार्गः, चाक्रोवश्शोचिरोघश्शमयतु दुरितापह्नवं दाववह्निम् ॥ १७ ॥

भ्राम्यन्ती संश्रितानां भ्रमशमनकरीच्छन्नसूर्यप्रकाशा, सूर्यालोकानुरूपा रिपुहृदथतमस्कारिणी निस्तमस्का । धारासंपातिनी च प्रकटितदहना दीप्तिरस्त्रेशितुर्वः, चित्रा भद्राय विद्रावितविमतजना जायतामायताय ॥ १८ ॥ निन्ये वन्येन काशी दवशिखिजटिलज्योतिषा येन दाहं, कृत्यावृत्तचा विलिल्ये शलभसुलभया यत्र चित्रप्रभावे। रुद्रोऽप्यद्रेर्दुहित्रा सह गहनगुहां यद्भयादभ्यशासीत्, दिश्याद्विश्वार्चितो वस्स शुभमनिभृतं शौरिहेतिप्रतापः ॥ १९ ॥ उद्यन् बिम्बादुदाराग्नयनजलहिमं मार्जयन् निर्जरीणां, अज्ञानध्वान्तमूर्छाकरजनिरजनीभञ्जनव्याञ्जताध्वा । न्यक्कुर्वाणो ग्रहाणां स्फुरणमपहरन्नर्चिषः पावकीयाः, चक्रेशार्कप्रकाशो दिशतु दश दिशो व्यश्नुवानं यशो वः ॥ २० ॥ वर्गस्य स्वर्गधाम्नामपि दनुजनुषां विग्रहं निग्रहीतुं, दातुं सद्योबलानां श्रियमतिशयिनीं पत्रभङ्गानुवृत्तचा । योऽकुं देदीप्यते या युगपदपि पुरो भूतिमय्या प्रकृत्या, सा वो नुद्यादविद्यां द्युतिरमृतरसस्यन्दिनीस्यान्दनाङ्गी २१ दाहं दाहं सपत्नान् समरभुवि लसद्भस्मना वर्त्मना यान्, क्रव्याढ्प्रेतभूताद्यभिलषितपुषा प्रीतकापालिकेन । कङ्कालैः कालधौतं गिरिमिवकुरुते यःस्वकीर्तेर्विहर्तुं,घृष्टिस्सान्द्रष्टिकं वस्सकलमुपनयत्वायुधाग्रेसरस्य २२ दग्धानां दानवानां सभसितनिचयैरस्थिभिस्सर्वशुभ्रां, पृथ्वीं कृत्वापिभूयो नवरुधिरझरी कौतुकक्षौणपेभ्यः। कुर्वाणं बाष्पपूरैः कुचतटघुसृणक्षालनैस्तद्वधूनां, पापं पापच्यमानं शमयतु भवतां शस्त्रराजस्य तेजः ॥ २३ ॥ मागान्मोषं ललाटानल इति मदनद्वेषिणा ध्यायतेव, स्रष्ट्रा प्रोन्निद्रवासाम्बुजदलपटलप्लोषमुत्पश्यतेव । वज्राग्निर्मास्स नाशं व्रजादिति चकितेनेव शक्रेण वद्धैः स्तोत्रैरस्त्रेश्वरस्य द्यतु दुरित शतं द्योतमाना द्युतिर्वः॥ २४॥इतिज्वालर्णनंप्रथमम्

अथ नेमिवर्णनं द्वितीयम्—

शश्वाखं शात्रवाणां शलभकुलमिव ज्वालया लेलिहाना, घोषैः स्वैः क्षोभयन्ती विघटितभगवद्योगनिद्रान् समुद्रान् । व्योढोरः प्रौढचार त्रुटितपटुरटत्कीकसक्षुण्णदैत्या, नेमिस्सौदर्शनी वःश्रियमतिशयिनीं दाशतादाशताब्दम् २५ धारा चक्रस्य तारागणकणविततिद्योतितद्यु प्रचारा पारावाराम्बुपूरक्वथनपिशुनितोत्तालपातालयात्रा । गोत्राद्रिस्फोटशब्दप्रकटितवसुधास्मण्डली चण्डयाना, पन्थानं वः प्रदिश्यात् प्रशमनकुशला पाप्मनामात्मनीनम् ॥ २६ ॥ यात्रा या त्रातलोका प्रकटितवरुणत्रासमुद्रे समुद्रे, सत्त्वासत्त्वा सहोष्मा कृतसगरुदगस्पन्ददाना ददाना । हानिं हा निन्दितानां जगति परिषदां दानवीनां नवीनां, चक्रे चक्रेशनेमिश्शमुपहरतु सा सप्रभावप्रभावः ॥ २६ ॥ यत्राऽमित्रान् दिधक्षौ प्रविशति वलिनो धाम निस्सीमधाम्नि, प्रस्तापस्तापशीर्णैः प्रगुणितसिकतो मौक्तिकैश्शौक्तिकेयैः । राशिर्वारामपारां प्रकटयति पुनर्वैरिदाराश्रुपूरैः,वृद्धिं निर्याति निर्यापयतु सदुरितान्यस्त्रराजप्रधिर्वः ॥ २८ ॥ कक्ष्यातौल्येन कद्रूतनयफणमणीन् कल्पदीपस्य युञ्जन् पातालान्तःप्रपाती निखिलमपि तमः स्वेन धाम्ना निगीर्य । दैतेयप्रेय सीनां वमति हृदि हतप्रेयसां भूयसा यः, चक्राग्रीयाग्रदेशो दहतु विलसितं वह्नसावंहसां वः २९ कृष्णाम्भोदस्य भूषा कृतनयननयव्याहृतिर्भार्गवस्य, प्राप्तामावेदयन्ती प्रतिभटसुदृशामुद्भटां बाष्पवृष्टिम् । निष्टप्ताष्टापदश्रीस्समममरचमूगर्जितैरुज्जिहाना, कीर्तिं वःकेतकीभिः प्रथयतु सदृशीं चञ्चला चक्रधारा ॥ ३० ॥ वप्राणां भेदनीं यःपरिणतिमखिलश्लाघनीयां दधानः, क्षुण्णां नक्षत्रमालां दिशि दिशि विकिरन् विद्युता तुल्यकक्ष्यः । निर्याणेनोत्कटेन प्रकटयति नवं दानवारिप्रकर्षं, चक्राधीशस्य भद्रो वशयतु भवतां सप्रधिश्चित्त वृत्तिम् ॥ ३१ ॥ नाकौकश्शत्रुजत्रुत्रुटनविघटितस्कन्धनी रन्ध्रनिर्यन्, नव्यक्रव्यास्रभव्यग्रसनरसलसज्ज्वालजिह्वालवह्निम् ।

यं दृष्ट्वा सांयुगीनं पुनरपि विदधत्याशिषो वीर्यवृद्ध्यै, गीर्वाणा निर्वृणाना वितरतु स जयं विष्णुहेतिप्रधिर्वः ॥ ३२ ॥ धन्त्राध्वन्यस्य धारासलिलमिव धनं दुर्गतस्येव दृष्टिः जात्यन्धस्येव पङ्गोः पदविहृतिरिव प्रीणनी प्रेमभाजाम्। पत्युर्माया क्रियायां प्रकटपरिणतिर्विश्वरक्षाक्षमायां ;मायामायामिनीं वस्त्रुटयतु महती नेमिरस्त्रेश्वरस्य ॥ ३३ ॥ त्राणं या विष्टपानां वितरति च यया कल्प्यते कामपूर्तिः, न स्थातुं यत्पुरस्तात् प्रभवति कलयाऽप्योषधीनामधीशः। उन्मेषो याति यस्या न समयनियतिं सा श्रियं वः प्रदेयात् न्यक्कृत्य द्योतमाना त्रिपुरहरदृशं नेमिरस्त्रेश्वरस्य ॥ ३४ ॥ नक्षत्रक्षोदभूतिप्रकरविकिरणश्वेतिताशावकाशा, जीर्णैः पर्णैरिव द्यां जलधरपटलैश्चूर्णितैरूर्णुवाना। अजावाजानवाजानतरिपुजनतारण्यमावर्तमाना, नेमिर्वात्येव चाक्री प्रणुदतु भवतां संहतं पापतूलम् ३५ क्षिप्त्वा नेपथ्यशाटीमिव जलदघटां जिष्णुकोदण्डचित्रां, तारापुञ्जं प्रसूनाञ्जलिमिव विपुले व्योमरंगे विकीर्य। निर्वेदग्लानिचिन्ताप्रभृति परवशानन्तरा दानवेन्द्रान्, नृत्यन्नानालयाढयं नट इव तनुतां शर्मचक्रप्रधिर्वः ॥ ३६ ॥ दौर्गत्यप्रौढतापप्रतिभटविभवा वित्तधारास्सृजन्ती, गर्जन्ती चीत्क्रियाभिर्ज्वलदनलशिखोद्दाम सौदामनीका। अव्यात् क्रव्याद्वधूटीनयनजलभरैर्दिक्षु नव्याननाव्यान्, पुष्यन्ती सिन्धुपूरान् रथचरणपतेर्नेमिकादम्बिनी वः ॥३७॥ सन्दोहं दानवानामजसमजमिवाऽऽलम्य जाज्वल्यमाने, वह्नावह्नाय जुह्वत्रिदशपरिषदे स्वस्वभागप्रदायी। स्तोत्रैर्ब्रह्मादिगीतैर्मुखरपरिसरं श्लाघ्यशस्त्रप्रयोगं, प्रासस्सङ्ग्रामसत्रं प्रधिरसुररिपोः प्रार्थितं प्रस्तुतां वः ॥३८॥ इति नेमिवर्णनम्।

अथ अरवर्णनं तृतीयम्—

उत्पातालातकल्पान्यसुरपरिषदामाहवप्रार्थिनीनां, अध्वानध्वावबोधक्षपणचणतमः क्षेपदीपोपमानि। त्रैलोक्यागारभारोद्व-

हनसहमणिस्तम्भसम्पत्सखानि, त्रायन्तामन्तिमायां विपदि सपदि वोऽराणि सौदर्शनानि ॥ ३९ ॥ ज्वालाजालप्रवालस्तवकितशिरसो नाभिमावालयन्त्यः, सिक्ता रक्ताम्बुपूरैश्शकलितवपुषां शात्रवानीकिनीनाम् ॥ चक्राक्रीडप्ररूढा भुजगशयभुजोपघ्ननिघ्नप्रचाराः, पुष्प्यन्त्यः कीर्तिपुष्पाण्यरकनकलताः प्रीतये वःप्रथन्ताम् ॥ ४० ॥ ज्वालाजालाब्धिमुद्रं क्षितिवलयमिवाऽऽबिभ्रती नेमिचक्रं, नागेन्द्रस्येव नाभेः फणपरिषदिव प्रौढरत्नप्रकाशा । दत्तां वो दिव्यहेतेर्मतिमरवितति: ख्यातसाहस्रसङ्ख्या, सङ्ख्यावत्सङ्घचित्तश्रवणहरगुणस्यन्दिसन्दर्भगर्भाम् ॥ ४१ ॥ ब्रह्मेशोपक्रमाणां बहुविधविसतक्षोदसंमोदितानाम्, सेवायै देवतानां दनुजकुलरिपोः पिण्डिकाघङ्घभाजाम् । तत्तद्धामान्तसीमाविभजनविधये मानदण्डायमना, भूमानं भूयसा वो दिशतु दशशती भास्वराणामराणाम् ॥ ४२ ॥ ज्वालाकल्लोलमालानिविडपरिसरां नेमिवेलां दधाने पूर्वेणाक्रान्तमध्ये भुवनभयहाविर्भोजिना पूरुषेण । प्रस्फूर्जत्प्राज्यरत्ने रथपदजलधावेधमानैः स्फुलिङ्गैः भद्रं वो विद्रुमाणां श्रियमरविततिर्विस्तृणाना विधत्ताम् ॥ ४३ ॥ नासीरस्वैरभग्जप्रतिभटरुधिरासारधारावसेकान् एकान्तस्मेरपद्मप्रकरसहचरच्छायया प्राप्य नाभ्या । मुक्तानीवाङ्कुराणि स्फुरदनलशिखादर्शितप्राक्प्रवालानि, अव्याघातेन भव्यं प्रददतु भवतां दिव्यहेतेरराणि ॥ ४४ ॥ दावोल्कामण्डलीव द्रुमगणगहने वाडवस्येव वह्नेः, ज्वालावृद्धिर्महाब्धौ प्रचयसि तमसि प्रातरर्कप्रभेव । चक्रे या दानवानां हयकरटिघटासङ्कटे जाघटीति प्राज्यं सा वः प्रदेयात् पदमरपरिषत् पद्मनाभायुधस्य ॥ ४५ ॥

तापाद्दैत्यप्रतापातपसमुपचितात् त्रायमाणं त्रिलोकीम्, लोलैर्ज्वाला कलापैः प्रकटयदभितश्चीनपट्टाञ्चलाने । छत्राकारं शलाका इव कनककृताश्शौरिदोर्दण्डलग्नं, भूयासुर्भूषयन्त्यो रथचरणमरस्फूर्तयः कीर्तये वः ॥ ४६ ॥ नाभीशालानिखातां नहनसमुचितां वैरिलक्ष्मीवशानां, संयद्वारीहृतानां समनुविदधती काञ्चनालानपङ्क्तिम् । राज्या च प्राज्यदैत्यव्रजविजयमहोत्तम्भितानां भुजानां, तुल्या चक्रारमाला तुलयतु भवतां तूलवच्छत्रुलोकम् ॥ ४७ ॥ आ नेमेश्चक्रनालाच्चिय इव वितताः पिण्डिकाचण्डदीप्तेः, दीप्ता दीपा इवाऽऽरादृढनरणतमीगाहिनः पूरुषस्य । शाणे रेखायितानां रथचरणमये शत्रुशौण्डीर्यहेम्नां, रेखाः प्रत्यग्रलग्ना इव भुवनपरश्रेणयः प्रीणयन्तु ॥ ४८ ॥ दीप्तैरर्चिःप्ररोहैर्दलयति विधृते बाहुनालेन विष्णोः, उद्यत्प्रद्योतनाभं प्रथयति पुरुषं कर्णिकावर्णिकायाम् । चूडालं वेदमौलिं कलयति कमले चक्रनाम्नोपलक्ष्ये, लक्ष्मीं स्फारामराणि प्रतिविदधतु वः केसरश्रीकराणि ॥ ४९ ॥ धातुस्यन्दैरमन्दैः कलुषितवपुषो निर्झराम्भःप्रपातान्, अर्चिष्मत्या स्वमूर्त्या रथचरणगिरेर्नेमिनाभीतटस्य । व्याकुर्वाणाऽरपङ्क्तिर्वितरतु विभुताविस्तृतिं वित्तकोटी, कोटीरच्छत्रपीठीकटककरिघटाचामरस्रग्विणीं वः ॥ ५० ॥ इति अरवर्णनं तृतीयम् ।

अथ नाभिवर्णनं चतुर्थम्—

ऐक्येन द्वादशानामशिशिरमहसां दर्शयन्ती प्रवृत्तिं, दत्तैः स्वर्लोकलक्ष्म्यास्तिलक इव मुखे पद्मरागद्रवेण । देयाद्दैतेयदर्पक्षतिकरणरणप्रीणिताम्भोजनाभिः नाभिर्नाभित्वमुर्व्यास्सुरपतिविभवस्पर्शि सौदर्शनी वः ॥५१॥ शस्त्रश्यामे शताङ्गक्षितिभृति तरलैरुत्तरङ्गे तुरङ्गैः, त्वङ्गन्मातङ्गनक्रे कुपितभटमुखच्छायमुग्धप्रवाले । अस्तोकं प्रस्तुवाना प्रतिभटजलधौ पाटवं बाडवस्य, श्रेयो वस्संदि-

धत्तां श्रितदुरितहरा श्रीधराब्जस्य नाभिः ॥ ५२ ॥ ज्वालाचूडाल कालानलचलनसमाडंबरा सांपरायं, यासावासाद्य माद्यत्सुरसुभट भुजास्फोटकोलाहलाढ्यम् । दैत्यारण्यं दहन्ती विरचयति यशो-भूतिशुभ्रां धरित्रीं, सा वश्चक्रस्य नक्रस्यदमृदितगजत्राथिणी नाभिरव्यात् ॥ ५३ ॥ विन्दन्ती सान्ध्यमर्चिर्विदलितवपुषः प्रत्यनीकस्य रक्तैः, स्फायन्नक्षत्रराशिर्दिशिदिशि कणशः कीकसैः कीर्यमाणैः । नाकौकःपद्मलाक्षीनवमदहसितच्छायया चन्द्रपादान्, राथाङ्गी विस्तृणाना रचयतु कुशलं पिण्डिका यामिनी वः ॥ ५४ ॥ निस्सीमं निस्सृताया भुजधरणिधराघाटतः कैटभारेः, आशाकूलङ्कषधैर्यैरहितबलमहाम्भोधिमासादयन्त्याः । चक्रज्वालापगायाश्चल-दरलहरीमालिकादन्तुरायाः, विभ्रत्यावर्तभावं भ्रमयतु भुवने पिण्डिका वः प्रशस्तिम् ॥ ५५ ॥ पाणौ कृत्याहवाग्रे प्रतिभटवि-जयोपार्जितां वीरलक्ष्मीं, अनीतायास्ततोऽस्याः स्वसविधमसुरद्वेषि-णा पूरुषेण । प्रासादं वासहेतोर्विरचितमरुणै रश्मिभिस्सूचयन्ती, ना-भिर्वो निर्मिमीतां रथचरणपतेर्निर्वृतिं निर्विघाताम् ॥ ५६ ॥ डिण्डीरापाण्डुगण्डैररियुवतिमुखैः पिण्डिका कृष्णहेतेः, उच्चण्डाश्रु प्रवर्षैरुपरततिलकैरुक्तशौण्डीर्यचर्या । द्वित्रग्रामाधिपत्यद्रुहिण-मदमपीदूषिताक्षक्षमाभृत् , सेवाहेवाकपाकं शमयतु भवतां कर्म शर्मप्रतीपम् ॥ ५७ ॥ पर्याप्तामुन्नतिं या प्रथयति कमलं या तिरोभाव्य भाति, स्रष्टुस्सृष्टेर्दवीयः कुवलयमहितं या बिभर्ति-स्वरूपम् । भूम्ना स्वेनान्तरिक्षं कवलयति च या सा विचित्रा वि-धत्तां, दैतायारातिनाभिर्द्रविणपतिपदद्रोहिणीं संपदं वः ॥ ५८ ॥ वाणीवाङ्गैश्चतुर्भिस्सदसि सुमनसां द्योतमानस्वरूपा, वाहन्तःस्था मुरारेभिमतमखिलं श्रीरिव स्पर्शयन्ती । दुर्गेवोग्राकृतिर्या त्रिभुवन-

जननस्थेमसंहारधुर्या, मर्यादालम्घनं वः क्षपयतु महती हेतिवर्यस्य नाभिः ॥ ५९ ॥ स्रग्भिस्सन्तानजाभिर्मधुरमधुरभस्यन्दसन्दोहिनीभिः, पाटीरैः प्रौढचन्द्रातपसुषमालोपनैर्लेपनैश्च । धूपैः कालागरूणामपि सुरसुदृशो विस्तमर्चासु यस्याः, गन्धं रुन्धन्ति सा वश्चिरमसुरभिदो नाभिरव्यादभव्यात् ॥ ६० ॥ अंहस्संहृत्य दग्ध्वा प्रतिजनिजनितं प्रौढसंहारवन्या दूराध्वन्यानधन्यान्महति विनतिभिर्धामनि स्थापयन्ती । विश्रान्तिं शाश्वतीं या नयति रमयतां चक्रराजस्य नाभिः संयन्मोमुह्यमानत्रिदशरिपुदशासाक्षिणी साक्षिणी वः ॥ ६१ ॥ इति नाभिवर्णनं चतुर्थम् ।

अथ अक्षवर्णनं पञ्चमम्—

श्रुत्वा यन्नामशब्दं श्रुतिपथकटुकं देवनक्रीडनेषु, स्वैरैरिस्वैरवत्यो भयविवशधियः कातरन्यस्तशाराः । मन्दाक्षं यान्त्यमन्दं प्रतियुवतिमुखैर्दर्शितोत्प्रासदर्पैः, अक्षं सौदर्शनं तत्क्षपयतु भवतामेधमानां धनायाम् ॥ ६२ ॥ व्यस्तस्कन्धं विशीर्णप्रसवपरिकरं प्रत्तपत्रोपमर्दम्, संयद्वर्षासु तर्षातुरखगपरिषत्पीतरक्तोदकासु । अक्षं रक्षस्तरूणामशनिवदशनैरापतन्मूर्ध्निमूर्ध्नि, स्तादस्त्राधीशितुर्वः स्तवकितयशसे द्वेषिणां प्लोषणाय ॥ ६३ ॥ दीक्षां सङ्ग्रामसत्रे महति कृतवतो दीप्तिभिस्संहताभिः, जिह्वाले सप्तजिह्वे दनुजकुलहविर्जुह्वतो नेमिजुह्वा । वैकुण्ठास्त्रस्य कुण्डं महदिव विलसत्पिण्डिकावेदिमध्ये, दिश्याद्दिव्यर्द्धिदेश्यं पदमिह भवतामक्षतोन्मेषमक्षम् ॥ ६४ ॥ तुङ्गदोरद्रिशृङ्गाद्दनुजविजयिनः स्पष्टदानोद्यमानां, शत्रुस्तम्बेरमाणां शिरसि निपततः स्रस्तमुक्तास्थिपुञ्जे । रक्तैरभ्यक्तमूर्तेर्विदलनगलितैर्व्यक्तवीरायितर्द्धेः हर्यक्षस्यारिभङ्गं जनयतु जगतामीडितं क्रीडितं वः ॥६५ ॥ उन्मीलत्पद्मरागं कटकमिव धृतं बाहुना यन्मुरारेः दीप्तान् रश्मीन्दधानं नयनमिव यदुत्तारकं विष्टपस्य । चक्रेशार्कस्य यद्वा परिधिरभिदृदधत्यहल्यामिवद्रा,

अक्षं पक्षे पतित्वा परिघटयतु वस्तद्द्वदिष्टां प्रतिष्ठाम् ॥ ६६ ॥ क्रीडत्प्राक्क्रोडदंष्ट्राहतिदलितहिरण्याक्षवक्षःकवाटप्राद्भूतप्रभूतक्षतजसमुदितारण्यमुग्रं समुद्रम् । उन्मीलत्किंशुकाभैरुपहसदमितैरंशुभिस्संशयघ्नीं, अक्षं चक्रस्य दत्तामघशतशमनं दाशुषीं शेमुषीं वः ॥ ६७ ॥ पद्मोल्लासप्रदं यज्जनयति जगतीसेधमान प्रबोधां यस्यच्छायासमाना लसति परिसरे रोहिणी तारकाग्र्या । नानाहेत्युन्नततत्त्वं प्रकटयति च यत्प्राप्तकृष्णप्रयाणं त्रेधा भिन्नस्य धाम्नस्समुदय इव तत्पातु वश्चाक्रमक्षम् ॥ ६८ ॥ शोचिर्भिः पद्मरागद्रवसमसुषमैश्शोभमानावकाशम्, प्रत्यग्राशोकरागप्रतिभटवपुषा भूषितं पूरुषेण । अन्तः स्वच्छन्दमग्नोत्थितभृगुतनयं क्षत्रियाणां क्षतानां, आरब्धं शोणितौघैस्सर इव भवतो दिव्यहेत्यक्षमव्यात् ॥ ६९ ॥ मत्तानामिन्द्रियाणां कृतविषयमहाकाननक्रीडनानाम्, सृष्टं चक्रेश्वरेण ग्रहणधिषणया वारिवद्वारणानाम् । गम्भीरं यन्त्रगर्तं कमपि कृतधियो मन्वते यत्प्रदेयात्, अस्थूलां संविदं वस्त्रिजगदभिमतस्थूललक्षं तदक्षम् ॥ ७० ॥ प्राणादीन् सन्नियम्य प्रणिहित मनसां योगिनामन्तरङ्गे, तुङ्गं सङ्कोच्य रूपं विरचितदहाराकाश कृच्छ्रासिकेन । प्राप्तं यत्पूरुषेण स्वमहिमसदृशे धाम कामप्रदं वः भूयात् तद्भुवस्स्वस्त्रयवरिवसितं पुष्कराक्षायुधाक्षम् ॥ ७१ ॥ विद्वान्वीध्रेण धाम्ना चरणनखभुवा बद्धवासस्य मध्ये, चक्राध्यक्षस्य बिभ्रत्परिहसितजपापुष्पकोशान्प्रकाशान् । शुभ्रैरभ्रैरदभ्रैश्शरदिनत इतो व्योम विभ्राजमानं प्रातस्त्यादित्यरोचिस्ततमिव भवतः पातु राथाङ्गमक्षम् ॥ ७२ ॥ श्रीवाणीवाङ्मृडान्यो विदधति भजनं शक्तयो यस्य दिक्षु प्राह व्यूहं यदाद्यं प्रथममपि गुणं भारती पाञ्चरात्री । घोरां शान्तां च मूर्तिं प्रथयति पुरुषः प्राक्तनः प्रार्थनाभिः, भक्तानां यस्य मध्ये दिशतु तदनघामक्षमध्यक्षतां वः ॥ ७३ ॥ रक्षःपक्षेण रक्षत्क्षतममरगणं लक्ष्यवैलक्ष्यभाजौ, लक्ष्मी-

मक्षीयमाणां वलमथनभुजे वज्रशिक्षानपेक्षे । निक्षिप्य क्षिप्रमध्यक्षयति जगति यद्दक्षतां दिव्यहेतेः, अक्षामास्मक्षमां तत्क्षपयतु भवतामक्ष जिह्वक्ष्यमक्षम् ॥ ७४ ॥ इतिअक्षवर्णनं पञ्चमम् ।

अथ पुरुषवर्णनं षष्ठम् ।

ज्योतिश्चूडालमौलिस्त्रिनयनवदनष्षोडशोत्तुङ्गबाहुः, प्रत्यालीढेन तिष्ठन्प्रणगशशधराधारषट्कोणवर्ती । निस्सीमेन स्वधाम्ना निखिलमपि जगत्क्षेमवन्निर्मिमाणः, भूयात् सौदर्शनो वः प्रतिभट पुरुषः पूरुषः पौरुषाय ॥७५॥ वाणी पौराणिकी यं प्रथयति महितं प्रेक्षणं कैटभारेः, शक्तिर्यस्येषुदंष्ट्रानखपरशुमुखव्यापिनी तद्विभूत्याम् । कर्तुं यत्तत्त्वबोधो न निशितमतिभिर्नारदाद्यैश्च शक्यः, दैवीं वो मानुषीं च क्षिपतु स विपदं दुस्तरामस्त्रराजः ॥ ७६ ॥ रूढस्तारालवाले रुचिरदलचयः श्यामलैश्शस्त्रजालैः, ज्वालाभिस्सप्रवालः प्रकटितकुसुमो बद्धसङ्घैः स्फुलिङ्गैः । प्राप्तानां पादमूलं प्रकृतिमधुरया च्छायया तापहृद्यः, दत्तामुद्दोःप्रकाण्डः फलमभिलषितं विष्णुसङ्कल्पवृक्षः ॥ ७७ ॥ धाम्नामैरम्मदानां निचयमिव चिरस्थायिनां द्वादशानां, मार्तण्डानां समूहं मह इव बहुलं रत्नभासामिवर्द्धिम् । अर्चिस्सङ्घातमेकीकृतमिव शिखिनां बाडवाग्रेसराणां, शङ्कन्ते यस्य रूपं स भवतु भवतां तेजसे चक्रराजः ॥ ७८ ॥ उग्रम्पश्याक्षमुद्यद्भ्रुकुटि समुकुटं कुण्डलिस्पष्टदंष्ट्रं, चण्डाखर्वाहुदण्डैर्लसदनलसमक्षामलक्ष्योरुकाण्डम् । प्रत्यालीढस्थपादं प्रथयतु भवतां पालनव्यग्रमग्रे, चक्रेशोऽकालकालेरितभटविकटाटोपलोपाय रूपम् ॥७९॥ चक्रं कुन्तं कृपाणं परशुहुतवहावङ्कुशं दण्डशक्ती, शङ्खं कोदण्डपाशौ हलमुसलगदावज्रशूलांश्च हेतीन् ।

दोर्भिस्सव्यापसव्यैर्दधदतुलबलस्तम्भितारातिदर्पैः, व्यूहस्तेजोभिमानी नरकविजयिनो जृम्भतां संपदे वः ॥ ८० ॥ पीतं केशे रिपोरप्यसृजि रथपदे संश्रितेऽप्युत्कटाक्षं, चन्द्राधःकारि यन्त्रे वपुषि च दलने मण्डले च स्वराङ्कम् । हस्ते वक्त्रे च हेतिस्तबकितमसमं लोचने मोचने च स्तादस्तोकाय धाम्ने सुरवरपरिषत्सेवितं दैवतं वः ॥ ८१ ॥ चित्राकारैः स्वचारैर्मितसकलजगज्जागरूकप्रतापः मन्त्रं तन्त्रानुरूपं मनसि कलयतो मानयन्नात्मगुह्यान् । पञ्चाङ्गस्फूर्तिनिर्वर्तितरिपुविजयो धाम षण्णां गुणानां, लक्ष्मीं राजासनस्थो वितरतु भवतां पूरुषश्चक्रवर्ती ॥ ८२ ॥ अक्षावृत्ताभ्रमालान्यरविवरलुठच्चन्द्रचण्डद्युतीनि, ज्वालाजालावलीढस्फुटदुडुपटलीपाण्डुदिङ्मण्डलानि । चक्रान्ताक्रान्तचक्राचलचलितमहीचक्रवालार्तशेषाण्यस्त्रग्रामाग्रिमस्य प्रददतु भवतां प्रार्थितं प्रस्थितानि ॥ ८३ ॥ शूलं त्यक्तात्मशीलं सृणिरणुकघृणिः पट्टिसः स्पष्टसादः शक्तिश्शालीनशक्तिः कुलिशमकुशलं कुण्ठधारः कुठारः । दण्डश्चण्डत्वशून्यो भवति तनु धनुर्यत्पुरस्तात्स वः स्तात्, ग्रस्ताशेषास्त्रगर्वो रथचरणपतिः कर्मणे शर्मणाय ॥ ८४ ॥ क्षुण्णाजानेयवृन्दं क्षुभितरथगणं सन्नसान्नाय्ययूथं, क्ष्वेलासंरंभहेलाकलकलविगलत्पूर्वगीर्वाणगर्वम् । कुर्वाणस्साम्परायं रथचरणपतिः स्थेयसीं वः प्रशस्तिं, दुग्धां दुग्धाब्धिभासं भयविवशशुनासीरनासीरवर्ती ॥ ८५ ॥ दुह्यद्दोश्शालिमालिप्रहरणरभसोत्तानिते वैनतेये, विद्राति द्राक्प्रयुक्तः प्रथनभुवि परावर्तमानेन भर्त्रा । निर्जित्य प्रत्यनीकं निरवधिकचरद्भासितकार्श्यीयरथ्यं, पथ्यं विश्वस्य दाधान् प्रथयतु भवतो हेतिरिहेन्द्रानुजस्य ॥ ८६ ॥ नन्दिन्यानन्दशून्ये गलति गणपतौ व्याकुले बाहुलेये, चण्डे चाकित्यकुण्ठे प्रमथपरिषदि प्राप्तवत्यां प्रमाथम् । उच्छिद्याऽऽजौ बलिष्ठं बलिजभुजवनं यो ददावादिभिक्षोः, भिक्षां तत्प्राणरूपां स

भवदकुशलं कृष्णहेतिः क्षिणोतु ॥ ८७ ॥ रक्तौघाभ्यक्तमुक्ताफल लुलितललद्वीचिवृद्धौ महाब्धौ, सन्ध्यासम्बद्धताराजलधरशबला-काशनीकाशकान्तौ । गम्भीरारंभमम्भश्चरमसुरकुलं वेदविघ्नं विनिघ्नन्, निर्विघ्नं वः प्रसूतां व्यपगतविपदं सम्पदं चक्रराजः ॥८८॥ काशीविप्लोषचैद्यक्षपणधराणिजध्वंससूर्यापिधान, ग्राहद्वेध, त्वमालित्रु-टनसुखकथावस्तुसत्कीर्तिगाथाः । गीयन्ते किन्नरीभिः कनकगिरि गुहागेहिनीभिर्यदीयाः, देयाद्दैतेयावैरी स सकलभुवनश्लाघनीयां श्रियं वः ॥ ८९ ॥ नानावर्णान् विवृण्वन्विरचितभुवनानुग्रहान् विग्रहान्यः, चक्रेष्वष्टासु मृष्टासुरवरतरुणीकण्ठकस्तूरिकेषु । आताराद्वर्णमालावधिषु वसति यः पूरुषो वस्सवध्यात्, व्यपैरुद्भूतसर्वैरुपहितमबहिर्ध्वान्तमध्वान्तवर्ती ॥ ९० ॥ द्वात्रिंशत्षोडशाष्टप्रभृति पृथुभुजस्फूर्तिभिर्मूर्तिभेदैः, कालाद्ये चक्रषट्के प्रकटितविभवः पञ्च कृत्यानुरूपम् । अर्थानामर्थितानामहरहरखिलं निर्विलम्बैर्विलम्बैः, कुर्वाणो भक्तवर्गं कुशलिनमवतादायुधग्रामणीर्वः ॥ ९१ ॥ कोणै र्णैस्सरोजैरपि कपिशगुणैष्षड्भिरुद्भिन्नशोभे, श्रीवाणीपूर्विकाभिर्दधति विकसतश्शक्तिभिः केशवादीन् । तारान्ते भूपुरादौ रथचरण गदाशार्ङ्गखड्गाङ्किताशे, यन्त्रे तन्त्रोदिते वः स्फुरतु कृतपदं लक्ष्म लक्ष्मीसखस्य ॥ ९२ ॥ दंष्ट्राकांत्या कडारे कपटकिटितनोः कैटभारेरधस्तात् , ऊर्ध्वं हासेन विद्धे नरहरिवपुषो मण्डले वासवीये । प्राक्प्रत्यक्सान्ध्यसान्द्रच्छविभरभरिते व्योम्नि विद्योतमानः, दैतेयोत्पातशंसी रविरिव रहयत्वस्त्रराजो रुजं वः ॥ ९३ ॥ क्वापि क्वापि स्थितोऽपि त्रिभुवनविततश्चन्द्रधामाऽपि रूक्षः रुक्मच्छायोऽपि कृष्णाकृतिरनलमयोऽप्याश्रितत्राणकारी । धारासारोऽपि दीप्तो दिनकररुचिरोऽप्युल्लसत्तारकश्रीः, चक्रेशश्चित्रभूमा वितरतु विमतत्रासनं शासनं वः ॥ ९४ ॥ शुक्रश्शक्र! स्तवस्ते सहदहन! कलां काल! तेऽयं न कालः, किं वो रक्षांसि! रक्षा तव फलतु पते!यादसां पादसेवा

वाय्वो! क्रूरोऽसि भर्तुस्त्यज धनद! मदं सेव्यतां त्र्यंबकेति, प्राहु-र्यद्यन्त्रपालास्स दनुजविजयी हन्तु तन्द्रालुतां वः ॥९५॥ गायत्र्यर्णारचक्रे प्रथममनुसखस्मेरपत्रारविन्दे बिम्बं वह्नेस्त्रिकोणं वहति जयिजयाद्यष्टशक्तौ निषण्णा । शोकं वोऽशोकमूले पदसविधलसद्भीमभीमाक्षभीमा, पुंसो दिव्यस्य धामा पुरुषहरिमयी मूर्तिरस्त्वपूर्वा ॥९६॥ पाश्चात्याशोकपुष्पप्रकरनिपतितैः प्राप्तरागं परागैः सन्ध्यारोचिस्सगन्धैः खपदशशधरं प्रेक्ष्य तारानुषक्तम् । पद्मानाबद्धकोशानिव सुरनिवहैरञ्जलीन् कल्प्यमानान्, चक्राधीशोऽभिनन्दन् प्रदिशतु सदृशीमुत्तमश्लोकतां वः॥९७॥ रक्ताशोकस्य वेदस्य च विहितपदं प्राप्तशाखस्य मूले, चक्रैरक्षैस्तदाद्यैरपि महितचतुर्द्विश्चतुर्बाहुदण्डम् । आसीनं भासमानं स्थितमपि भयतस्त्रायतां तत्त्वमेकं पश्चात् पूर्वत्र भागे स्फुटतरहरितामानुषं जानुपाद्भः ॥ ९८ ॥ प्राणे दत्तप्रयाणे मुषितदिशि दृशि त्यक्तसारे शरीरे, मत्यां व्यामोहवत्यां सतमसि मनसि व्याहते व्याहते च। चक्रान्तर्वर्ति मृत्युप्रतिभयमभयाकारचित्रं पवित्रं, तेजस्तत्तिष्ठतां वस्त्रिदशकुलधनं तीक्ष्णं तीक्ष्णदंष्ट्रम् ॥ ९९ ॥ यस्मिन् विन्यस्य भारं विजयति जगतां जङ्गमस्थावराणां, लक्ष्मीनारायणाख्यं मिथुनमनुभवत्यत्युदारान् विहारान् । आरोग्यं भूतिमायुः कृतमिह बहुना यद्यदास्थापदं वः, तत्तत्सद्यःसमस्तं दिशतु स पुरुषो दिव्यहेत्यक्षवर्ती ॥ १०० ॥ पंचानांतत्त्वविद्याद्युमणिगिरिशत्रीध्यङ्गसङ्ख्याधराणां, अर्चिर्व्यङ्गेषु नेम्यादिषु च परमतः पुंसि षड्विंशतेश्च । सङ्ख्यसौदर्शनं यः पठति कृतमिदं कूरनारायणेन, स्तोत्रं निर्विष्टभोगो भजति स परमां चक्रसायुज्यलक्ष्मीम् ॥ १०१ ॥ इति पुरुषवर्णनं षष्ठम् ।

सुदर्शनशतकं समाप्तम् ।

श्रीः ।

शास्त्रमुक्तावली - ३.

मीमांसापादुका ।

श्रीकवितार्किकसिंहेन सर्वतन्त्रस्वतन्त्रेण

श्रीमद्वेदान्ताचार्येण विरचिता ।

श्रीकांची प्रतिवादिभयंकरं अनन्ताचार्येण परिशोधिता

श्रीसुदर्शनमुद्राक्षरशालायां

मुद्रिताभूत् ।

॥ श्रीकांची ॥

इदानीमेतन्मूल्यम् — ०-६-६

१९००

नमामि धर्मनिलयां करुणां लोकमातरम् ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुन्दरीम् ।
पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम् ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगन्धिनीम् ।
पुण्यगन्धां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम् ।
नमामि चन्द्रवदनां चन्द्रां चन्द्रसहोदरीम् ।
चतुर्भुजां चन्द्ररूपामिन्दिरामिन्दुशीतलाम् ।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम् ।
विमलां विश्वजननीं पुष्टिं दारिद्र्यनाशिनीम् ।
प्रीतिपुष्करिणीं शान्तां शुक्लमाल्याम्बरां श्रियम् ।
भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम् ।
वसुन्धरामुदाराङ्गां हरिणीं हेममालिनीम् ।
धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदाम् ।
नृपवेश्मगतानन्दां वरलक्ष्मीं वसुप्रदाम् ।
शुभां हिरण्यप्राकारां समुद्रतनयां जयाम् ।
नमामि मङ्गलां देवीं विष्णुवक्षःस्थलस्थिताम्
विष्णुपत्नीं प्रसन्नाक्षीं नारायणसमाश्रिताम् ।
दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रववारिणीम्
नवदुर्गां महाकालीं ब्रह्मविष्णुशिवात्मिकाम् ।
त्रिकालज्ञानसंपन्नां नमामि भुवनेश्वरीम्

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपाङ्कुराम् ।
श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम्
मातर्नमामि कमले कमलायताक्षि श्रीविष्णुहृत्कमल-
वासिनि विश्वमातः । क्षीरोदजे कमलकोमलगर्भ-
गौरि लक्ष्मीः प्रसीद सततं नमतां शरण्ये ॥
ओं

श्रीः ॥

श्रीहयग्रीवायनमः।

॥ मीमांसापादुका ॥

(श्रीमद्वेदान्त देशिक विरचिता ।)

यस्य श्री र्नित्यहृद्या निरुपधिगृहिणी नन्दति च्छन्दवृत्त्या
यस्यापत्यं प्रजेशप्रभृति विहरणं यस्य विश्वक्षपरार्थम् ।
लीलाभोगापदेशव्यतिभिदुर मिदं यस्य विश्वं विभूतिः
सत्तासिद्धानुकम्पानिधि रवतु सन स्सतलोकीगृहस्थः ॥ १ ॥

यस्मा दस्माभि रेत द्यतिपतिकथित प्राक्तनप्रक्रियोद्य
त्कर्मब्रह्मावमर्शप्रभवबहुफलं सार्थ मग्राहि शास्त्रम् ।
तं विष्वग्भेद विद्यास्थितिपदविषयस्थेयभूतं प्रभूतं
वन्देयात्रेयरामानुजगुरुमनघं वादिहंसाम्बुवाहम् ॥ २ ॥

वेद्यं वेदै रशेषै र्विधितदितरयो र्विश्वमाज्ञापयन्तं
௰௮	க௦௮	த்ருஷ்டா	த்ருஷ்டி
,,	க௦கூ	ரபாக்	ரபராக்
உ௮	கஎக	வ்ராண	வ்ராஹ
உகூ	கஎஎ	மதிதஃ	மதிதஃ
௩கூ	உஉ௩	வெய்யாஶோ	வெய்யாத்
௪உ	உகூ௰	உக்த	உக்தஃ
௪கூ	உஎ௮	ஸ்வத்ருத	ஸ்வத்ருதி
ருஉ	௩ககூ	ஶண	ஶாண
ரு௪	௩௩க	யாகேதுஃ	யாகேதுஃ
ருஎ	௩ரு௰	ஸாஜாஃ	ஸாஜஃ
கூ௪	௩௮௮	ஸீகரோதி	ஸீகரோதி
௮௩	ரு௦௦	ஶாமிதா	ஶாமிநா
௮௪	ரு௦கூ	த்ஞாதே	த்ஞாதே
௮கூ	ருக௮	வெடிதே	வெடிதே

அத தத்வமுக்தாகலாப ஶுத்திபத்ரிகா.

பு	ஶ்லோ	அஶுத்தம்	ஶுத்தம்
க௦௦	௪௰	த்ருஷ்டே	த்ருஷ்டே
க௦உ	ரு௪	ஸௌஹ்ருத்ய	ஸௌஹ்ருக
க௦௪	எ௰	ஜமநியிஃ	ஜமயிஃ
கக௪	கஉக	ஸந்ருத்ய	ஸந்ருத்ய
ககஎ	க௪௮	பாஹ்தி	பர்ஹ்தி
கஉ௮	[illegible]	[illegible]	[illegible]

௧௧௯	௧௯௧	தாத்ரு	தாத்ரு
௧௨௧	௧௭௯	நேமேயேட்	நமேயேட்
"	"	ஸாக்ஷாத	ஸாக்ஷாத
௧௨௨	௧௮௰	நயிஷ்டா	நாயிஷ்டா
௧௨௮	௨௧	மேயேவா	மேவேபா
௧௩௨	௨௩௫	யொகஹ்யம்	யொகஹ்யா
௧௩௫	௨௫௨	ஸவதின	ஸவதினா
"	"	ஸாத்யஸாத்யா	ஸாத்யஸத்யா
"	"	விஷயிவிஷயி	விஷயவிஷயி
"	௨௫௩	நாநாஜநி	நாமேஜநி
௧௪௰	௨௮௧	ந்யாய	ந்யாயவிஸ்தர
"	௨௮௩	ரவிவஷ	ரிதிவஷ
௧௪௧	௨௯௨	வ்யாக்ஷிஹாஹா	வ்யாக்ஷ்யஹாவா
௧௪௨	௨௯௪	ஸ்வாக்தி	ஸ்வாக்தி
௧௪௩	௩௰௫	தமேயாவா	தமேயாவா
௧௪௪	௩௰௯	நிக்ஷஷரிணாம்	நிக்ஷ்யமேஷ்யஷாம்
௧௪௫	௩௧௫	வாக்யாதா	வாக்யாதா
௧௪௯	௩௨௰	ஸஹகா	மேஸஹகா
௧௪௮	௩௩௩	விரோதயெ	விரோதயி
"	௩௩௫	தஸ்ஃமேஷ்யஃ	தஸ்ஃமேஷ்ய
௧௪௯	௩௩௭	வ்ருதிஷாம்	வ்ருதிஷம்
"	௩௪௧	ஸம்வாமேஷ	ஸம்வாமேஷ
௧௫௰	௩௪௨	(ஈஷத்காமேதிட் த்யாநமேபத்ராதிரூ ஸஸம்பஃ)	
"	௩௪௩	ரதிதா	ரவிதிதா
௧௫௨	௩௫௫	ராமஹே	ராமஹஸ
"	"	மேஸதிஹ்ய	மேஸதிஹ்ய
௧௫௫	௩௭௫	திநாஸ்த	நாதிஸ்த
௧௫௭	௩௮௩	த்யாஸ்த்யஜ	உஸ்த்யஜ
"	௩௮௪	ஸணட்	ஸமேணட்
"	௩௮௭	வ்யாயிகா	வ்யாயிகா
௧௫௯	௩௯௰	மேஸதி	மேஸதி

,,	௪௦௨	द्यप्रैष्टक्य	द्यप्रैष्ट्यक्य
௧௬௧	௪௦௰	सञ्जिहि	सञ्जिहि
௧௬௪	௪௨௬	वाणुः	वणाः
,,	௪௨௭	साप्साप्याष्टा	यी-साप्साप्य
௧௬௬	௪௩௨	निष्ठोच्छेः	नष्ठोच्छेः
௧௬௬	௪௩௬	शनृच	शनृक्
,,	,,	वार्ष्णाङ्ग	वार्ष्णांस्क
,,	௪௩௮	स्सावरि	सावरि
,,	,,	क्र्यकवडा	क्र्यकवडा
,,	௪௩௯	वलिमे	वलिम्य
௧௬௭	,,	द्रृष्ट	द्रृष्ट
,,	,,	निक्षष्य	निक्ष षि
,,	௪௪௰	तळताकवी	तळतातिवी
௧௬௮	௪௪௫	अिजरव	अिजवष
,,	௫௪௭	ऊषय	षय
௧௬௯	௪௫௨	गृद्रृ	गाद्रृ ०
௧௭௰	௪௫௬	नञ्जोवी	नञ्जोवी
,,	௪௬௰	कयशि	कयशि
௧௭௧	௪௬௨	द्रृायं	द्रृायवं
௧௭௨	௪௭௧	वेशाभंगः	वेशासंभवः
௧௭௩	௪௭௬	नेष्टा	नेष्टा
,,	௪௭௭	व्यञ्जकव्यञ्जि तका	व्यंजकक्वंजि तक्स
௧௭௪	௪௭௯	स्सद्धा	स्सद्धा
,,	௪௮௦	शेणी	शेणी
,,	௪௮௨	शृश्रृतं	श्रितं

शुद्धिपत्रिकासमाप्ता.

इष्टोपायतया क्रिया न सहिता यास्तेऽवरा याश्च ये
कर्तुं दास्यमशेषमप्रतिहतं नित्यं त्वहं निर्ममः ॥ ६ ॥

मत्प्राप्त्यर्थतया मयोक्तमखिलं सन्त्यज्य धर्मं पुन-
र्मामेकं मदवाप्तये शरणमित्यार्तोऽवसायं कुरु ।
त्वामेवं व्यवसाययुक्तमखिलज्ञानादिपूर्णो ह्यहं
मत्प्राप्तिप्रतिबन्धकैर्विरहितं कुर्यां शुचं मा कृथाः ॥ ७ ॥

निश्चित्य त्वदधीनतां मयि सदा कर्माद्युपायान् हरे
कर्तुं त्यक्तुमपि प्रपत्तुमनलं सीदामि दुःखाकुलः ।
एतज्ज्ञानमुपेयुषो मम पुनः सर्वापराधक्षयं
कर्तासीति दृढोऽस्मि ते तु चरमं वाक्यं स्मरन् सारथे ॥ ८ ॥

अष्टश्लोकी संपूर्णा ॥

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥

सत्सङ्गाद्भवनिःस्पृहो गुरुमुखाच्छ्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य कर्मशकलं प्रक्षीणकर्मान्तरः ।
न्यासादेव निरङ्कुशेश्वरदयानिर्लूनमायान्वयो
हार्दानुग्रहलब्धमध्यमधमनिद्वाराद्बहिर्निर्गतः ॥ १ ॥

मुक्तोऽर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दवातांशुमद्-
ग्लौविद्युद्वरुणेन्द्रधातृमहितः सीमान्तसिन्ध्वाप्लुतः ।
श्रीवैकुण्ठमुपेत्य नित्यमजडं तस्मिन् परब्रह्मणः
सायुज्यं समवाप्य नन्दति समं तेनैव धन्यः पुमान् ॥ २ ॥

प्रातर्नित्यानुसन्धेयं परमार्थं मुमुक्षुभिः ।
श्लोकद्वयेन संक्षिप्तं सुव्यक्तं वरदोऽब्रवीत् ॥

अथ न्यासविंशतिः प्रारभ्यते

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम् ।
डम्भासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं
स्खालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥ १ ॥

अज्ञानध्वान्तरोधादघपरिहरणादात्मसाम्यावहत्वा-
ज्जन्मप्रध्वंसिजन्मप्रदगरिमतया दिव्यदृष्टिप्रभावात् ।
निष्प्रत्यूहानृशंस्यान्नियतरसतया नित्यशेषित्वयोगा-
दाचार्यः सद्भिरप्रत्युपकरणधिया देववत्स्यादुपास्यः ॥ २ ॥

सद्बुद्धिः साधुसेवी समुचितचरितस्तत्त्वबोधाभिलाषी
शुश्रूषुस्त्यक्तमानः प्रणिपतनपरः प्रश्नकालप्रतीक्षः ।
शान्तो दान्तोऽनसूयुः शरणमुपगतः शास्त्रविश्वासशाली
शिष्यः प्राप्तः परीक्षां कृतविदभिमतं तत्त्वतः शिक्षणीयः ॥ ३ ॥

स्वाधीनाशेषसत्तायतनफलं विद्धि लक्ष्मीशमेकं (स्थिति)
प्राप्यं नान्यं प्रतीया न च शरणतया कंचिदन्यं वृणीयाः ।
एतस्मादेव पुंसां भयमितरदिति प्रेक्ष्य मोक्षीस्त्वमाज्ञां-
मित्यैकान्त्योपदेशः प्रथममिह गुरोरेकचित्तेन धार्यः ॥ ४ ॥

मोक्षोपायार्हतैवं भवति भवभृतां कस्यचित्क्वापि काले
तद्भक्तिप्रपत्त्योरधिकृतिनियमस्तादृशा स्यान्नियत्या ।
शक्ताशक्तादितत्तत्पुरुषविषयतः स्थाप्यते तद्व्यवस्था
यच्चाहुस्तद्विकल्पः सम इति कतिचित्तत्फलस्याविशेषात् ॥ ५ ॥

अथ शतदूषणीश्लोकाः प्रारभ्यन्ते

श्रीमान् वेङ्कटनाथार्यः — सन्निधत्तां सदा हृदि।

— ब्रह्मशब्दवृत्त्यनुपपत्तिवादः प्रथमः —

समाहारः साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यूहानां लहरिविततिर्बोधजलधेः।
कथादर्पक्षुभ्यत्कलिकथककोलाहलभवं
हरत्वन्तर्ध्वान्तं हयवदनहेषाहलहलः॥ १॥

इदं प्रथमसंभवं कुमतिजालतूलं कथं
मृषामतविषानलज्वलितजीवजीवातवः।
अनन्यमतनमस्करं यतिपुरन्दरस्योक्तयः -
निरञ्जनसरस्वतीनिकुरुम्बसारान्धिकाः॥ २॥

प्राचीमुपेत्य पदवीं यतिराजदृष्टां तत्सन्निकृष्टमणिवामतमाजयन्तः।
प्राज्ञा यथोदितमिदं शुकवत्पठन्तः प्रच्छन्नबौद्धविजये परितो यतध्वम्॥ ३॥

वादाहवेषु निर्भेत्तुं वेदमार्गविदूषकान्।
प्रयुज्यतां शरश्रेणी निशिता शतदूषणी॥ ४॥

विचारविषयत्वेन सूत्रकृद्यदसूत्रयत्।
परोक्ता ब्रह्मशब्दस्य वृत्तिरत्र निरस्यते॥ ५॥

— जिज्ञासानुपपत्तिवादो द्वितीयः —

अथ स्वार्थैकभासस्य निर्विशेषस्य दुर्गतः।
विरुद्धस्यापि जिज्ञासा परेष्टा प्रतिषिध्यते॥ ६॥

— ऐकशास्त्र्यसमर्थनवादस्तृतीयः —

त्रय्यन्ताः कर्मभागेन सौहार्दं समधिश्रिताः।
मुक्तिं यद्भजनादाहुस्तमनन्तमुपास्महे॥ ७॥

— अविशेषज्ञानभङ्गवादश्चतुर्थः —

विचित्रैस्तैर्यत्र कथितमविशेषस्य कुमति[illegible]

सानुक्रोशे समर्थे प्रपदनमृषिभिः स्मर्यते ऽभीष्टसिद्ध्यै
लोके ऽप्येतत् प्रसिद्धं न च विमतिरिह प्रेक्ष्यते क्वापि तज्ज्ञैः ।
तस्मात् कैमुत्यसिद्धं भगवति तु भरन्यासविद्यानुभावं
धर्मस्थेयाश्च पूर्वे स्वकृतिषु बहुधा स्थापयाञ्चक्रुरेवम् ॥ ६ ॥

शास्त्रप्रामाण्यवेदी ननु निधिविषये निर्विशङ्कोऽधिकारी
विश्वासस्याङ्गभावे पुनरिह विदुषा किं महत्त्वं प्रसाध्यम् ।
मैवं घोरापराधैः झटिति गुरुफले न्यासमात्रेण लभ्ये
शङ्का पार्ष्णिग्रहार्हा शमयितुमुचिता हेतुभिस्तत्तदर्हैः ॥ ७ ॥

नेहाभिक्रान्तिनाशो न च विमतिरिह प्रत्यवायो भवेदि-
त्युक्तं कैमुत्यनीत्या प्रपदनविषये योजितं शास्त्रविद्भिः ।
तस्मात् क्षेत्रे तदर्हे सुविदितसमयैर्देशिकैः सम्यगुप्तं
मन्त्रास्यं मुक्तिबीजं परिणतिवशतः कल्पते सत्फलाय ॥ ८ ॥

न्यासः प्रोक्तो ऽतिरिक्तं तप इति कथितः स्वध्वरश्चास्य कर्ता
ऽहिर्बुध्न्यो ऽप्यन्ववादीद् गणि दिविषदामुत्तमं गुह्यमेतत् ।
साक्षान्मोक्षाय चासौ श्रुत इह तु मुधा बाध्यशङ्का गुणाढ्ये
तन्निष्ठो ह्यन्यनिष्ठान् प्रभुरतिशयितुं कोटिकोट्यंशतो ऽपि ॥ ९ ॥

नानाशब्दादिभेदादिति तु कथयता सूत्रकारेण सम्यङ्
न्यासोपासे विभक्ते यजनहवनवच्छब्दभेदादभाक्तात् ।
आख्यारूपादिभेदः श्रुत इतरसमः किञ्च भिन्नोऽधिकारः
शीघ्रप्राप्त्यादिभिः स्याल्लघुरिति च मधूपासनादौ व्यवस्था ॥ १० ॥

यत्किञ्चिद्रक्षणीयं तदवननिपुणे न्यस्यतोऽकिञ्चनस्य
प्रस्पष्टं लोकदृष्ट्याऽप्यवगमित इह प्रार्थनाख्याङ्गयोगः ।
तस्मात् कर्माङ्गकं तं व्यपनयति पराऽपेक्षणाभाववादः
साङ्गे न्यासाङ्गयोगं व्यवहृतिनयतः सिद्धिवत्तोपचारः ॥ ११ ॥

निष्पत्ते दुरन्ताब्धेर्विलयमविषयया श्रुतिरिति ।
तदुद्धूयो पायं भगवदुपसत्तिं प्रथयते
नमस्या मस्यामो यतिपरिवृढाय प्रतिकलम् ॥ ८ ॥

== बाधितानुवृत्तिभङ्गवादः षष्ठमः ==

नानुवर्तेत संसारो यत्प्रसादैकबाधितः ।
प्रसीदतु स मे देवः प्रथमाञ्जलिकिङ्करः ॥ ९ ॥

== अथ विविदिषासाधनत्वभङ्गवादः सप्तमः ==

दृष्टानुश्रविकार्थजातविमुखान् दृष्टोऽधिकृत्य श्रुतौ
यज्ञादिर्यदुपास्तिसाधनतया साक्षाद्विधिं प्राप्नुते ।
लीलाभोगविभूतियुग्मभरितस्वात्मप्रदानोन्मुखः
श्रीमानस्तु स मे समस्तदुरितध्वान्तारम् नारायणः ॥ १० ॥

== शब्दजन्यप्रत्यक्षभङ्गवादः सप्तमः ==

विभूत्यंशो यस्य स्फुरति जगताम्प्रथममखिलं
श्रुतिर्नित्यं ज्ञानामुपदिशति यं रूपमिव नः ।
निलाप्यक्षप्रेक्षानुलकितसमस्तः स्वयमसौ
हृषीकेशो दिव्यं दिशतु मम चक्षुः स्वविषयम् ॥ ११ ॥

== साधनचातुष्ट्यपूर्ववृत्तत्वभङ्गवादोऽष्टमः ==

शास्त्रैक्ये विषयाद्यभेदनियते सङ्गत्यधीनक्रमे
कर्माण्यपि तदङ्गिकामथ परां विद्यामुपादित्सुभिः ।
यस्तद्वेद्यतया ज्ञेयं फलतयाऽप्यासेदिति श्रेयतां
कुर्वीत विभुः श्रिया सह मम स्वान्तं निजालङ्कृतम् ॥ १२ ॥

== कृतानधिकारवादो नवमः ==

हयग्रीवसुधासिन्धुहर्षहेषारवोर्मयः ।
जयन्ति वादकोलाहलक्षितिवाद्यकुदृष्टयः ॥ १३ ॥

== अथ निर्विशेषस्वप्रकाशभङ्गवादो दशमः ==

विचित्रं यत्र लोकं स्फुरति ... ... विभुः ...

पञ्चाप्यङ्गान्यभिज्ञाः प्रणिजगुरविनाभावभाञ्जि प्रपत्तेः
कैश्चित् संभावितत्वं यदिह निगदितं तत्प्रपत्त्युत्तरं स्यात् ।
अङ्गेष्वङ्गित्ववादः फलकथनमिह द्वित्रिमात्रोक्तयश्च
प्राशस्त्यं तत्र तत्र प्रणिदधति ततः सर्ववाक्यैककण्ठ्यम् ॥ १२ ॥

रक्षापेक्षा स्वसाहृद्यप्रणयवति भरन्यास आज्ञादिदक्षे
दृष्टा नात्र प्रपत्तिर्व्यवहृतिरिह तन्मेलने लक्षणं स्यात् ।
गेहागत्यादिमात्रे निपततु शरणागत्यभिख्योपचाराद्
यद्वाऽनेकार्थभावाद् भवति च विविधः पालनीयत्वहेतुः ॥ १३ ॥

आत्मात्मीयस्वरूपन्यसनमनुगतं यावदर्थं मुमुक्षोस् -
तत्त्वज्ञानात्मकं तत्प्रथममथ विभोः स्यादुपाये समेतम् ।
कैङ्कर्यार्थे पुमर्थेऽप्यनुषजति तदप्यर्थनाहेतुभावात्
स्वाभीष्टानन्यसाध्यावधिरिह तु भरन्यासोऽङ्गिभूतः ॥ १४ ॥

न्यासादेशेषु धर्मत्यजनवचनतोऽकिञ्चनाधिक्रियोक्ता
कार्पण्यं वाऽङ्गमुक्तं भजनवदितरापेक्षणं वाऽपोढम् ।
दुःसाधेष्वोद्यमौ वा क्वचिदुपशमितावन्यसंमेलने वा
ब्रह्मास्त्रन्याय उक्तस्त्विह न विहतो धर्म आज्ञादिसिद्धः ॥ १५ ॥

आदेष्टुं स्वप्रपत्तिं तदनुगुणगुणाद्यन्वितं स्वं मुकुन्दो
मामित्येकैकशब्दं वदति तदुचितं तत्र तात्पर्यमूह्यम् ।
तत् प्राप्यप्रापकैक्यं सकलफलदतां न्यासतोऽन्यानपेक्षां
प्राधान्याद्यं च किञ्चित् प्रथयति स परं श्रीसखो मुक्त्युपाये ॥ १६ ॥

स्वाभीष्टप्राप्तिहेतुः स्वयमिह पुरुषैः स्वीकृतः स्यादुपायः
शास्त्रे लोके च सिद्धः स पुनरुभयथा सिद्धसाध्यप्रभेदात् ।
सिद्धोपायस्तु मुक्तौ निरवधिकदयः श्रीसखः सर्वशक्तिः
साध्योपायस्तु भक्तिर्न्यसनमिति द्वयं तद्वशीकारसिद्ध्यै ॥ १७ ॥

तदेकं नैहैकं त्रिगुणमपि मोक्षात् कृतमिति |
वदन्तो वैयात्याद् बहुविहृतिवाद्याहतधियो
विधूयन्ते हन्त श्रुतिशतशिरःशूलवचसः ॥ १४ ॥

== निर्विशेषविषयनिर्विकल्पभङ्गवाद एकादशः ==

संप्रज्ञातस्थितिमधिगते निर्विकल्पे समाधौ
शान्तावस्थं स्तिमितबहुलानन्दसन्दोहमन्तः |
यद्ब्रह्म स्फुरति यमिनां पूर्णषाड्गुण्यरूपं
सा मे नित्यं हृदि हयमुखी देवता सन्निधत्ताम् ॥ १५ ॥

== सन्मात्रग्राहिप्रत्यक्षभङ्गवादो द्वादशः ==

यस्य सत्त्वेन विश्वस्य सत्ता सदसदात्मनः |
प्रत्यक्षग्राह्यपरिच्छेद्यं तत् सदैकमुपास्महे ॥ १६ ॥

== भेददूषणनिस्तारवादस्त्रयोदशः ==

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तोच्छ्वासनिर्गतः |
भेदं विभिन्दतां चित्ते भिन्ते तर्कात्मिकः शरः ॥ १७ ॥

== वेदप्रामाण्यपरिग्रहानुपपत्तिवादश्चतुर्दशः ==

यदाज्ञा नो वेदा यदनुगुणवर्णाकृतिजुषः
प्रमाणं यत्रैते नियतमपरिच्छेद्यविभवे |
य एषामाहर्ता दनुजमथनो वाजिवदनः
स मे देवः श्रीमान् विदलयतु सम्मोहमखिलम् ॥ १८ ॥
वेदप्रामाण्यवङ्मातृकञ्चुकच्छन्नमर्मणाम् |
बुद्धसिद्धान्तसुहृदां सन्तः पश्यन्तु वाच्यताम् ॥ १९ ॥

== दृश्यत्वानुमाननिरासवादः पञ्चदशः ==

अबाध्यादध्यक्षप्रभृतिमितिवर्गैरववृतं
शरीरं यस्येदं जगदखिलमन्तर्यमयितुः |
स मे तर्कैर् [illegible] मानुष्टाकमयने:

अत्यन्ताकिंचनोऽहं त्वदपचरणतः सन्निवृत्तोऽद्य नाथ
तत्सैवैकान्तधीः स्यां त्वमसि शरणमित्यध्यवस्यामि गाढम्।
त्वं मे गोपायिता स्यास्त्वयि निहितभरोऽस्म्येवमित्यर्पितात्मा
यस्मै स न्यस्तभारः सकृदथ (दिति) तु सदा न प्रयस्येत्तदर्थम्॥१८॥

त्यक्तोपायाननपायानपि परमजहन्मध्यमां स्वार्हवृत्तिं
प्रायश्चित्तं च योग्यं विगतऋणततिर्द्वन्द्ववात्यां तितिक्षुः।
भक्तिज्ञानादिवृद्धिं परिचरणगुणान् सत्समृद्धिं च युक्त्या
नित्यं याचेदनन्यस्तदपि भगवतस्तस्य यद्वाऽप्रवगति॥१९॥

आज्ञाकैङ्कर्यवृत्तिष्वनघगुरुजनप्रक्रियानेमिवृत्तिः
स्वार्हानुज्ञातसेवाविधिषु च शकने यावदिष्टं प्रवृत्तः।
कर्म प्रारब्धकार्यं प्रपदनमहिमध्वस्तशेषं द्विरूपं
भुक्त्वा स्वाभीष्टकाले विशति भगवतः पादमूलं प्रपन्नः॥२०॥

श्रुत्या स्मृत्यादिभिश्च स्वयमिह भगवद्वाक्यवर्गैश्च सिद्धां
स्वातन्त्र्ये पारतन्त्र्येऽप्यनितरगतिभिः सद्भिरास्थीयमानाम्।
वेदान्ताचार्य इत्थं विविधगुरुजनग्रन्थसंवादवत्या
विंशत्या न्यासविद्यां व्यवृणुत सुधियां श्रेयसे वेङ्कटेशः॥२१॥

संसारावर्तवेगप्रशमनशुभदृग्देशिकप्रेक्षितोऽहं
सन्त्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः।
निःशङ्कस्तत्त्वदृष्ट्या निरवधिकदयं प्रार्थ्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि॥२२॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु न्यासविंशतिः सम्पूर्णा॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

प्रसीदन्प्रसीदन्निशमशातसीम्ना हृदयम्बुरवः ॥ २० ॥

आवर्तमानत्वानुमानभङ्गवादः षोडशः

विश्वं आवर्तमानत्वान्निवर्तयितुमिच्छतः ।
निवर्तयामः कुमतीन् कथासंग्रामसीमतः ॥ २१ ॥

दृग्दृश्यसम्बन्धानुपपत्तिपरिहारवादः सप्तदशः

बिभ्राणमात्मनि सदा महतीं विभूतिं
देहेन तन्मयनिदर्शितभूषणास्त्रम् ।
आलिङ्गितं कमलया मम चित्तवृत्ते-
रालम्बनं भवतु दैवतमद्वितीयम् ॥ २२ ॥

बाह्यप्रकाशानुपपत्तिवादोऽष्टादशः

अज्ञानसन्तमसमाश्रयतीन्दुरवानां
संवित्प्रदीप्तमहसा सहसा निरुन्धन् ।
विश्वास्वपनरपतिर्व्यपहन्तु विष्वक्
सर्वानुभूः स भगवान् पुरुषोत्तमो नः ॥ २३ ॥

ब्रह्माश्रयाज्ञाननिरासवाद एकोनविंशः

अनन्यचेतसां पुंसामज्ञानमवधून्वते ।
निरस्ताशानगन्याय नित्यं सर्वविदे नमः ॥ २४ ॥

अवच्छेदभङ्गवादो विंशः

श्रुतिगणशिरोनिष्णातानां स्वसत्त्वमभीप्सतां
श्रवणमननध्यानैरध्यक्षतः प्रकाशितं यत् ।
अमृतमिति यद्भूम्ना यत्नाद्यतामवगाहते
भवभयतमः प्रत्यासिन्धुं भजेमहि तन्महः ॥ २५ ॥

संविदनुत्पत्तिदूषणवाद एकविंशः

विविधविषयाकृष्टैर्योगादिभिः स्खलदागसां
स्वयमुपनतं शान्तभ्रान्तं निरस्य निरस्य नः ।
भगवति हरौ ...

अथ श्रीमन्निगमान्तमहादेशिकानुगृहीता
द्रमिडोपनिषत्तात्पर्यरत्नावलिरारभ्यते ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सारः सारस्वतानां शठरिपुफणितिः शान्तिशुद्धान्तसीमा
मायामायामिनीभिः स्वगुणविततिभिर्बन्धयन्तीं धयन्ती ।
पारं पारम्परीतो भवजलधिभवन्मज्जनानां जनानां
प्रत्यक् प्रत्यक्षयेन्नः प्रतिनियतरमासन्निधानं निधानम् ॥ १ ॥

प्रज्ञारन्ये पन्थशैले प्रथितगुणरुचिं नेत्रयन् संप्रदायं
तत्तच्छिद्धिप्रसक्तैरनुपधि विबुधैरर्थितो वेङ्कटेशः ।
तल्पं कल्पान्तयूनः शठजिदुपनिषद्दुग्धसिन्धुं विमथ्नन्
ग्रथ्नाति स्वादुगाथालहरिदशशतीनिर्गतं रत्नजातम् ॥ २ ॥

पाञ्चालीगात्रशोभाहृतहृदयवधूवर्गपुम्भावनीत्या
पत्यौ पद्मासहाये प्रणयिनि भजतः प्रेयसीणारतनायम् ।
भक्तिः शृङ्गारवृत्त्या परिणमति मुनेर्भावबन्धप्रथिम्ना
योगात् प्रागुत्तरावस्थितिरिह विरहो देशिकास्तत्र दूताः ॥ ३ ॥

भाषागीतिः प्रशस्ता भगवति वचनात् प्राजवच्चोपचारात्
सा चागस्त्यप्रसूता क्षितिपरिजगृहे भूमिकाभेदयोग्या ।
यत्तत्कृत्यं श्रुतीनां मुनिगणविहितैः सेतिहासैः पुराणै-
स्तत्रासौ सत्त्वसीम्नः शठमथनमुनेः संहिता सार्वभौमी ॥ ४ ॥

प्रस्मरस्सुधाधाराकारा प्रसीदतु शेमुषी ॥ २६ ॥

== संविन्निर्विकारत्वानुमानभङ्गवादो द्वाविंशः ==

परिणमयति विश्वं यः स्वयं निर्विकारः
परिणमति च योऽसौ नत्तदर्थत्वरात्मा ।
विषम विषयतृष्णाधन्वकान्तारजातं
व्यपनयतु भयं मे विश्वजिष्णुः स विष्णुः ॥ २७ ॥

== संविन्नानात्वनिषेधकानुमानभङ्गवादस्त्रयोविंशः ==

प्रतिपुरुषमनेकाः प्रत्यवस्थं विचित्राः
शुभगतिषु धियो याभ्योदयत्यन्त्वसा नः ।
अखिलचिदचिदन्तर्यामि तद्विष्णुसंज्ञं
सवितुरहमुपासे तस्य देवस्य भर्गः ॥ २८ ॥

== निर्विशेषत्वानुमानभङ्गवादश्चतुर्विंशः ==

विश्वं त्रिगुणवर्गेण विशिष्टं यमधीमहे ।
अप्रतर्क्यविशेषाय तस्मै भगवते नमः ॥ २९ ॥

== संविदात्मत्वभङ्गवादः पञ्चविंशः ==

अन्योन्यव्यतिरि(षि)क्तयोरविजहद्धर्मित्वधर्मित्वयो-
र्यापारे गृहमेधिनोरिव ययोः साहित्यमास्त्र्यते ।
सा संवित् सकलार्थसाधकवपुस्तत्सिद्धभोगः प्रभुः-
श्रीमत्तु समे समस्तदुरितोत्तारायनारायणः ॥ ३० ॥

== अहमर्थात्मत्वसमर्थनवादः षड्विंशः ==

अहं ते दत्ताभ्यां स्वपरविदितांश्चेतनगणान्
अहंकारादीनप्यचिदुपाधिभेदाननहमः ।
अहन्ता यस्यैका कवलयति नैशिष्ट्यविभवात्
मपास्मिन् विश्वान्यत्वहमिति मतिर्भवतु [illegible] ॥ ३१ ॥

आदौ शारीरकार्थक्रममिह विशदं विंशतिर्वक्ति साग्रा
संक्षेपोऽसौ विभागं प्रथयति चरमा चारुपाठोपपन्नाम् ।
सम्यग्गीतानुबद्धं सकलमनुगतं सामशाखासहस्रं
संलक्ष्यं साभिधेयैर्यजुरपि दशकैर्भात्यथर्वा रसैश्च ॥५॥

प्राप्ये सेव्यानुगुण्यात् प्रभुमिह शतकेऽमंस्त मुक्तेरुपायं
मुक्तप्राप्यं द्वितीये मुनिरनुबुबुधे भोग्यताविस्तरेण ।
प्राप्यत्वोपायभावौ शुभसुभगतनोरित्यवादीत् तृतीये
ऽनन्यप्राप्यश्चतुर्थे समभवदितरैरप्यनन्याद्युपायः ॥६॥

देवः श्रीमान् स्वसिद्धेः करणमिति वदन्नेकमर्थं सहस्रे
सेव्यत्वादीन् दशार्थान् पृथगिह शतकैर्वक्ति तत्स्थापनार्थान् ।
ऐकैकश्यात् परत्वादिषु दशकगणेष्वायतन्तो तथा ते
तत्तद्गाथागुणानामनुविदधति तत्पंक्तयः पङ्क्तिसंख्याः ॥७॥

सेव्यत्वाद्भोग्यभावाच्छुभतनुविभवात् सर्वभोग्याधिकत्वा-
च्छ्रेयस्तद्धेतुदानाच्छ्रितविवशतया स्वाश्रितानिष्टहन्त्वात् ।
भक्तच्छन्दानुवृत्तेर्निरुपधिकसुहृद्भावतः सत्पदव्यां
साहाय्याच्च स्वसिद्धेः स्वयमिह करणं श्रीधरः प्रत्यपादि ॥८॥

ब्रूते गाथासहस्रं मुरमथनगुणस्तोमगर्भं मुनीन्द्रः
प्रत्येकं चात्र गाथाः प्रथितविभुगुणाः स्पष्टमध्यक्षयामः ।
तत्रासंकीर्णतत्तद्दशकगुणशतस्थापनौचित्ययुक्तान्
ऐदम्पर्यावरूढाननगणितगुणितान् सद्गुणाननुद्गृणीमः ॥९॥

— शातृत्वाभ्यासभङ्गवादः सप्तविंशः —

नमाम्यये यस्त्विह चेतनानामेको बहूनां विदधाति कामान् ।
शक्तिः परा यस्य समस्तसद्‌गतिः स्वाभाविकी ज्ञानबलक्रिया च ॥ ३१ ॥

— साक्षित्वभङ्गवादोऽष्टाविंशः —

चतुर्दशविधस्यापि साक्षिवर्गस्य साक्षिणे ।
स्वतः सर्वविदे तस्मै नमः सर्वान्तरात्मने ॥ ३३ ॥

— प्रत्यक्षशास्त्रविरोधपरिहारवाद एकोनत्रिंशः —

विदितमनुवदन्तो विश्वमेतद् यथावद्
विदधति निगमान्ताः केवलं यत्प्रयत्नम् ।
अविदितबहुभूमा निश्चलन्निर्विधित्वां
हयवरवदनोऽसौ सन्निधिः सन्निधिं नः ॥ ३४ ॥

— असत्यात् सत्यसिद्धिभङ्गवादस्त्रिंशः —

सत्यैरेव सदातनोक्तिनिवहैः सत्यप्रमाहेतुभिः
सत्यं ज्ञानमनन्तमेकममलं यद् ब्रह्म निर्दिश्यते ॥
तत् सत्यैः परिकर्मितं गुणगणैः सत्याभिसन्धिक्रियं
सत्यानन्दविभूतिकं विचिनुमः सत्यस्य सत्यं महः ॥ ३५ ॥

— जीवन्मुक्तिभङ्गवाद एकत्रिंशः —

अन्ते विरोधिजनसंक्रमणीयसर्व-
दुर्नीतराज्यनिज(?)प्रतिबन्धकेन ।
यद्ध्यानसन्ततिलताप्रथमाङ्कुरेण
मुक्ता इवात्र मनयः सन्ति (?) स्वयं नमः ॥ ३६ ॥

— बाधार्थसामानाधिकरण्यभङ्गवादो द्वात्रिंशः —

यदधिकरणमेतद्द्विधेयं यदर्थे
यत उदितमपीति प्रेक्ष्यते ... विचित्रम् ।

दुग्धासारस्यसत्यापितगुणकमलाकान्तगीतान्तसिध्य-
च्छुद्धानाचारशुद्धैरियमनघगुणग्रन्थिबन्धानुबन्धा।
तत्तादृक्ताम्रपर्णीतटगतशठजिद्दृष्टसर्वीयशाखा-
गाथातात्पर्यरत्नावलिरखिलभयोत्तारिणी धारणीया॥१०॥

१-१- निःसीमोच्चद्गुणत्वादभितरसतयाऽनन्तलीलारसत्वा-
स्वायत्ताशेषसत्तास्थितियतनभिदावैभवाद्वैश्वरूप्यात्।
व्याप्त्या ब्रह्मात्मभावात्सदसदवगतेःसर्वतत्त्वेषु पूर्तेः
पश्यन् योगी परं तत्पदकमलनतावन्वशादात्मनिष्ठाम्॥११॥

१-२- स्वामित्वात्सुस्थिरत्वान्निखिलनिरुपधिस्वात्मविज्ञाह्यभावात्
तादृक्सर्वानुकूल्याच्च्यवनवदितरप्राप्यवैषम्यकत्वात्।
सर्वत्रापक्षपाताच्छुभविभवतया मानसाक्ष्यर्थभि..त्र
संकोचोन्मोचकत्वाज्जगदवनतयोपादिशत्सर्वयोग्यम्॥१२॥

१-३- बन्धार्हत्वात्स्वभक्तैरधिकतरगुणानन्तदिव्यावतारात्
सर्वेषामासन्निमत्वान्नतसुगमतया स्वप्रबोधप्रदत्वात्।
ख्यातानिरस्यादिचिन्हात्स्वरुचिवितरणात्सर्वकालाश्रयत्वा-
च्छौर्यादेः स्वाङ्गदानात्प्रहितपदतयाऽनन्तसौलभ्यमाह॥१३॥

१-४- त्राणे न दुष्कजत्वाच्छुभनयनतया स्वार्थलाभेऽर्थिभावात्
तिम्यन्मोधस्वभावाज्जगदुपजननस्थापनातिप्रियत्वात्।
कारुण्यासक्तयोगादनुगतमहिषीसन्निधेः नाःपारः दैव्यात्
च्छायानायकैः स्वस्वभावहितनमतया क्षाम्यत... कृष्णम्॥१४॥

तमजमजडमन्तयमिनं सर्वजन्तो -
निरवधिमहिमानं देवमाराधयामः ॥ ३७ ॥

संविदद्वैतभङ्गवादस्त्रयस्त्रिंशः

बहुविधभक्तिज्ञानप्रभावपूतैर्निषेवितं बुधैः।
प्रभयेव भानुमन्तं लक्ष्म्या सेव्यं नु नाथयामस्तम् ॥ ३८ ॥

उपदेशानुपपत्तिवादश्चतुस्त्रिंशः

हयमुखमुखैस्तत्तद्रूपैरकर्मविनिर्मितैः -
रुपदिशति यस्तथ्यं पथ्यं सतामवसीदताम्।
जननपदवीयातायातश्रमापहरं धियं
जनयतु स मे देवः श्रीमान् धनञ्जयसारथिः ॥ ३९ ॥

तिरोधानानुपपत्तिवादः पञ्चत्रिंशः

यन्मायामोहितात्मानो यन्मायामोहितं विदुः।
तत्प्रपद्य तदुक्तोऽयं तिरोधिरवधूयते ॥ ४० ॥

आत्माद्वैतभङ्गवादः षट्त्रिंशः

नमस्तस्मै विभक्तानामात्मनामन्तरात्मने।
ब्रह्मणे हयवक्त्राय बन्धमोक्षैकहेतवे ॥ ४१ ॥

जीवेश्वरैक्यभङ्गवादस्सप्तत्रिंशः

आत्मतत्त्वविदां पुंसां पदास्यं लास्यकारणम्।
तद्वन्दे परमानन्दमिन्दिरामन्दिरं महः ॥ ४२ ॥

अखण्डवाक्यार्थखण्डनवादोऽष्टत्रिंशः

ज्ञानानन्दगुणोपेतं ज्ञानानन्दमयं महः।
पायादपायाद् भवतो भवबन्धविधायकात् ॥ ४३ ॥
सत्यज्ञानादिभिर्वाक्यैरखण्डं बोध्यमित्यतार्
अहं क्वचिद् यं खण्डामहं करणखण्डनम् ॥ ४४ ॥

भावरूपाज्ञानभङ्गवाद [illegible]त्रिंशः

१-४- सध्रीभव्यान् स्वभावैस्सुचरितसुभगान्कृष्णसारूप्यसौम्यान्
स्वाचारोदारशीलान् तदनुभृतभगवल्लक्ष्मणो नात्यगुप्तान् ।
छात्रस्वच्छन्दवृत्तीनभिगतशिशिरानत्र दूतोक्तियोग्यान्
आचार्यान्कृष्णलब्ध्यै अवृणुत शठजित् प्रेयसीदूतनीत्या ॥१५॥

१-५- क्षुद्राह्वानाभिमुख्यान्निजमहिमतिरस्कारकार्चाप्रियत्वात्
सर्वत्राप्यङ्घ्रिदानात् सविधशयनतः स्वाङ्घ्रिसक्तैकरस्यात् ।
गोपाद्याप्तेरशेषेक्षणविषयतया भक्तवस्तुप्रसक्तेः
क्लिश्यन्नाशव्यपोहात्तदहितशमनात् प्राह नाथं सुशीलम् ॥१६॥

१-६- अक्रीतैरन्यभावादनियतविविधाभ्यर्चनादल्पतुष्टेः
प्रह्वावर्ज्यस्वभावात्स्वविषयनियतेष्वादरात् स्वादुभूम्ना ।
पादासक्तप्रसक्तेः सकृदुपसदने मोक्षणाद् धर्मसौस्थ्यात्
क्षिप्रक्षिप्ताहितत्वात् सुकरभजनतां माधवस्याभ्यधत्त ॥१७॥

१-७- सच्चित्ताकर्षहेतोरघशमननिधेर्नित्यभोग्यामृतस्य
त्यागे हेत्वुज्झितस्य प्रबहुपकृतेर्दुस्त्यजस्वानुभूतेः ।
त्यागाकाङ्क्षानिरोद्धुः श्रितहृदयपृथक्कारनित्याक्षमस्य
स्वात्मश्लिष्टस्य गायञ्छ्रमहरयशसः सेवनं स्वाद्व[illegible] ॥१८॥

१-८- सूरीणां स्वैरसेव्ये स्वयमवतरति क्षुद्रदिव्यैकनेत्रे
गोपाद्यर्थं धृताद्रौ श्रिततनुरसिके वामनीभावदृश्ये ।
तच्चित्तानन्यवृत्तौ विभवसमजनौ स्वाश्रयारूढहस्ते
नीचोच्चग्राह्यपादे निरुपधिमृजुतां नीरवर्णे जगाद ॥१९॥

श्रुतिकिरीटनिरूपणनिर्भरप्रसरयैव धिया परिचोदिताम्।
सुविमलां पदवीमदवीयसीं भजत माधवभक्तिमयीमिमाम्॥४४॥
भावरूपं पदज्ञानं ये जनाः परिचक्षते।
तन्निषेत्ते तत् तथाभूतं निरिच्छन्ति विपश्चितः॥४५॥

== जीवाज्ञानभङ्गवादः चत्वारिंशः ==

अखिलचिदचिदन्तर्यामितां प्राप्य तिष्ठन्
स्वयमखिलगुणाढ्यः सूरिभिर्नित्यसेव्यः।
निजचरणनिषेवावैभवेनापराधान्
व्यपनयति नराणां व्यक्तमेवं भजामः॥४६॥

== अविद्यास्वरूपानुपपत्तिवादः एकचत्वारिंशः ==

अविद्याख्यावद्यं फलमपि तदीयं भगवतो
विदूरे यस्येति श्रुतिशिरसि जोघुष्यत इदम्।
यदज्ञानाद् बन्धो भवति ननु यद्वै भवविदाम्
स मे देवः श्रीमान् जयतु सदा चेतसि नमः॥४७॥

== मायाविद्याविभागभङ्गवादो द्विचत्वारिंशः ==

य एको दुर्लङ्घ्यत्रिगुणनिजमायानिगलितै-
र्विचित्रैः क्षेत्रज्ञैर्विहरति सरोजासहचरः।
जगत्सर्गक्षेमक्षपणपरिकर्मीणमहिमा
दयालुर्देवोऽसौ तुरगवदनस्तारयतु नः॥४८॥

== निवर्तकानुपपत्तिवादः त्रिचत्वारिंशः ==

अनन्यानां पुंसामनवधिकभक्तिस्थितिजुषा-
मविद्याध्वंसो यच्चरणवरिवस्यापरिणतेः।
तदेकं सत्संवित्सुखमवधिदूरीकृतगुणं
हृतारोपानद्यं हयवदनमीडीमहि महः॥४९॥

१९. पर्यङ्केऽङ्कत्के च दृष्टं स्वविरहविधुरं डिम्भवत् पार्श्वलीनं
चित्ते क्लृप्तप्रवेशं भुजशिखरगतं तालुसिंहासनस्थम्।
चक्षुर्मध्ये निविष्टं स्थितमलिकतटे मस्तकेतास्थिवांसं
प्रत्याहारोक्तरीत्या विभुमनुबुभुजे सात्म्यभोगप्रदानात्॥२०॥

१.१०. विषयविक्रान्तिदृश्यं विगणनसुलभं व्यक्तपूर्वोपकारं
स्वान्तस्यैकाग्र्यहेतुं स्वयमुदयजुषं नन्दमात्रोपयातम्।
चिन्तास्तुत्यादिलक्ष्यं नतजनसततश्लेषिणं दर्शितार्त्तिं
स्मृत्यै चित्ते मिषन्तं स्ववितरणमहौदार्यतुष्टोऽभ्यचष्ट॥२१॥

आदावित्थं परस्तादखिलसमतया भक्तसौलभ्यभूम्ना
निःशेषागस्सहत्वात्कृपणसुघटनाच्छ्रमसंराधनत्वात्।
स्वादुस्वोपासनत्वात् प्रकृतिऋजुतया सात्म्यभोगप्रदत्वाद्
अव्याजोदारभावादमनुत शतके माधवं सेवनीयम्॥२२॥

२.१. निद्राविच्छेदकत्वादरतिजननतोऽजस्रसंक्षोभकत्वाद्
अन्वेष्टुं प्रेरकत्वाद्वलयवितरणात्कार्श्यदैन्यादिकत्वात्।
चित्ताक्षेपाद्विसंज्ञीकरणत उपसंशोषणावर्जनाभ्यां
दृष्टास्वादस्य शौरेः क्षणविरहदशादुःसहत्वं जगाद॥२३॥

२.२. पूर्णैश्वर्यावतारं भवदुरितहरं वामनत्वे महान्तं
नाभीपद्मोत्थविश्वं तदनुगुणदृशं कल्पतल्पीकृताब्धिम्।
सुप्तं न्यग्रोधपत्रे जगदवनधियं रक्षणायावतीर्णं
रुद्रादिस्तुत्यलीलं व्यवृणुत ललितोत्तुङ्गभावेन नाथम्॥२४

== निवृत्त्यनुपपत्तिवादः त्रिचत्वारिंशः ==

सत्त्वानीव विरुद्धजातिजनुषा सिद्धानि सिद्धाश्रमे
वैरं यत्र मिथस्त्यजन्ति विधयस्सर्वैर्निषेधैः सह।
तं रङ्गैरायमङ्गसङ्गिकमलालक्ष्येश्वरप्रक्रियं
शान्तावर्त्मयनन्तमङ्गलगुणं देवं प्रपद्यामहि ॥५१॥

== शब्दावेद्यत्वनिरासवादः पञ्चचत्वारिंशः ==

यन्नामानि परोरजांसि शृणतां यादृच्छिकैर्हेतुभि-
र्दुर्लङ्घ्योऽप्यनुपयाति गोष्पदतुलां संसारनाशांनिधिः।
दूरे नित्यमसीमभूमकतया नाम्नां यदाम्नायते
तद्वन्देमहि सर्वशब्दविषयं त्रय्यन्तवेद्यं महः॥५२॥

== निष्प्रपञ्चीकरणनियोगभङ्गवादः षट्चत्वारिंशः ==

आविर्भावतिरोभावजन्मनाशविकल्पवत्।
यस्यैतदक्षयं नित्यं जगत् तं विष्णुमाश्रये ॥५३॥

== विकल्पाप्रामाण्यभङ्गवादः सप्तचत्वारिंशः ==

संसारसागरोत्तारकारणं वारणान्तिके।
अविकल्पविकल्पाभ्यामध्यक्षितमुपास्महे॥५४॥

== उपबृंहणवैयर्थ्यवादोऽष्टचत्वारिंशः ==

गुणविभूतिविशेषविचित्रितं निगमसीमनि यत् समधीमहे।
स्मृतिपुराणशतैरुपबृंहितं तदिदमस्तु सदा हृदयेषु नः॥५५॥

= ऐक्योपदेशान्यथानुपपत्तिभङ्गवाद एकोनपञ्चाशः =

त्रिविधचिदचिदन्तर्यामितां प्राप्य तिष्ठन्
निखिलनिगमनिष्ठैर्नित्यमैक्योपदेशैः।
भ्रममयलधियां यो वारयत्येकभक्त्या
भवतु शरणवाणी तत्पदे शाश्वती नः॥५६॥

२३. चित्रास्वादानुभूतिं प्रियमुपकृतिभिदस्य सारस्य हेतुं
स्वात्मन्यासार्हकृत्यं भजदमृतरसं भक्तिचित्तैकभोग्यम् ।
सर्वाक्षिप्रीणनार्हं सपदि बहुफलस्नेहमास्वाद्यशीलं
सभ्यैः साध्यैः समेतं निरविशदनघाश्लेषनिर्वेशमीशम् ॥२५॥

२४. प्रह्लादार्थे नृसिंहं क्षपितविपदुषावल्लभं क्षिप्तलङ्कं
क्ष्वेलप्रत्यर्थिकेतुं श्यामहरतुलसीमालिनं धैर्यहेतुम् ।
त्राणे दत्तावधानं स्वरिपुहतिकृताश्वासनं दीप्तहेतुं
सत्रे क्षा[illegible] रक्षितारं व्यसननिरसनव्यक्तकीर्तिं जगाद ॥२६॥

२५. स्वप्राप्त्या सिद्धकान्तिं सुघटितदयितं विस्फुरत्तुङ्गशक्तिं
प्रोत्युन्मेषातिभोग्यं नवघनसदृशं नैकभूषाढ्यदृश्यम् ।
प्रख्यातप्रीतिलीलं दुरभिलपरसं सद्गुणामोदहृद्यं
विश्वव्यावृत्तचित्रं व्रजयुवतिगणख्यातरीत्याऽन्वभुङ्क्त ॥२७॥

२६. स्वादादरव्यापकत्वाच्छ्रितनियतदशानैकभोगप्रदानात्
त्यागानर्हप्रकाशात् स्थिरपरिचरणस्थापनात् पापभङ्गात् ।
दुःसाध्यार्थस्य सिद्धेर्विरहभयकृते दुर्विभेदप्रयोगात्
नित्यानेकोपकारात् स्वनिरतचरितं प्रेक्षताम्भोरुहाक्षम् ॥२८॥

२७. शरदिस्सर्वनाथस्त्रिभुवनजननीवल्लभः स्वामितार्थी
निपवर्ग्याप्त्याऽतिदीप्तो विमतनिरसनः स्वाङ्घ्रिसद्भक्तिदायी ।
विश्वाद्यैर्नामनाङ्कः स्वविभवरसदः स्वात्माननिर्हियोग्यः
स्वार्थैहोभवन्मोक्षः स्वजनहिततया द्वादशाख्याभिरूले ॥२९॥

== परयते शास्त्राधिकारिभङ्गवादः पञ्चाशः ==

हताशेषक्लेशा निरवधिमहानन्दधनिनो
वयं भूयास्मेति स्थिरमनघवर्त्मन्यधिकृताः।
अनाघ्राताबाधा ह्यमुखपदद्वन्द्वरुच्यः
स्वदन्तां मे मन्त्राः श्रुतिजलधिमुष्टिन्धयधियः॥५७॥

== मुक्तसंविन्निर्विषयत्वभङ्गवाद एकपञ्चाशः ==

अनुकूलतया सर्वं पश्यन्त्या मुक्तसंविदः।
आनन्त्यं निर्विषयत्वेन वदतोऽर्थान्निरुन्ध्महे॥५८॥

== सगुणनिर्गुणश्रुतिव्यवस्थावादो द्विपञ्चाशः ==

सत्त्वाजीन विरुद्धजातिजनुषां सिद्धानि सिद्धाश्रमे
वैरं यत्र मिथस्त्यजन्ति विधयस्सर्वे निषेधैः सह।
तत्रद्वेशयमङ्गसङ्गिकमलालक्ष्येश्वरप्रक्रियं
शान्तावद्यमनन्तमङ्गलगुणं ब्रह्म प्रपद्येमहि॥५९॥
निर्गुणश्रुतिभिः केचिद् बाधन्ते सगुणश्रुतीः।
तासामन्योन्यसौहार्दमाहुर्यतिवरास्त्रयः॥६०॥

== ब्रह्मोपादानत्वान्यथानुपपत्तिभङ्गवादस्त्रिपञ्चाशः ==

सद्ब्रह्मादिमुखैः पदैः श्रुतिषु यत् तत्त्वं समुद्घोषितं
स्यामित्येव चराचरं जगदिदं सृष्ट्वा प्रविश्याभवत्।
तस्मै विस्मयनीयमङ्गलगुणस्तोम्ने सदा स्थायिने
सर्वावस्थसमस्तवस्तुवपुषे धाम्ने परस्मै नमः॥६१॥

== मायोपादानत्वान्यथानुपपत्तिभङ्गवादश्चतुःपञ्चाशः ==

यत्प्रपत्तिं विना सर्वैर्यस्य माया दुरत्यया।
धनञ्जयरथोत्तंसं तत् प्रपद्ये परं महः॥६२॥

== कार्यान्यथानुपपत्तिभङ्गवादः पञ्चपञ्चाशः ==

२.८ प्राप्याकारोपपत्त्या जनिपरिहरणाद्विभस्य प्राप्यादिशान्ते-
२९ र्निःसीमानन्तदेशान्वयत उपजनेऽनो रक्षणार्थावतारात्।
सुप्रख्यातानुभावाद्विविधनिहरणाद्व्याप्तिवैचित्र्यवत्त्वाद्
भक्तैर्द्राग्दृश्यभावादखिलफलकृतेर्मुक्तिसौख्यं मुकुन्दे ॥३०॥

२.९ अद्वेयस्वाङ्घ्रियोगं शुभमतिकरं स्तोत्रसामर्थ्यहेतुं
स्वार्थीकारोपकारं स्मृतिरसशमितान्यादरं प्रीतिवश्यम्।
प्राप्तौ कालाक्षमत्वप्रदममृतरसध्यानमात्मार्पणार्हं
वैमुख्याद्वारयन्तं कृतपरिचरणं चक्रपाणिं जगाद ॥३१॥

२.१० दीप्ताश्चर्यस्वभावं मुखरितजलजं वर्षुकाम्भोदवर्णं
शैलच्छत्राभिगुप्ताश्रितमतिविलसद्द्युतिमापीतगव्यम्।
संरम्भोत्क्षिप्तभूमिं प्रणमदनुगुणं पूतनाचेतनान्तं
पूर्वाचार्यैर्मुनीनां शुभसविधगिरिस्थानतो निर्दिदेश ॥३२॥

इत्यत्यन्तात्यसह्यक्षणविरहतया मानुषत्वे परत्वात्
सर्वस्वादत्वभूम्ना व्यसनहरतया स्वाप्तिसंप्रीतिमत्त्वात्।
वैमुख्यत्रासयोगान्निजसुहृदवनान्मुक्तिसारस्यदानात्
कैङ्कर्यैर्दृश्यभावाच्छुभनिलयतया चातिभोग्यं द्वितीये ॥३३॥

३/१ सुश्लिष्टाकल्पमङ्गैरनुपमसुषमं वक्ति निःसीमदीप्तिं
स्वान्तस्वादुस्वदेहं सुखभजनपदं मण्डिताङ्गं महिम्ना।
स्तोत्रातिक्रान्तकीर्तिं मलिनिमरहितोज्ज्वलाद्यमिष्टौघवाह्यं
वीताश्चर्यत्रिणेत्रप्रभृतिसुरनुतिं चित्रसौन्दर्यवित्तम् ॥३४

बाल: क्रीडनकैरिव स्थिरचरैः स्वैनैव निर्वर्तितैः
संकल्पैकवशंवदो विहरति ब्रह्मादिभिर्जन्तुभिः।
जिज्ञास्याय मुमुक्षतामिह पुनः प्राप्याय मुक्तात्मनां
लक्ष्मीकौस्तुभलक्ष्मणे नम इदं तस्मै परब्रह्मणे॥६३॥

== आनन्त्यनिरूपणवादः षट्पञ्चाशः ==

देशानामपि देशतामुपगतं स्वाभाविकाद्वैभवात्
कालस्यापि कलामुपाधिकलनात्कालत्वहेतुं स्तुमः।
निःशेषेष्वपि विश्वकोटिघटितैर्निर्मोच्यते वस्तुनि
स्वात्मन्येव जहत्समाधिककथासंभावनं तन्महः॥६४॥

== निर्विशेषब्रह्मण आनन्दत्वभङ्गवादः सप्तपञ्चाशः ==

ब्रह्मण्यानन्दशब्देन दर्शितां गुडजिह्विकाम्।
निर्विशेषस्य हीनानां वादिनां विलुनाम्यहम्॥६५॥

== निर्विशेषब्रह्मणो नित्यत्वभङ्गवादोऽष्टपञ्चाशः ==

पूर्ववृत्तान्ततुल्येऽपि पूर्वत्वेनोपवर्णिते।
नित्यानित्यविवेकेऽत्र नित्यत्वं वो निरस्यते॥६६॥

== परपक्षे अद्वितीयश्रुतिविसंवादवाद एकोनषष्टितमः ==

स्वतः सर्वजगत्कर्तेः संवित्सि श्रुत्यादिभिः स्फुटम्।
अद्वितीयपदोक्त्यैव साधिता सविशेषता॥६७॥

== सत्त्वासत्त्वविवेकवादः षष्टितमः ==

अस्ति नास्तीति धीभ्यामभिन्याभिन्नवस्तुषु।
सदेव सदसद्बुद्धिनिमित्तत्वेन साध्यते॥६८॥

== जीवैक्यभङ्गवाद एकषष्टितमः ==

पयोधितनयान्विते परमधाम्नि यद्वर्तते
सदा पदवलोकनं विदधते फणीन्द्रादयः।

३-२ स्रष्टा क्रान्ता च लोकान् हृतधरणिभरोऽनन्यभोग्याङ्घ्रियुग्म-

च्छिन्नोद्यन्नीलरूपो निरवधिरसदस्वाङ्घ्रिरध्यक्षमूर्तिः ।

नित्योपास्यस्वपादो निखिलवसुमतीगोपनस्वाङ्घ्रिवृत्ति-

र्गृण्णन् मूर्तिप्रतीत्या यमपरवशतां प्रोज्झि लोकैकनाथः ॥३५॥

३-३- स्थानोत्कर्षाति सुदीप्तं भ्रमहरवपुषं स्वाङ्ग पर्याप्तभूषं

तेजिष्ठं नीलयोगात् प्रणमितभुवनं पावनं सन्नतानाम् ।

प्राप्यर्हस्थानमंहःप्रशमनविषयं बन्धविच्छेदि पादं

भेजे श्रीश्राभियाज्ञक्षमरघुभवसतिं लम्भितार्चाभिमुख्यम् ॥३६॥

३-४- भूतैस्तत्कार्यभूतैः शुभनिजवपुषा दीप्तिमद्भिः पदार्थैः

पथ्यास्वादोपपन्नैः श्रुतिसुखसुभगाशेषशब्दप्रपञ्चैः ।

नानाकारैः पुमर्थैर्जगदधिपतिभिश्चेतनाचेतनौघै-

र्जुष्टं दोषैरदुष्टं निखिलतनुतया संप्रतुष्णाव तुष्टः ॥३७॥

३-५- ग्राहग्रस्तेभमोक्षे सुररिपुदमने गोकुलत्राणकार्ये

(नीला) गोदार्थोक्षावमर्दे सदहितमथने सिन्धुपर्यन्तभोग्ये ।

क्षोणीभारव्यपोहे क्षितिधरवसतौ निर्जराराध्यतायां

विश्वारम्भे च शौरेः शुभतनुसुषमो न्यादरूहे जगाद ॥३८॥

३-६= पद्माक्षीं पापहन्त्रीं मणिरुचिममरावीशचिन्त्याङ्घ्रियुग्मां

तत्तादृक्कुलालश्रीसुघटितमकुटां भावुकप्राप्यपादाम् ।

रुद्रास्वाद्यस्वभावां यमभटमथनीं भक्तजीवृत्तिभव्यां

नीचोऽप्यभीष्टवृत्तिं हरितनुमवदन्निर्मलार्चानुरक्तः ॥३९

अकृत्रिमसरस्वतीवदनसक्तां तां स्वादिते -
गुणैरखिलगुणं महस्स्वयमनन्तमालक्ष्यते ॥६९॥

== परमते अपशूद्राधिकरणविरोधवादो द्विषष्टितमः ==

स्वे स्वे कर्मणि ग्रुग्मानो मुखबाहूरुपादजान् ।
स्वयं नः संप्रकाशेत स्वान्ते स्वच्छन्दसारथिः ॥७०॥

== अधिकारिविवेकवादस्त्रिषष्टितमः ==

कर्मज्ञानादिनिष्ठास्तु कर्तृत्वं योगिनां यतः ।
स सर्वकर्ता स्वमतं नित्यं कारयितास्तु नः ॥७१॥

== यतिलिङ्गभेदभङ्गवादश्चतुष्षष्टितमः ==

मितान् परमहंसतां परमहंस इत्युल्लिल :
नयीप्रथमसौगतान् कपटसौगतान् खण्डयन् ।
मुनिर्जयति लक्ष्मणो मुदमुदञ्चयन्नञ्चतां
मुकुन्दगुणमौक्तिकप्रकरशुक्तिभिः सूक्तिभिः ॥७२॥

== अलेपकमतभङ्गवादः पञ्चषष्टितमः ==

अशेषमम बाह्यानामीश्वराज्ञाभरन्नमात् ।
अलेपकदशाभाजामवलेपोऽत्र लुप्यते ॥

== परमते सूत्रस्वारस्यभङ्गवादः षट्षष्टितमः ==

नमोऽस्तु ब्रह्मणे तस्मै बादरायणरूपिणे ।
यस्यैव ब्रह्मसूत्राणां रचना सगुणायते ॥७३॥
अद्वैतमतविष्ठावामन्त्रेणानमदा कृतम् ।
ब्रह्मसूत्रार्थवैरूप्यं तेषामथ निरूप्यते ॥
इतिसंपूर्णा ———— शतदूषणी ॥

कवितार्किकसिंहाय — वेदान्तगुरवे नमः

३-७- स्फीतालोकातिभूम्ना पृथुबहुभुजया दिव्यमाल्यास्त्रभाजा
सद्वस्त्राकल्पक्लृप्त्या त्रिदशरसकृता रक्षणौन्मुख्यवत्त्या ।
मुक्तैरुत्तंसिताङ्घ्र्या स्थिरधृतरमया श्यामया नित्यसत्त्या
शौरेः कान्त्या जितानां स्वबहुमतजनस्तामितामन्वमंस्त ॥४०॥

३-८- चित्ताकृष्टिप्रवीणैरभिलपनसुखैः स्पर्शवाञ्छां दुहानै-
रानन्दानैर्दिदृक्षां श्रुतिहितमहितैरात्मनित्यादरार्हैः ।
विश्लेषाक्रोशकृद्भिः स्मरदरतिहरैर्दत्तसायुज्यसङ्गैः
कुर्षणैर्बाललौल्यं मिलितगुणगणैर्नित्यदृश्याङ्गमाह ॥४१॥

३-९- रम्यस्थानादियोगाद्भितविभवतः सत्पथप्रापकत्वात्
सम्यक्सायुज्यदानाद्दनघवितरणात् सर्वशेषित्वचिन्हात् ।
प्रख्यातख्यासहस्रैरवतरणसैर्भुक्तिमुक्त्याभिमुख्यात्
त्रैलोक्योत्पादनाच्च श्रुतिविषयमजं व्याहरन्निन्दितान्यः ॥४२॥

३-१०- प्रादुर्भावानुभावात्परिजनविभवात् पावनाङ्घ्रित्वाज्-
जैत्रव्यापारयोगाद्घटितघटना देवभावप्रसिद्धेः ।
आश्चर्यक्रीडनत्वात्सरसिजनिलयानन्दनीयत्ववृत्ते-
रैश्वर्यव्यक्तिमत्त्वादघशमनतनुं केशवं व्याजहार ॥४३

एवं सौन्दर्यभूम्ना तनुविहितजगत्कृत्यसौभाग्ययोगात्
स्वेच्छासेव्याकृतित्वान्निखिलतनुतयोन्माददानार्हकान्त्या ।
लभ्याचार्यैर्भवत्वाद्गुणरसिकगुणोत्कर्षणाद्दक्षकृत्या
स्तुत्यत्वात्पापभङ्गाच्छुभसुभगतनुं प्राह नाथं तृतीये ॥४४

॥अथ अधिकारसंग्रह श्लोकाः प्रारभ्यन्ते॥

श्रीमान् वेंकटनाथार्यः — सन्निधत्तां सदा हृदि॥

गुरुपरम्परासारः प्रारभ्यते

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती॥१॥

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाधनाः।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन-
भ्रमपरिणतश्रद्धाशुद्धाशया मम देशिकाः॥२॥

एते मह्यमपोढमन्मथशरोन्माथाय नाथादय-
स्त्रय्यन्तप्रतिनन्दनीयविविधोदन्ताः स्वदन्तामिह।
श्रद्धातव्यशरण्यदम्पतिदयादिव्यापगाव्यापका-
स्पर्धाविप्लवविप्रलम्भपदवीवैदेशिका देशिकाः॥३॥

हृद्या हृद्यपद्मसिंहासनरसिकहयग्रीवहेषोर्मिघोष-
क्षिप्तप्रत्यर्थिदृप्तिर्जयति बहुगुणा पङ्क्तिरस्मद्गुरूणाम्।
दिक्सौधाबद्धजैत्रध्वजपटपवनस्फातिनिर्धूततत्ता-
त्सिद्धान्तस्तोमतूलस्तबकविगमनव्यक्तसद्वर्तनीका॥

॥इति गुरुपरम्परासारः सम्पूर्णः॥ ॥४॥

अथ श्रीमद्रहस्यत्रयसारः प्रारभ्यते।

आभ्यवत्तः प्रथिता मनप्रामार्यसंततिं वन्दे।
मनसि मम यत्प्रसादाद्वसति रहस्यत्रयस्य सारोऽयम्॥५॥

कर्मब्रह्मात्मके शास्त्रे कौतस्कुतनिवर्तकान्।
वन्दे हस्तिगिरीशस्य वीथीशोधककिंकरान्॥६॥

४.१. श्रीमान् नारायणः स्वाम्यनुगुणमकुटो वीरदामाङ्कमौलि-
र्दुर्दान्ताराति हन्ताऽद्भुतनियततनुः कल्पपाथोधितल्पः ।
विश्वात्मा ज्योतिरुर्वीधरफणिशयनो वेदरूपस्वकेतु-
र्निर्धूताशेषदोषः प्रभुरथ कथितः सुस्थिरैश्वर्यसीमा ॥४५॥

४.२. शैत्यात् सौगन्ध्यभूम्ना रुचिरुचिरतया पोषणादाभिरूप्यात्
सन्दर्भात् पुण्यसङ्गान्महिततुलसिकामालया शङ्खतश्च ।
चक्राधीशस्य योगाद्वटदलशयनाद्दुर्हृणीयापदानैः
संपन्नानेकभोग्यं निरविशदजितं कृष्णमूर्तिं शठारिः ॥४६॥

४.३. चेतोगन्धानुलेपः स्तुतिवचनकृतस्रक्कृपटोऽञ्जल्युपात्ता-
लङ्कारः प्राणवासी कल्पितवरशिरोभूषणश्चेतनेन ।
शीर्षण्यासत्पादपीठः स्वतनुसदनतामात्मरूपे वितन्वन्
अन्योन्यात्मत्वयोगात् प्रभुरगणि मिथः श्लिष्टभावोऽथ तेन ॥४७॥

४.४. भूम्यापोऽसागराद्यै र्ज्वलनशशिमुखैर्वस्तुभिर्व्याप्तसंपूर्णै-
र्नृत्याद्यैः स्वैश्च लोकादिभिरथ पृथिवीक्षितैर्दूरालीयदासैः ।
सौलभ्यैश्वर्यवर्यैर्गैरपि च गुणगणैर्वासुदेवो वियोगे
स्वीयैस्तुल्यैश्च भक्तान् व्यथयति मधुहेत्यब्रवीत् कारिसूनुः ॥
४८॥

४.५. आपन्नानन्यबन्धौ सरसिजनिलयावल्लभे सान्द्रमोदे
भक्ताघध्वंसशीले तदुचितसमयाश्वासदानप्रवीणे ।
कर्पूरालेपशोभे समधिकरहिते तोषके सर्वपूर्णे
कृष्णे स्तुत्यादिभाजां शठरिपुरवदद् धन्यतां निन्दितान्यः ॥
॥४९॥

~ अर्थानुशासनभागः ~

== उपोद्घाताधिकारः प्रथमः ==

मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः
कलुषमतिरविन्दन् किंकरत्वाधिराज्यम् ।
विधिपरिणतिभेदाद्वीक्षितस्तेन काले
गुरुपरिषदुपज्ञं प्राप्य गोपायति स्वम् ॥७॥

कर्मविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्-
मुक्तेरयन्ति संपन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥८॥

== सारनिष्कर्षाधिकारो द्वितीयः ==

श्रुतिपथविपरीतं क्ष्वेलकल्पं श्रुतौ च
प्रकृतिपुरुषभोगप्रापकांशो न पथ्यः ।
तदिह विबुधगुप्तं मृत्युभीता विचिन्व-
न्त्युपनिषदमृताब्धेरुत्तमं सारमार्याः ॥९॥

शाखानामुपरि स्थितेन मनुना मूलेन लब्धात्मकः
सत्ताहेतुसकृज्जपेन सततं कालं द्वयेन क्षिपन् ।
वेदोत्तंसविहारसारथिदयागुम्भेन विस्रम्भितः
सारज्ञो यदि कश्चिदस्ति भुवने नाथः सयूथः स नः ॥१०॥

== प्रधानप्रतितन्त्राधिकारस्तृतीयः ==

आधेयत्वप्रभृतिनियमैरादिकर्तुः शरीरं
सत्तास्थेमप्रयतनफलेष्वेतदायत्तमेतत् ।
विश्वं पश्यन्निति भगवति व्यापकादर्शदृष्टे
गम्भीराणामकृतकगिरां गाहते चित्तवृत्तिम् ॥११॥

यद्येतं यतिसार्वभौम[illegible] विद्यादविद्यातमः—

४.६- इच्छासारथ्ययोगात् प्रहरणनवना च्छ्रीतुलस्याढ्यमौलेः
स्तुत्याङ्घ्र्योः पादधूल्या स्वजनभजनतत्पादधूलीनमोभिः।
तन्मूलस्वाङ्घ्रिनुत्या तदितरभजनत्यागपूर्वोपसत्त्या
देवं प्राचीरुपपत् स्वप्रणयिषु भिषजं केसरस्रग्विभूषः ॥५०॥

४.७- आपद्बन्धुत्वदीप्तं निरवधिकमहानन्ददं क्रान्तलोकं
दुर्दर्शं देवतानां पितरमनुपाधिं सर्वभूतान्तरस्थम्।
पूर्णज्ञानैकमूर्तिं धृतरुभतुलसिं चक्रनाथं श्रुतीनां
विश्रान्तिस्थानमीशं विशदबहुगुणं प्राह खिन्नः शठारिः॥
"५१"

४.८- दुःशीलो मांसचक्षुर्निरवधिदुरितो वीतलज्जो विलोलः
प्रेक्षाहीनोऽन्यसङ्गात् कृतमपि लघयन् श्रीशमन्तर्दधानः।
कर्मज्ञानादिशून्यो निरुपधि विहितो ज्ञानदृष्टिं विनिन्दन्
प्रख्याप्यैवं स्वदोषान् पतिगुणरसिकस्तद्दिदृक्षां जगद्यौ॥
"५२"

४.८- सौन्दर्यादौ स्वकीये हृदि च स्वनिकरे पूर्णतायां च कान्तौ
सम्यग्ज्ञाने प्रकाशे वलयरशनयोर्वर्ष्मणि स्वस्वरूपे।
स्याद्विष्णोर्यदुपेक्षा तदिदमखिलमुन्मूलनीयं तदीये-
रित्यूचे कारिसूनुस्तदुपरि कथयंस्तं शिवाद्याश्रिताङ्घ्रिम्॥
"५३"

४.९- कारुण्यादाब्धिमाथी तदुपरि शयितस्तत्समानाङ्गवर्णः
ख्यातौदार्यः स्वदाने रुचिरमणिरुचिर्वैषतोऽतीव भोग्यः।
आत्मत्वेनानुभाव्यो दुरधिगमपदो बन्धमोक्षस्वतन्त्रः
स्वान्यप्रेमोपरोधी स्वदत इह विभुस्तत्पदोत्कण्ठिताय॥
"५४"

~ अर्थानुशासनभागः ~

== उपोद्घाताधिकारः प्रथमः ==

मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः
कलुषमतिरविन्दन् किंकरत्वाधिराज्यम्।
विधिपरिणतिभेदाद्वीक्षितस्तेन काले
गुरुपरिषदुपज्ञं प्राप्य गोपायति स्वम्॥७॥

कर्मविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा।
तन्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्-
मुक्तैर्यन्ति संपन्निधिरपि भविना कश्चिदित्थं विपश्चित्॥
॥८॥

== सारनिष्कर्षाधिकारो द्वितीयः ==

श्रुतिपथविपरीतं क्ष्वेलकल्पं श्रुतौ च
प्रकृतिपुरुषभोगप्रापकांशो न पथ्यः।
तदिह विबुधगुप्तं मृत्युभीता विचिन्व-
न्त्युपनिषदमृताब्धेरुत्तमं सारमार्याः॥९॥

शाखानामुपरि स्थितेन मनुना मूलेन लब्धात्मकः
सत्ताहेतुसकृज्जपेन सततं कालं द्वयेन क्षिपन्।
वेदोत्तंसविहारसारथिदयागुम्भेन विस्रम्भितः
सारज्ञो यदि कश्चिदस्ति भुवने नाथः सयूथः स नः॥१०॥

== प्रधानप्रतितन्त्राधिकारस्तृतीयः ==

आधेयत्वप्रभृतिनियमैरादिकर्तुः शरीरं
सत्तास्थेमप्रयतनफलेष्वेतदायत्तमेतत्।
विश्वं पश्यन्निति भगवति व्यापकादर्शदृष्टे
गम्भीराणामकृतकगिरां गाहते चित्तवृत्तिम्॥११॥

यद्येतं यतिसार्वभौमकथितं ...विद्याद विद्यातमः—

४.६- इच्छासारथ्ययोगात् प्रहरणनवनीतस्य तोतुलस्याढ्यमौलेः
स्तुत्याङ्घ्र्योः पादधूल्या स्वजनभजनतत्पादधूलीनमोभिः।
तन्मूलस्याङ्घ्रिनुत्या तदितरभजनत्यागपूर्वोपसत्त्या
देवं प्रापन्निरस्यपत् स्वप्रणयिषु भिषजं केसरस्राग्विभूषः॥५०॥
४.७- आपद्बन्धुस्तदीप्तं निरवधिकमहानन्ददं क्रान्तलोकं
दुर्दर्शं देवतानां पितरमनुपाधिं सर्वभूतान्तरस्थम्।
पूर्णज्ञानैकमूर्तिं धृतरुभतुलसिं चक्रनाथं श्रुतीनां
विश्रान्तिस्थानमीशं विशदबहुगुणं प्राह खिन्नः शठारिः॥
"५१"
४.८- दुःशीलो मांसचक्षुर्निरवधिदुरितो वीतलज्जो विलोलः
प्रेक्षाहीनोऽन्यसङ्गात् कृतमपि लपयन् श्रीशमन्तर्दधानः।
कर्मज्ञानादिशून्यो निरुपधि विहितो ज्ञानदृष्टिं विनिन्दन्
प्रख्याप्यैवं स्वदोषान् पतिगुणरसिकस्तद्दिदृक्षां जजक्षौ॥
"५२"
४.८- सौन्दर्यादौ स्वकीये हृदि च स्वनिकरे पूर्णतायां च कान्तौ
सम्यग्ज्ञाने प्रकाशे वलयरशनयोर्वर्णाणि स्वस्वरूपे।
स्याद्विष्णोर्यदुपेक्षा तदिदमखिलमुन्मूलनीयं तदीये-
रित्यूचे कारिसूनुस्तदुपरि कथयंस्तं शिवाज्ञाङ्कितात्मा॥
"५३"
४.९- कारुण्यादाब्धिमाथी तदुपरि शयितस्तत्समानाङ्गवर्णः
ख्यातौदार्यः स्वदाने रुचिरमणिरुचिर्वेषतोऽतीवभोग्यः।
आत्मत्वेनानुभाव्यो दुरधिगमपदो बन्धमोक्षस्वतन्त्रः
स्वान्यप्रेमोपरोधी स्वदलद इव विभुस्तत्पदोत्कण्ठिताय॥
"५४"

प्रत्यूषं प्रतितन्नामन्तिमयुगे काचिद्द्विपाश्रित्तम: |
तत्रैकत्र झटित्युपैति विलयं तत्तन्मतस्थापना-
हेवाकप्रथमानहेतुककथाकल्लोलकोलाहल: || ११२ ||

== अथ पिच्छकाधिकारी चतुर्थ: ==

आदौ प्राप्यं परममनघं प्राप्तृरूपं च मादा-
विष्टोपायं नयनमसोरीरितार्थं चतुर्थ्याम् |
तद्व्याघातं ममकृति गिरि व्यञ्जयन्तं महुं तं
तत्सायं च द्वयमपि विदन् संमत: सर्ववेदी || १३ ||

प्राप्यं ब्रह्म समस्तशेषि परमं प्राप्ताहमस्योचित:
प्राप्तिदयिघनक्रमादिह मम प्राप्ता स्वत:स्वरिवत् |
हन्तैनामतिवृत्तवानहमहंमत्या विमत्याश्रय:
सेतु:संप्रति शेषिदम्पतिभरन्यासस्तु मे शिष्यते || ११४ ||

== तत्त्वत्रयचिन्तनाधिकार: पञ्चम: ==

प्रकृत्यात्मभ्रान्तिर्गलति चिदचिल्लक्षणधिया
तथा जीवैरैक्यप्रभृतिकलहस्तद्विभजनात् |
अतो भोक्ता भोग्यं तदुभयनियन्तेति निगमै:
प्रतीतं नस्तत्त्वत्रयमुपदिशन्त्यक्षतधिय: || १५ ||

आवापोद्वापत:स्यु: कति कति कविधीचित्रवत्तत्त्वदर्थे-
ष्वानन्त्याद् दस्तिनास्त्योरनवधिकुहनायुक्तिकान्ता:कुधान्ता: |
तत्तालोकस्तु लोप्तुं प्रभवति सहसा निस्समस्तान् समस्तान्
पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुताधी: || १६ ||

== परदेवतापारमार्थ्याधिकार: षष्ठ: ==

आत्मैक्यं देवतैक्यं त्रिकसमधिकता तुल्यतैक्यं त्रयाणा-
मन्यत्रैवेयमित्याद्यनिपुणकथितैनिर्मितो[illegible] त्रयाणां न सन्ता: |

४.८- तापैस्सम्बन्धिदुःखैस्स्वविभवमरणैस्तापकद्रौण्यसङ्गैः-
दुर्गत्याज्ञातिवृत्तेरनितरविभुतेरण्डकारानिरोधात् ।
प्रह्वीभावोज्झितत्वात्प्रलघुपरिच्छेदतश्चातिशोच्यं
विश्वं द्रष्टुं न शक्तो निजपदनयने नाथति स्म स्वनाथम् ॥
"५५"

४.९- स्वानां निर्वाहकत्वादहिपतिशयनादब्धिवर्णस्वभावा-
दत्यन्तोदारभावाद्बलभिदुपलवद्दर्शनीयत्वयोगात् ।
सम्मौलित्वात्तुलस्या प्रियकरणसुखैरण्डसृष्टौ पटुत्वात्
सुप्रापत्वादिभिस्तं फलमतुलमवैद्वेणुषामेव नाथम् ॥
"५६"

४.१०- कल्पान्तेऽपि स्थितत्वात् सकलसुरगणस्राग्भावाज्जनानां
रक्षादानादकत्वाद्बैवविधिभरणात्सर्वदेवात्मभावात् ।
तत्तत्कर्मानुरूपं फलवितरणतो वैनतेयध्वजत्वा-
न्मार्कण्डेयावनाद्यैः प्रभुमथ शठजित् प्राह सर्वाधिरोहम् ॥
"५७"

नित्यैश्वर्यं तु तुर्ये सहजबहुलसद्भोग्यमन्योन्यसक्त-
क्लेशापादि स्वतुल्यं स्वजनकृतकृतार्थीकृतिं स्नेहिवश्यम् ।
संयुक्तं सद्गुणौघैस्स्वजनपरिहृतोपेक्ष्यमिष्टार्थरूपं
श्रेष्ठं निःशेषभोग्यादमनुत शतके देवतासार्वभौमम् ॥
"५८"

५-१- चक्रस्फायत्करत्वात् स्वजनवशतया रक्षणोद्युक्तभावात्
भव्यत्वात् स्वात्मदानादमलतनुतया श्रीगजेन्द्रावनाच्च ।
नानाबन्धुत्वयोगाद्विपदि सखितया व्याजमात्राभिलाषात्-
कारुण्याधीनवृत्तिं कमलदृशमवैत् कारिसूनुः कृतार्थः ॥ १ ॥
"५९"

त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान्नारायणो नः पतिरखिलतनुर्मुक्तिदो मुक्तभोग्यः ॥१७॥

जनपदभुवनादिस्थानजैत्रासनस्थे-
ष्वनुगतनिजवार्तं नश्वरेष्वीश्वरेषु ।
परिचितनिगमान्तः पश्यति श्रीसहायं
जगति गतिमविद्यादन्तुरे जन्तुरेकः ॥१८॥

== मुमुक्षुत्वाधिकारः सप्तमः ==

कालावर्तान् प्रकृतिविकृतीः कामभोगेषु दोषान्
ज्वालागर्तप्रतिमदुरितोदर्कदुःखानुभूतिम् ।
याथातथ्यं स्वपरनियतं यच्च दिव्यं पदं तत्
कारकल्पं वपुरपि विदन् कस्तितिक्षेत बन्धम् ॥१९॥

विषमधु बहिष्कुर्वन् धीरो बहिर्विषयात्मकं
परिमितरसस्वात्मप्राप्तिप्रयासपराङ्मुखः ।
निरवधिमहानन्दब्रह्मानुभूतिकुतूहली
जगति भविता दैवात् कश्चिज्जिहासितसंसृतिः ॥२०॥

== अधिकारिविभागाधिकारोऽष्टमः ==

मुमुक्षुत्वे तुल्ये सति च मधुविद्यादिषु यथा
व्यवस्था संसिध्यत्यधिकृतिविशेषेण विदुषाम् ।
विकल्प्येत न्यासे स्थितिरितरविद्यासु च तथा
नियत्या वैयासं नियमयितुमेवं प्रभवति ॥ २१ ॥

प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदं
प्रपन्नाश्च द्वेधा सुचरितपरीपाकभिदया ।
विलम्बेन प्राप्तिर्भजनसुखमेकस्य विपुलं
परस्यार्ता प्राप्तिः परिमितरसा जीवितदशा ॥२२॥

५.२- पाथोधिप्रौढकान्तौ सरसतुलसिकालङ्कृतो दानभावे
वैकुण्ठे च चक्रप्रहरणवशितादेवतास्थापनादौ ।
स्नानामन्त्यावनादौ सकलनियमने सर्वकर्मण्यभावे
निःश्वासकैः स्वभक्तैर्जगदघशमनं प्राह कृष्णं शठारिः ॥
"६०"
५.३- ज्योतीरूपाङ्कहासरसिजनयनानिष्टविध्वंसकत्वा-
न्मेघौघश्यामलत्वाच्छ्रुतसरसतयोत्कृष्टसौलभ्ययोगात् ।
रक्षायां चावधानात् सुभगतनुतया स्वापकारस्त्ववत्वात्
स्वानां प्रेमातिमात्रं जनयति भगवानित्यवादीच्छठारिः ॥
"६१"
५.४ आपद्बन्धुत्वकीर्त्या यदुकुलजननाद्वीरवीरत्वकीर्त्या
लोकानां विक्रमाच्चाश्रितदुरितहृतेरद्भुतैश्चेष्टितैश्च ।
चक्राद्यस्त्रान्वितत्वात् कमलनयनतासंपदा वामनत्वात्
क्षीराब्धौ शेषशायी जगदवनमहादीक्षितोऽज्ञायि तेन ॥
"६२"
५.५- शङ्खाद्यैर्यज्ञसूत्रादिभिरपि च तथा शार्ङ्गमुख्यैस्तुलस्या
बिम्बोष्ठाद्यैस्सुनासाप्रततिनिरवधिज्योतिरुज्जसिरत्यौ ।
नेत्राब्जाद्यैरशेषाभरणसुषमया स्वैश्च भक्तैर्मनोज्ञो
देवः स्वानामजस्रं स्मृतिविषयतया भाति नेत्यभ्यधायि ।
"६३"
५.६- स्रष्टृत्वाद्यैर्जगत्याः सकलविजकलावर्तकत्वेन भूतग-
न्तर्यामित्वेन कृत्स्नुद्धरण(भ)परतया भूभरापाकृतेश्च ।
शैलेन्द्रोद्धारणाद्यैः स्वजनहिततया व्रहरुद्रेन्द्रभावात्
दुष्कर्मोन्मूलनाद्यैः प्रभुरनिशमहं बुद्धिबोध्योऽन्वभावि ॥
"६४"

== उपायविभागाधिकारो नवमः ==

उपायः स्वप्राप्तेरुपनिषदधीतः स भगवान्
प्रसत्त्यै तस्योक्ते प्रपदननिदिध्यासनगती।
तदारोहः पुंसः सुकृतपरिपाकेन महता
निदानं तत्रापि स्वयमखिलनिर्माणनिपुणः॥२३॥

कर्मज्ञानमुपासनं च शरणव्रज्येति चावस्थितान्
सन्मार्गानपवर्गसाधनविधौ सद्वारकाद्वारकान्।
एकद्व्याकृतियोगसंभृतपृथग्भावानुभावानिमान्
संभाव्य प्रेक्ष्य शरण्यसारथिगिरा मन्ते रमन्ते बुधाः॥२४॥

== प्रपत्तियोग्याधिकारो दशमः ==

अर्थित्वेन समर्थता त्रिकतनुः सम्पिण्डिताधिक्रिया
सा चाष्टाङ्गषडङ्गयोगनियतावस्था व्यवस्थापिता।
श्रौती सर्वशरण्यता भगवतः स्मृत्यापि सत्यापिता
सत्यादिष्विव नैगमेष्वधिकृतिः सर्वास्पदे सत्पथे॥२५॥

भक्त्यादौ शक्त्यभावः प्रमितिरहिततां शास्त्रतः पर्युदासः
कालक्षेपाक्षमत्वं त्विति नियतिवशादापतद्भिश्चतुर्भिः।
एकद्वित्र्यादियोगव्यतिभिदुरजनिताधिक्रियाः संश्रयन्ते
सन्तः श्रीशं स्वतन्त्रप्रपदनविधिना मुक्तये निर्विशङ्काः॥२६॥

== परिकरविभागाधिकार एकादशः ==

इत्थंभूतः सकृदयमवश्यं भवान्
दयादिव्याम्भोधौ जगदखिलमन्तर्गमयति।
भवत्वं सोऽयुक्ते भगवति भरन्यासवपुषः
प्रपत्तेरादिष्टः परिकरविशेषः श्रुतिमुखैः॥२७॥

प्रख्यातः पञ्चषाङ्गः सकृदिति भगवच्छासनैरेष योग
तत्र द्वाभ्यामपायस्थितिरनितरोपायतैकेन साध्या।

५-७- सर्पाधीशैकशय्यत्वादरिदरभरणात् सानुकम्पत्वयोगात्
सत्साहाय्यादशेषान्तरनिलयतया भूसमुद्धृत्युदन्तैः ।
सर्वेषां तातभावादितरजनदुराधर्षतादेः शरण्यं
दीनानां प्राह विष्णुं शठजनमथनो देवतासार्वभौमम् ॥ "६५"

५-८ निःसौहित्यामृतत्वात् स्ववशजनितयाऽनन्यभावप्रदानात्
मर्यादातीतकीर्त्या नलिननयनतो नायकत्वात् सुराणाम् ।
सर्वैश्वर्यादियोगादनितरगतितात्वात् हासन्नभावा-
दास्ये स्वे स्थापयेत् स्वान् हरिरिति शठजित् स्थापयामास कृष्णम् ॥ "६६"

५-९- स्वामित्वात् संश्रितानामुपकरणरसात् स्वेष्टसंश्लेषकत्वात्
सर्वस्वादत्वभूम्ना कपटवटुतया दारुणापत्सरक्षत्वात् ।
दिव्यस्थानोपसत्त्या श्रमदरिभरणाच्चापि नारायणत्वा-
दत्यासन्नः श्रितानां भवति हरिरिति प्राह कोरस्तनूजः ॥६७॥

५-१० प्रादुर्भावादिवृत्तैर्वृषगणदमनात् स्तनाशातनाद्यैः
मौहार्थं बोद्धुकृत्यैर्गिरिवरभजनस्वीकृतेः स्थानभेदैः ।
तेजोक्रान्त्यादिभावाज्जलनिधिशयनाद्वीक्षणाद्यैस्त्रिपद्याः
पीयूषस्पर्शनाद्यैः शिथिलयति हरिः स्वीयहृच्छोत्स्यौच्ये ॥ "६८"

५ इत्थं कारुण्यनिघ्नं दुरितहरजनं प्रेम तीव्रं दुहानं
लोकानां रक्षितारं स्मृतिविषयमहं भावनागोचरं च ।
दीनानां सच्छरण्यं स्वरसकृतनिजप्रेष्यतावाञ्छमूर्च्छे
प्राप्तं शक्तिप्रदं श्रीपतिमिह शतके श्रेयसामेकहेतुम् ॥ "६९"

एकेन स्वान्तर्दाढ्यं निजभरविषयेऽन्येन तत्साध्यते वा
तत्त्वज्ञानप्रयुक्ता त्विह सपरिकरे तादर्थ्यात्यादिबुद्धिः ॥ २८ ॥

—— साङ्गप्रपदनाधिकारो द्वादशः ——

अभीष्टे दुःसाधे स्वत इतरतो वा कञ्चन तद्-
भरन्यासं याच्ञा ऋण्वितमभिवदन्ति प्रपदनम् ।
इतः पश्चादस्मत्स्वतननिरपेक्षेण भवता
समर्थोऽसावर्थस्थिति मतिविशेषं तदविदुः ॥ २९ ॥

युग्यस्यन्दनसारथिक्रमवति प्रत्यन्तसंदर्शिते
तत्त्वानां त्रितये यथार्हविविधव्यापारसन्तानिनि ।
हेतुत्वं त्रिषु कर्तृभाव उभयोः स्वाधीनतैकत्र तत्-
स्वामिस्वीकृतमद्भुरो यमलसस्तत्र स्वयं निर्भरः ॥ ३० ॥

—— कृतकृत्याधिकारस्त्रयोदशः ——

समर्थे सर्वज्ञे सहजसुहृदि स्वीकृतभरे
यदर्थं कर्तव्यं न पुनरिह यत्किञ्चिदपि नः ।
निषण्णास्तस्मिन् निरुपधिमहानन्दजलधौ
कृतार्थाः कुर्मस्तं कृपणमपि कैङ्कर्यमिति नः ॥ ३१ ॥

भगवति हरौ पारं गन्तुं भरन्यसनं कृतं
परिमितसुखप्राप्त्यै कृत्यं महीणमकृत्यकृत् ।
भवति च वपुर्वृत्तिः पूर्वं कृतैर्नियतक्रमा
परमिह विभोराज्ञा सेतुर्बुधैरनुपाल्यते ॥ ३२ ॥

—— स्वनिष्ठाभिज्ञानाधिकारः ——

स्वरूपोपायार्थेष्ववितथनिविष्टस्थिरमतेः
स्वनिष्ठाभिज्ञानं सुभगमपवर्गादुपनतात् ।
प्रथिम्ना यस्यादौ प्रभवति विनीतः स्थगयितुं
गभीरान् दुष्पूरान् गगनमहतश्छिद्रनिवहान् ॥ ३३ ॥

स्वापे द्वाःस्थव्यतिकरनिभे भोगमोक्षान्तराले
कालं कञ्चिज्जगति विधिना केनचित् स्थाप्यमानाः ।
तत्त्वोपायप्रभृतिविषये स्वामिदत्तां स्वनिष्ठां

६.१. चक्रित्वात् स्वामिभावाद् द्विपदि सखितया बिम्बदृश्यात्परत्वा-
दाब्धिश्यामत्व कान्त्या धृततनुलसितया निर्जराधीशभावात् ।
रक्ताभास्याङ्घ्रिभावात्पृथुमुकुटतयाऽऽश्चर्यचर्याविशेषै-
र्लङ्काध्वंसाच्च कृष्णं शठजिदकथयद्देशिकद्वारगम्यम् ॥८०॥

६.२- पूर्णत्वाद्गोपनारीजनसुलभतया लोडनादम्बुराशे-
र्न्यग्रोधाग्रेशयत्वादरिसुभगतया श्रीमहीवल्लभत्वात् ।
निर्दोषोत्तुङ्गभावान्निरवधिकयशस्सद्वशीकारिदृक्त्वात्
मोक्षस्पर्शेच्छया च स्वयमभिसरतीत्याह कृष्णं शठारिः ॥८१॥

६.३- संपद्दारिद्र्यभावादसुरवसुरवकृतेः पत्तनग्रामभावात्
पुण्यापुण्यादिभावात् कपटऋजुतया सर्वलोकादिभावात् ।
दिव्यादिव्याङ्गवत्त्वात्सुरदितिजगणस्निग्धशत्रुत्वकीर्त्या
न्यायान्यायादिभावादघटितघटनं (कं) प्राह कृष्णं शठारिः ॥
॥८२॥

६.४- रासक्रीडादिकृत्यैर्विविधमुरलिकावादनैर्मल्लभङ्गैः
गोपीजन्यार्हभावाद्व्रजजननमुखैः कंसदैत्यादिभङ्गैः ॥
प्रादुर्भावैर्निहीनेष्वसुरभुजगनद्धेदमुख्यैश्चरित्रै-
राकर्षत् सर्वचित्तं हरिरिति कथयामास कारेरपत्यम् ॥
॥८३॥

६.५- शङ्खाद्याक्रान्तिताल्पत्रिदशसुरतया सिन्धुशायित्वभूम्ना
तद्वत्स्यौदारभावादरुणसरसिजाक्षत्वचिह्नेन देवः ।
देवीभिः सख्यभावादतिसुलभतया स्वेप्सितस्निग्धभावा-
द्वल्लभ्यः स्वान् मुरारिर्विलसयति हृदादित्यबोचच्छठारिः ॥
॥८४॥

शेषां कृत्वा शिरसि कृतिनः शेषमायुर्नयन्ति ॥ ३४ ॥

उत्तरकृत्याधिकारः पञ्चदशः

सन्तोषार्थं विमृशति मुहुः सद्भिरध्यात्मविद्यां
नित्यं ब्रूते निशमयति च स्वादु सूक्त्यान् तदर्हान् ।
अङ्गीकुर्वन्ननघ ललितां वृत्तिमादेहपाताद्
दृष्टादृष्टस्वभरविगमे दत्तदृष्टिः प्रपन्नः ॥ ३५ ॥
प्रणयिजनमिव प्राप्तं पश्चात् प्रियास्वसमन्वितं
महति मुहुरारूढे दृष्ट्वा मनौ मणिदर्पणे ।
प्रपदनधनाः सन्तः शुद्धैः प्रभुं परिभुञ्जते
प्रसृमरमहामोदस्यैः प्रसूनसमैः क्रमैः ॥ ३६ ॥

पुरुषार्थकाष्ठाधिकारः षोडशः

स्वतन्त्रस्वामित्वात् स्वबहुमतिपात्रेषु नियतं
प्रियः कालो देवः सरनु विनियुङ्क्ते न्यदन्यितैः ।
यथालोकाम्नायं यतिपतिमुखैराहितधियां
ततो नः कैङ्कर्यं तदभिमतपर्यन्तमभवत् ॥ ३७ ॥
नाथे नस्तृणमन्यदन्यदपि वा तन्नाभिनालीकिनी-
नालीकस्पृहणीयसौरभमुचा वाचा न याचामहे ।
शुद्धानां तु लभेमहि स्थिरधियां शुद्धान्तसिद्धान्तिनां
मुक्तैश्वर्यदिनप्रभातसमयासत्तिं प्रसत्तिं मुहुः ॥ ३८ ॥

शास्त्रीयनियमनाधिकारः सप्तदशः

मुकुन्दे निक्षिप्य स्वभरमनघो मुक्तवदसौ
स्वतन्त्राज्ञासिद्धां स्वयमविदितस्वामिहृदयः ।
परित्यागे सद्यः स्वपरविविधानर्थजननाद्
अलङ्घ्यामामोक्षादनुसरति शास्त्रीयसरणिम् ॥ ३९ ॥
श्रुतिस्मृत्याचारैः स्वमतिगतिभिः शुद्धमनसां
सुसंकल्पैर्धर्म्यैः कुलचरणदेशादिसमयैः ।
नियोगैर्योग्यानां नियमयितुरादेरभिमतं
निमित्तस्वप्नाद्यैरपि निपुणमविमृश्य ... ॥ ४० ॥

६.६- पारम्याद्यौ ऽत्र पञ्चायुधविहृतिमुखैश्चक्रिहृणः स्रग्भावात्
देवानां स्वामिभावादपि सुभगतया ऽलङ्कृतेः कुन्दभङ्गात् ।
प्रादुर्भावेऽत्र सर्वान्तरनिलयतया ऽहं ममहे ऽति धैर्य
-चातुर्यादीनि नृणामपहरति हरिश्चेत्यभाणीच्छठारिः ॥ "७५"
६.७- पारम्याद् द्व्यभावात् स्रगभिहृतिमुखैः श्रीशतैश्वर्यभूम्ना
स्नेहित्वादाभिरूप्याच्छ्रितपरवशता सर्वलोकेशताद्यैः ।
धृत्यादेर्यदि हेतुं मुरमथनमथ व्याहरत् संश्रितानां
वेदानामस्त्यभाषावपुष उदभरच्छ्रेयसे देहिनां यः ॥ "७६"
६.८- लोकस्रष्टृत्वशक्त्या ऽऽयुधसुभगतया जिष्णुसारथ्ययोगात्
स्रग्भ्राड्देवेशभावाद्गरुडरथतया स्वाश्रिते पक्षपातात् ।
कान्त्या साम्राज्ययोगादवतरणदशास्पष्टपारम्यतोऽत्र
स्वीयायत्तस्वभूतिद्वयमथ कथयामास देवं शठारिः ॥ ७७ ॥
६.९- सर्वात्मत्वाज्जगत्याः क्रमणत उत संरक्षणाद्विष्टपानां
शत्रुध्वंसात्परत्वाच्चाभिमतदशया पञ्चधा ऽवस्थितत्वात् ।
निर्वाहाद्दण्डकोटया बुधदयिततया सर्वशीर्ण्याद्भ्रिदानात्-
मोक्षे त्वोत्पादकत्वाद्धरिमथ शठजिद्व्यातनोद्विश्वयोगम् ॥ "७८"
६.१०- आपत्संरक्षणाद्युपकरणतया मेघसाम्यादिभूम्ना
स्वानां विश्वासदानात्सुरगणभजनाद्दिव्यदेशोपसक्त्या ।
प्राप्याप्राप्यत्वयोगात्स्वजनविजनयोः सम्प्रपत्त्यभावा-
द्दूर्वे त्वर्थं शरण्यं श्रुतिशिखरविदं ते ... शठारिः ॥ "७९"

— अपराधपरिहाराधिकारोऽष्टादशः —

स्वच्छस्वादुसदावदातसुभगां दैवादयं देहभृद्
मालिन्यप्रशमाय माधवदयामन्दाकिनीं विन्दति।
यद्यप्येवमसावसारविषयस्रोतःप्रसूतैः पुनः
पङ्कैरेव कलङ्कयन्निजतनुं प्राज्ञैर्न संश्लिष्यते॥४१॥

प्रारब्धेतरपूर्वपापमखिलं प्रामादिकं चोत्तरं
न्यासेन क्षपयन्ननुभ्युपगतप्रारब्धखण्डं जनः।
धीपूर्वोत्तरपाप्मनामजननात्यातेऽपि तन्निष्कृतेः
कौटिल्ये सति शिक्षयाप्यनघयन् क्रोडीकरोति प्रभुः॥
॥४२॥

— स्थानविशेषाधिकार एकोनविंशः —

यत्रैकाग्र्यं भवति भगवत्पादसेवार्थना दे-
यत्रैकान्त्यव्यवसितधियो यस्य कस्यापि लाभः।
वासस्थानं तदिह कृतिनां भाति वैकुण्ठकल्पं
प्रायो देशा मुनिभिरुदिताः प्रायिकौचित्यवन्तः॥
॥४३॥

सा काशीति न चाकशीति भुवि सायोध्येति नाध्यास्यते
साऽवन्तीति न कल्मषादवति सा काञ्चीति नोदञ्चति।
धत्ते सा मधुरेति नोत्तमधुरां नान्यापि मान्या पुरी
या वैकुण्ठकथासुधारसभुजां रोचेत नो चेतसे॥४४॥

— निर्याणाधिकारो विंशः —

मनसि करणग्रामं प्राणे मनः पुरुषे च तं
झटिति घटयन् भूतेष्वेनं परे च तमात्मनि।
स्वविदविदुषोरित्थं साधारणे सरणे सुखे-
नयति परतो नाडीभेदैर्यथोचितमीश्वरः॥४५॥

दहरकुहरे देवस्तिष्ठन्निषद्वर दीर्घिका-
निपतितनिजाध्यादित्सावतीर्णपितृक्रमात्।
धमनिमिह नस्तस्मिन् काले स एकशताधिका-
मकृतकपुरप्रस्थानार्थं प्रवेशयति प्रभुः॥४६॥

— गतिविशेषाधिकार एकविंशः —

ज्वलनदिवसज्योत्स्ना... पक्षोत्तरायणवत्सरान्

इत्थं सद्वारगम्यं स्वयमितमसहं स्थायिनां योजनार्हं
कर्षनं स्वैश्चरित्रैर्विघटितविजनं स्वान्वितस्तेयदक्षम्।
धृत्यादीनां निदानं घटकशमहाभूतियुग्मं शठारि-
वैघट्यस्याप्यनर्हं प्रपदनसुलभं प्राह घण्टे शरण्यम्॥
"२०"

८.१- निःसंख्याश्चर्ययोगादतिमधुरतयाऽथो जगत्कारणत्वात्
न्यग्रोधार्हत्वभूम्ना त्रिदशपतितया वाङ्मनःसन्निपानात्।
पीयूषस्पर्शनाद्यैरखिलपतितयां लोकसंरक्षणाद्यैः
शाठ्याशङ्कां सहेत त्रितनुरसुरहेत्याह निश्चान्तिकस्थः॥
"२१"

८.२- श्रीरङ्गे सन्निधानान्निखिलजगदनुस्मृताद्यैः शुचित्वाद्
विन्यस्तानिष्टभावादुरगशयनतः पुंसु कर्मानुरूपम्।
शर्मशर्मप्रदानाज्जलदतनुतयोपक्रियातत्परत्वात्
स्वामी स्वानां विगर्हामुपशमयति चेत्याह श्रीमान् शठारिः॥
"२२"

८.३- पद्माक्षत्वेन हृत्स्थः परमरवनिलयः स्वोपकारी विगर्ज-
च्छृङ्गोऽनिष्टप्रहर्ताऽऽदरविलसनकृद्रक्षकोऽम्भोधिदृश्यः।
आपत्संरक्षकश्रीमकरवरलसत्कुण्डलः स्वाङ्गकान्त्या
स्वेषु स्वं गोप्तृभावं प्रकरयति हरिश्चैवमाह शठारिः॥
"२३"

८.४- विक्रान्त्या विष्टपानाममृतमथनतश्चोद्धृतेर्भूतधात्र्याः
कल्पे लोकादनाच्च क्षितिभरहरणाद्दैत्यराजप्रहारात्।
लङ्कासंकोचकत्वादसुरभुजवनच्छेदनाल्लोकस्रष्टे-
र्व्यक्ता गोत्राभिवृद्धे स्तु[illegible] प्रकटयं श्रीशमाह॥
"२४"

पवनतपनप्रालेयांशून् क्रमादचिरद्युतिम् ।
जलचरपतिं देवाधीशं प्रजापतिमागत-
स्तरति विरजां दूरे वाञ्छस्ततः परमद्भुतम् ॥४७॥

पितृपथपटीयन्नारोहावरोहपरिभ्रमै-
र्निरयपदवीयातायातक्रमैश्च निरन्तरैः ।
अधिगतपरिश्रान्तो नाज्ञाधरैरतिवाहकैः
सुखयति निजच्छायादायी स्वयं हरिचन्दनः ॥४८॥

== परिपूर्णब्रह्मानुभवाधिकारो द्वाविंशः ==

विनमसि पदे लक्ष्मीकान्तं विचित्रविभूतिकं
सन्निवगमितः संपद्याविर्भवत्सहजाकृतिः ।
स्फुटतदपृथक्सिद्धिस्सिद्ध्यद्गुणाष्टकतत्फलो
भजति परमं साम्यं भोगे निवृत्तिकथोज्झितम् ॥४९॥

अविश्रान्तमदूरातकलहकल्लोलकलुषा
समाविर्भूयासुर्मनसि शुचिसिद्धादिसुलभाः ।
मधुक्षीरन्यायस्वगुणविभवास्सञ्जनकनन्-
महानन्दब्रह्मानुभवपरिवाहा बहुविधाः ॥५०॥

संदृष्टः सारतास्थितस्वपरनिशितधीः सङ्गजिन्नैकसंस्थः
स्पष्टोपायोऽतिखिन्नः सपरिकरभरन्यासनिष्पन्नकृत्यः ।
स्वावस्थार्हं सपर्याविधिमिह नियतं व्यागसं क्वापि बिभ्रत्
निर्मुक्तस्थूलसूक्ष्मप्रकृतिरनुभवत्यच्युतं नित्यमेकः ॥५१॥

ॐॐॐ इत्यर्थानुशासनभागः संपूर्णः । अथ स्थिरीकरणभागः प्रारभ्यते ॥

== सिद्धोपायशोधनाधिकारः ==

युगपदखिलं प्रत्यक्षेण स्वतः सततं विदन्
निरवधिदयादिव्योदन्वानराक्यनिवर्तितः ।
जलधिसुतया सार्धं देवो जगत्परिपालयन्
परमपुरुषः सिद्धोपायः प्रतीष्टभरः सताम् ॥५२॥

विश्राम्य द्विरुपर्युपर्यपि दिवानक्तं न हि दर्शनै-
रस्मद्देशिकसंप्रदायरहितैरध्यापि[illegible]ः ।

७.५- साकेते मुक्तिदानात् स्थिरचरजनुषां सर्वशो रक्षकत्वात्
चैद्ये सायुज्यदानाज्जगदुदयकृते रुद्धते भूमिदेव्याः ।
यात्रार्थं वामनत्वाच्छिवभजकमुनेर्मोक्षदानाच्च दन्तैः
स्नेहं सर्वत्रियं स्वं प्रकटयति हरिश्चेत्यथाज्ञायि तेन ॥ ८५ ॥

७.६. नाभीपद्मोज्ज्वलत्वाद् विधिशिवभजनीयाङ्घ्रिभावाद्ववं च
त्राणाद्यैः सर्वभूतान्तरनियमनतः संश्रिते भव्यभावात् ।
ब्रह्माद्यापद्विमोक्षादसुरनिरसनात् त्रातरक्षोऽनुजत्वात्
स्त्रीयाक्रन्दापहारी भवति च भगवानित्यवादीच्च शौरिः ॥ ८६ ॥

७.७. दृग्भ्यां पद्माकृतिभ्याममरतरुलतानासिकातोऽधरेण
भ्रूचापेन स्मितेनाप्यथ मकरलसत्कुण्डलाभ्यां विशिष्टः ।
फालेनाऽर्धेन्दुभासाऽमलमुखशशिना नेत्रशोभादिभाजा
श्रीमान् देवः किरीटी स्मृतिविशदतनुर्भाति चेत्यभ्यधायि ॥ ८७ ॥

७.८. भूतैश्चन्द्रार्यमाद्यैः सकलसुरगतैर्वसुभिश्चेतनाद्यैः
स्वैर्लोकानां नियत्या स्मरणतदितरोत्पादनान्माननाद्यैः ।
दुर्ज्ञेयत्वात्स्वभाजां बहुशुभकरणाद्वेदसंवेद्यभावात्
श्रीमान्नारायणोऽनाविभव इति ततः श्रीधरः प्रत्यपादि ॥ ८८ ॥

७.९. स्वामित्वात्सर्वभाग्दाणि च करुणया दत्तवाग्रक्षणत्वाद्
उत्तानापादकत्वादघटितघटनाशक्तिवैकुण्ठयोगात् ।
शुद्धस्वान्ते च चक्रायुधजलधिसुतावल्लभत्वात् पितृत्वात्
स्वे स्तोत्रे विष्णुरत्यप्रकसम्पत्तिविधेयं स्वान् मुनीन्योऽगायत ॥ ८९ ॥

स्वप्राप्तः स्वयमेव साधनतया जोघुष्यमाणः श्रुतौ
सत्तस्थेषु भजेत सन्निधिमसौ शान्तावधिः शेवधिः॥ ५२॥

साध्योपायशोधनाधिकारः

यथाधिकरणं प्रभुर्यजनदानहोमार्चना-
भरन्यसनभावनाप्रभृतिभिः समाराधितः।
फलं दिशति देहिनामिति हि संप्रदायस्थितिः
श्रुतिस्मृतिगुरूक्तिभिर्नयवतीभिराभाति नः॥५३॥
ततैद्वतुकहेतुके कृतधियस्तर्केन्द्रजालक्रमे
बिभ्राणाः कथकप्रधानगणने निष्णं कनिष्ठाक्षयाद्।
अध्यात्मश्रुतिसंप्रदायकनकैरद्वा विशुद्धाशया
सिद्धोपायवशीक्रियामिति हि नः साध्यां समध्यापिपन्॥ ५४॥

प्रभावव्यवस्थाधिकारः

स्वरूपं यद्वाक् गुणविभवलीलादि च विभो-
स्तदाम्नासेनुल श्रुतिभिरवसेयं तदखिलम्।
तथा तद्भक्तानां तदुपसदनादेश्च महिमा
यथाधीतं सद्भिर्यतिपतिमुखैरध्यवसितः॥५५॥
चातुर्वर्ण्यचतुर्निधाश्रममुखे भेदे यथावस्थिते
वृत्तं तन्नियतं गुणानुगुणया वृत्त्या विशिष्टं श्रिताः।
त्यागोपप्लवनित्यदूरशरणव्रज्याविधौ कोविदा
श्चिन्तामभ्युपगन्तुमन्तिमयुगेऽप्येकान्तिनः सन्ति नः॥ ५६॥

प्रभावरक्षाधिकारः षड्विंशः

शिलादेः स्त्रीत्वादिविपरिणतिरस्वाङ्घ्रिलभिदं
ततोऽधिक्षिप्तं यदुत दहनस्यैव हिमता।
तृणस्यैवास्त्रत्वं रिपुषु निहतेरेव हितता
पदन्नेणैनेह त्रिभुवनपरित्राणमिति च॥५७॥
रागद्वेषमदादिकैरिह महारक्षोभिरक्षोभिते
[illegible] निजभरन्यासाभिधानं तपः।
यत् कक्षीकृतमत्यशेत विविधान् धर्मानधर्मद्रुह-
स्तद्धर्मार्थिलेशवर्णनमपि प्रायं [illegible]॥५८॥

८. १० वैकुण्ठे नित्ययोगाच्छ्रुतविदशायाऽनन्तकीर्त्युज्ज्वलत्वात्
शेषेशायित्वरुक्मिण्यभिमतमुरजिद्बाणदोःखण्डनाद्यैः ।
ग्राहग्रस्तेभरक्षाभिरुचितविषये सन्निधानाद्युचितत्वात्
स्तोतॄणां दुःखजातं विधमयति हरिस्तीर्थपादोऽप्यपायि ॥ ९० ॥

शाठ्याशङ्कासहिष्णुं प्रशमितजनतागर्हणं स्पष्टरक्षं
व्याकुर्वन्तं स्वरक्षाक्रममखिलजनस्नेहितां दर्शयन्तम् ।
स्वीयाक्रन्दच्छिदौत्कं स्मरणसुविशदं विस्मयार्हद्विभूतिं
स्तोत्रे युञ्जन्तमाह स्तुतिकृदघहरं सप्तमेऽनिष्टचोरम् ॥ ९१ ॥

८. १. श्रयाद्यैः पत्न्यादिमत्त्वाद्रघुयदुकुलयोरुद्भवात्स्वाश्रितेच्छा-
धीनेहाविग्रहत्वात्सकलचिदचितामन्तरात्मत्वभूम्ना ।
स्वामित्वात् स्वाश्रितत्वेऽप्यखिलगुणतया ज्ञानिनामप्यदुःख-
स्थाने व्यापादनाद्यैर्हरिरकथि परं दर्शनीयोऽस्तु दृश्यः ॥ ९२ ॥

८. २. तार्क्ष्योरुवाहनत्वाच्छुभनयजतया नीलमेघाकृतित्वाद्
आश्चर्योच्छ्रेष्ठितत्वाद्दुरवधरतया योगिभिर्निर्जरैश्च ।
स्वेषु व्यामुग्धभावात् प्रतिहतिविरहाद्दुर्लभादृश्यभावाद्
निःस्सङ्गानां जनानां सुलभतम इति प्राह नाथः शठारिः ॥ ९३ ॥

८-३- श्रीभूमीनायकत्वादरिसुकरतया कल्पसिन्धौ शयत्वात्
श्रीस्थाने सन्निधानात्सुरहितकरणाच्छ्रीनिवासत्वयोगात् ।
विक्रान्त्या विष्टपानां विधिदुरधिगमात्स्वेषु सौलभ्यभूम्ना
चैकाकिस्वामित्वात्तो विरूपसमये श्रीधरः प्रत्यपादि ॥ ९४ ॥

— इति स्थिरीकरणभागः संपूर्णः। अथ परमात्मयोजनाभागः —

मूलमन्त्राधिकारः

तारं पूर्वं तदनु हृदयं तत्र नारायणाये -

त्याम्नायोक्तं पदमनयतां सार्थमाचार्यदत्तम्।
अङ्गीकुर्वन्नलसमनसामात्मरक्षाभरं नः
क्षिप्रं देवः क्षिपतु निखिलान् किङ्करैश्वर्यविघ्नान्॥ ५९॥

कल्याणमावहतु कार्तयुगं स्वधर्मं
प्रख्यापयन् प्रणिहितेषु नरादिकेषु।
आद्यं कमप्यधिगतो रथमष्टचक्रं
बन्धुः सतां बदरिकाश्रमतापसो नः॥ ६०॥

यदन्तःस्थमशेषेण वाङ्मयं वेदवैदिकम्।
तस्मै व्यापकमुख्याय मन्त्राय महते नमः॥ ६१॥

इह मूलमन्त्रसंवृतमर्थमशेषेण कश्चिदनुभवति।
स्फटिकनलनिहितनिधिमिव देशिकदत्तेन चक्षुषा जन्तुः॥ ६२॥

अविद्यापूतनोन्मुक्तैरनवज्ञातसत्पथैः।
अस्मदास्वादसव्रीडैराद्दिष्टमिति दर्शितम्॥ ६४॥

— द्वयाधिकारो ऽष्टाविंशः —

आकर्णितो वितनुते कृतकृत्यकक्ष्या -
माम्रेडितो दिशति यश्च कृतार्थभावम्।
तत्रूषतां भजति संसृतिकालरात्रेः
पद्मासहायशरणागतिमन्त्र एषः॥ ६५॥

वैराग्यविलितस्वान्तैः प्रपत्तिविजितेश्वरैः।
अनुक्रोशैकविलितैरित्युपादेशि देशिकैः॥ ६६॥

इदमष्टपदं व्यासे समासे षट्पदं विदुः।
वाक्यं पञ्चपदं केचित् व्याख्यातप्रधानकम्॥ ६७॥

एकं द्वयं प्रवयवं स्वरवलभ्यतुर्यं
व्यक्तार्थपञ्चकमुपात्तषडङ्गयोगम्।
सप्तार्णवीमहिमवद्विकृताष्टवर्णं
रङ्गे सतामिह रत्नं नवमं प्रसूते॥ ६८॥

न वेदान्ताच्छास्त्रं न मधुमथनात् तत्त्वमधिकं
न तद्भक्तात् तीर्थं न तदभिमतात् सात्त्विकपदम्।
न सत्तादारोग्यं न बुधभजनाद्धि धनं

८.४- दुर्दान्तेभेन्द्रभङ्गाच्छुभनिलयतया साम्यतश्चेतरेषां
स्वायत्तत्वेन भानाच्छ्रितहृदि सततं देवतद्भूषिसङ्घं ।
मित्रामित्रत्वयोगाज्जगदुदयकृते दैवतात्मत्वमुख्यैः
श्रीमान् वैकुण्ठनाथः श्रितविहितसमग्रस्वभूमाऽन्वभावि ॥९५॥

८.५- आश्चर्येहान्वितत्वाच्छुभमकुटतया स्वामितापौरुषत्वाज्-
जीमूतश्यामलत्वाच्छ्रितसुलभतया पद्मसूर्योपमाङ्गात् ।
सारथ्यात् पाण्डुसूनोरवनिभरहृतेरन्तरात्मत्वयोगाज्-
जीवापेक्षाप्रतीक्षो भवति तदवने श्रीपतिश्चेत्यभाणि ॥९६॥

८.६- भातत्वाच्छ्रीतुलस्या श्रितहृदि शयनाच्छ्रीदूवक्षस्कभावा-
दाश्चर्योपक्रियत्वात्सुरगणभजनाद्वैरिविध्वंसकत्वात् ।
गोविन्दत्वादशेषाभिमतविषयतोऽभीष्टसञ्चित्तकत्वात्
सर्वाकाराद्भुतत्वात् स्वपदवितरणे सज्ज इत्याह कृष्णः ॥९७॥

८.७- भव्यत्वाद्रक्षकत्वात् त्रिजगदधिककारुण्यतो गोपभावात्
नीलाश्माद्रिप्रभत्वात् स्वजनकृतनिजात्मप्रदानप्रभुत्वात् ।
मन्दस्मित्यास्थितत्वाद्धृदि सुकृतिषु चातर्कितानुग्रहत्वात्
स्वानां चित्तानपायात् स्वजनहृदि रतो माधवश्चेत्यवोचत् ॥
॥ ९८ ॥

८.८- प्रासाद्यन्येन भानाद्धृदि च विभुतयाऽलंमहिम्ना परत्वात्
माधुर्याद्देहदेहत्वादिषु च गततया स्वस्वरूपप्रकाशात् ।
अन्यस्मृत्याप्यभावात्स्वपरमपुरुषैक्यभ्रमध्वंसकत्वात्
~~[illegible] प्रकटयति हरिर्भैत्यथानायि तेन~~ ॥९९॥
पुंसि दास्यं स्वमूर्त्त ॥

न मुक्तेः सौख्यं न द्वयवचनतः क्षेमकरणम् ॥ ६९ ॥

== चरमश्लोकाधिकार एकोनविंशः ==

य उपनिषदामन्ते यस्मादनन्तदयाम्बुधे-
स्त्रुटितजनताशोकः श्लोकः स्वयं समजायत ।
तमिह समितं विधिना कृष्णं धर्मं प्रपद्य सनातनं
शमितदुरिताः शङ्कातङ्कलजः सुखमास्महे ॥ ७० ॥

दुर्विज्ञानैर्नियमगहनैर्दूरविश्रान्तिदेशै-
र्बल्लानैर्बहुभिरयनैः शोच्यतां नः सुपन्थाः ।
निष्प्रत्यूहं निजपदमसौ नेतुकामः स्वभूमा
सत्पाथेयं किमपि निदधे सारथिः सर्वनेता ॥ ७१ ॥

एकं सर्वपदं धर्मं श्रियाश्लिष्टं समाश्रितैः ।
अपेतशोकैराचार्यैरयं पन्थाः प्रदर्शितः ॥ ७२ ॥

व्यासाम्नायपयोधिकौस्तुभनिभं सूक्तं हरेरुत्तमं
श्लोकं केचन लोकवेदपदवीविश्वासितार्थं विदुः ।
येषामुक्तिषु मुक्तिसौधशिखरसोपानपङ्क्तिष्वमी
वैशम्पायनशौनकप्रभृतयः श्लोकाः शिरःकम्पिनः ॥ ७३ ॥

इति पदवाक्ययोजनाभागः संपूर्णः । अथ संप्रदायप्रक्रियाभागः ==

== आचार्यकृत्याधिकारस्त्रिंशः ==

अधिजिगमिषुराद्यं धाम दिव्यं त्रिधाम्नः
मुनिविविधपरीक्षाशोधिते क्वापि पात्रे ।
अनघगुणदशायामाहितस्नेहमार्यः
प्रदिशति निरपायं संप्रदायप्रदीपम् ॥ ७४ ॥

प्रथमेयस्तु विलक्षणः प्रकृतितस्त्राता पतिस्तत्परः
तस्मिन्नात्मसमर्पणं हिततमं तच्छेषवृत्तिः फलम् ।
इत्थं तत्त्वहिते पुमर्थ इति न स्त्रेधा विभक्तं धनं
दायत्वेन दयाधनाः स्वयमदुर्दत्तात्मनां देशिकाः ॥ ७५ ॥

निरवधिदयादिव्योदन्वत्तरङ्गनिरङ्कुशै-
र्नियमयति यः शिष्यान् शिक्षाक्रमैर्गुणसंक्रमैः ।
अचरमगुरोराज्ञापारंपरीपरवानसौ
न परमिह तांस्तत्क्षेपेण स्वामप्यभिरक्षति ॥ ७६ ॥

८.९. वैलक्षण्यात् स्वमूर्तेर्मकुटमुखमहाभूषणैर्भूषितत्वात्
स्वाह्निकायुष्मत्वात्प्रलयसखितयोज्जीवने कर्षकत्वात् ।
भव्यत्वाद्यैश्च संपन्निरवधिकवयाऽऽश्चर्यचेष्टत्वयोगात्
निष्ठां दास्ये स्वकीये प्रकटयति हरिश्चेत्यभाषि तेन ॥१००॥

८.१०. व्यामुग्धत्वात् स्वकीयेष्वमलघनरुचा वामनत्वेन चापद्-
बन्धुत्वाच्चर्यभावादहितनिरसना ल्लोकस्रष्ट्र्यादिशक्तेः ।
अब्धौ शायित्वयोगाच्छ्रितदुरितहृतेर्भातसीपुष्पकान्त्या
त्वाकृष्टैः स्वीयदास्यावधिं विशदयतीत्याह नाथः स्वदास्यम् ॥१०१॥

इत्थं सूरिर्दिदृक्षोर्दृशि विषयमयैर्निःस्पृहैरेव लभ्यं
स्वानां विश्लेषभोग्यं श्रितविहितसमग्रप्रभूतिं शठारिः ।
स्वापेक्षासव्यपेक्षं स्व वितरणपरं हृद्गतं स्पष्टयन्तं
दास्यं स्वं तस्य निष्ठां तदवधिमपि चाष्टमे स्वेष्वशंसत् ॥
॥१०२॥

९.१- आपद्बन्धुत्वकीर्त्या दृढमतिजननाद्दैत्यनाशाय भूमौ
जातत्वादुत्तरस्यां पुरि मधुरपदालङ्कृतायां दयाब्धेः ।
बन्धोः कृष्णस्य पादाश्रयणमिह विना नो सहायः पुमर्थो
रक्षासामर्थ्यहाने भवति इति हितं कारिसूनुर्बभाषे ॥१०३॥

९.२- लक्ष्मीसम्बन्धभूम्ना मितधरणितया पद्मनेत्रत्वयोगात्
स्थित्याद्यैः स्वैश्चरित्रैः स्वहृदपहरणाच्छ्रीगजेन्द्रावनाच्च ।
तार्क्ष्यांसौ चाधिरूढ्यारिगणनिरसनाद्देवदुष्प्रापताद्यैः
दुष्कर्मोन्मूलनाद्यैः सुचिरकृतदयो माधवश्चेत्यवोचत् ॥
॥१०४॥

— शिष्यकृत्याधिकार एकत्रिंशः —

अशिथिलगुरुभक्तिस्तत्प्रशंसादिशील:
प्रचुरमनुमतिस्तद्वस्तुनास्वादकेऽपि ।
गुणवति विनियोक्तुं गोपयन् संप्रदायं
कृतविदनपवृत्ति: किं न विन्देन्निधानम् ॥ ७७ ॥

साक्षान्मुक्त्युपायान् यो विद्याभेदानुपादिशत् ।
कथ्यते मोक्षशास्त्रेषु स तु श्रेष्ठतमो गुरु: ॥ ७८ ॥

आचार्यवत्तया मोक्षमामनन्ति स्मरन्ति च ।
इहामुत्र च तत्पादौ शरणं देशिका विदु: ॥ ७९ ॥

अध्यासीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासना-
दाचार्यादिह देवतां समधिकामन्यां न मन्यामहे ।
यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकां
मग्नानां भविनां भवार्णवसमुत्तारा्य नारायण: ॥ ८० ॥

— निगमनाधिकारो द्वात्रिंश: —

करबदरितविश्व: कश्चिदाचार्यदृष्ट्या
मुषितनिखिलमोहो मूलमन्त्रादिभोग: ।
सगुणविषयसिद्धौ संप्रदायं प्रपश्यन्
सुचरितसिलहारी सूरिवृन्दाभिनन्द्य: ॥ ८१ ॥

इति यतिराजमहानसपरिमलपरिवाहवासितां पिबत ।
विबुधपरिषन्निषेव्यां वेदान्तोदयनसंप्रदायसुधाम् ॥ ८२ ॥

कलकण्ठगणास्वाद्ये कामस्यास्मिन् निजाङ्कुरे ।
निम्बवृत्तिभिरुज्जीर्णैर्न चूत: परितप्यते ॥ ८३ ॥

निर्विष्टं यतिसार्वभौमवचसामावृत्तिभिर्यौवनं
निर्धूतेतरपारतन्त्र्यनिरया नीता: सुखं वासरा: ।
अङ्गीकृत्य सवां प्रसक्तिमसतां गर्वोऽपि निर्वापित:
शेषायुष्यपि शेषिदम्पतिदयादीक्षामुदीक्षामहे ॥ ८४ ॥

आस्तिक्यवान् निशितबुद्धिरनभ्यसूयु:
सत्संप्रदायपरिशुद्धमना: सदर्थी ।
संकेतभीतिरहित: सरणेष्वसक्त:
संवर्तनीमनुविभावयतु शाश्वतीं न: ॥ ८५ ॥

रहस्यत्रयसारेऽस्मिन् यं वेङ्कटेशविपश्चिता ।
शरण्यदम्पती विन्दां सम्मत: समगृह्णत ॥ ८६ ॥

इति संप्रदायप्रक्रियाभाग: पूर्ण: । इत्यधिकारसंग्रहश्लोका: पूर्णा: ॥

९-३- नैकश्रीनामवत्त्वाज्जगदुदयसुसंस्थापनाद्यैर्हरित्वाद्-
दानान्मोक्षस्य हेयप्रतिभटपरकर्मेणिसंपत्तिमत्त्वात् ।
प्रह्लादाह्लादकत्वाद्वृषगिरिकटके सन्निधानादिकृत्यैः
शार्वादेः स्वाङ्गदानादकथि यदुपतिः शीलरत्नाकरोऽसौ ॥ "१०५"

९-४- लक्ष्मीवक्षस्त्वभावात्स्वजनसुलभतापर्वतोद्धारणाद्यै-
र्दुर्ज्ञेयत्वात् सुरादेरखिलपतितया नाकिनां वृद्धभागात् ।
स्वेषां हृद्वासितायाः स्वजनवशतया तत्र चासक्तिभूम्ना
स्वस्वामित्वादिबन्धाज्जगदवति हरिर्जेत्यभाणीच्छठारिः ॥ "१०६"

९-५- प्राणत्वादद्भुतत्वादपि च स्वविदितत्वेन भव्यत्वयोगात्-
लक्ष्मीवक्षस्त्वभावाद्रघुकुलजननान्नीलरत्नाभमूर्त्या ।
कृष्णत्वादब्जदृक्त्वात्परमपतितया चेश्वरं संश्रितानां-
मन्ये श्रीमान् शठारिः स्वगुणगरिमसंस्मारकं सर्वदर्शी ॥१०७॥

९-६- आश्चर्येहान्वितत्वादखिलपतितया चान्तरात्मत्वभूम्ना
शक्ये शक्तत्वभूम्ना जलदतनुतया भव्यताकर्षकत्वात् ।
औदार्यादेर्विशिष्टादपि च भवभृतां रक्षणे तीव्रसङ्गाद्
विस्मर्तुं नैव शक्यो हरिरिति शठजित्कंसजेतारमाह ॥१०८॥

९-७- रम्यत्वाच्छ्रीतुलस्या श्रितजनसहितत्वेन पद्माक्षतायाः
स्वामित्वात् सत्परञ्ज्योतिरिति कथनतः श्रीपरत्वातिकीर्त्या ।
पुष्पश्यामत्वभूम्ना रथचरणमुखस्वायुधत्वात्कुदन्तैः
शौरेर्धीमान् शठारिर्घटकमुखसुविस्रम्भणीयत्वमाह ।

॥१०९॥

श्रीमल्लोकाचार्यप्रणीतस्य श्रीवचनभूषणस्य श्रीकाञ्चीप्रति
वादिभयङ्कराण्णङ्गराचार्यकृतः संस्कृतानुवादः

श्रीमल्लोकगुरुप्रोक्तं श्रीमद्वचनभूषणम् ।

१-४- अण्णङ्गरार्य दासेन श्लोकरूपं विवर्त्यते ॥ उपोद्घातः

1) वेदार्थनिर्धारणमामनन्ति स्मृत्येतिहासेन पुराणतश्च ।
2) स्यात् पूर्वभागार्थधृतिः स्मृतिभ्यः शिष्टद्वितीयः शिरसोऽर्थक्लृप्तिः ॥
3) इतिहासस्तु बलवानितिहासपुराणयोः ।
4) अत एव समासेऽभूत् तस्य पूर्वं प्रयुक्तता ॥

५-१३- श्रीमद्रामायणप्रधानप्रतिपाद्यार्थसंग्रहः

5) अथेतिहासरत्नेन श्रीमद्रामायणेन तु ।
कारागृहनिवासिन्या वैभवं प्रतिपाद्यते ।
दूतस्य विभवः प्रोक्तो महता भारतेन तु ॥

टि- देवस्त्रीणां कारागृहवासनाशाय स्वयं कारावासं गतायाः कृपापरवशायाः श्रीसीताया वैभवं श्रीमद्रामायणेन, पाण्डवार्थं गत्वा दौत्यपत्रिकामादाय दौत्यं कुर्वत आश्रितपरवशस्य श्रीकृष्णस्य वैभवं महाभारतेन प्रतिपाद्यते ॥

6) प्रोक्तप्रबन्धयुग्मेन चरकोपायभूतयोः ।
वैभवं प्रोच्यते स्मेति वेदितव्यं विवेकिभिः ॥
7) कृपा च पारतन्त्र्यं चानन्यार्हत्वमितीरितम् ।
त्रयं पुरुषकारस्य सिद्ध्यै सम्यपेक्षितम् ॥

टि- दुःखिनां रक्षासंपादनार्थं तद्विषये कृपा, स्वतन्त्रं भगवन्तमनुवर्त्यानुकूलयितुं पारतन्त्र्यं, अनन्यार्हत्वादस्य द्वितमेव वदतीति बुद्ध्वा तस्य प्रवृत्तिसिद्धयेऽनन्यार्हत्वं च ॥

8) सीताया आद्यविश्लेषः स्वकृपाख्यापनार्थकः ।
अथ मध्यमविश्लेषः पारतन्त्र्यप्रकाशकः ।
समनन्तरविश्लेषोऽनन्यार्हत्वप्रकाशकः ॥

टि- सामर्थ्ये सत्यपि रावणहरणमनुमत्य तद्व्याजेन लङ्कायां देवस्त्रीबन्दीमोचनार्थं बन्दीभावस्वीकारात् त्रिजटाशरणागतिप्रसङ्गे अभयदानात्, अन्ते हनूमतस्ताः संरक्षणाच्च प्रथमवियोगः कृपाप्रकाशनार्थः। मध्यमवियोगे

[illegible]

९-८- वल्लीमध्यत्वयोगादपि च सुविदितश्रीक्षयो वाच्यभावाद्
भूम्याद्यैश्वर्ययोगादवतरणदशासाहचर्यात्स्वभर्तुः ।
सन्धातृत्वात्सुबोधप्रद दुरितहरत्वात्समासन्नभावात्
लक्ष्म्याः श्रीरङ्गशौरिः प्रथयति च सुमज्ञानिभावेन नाथम् ॥
"११०"

९-९- पद्माक्षत्वप्रसिद्ध्या जगदवनतया भव्यताद्यैश्च सार-
ग्राहित्वाद्वेणुनादैर्हर्षितजनतया स्वाङ्गदानादजादेः ।
श्यामत्वाद्भव्यचोरत्वत उत सरसस्मेरचेष्टत्वभूम्ना
नः कूटस्थोऽत्र सिद्धं सुखसमयतयास्थापयामास कृष्णम् ॥
"१११"

९-१० सर्वश्रैष्ठ्यात् स्वकीयैरपि जगदवनाद्दण्डपिण्डाधिपत्यात्
नीलाया वल्लभत्वादमृतवितरणाद्भक्तसुस्निग्धभावात् ।
दासानां सत्यभावादतिसुजनतयाऽथो जगत्कारणत्वात्
श्रीमान् वेलाप्रतीक्षो भवभयहरणे चेत्यभाणीच्छशौरिः ॥
"११२"

इत्थं सर्वैकबन्धुं चिरकृतकरुणं शीलसिन्धुं पतित्वात्-
संबन्धाद्रक्षितारं स्वगुणगरिमसंस्मारकं प्राह कृष्णम् ।
विस्रब्धं चाप्यशक्यं परकसुखसुविस्रम्भणीयं सुमत्या
लक्ष्म्या श्लिष्टं स्वसिद्धं सुखसमयमनेहः प्रतीक्षं सुमित्रम् ॥
"११३"

१०-१- दैत्यानां नाशकत्वाद्विधृततुलसिकामौलिभावोज्ज्वलत्वात्-
सर्वाधीशेशयत्वान्निरवधिकपरज्योतिरुल्लास्यभावात् ।
लोकानां स्रष्टृभावाद्दृशरथसुततामानिहारित्वमुख्यै-
राकारैः सज्जतिः स्याज्जलदतनुरुचिश्चेति तेनाभ्यधायि ॥
"११४"

या हे सौमित्रे! इदं मे दुःसहं दुःखम्, अत्रैव गङ्गायां निपतेय-
म्. तथा सति महाकुलप्रसूतस्य श्रीरामस्यापवादः, गर्भिण्या मे इदा-
नीमेव मरणे सन्ताननाशो रघुवंशोच्छेदाच्च, प्रसवानन्तरं
मरणे दुष्टहान्मृतेत्यपवादः दोषद्वयीभावाच्च, सन्तानस्य र-
घुकुलान्वयाभावाच्च, पत्युः स्त्रीहत्यादोषादपकीर्तिप्रसक्त्या-
दित्याद्यूह्य प्राणत्यागसमयेऽपि तमकृत्वाऽन्तःदुःखेन वन-
वासेन स प्रभुः, तच्छन्दानुवर्तनं कार्यमिति स्त्रिया पारतन्त्र्यं प्र-
काशनार्थो मध्यमविश्लेषः। अनन्यार्हयोगेऽपि सीतया यथाहं
राघवादन्यं मनसापि न चिन्तये। तथा मे माधवी देवी विवरं दातु-
मर्हतीति सशपथं देवेषु पुष्पं वर्षत्सु भूप्रवेशादनन्यार्हत्वं प्रकाशितम्॥
अत्रैते तदर्थत्वेऽनपायिन्या अकर्मवश्याया वियोगायोगः॥

९) संश्लेषेऽपि च विश्लेषे घटकत्वं प्रकाशते।

टि- संश्लेषे काकविषये विश्लेषे राक्षसीविषये प्रकाशते।

१०) संश्लेषकाले सर्वेशं विनेतुं यतते रमा।
विश्लेषसमये जीवं शिक्षितं कर्तुमिच्छति॥

टि- संश्लेषदशाविषये दण्डोद्युक्तं शान्तनिग्रहं कृत्वा तं जीवा-
ङ्गीकारोन्मुखं करोति संश्लेषदशायाम्। विश्लेषदशायां सर्वे-
श्वरे जीवान्वेषणशीले कर्मवशात् पराङ्मुखस्याश्रयणाभिमुख्यं
कारयति॥

११) उपदेशात एवैतच्छिक्षणं स्यात्तयोर्द्वयोः।

टि- जीवापराधान् गणयित्वा दण्डयन् द्वारं पिदध्याच्चेत् अस्य-
कान्या गतिः, युवयोः सम्बन्धः किं स्वल्पः, एतल्लाभः स्वामिन-
स्तव किं न लाभः, अस्मिन्नाले कः पतेदिति जीवान्वेषकस्य ते मया
किं वाच्यम्, पराङ्मुखेषु शिक्षाशास्त्राणि अभिमुखेषु दयादि-
कं योजयेच्चेत् सुन्दरम्, अतः इमं रक्षेतीश्वरम्, तव नैकचित्-
पदन्यासस्थलम्। चेतनः सह दपराधान् गणयित्वा दण्डयेत्
यदि त्राणमिच्छसि, तच्चरणयोः शिरोनमनादन्या गतिः, एवं कृ-
तेऽपराधान् सोढुं भोग्यत्वेन गृहीतुं चैकल्याणगुणपूर्णः स सर्वे-
इति जीवं चोपदिशति॥

१२) द्वयोश्च कर्मवैवश्यमुपदेशेन भण्यते।

टि- ईश्वरवैमुख्यापादकं जीवस्य कर्मपारतन्त्र्यं, यथाकर्मफ-
लप्रदानाद्यनिवारणरूपं जीवरक्षायां वैमुख्यापादकं चेश्वरस्य क-
र्मपारतन्त्र्यं च नाशयति॥

१०-२- अघ्ने श्रीकेशवत्वादमलचरितखगंगाग्र्यहेतुत्वयोगाद्-
आसन्नत्वात्पतित्वादमरपरिषदामादिभूतत्वभूम्ना ।
व्यापारैः सृष्टिमुख्यैरपि च भुजगशायित्वमुख्यैश्चरित्रै-
रक्षक्लेशापहर्ता भवति च भगवानित्यनन्यः शठारिः ॥
॥११५॥

१०-३- अम्भोजाक्षत्वकीर्त्या यदुकुलजतया चात्मनः श्यामलत्वाद्
गोविन्दत्वात्प्रियोऽस्मद्वचनपरतया चक्रराजायुधत्वात् ।
श्रीनीलाभ्रप्रभत्वादति सुभगतया गोपनिर्वाहकत्वाद्
अस्थानस्नेहशङ्कास्पदरस उदितः श्रीपतिः कारिजेन ॥
॥११६॥

१०-४- श्रीमद्दामोदरत्वादमरपरिषदामप्यगम्यत्वभूम्ना
चक्राधीशायुधत्वाद् वटदलशयनान्नागराजेशयत्वात् ।
वक्षःस्पर्शोन्मुखत्वात्परमपुरुषतामाधवत्वादियोगाद्
दुष्प्रापोऽयं भवद्भिः सुगम इति दृढं माधवं सोऽभ्यधत्त ॥
॥११७॥

१०-५- नाम्नां संकीर्तनेन स्वपरिवृढतया भावनातोऽनुवेलं
संस्कृत्या पुष्पदानाध्ययननियमैः स्तोत्रनृत्तादिकॢप्तैः ।
धर्मैर्वर्णाश्रमोक्तैर्बहुविधभजनप्रक्रियो दीर्घबन्धुः
श्रीमान्नारायणश्चेत्यकथयदखिलद्रामिडब्रह्मदर्शी ॥११८॥

१०-६- चक्रित्वात्केशवत्वादिभिरपि च तथा श्रीशनारायणत्वात्
स्नेहित्वात् पाण्डवानामभिमततुलसीपूजनीयत्वभावात् ।
अम्भोजाक्षत्वगोविन्दत उत सुयशः श्रीपतित्वादिभावैः
श्रीमान् तीव्रोद्यमोऽयं स्वपदवितरणे चेति तेनाभ्यधायि ॥
॥११९॥

१३) उपदेशस्य वैफल्ये जीवं निजकृपानलात् ।
ईशं सौन्दर्यतश्चापि विनेतुं प्रयतेत सा ॥

टि- जीवस्य भगवद्वैमुख्यहेतुर्दुर्वासनेति तन्नाशाय कृपां करोति।

—— श्रीमन्महाभारतप्रधानप्रतिपाद्यसंग्रहः ——

१४) अज्ञातानखिलानर्थान् ज्ञापयित्वा यतो हरिः ।
आचार्यघटकोपायकृत्यान्यात्मन्यदीदरत् ।
ततश्चोपायमाहात्म्यं महाभारतकीर्तितम् ॥

टि- गीतोपदेशेनाचार्यकृत्यस्य, पुरुषकारपुरस्कारनैरपेक्ष्येण स्वयमेवार्जुनापराधनिबन्धनकालुष्यस्य क्षामणेन पुरुषकारकृत्यस्य त्वमेवोपायभूतो मे भवेति एतत्प्रार्थनोत्तरं उपायकृत्येऽप्यधिकृतेन एतत्प्रार्थनानैरपेक्ष्येण "अहमेवास्योपायो भूत्वाऽनिष्टं निवर्त्येष्टं प्रापयामी"त्यभिसंधाय "मामेकं शरणं व्रज अहं मोक्षयिष्यामी"त्युद्बोधनात् उपायकृत्यस्य च स्वस्मिन्नारोपणान्महाभारते उपायवैभवं उच्यते। आचार्ये उपदिष्टवति पुरुषकारे च स्वकृत्यं कृतवति तत आत्मयत्नोत्तरं रक्षणाधिकृतेनास्य सर्वस्य करणं वैभवमेव ॥

१५) अनयोर्दिव्यदम्पत्योः को नाम महिमेति चेत् ।
दोषाश्च गुणहानिश्च वर्तेते चेतनेऽपि चेत् ।
अनेन हेतुना तेषामनुपेक्षणतोऽपि च ।
तयोरेव च तत्स्वीकृत्युपायनतया ग्रहः ।
इति यत्तद्दिव्यं तावद्वैभवं श्रीतदीशयोः ॥

टि) अकृत्यकरणं दोषः, कृत्याकरणं गुणहानिः, चेतनेष्वेतद्दर्शनक्षमेयं नरके पातयेयमिति कृपयोपेक्षणमकृत्वा दयाक्षान्त्यादिभिस्तेषामङ्गीकरणमेव नैतयोर्वैभवं, किंतु दोषगुणहानी अपहारहेतुत्वेन स्वीकृत्य वात्सल्यगुणं प्रकाश्य चेतनाङ्गीकारो वैभवम् ॥

(१६) अथ चेद्दिव्यदम्पत्योस्तद्द्वयक्षयकारणम् ।
तयोर्द्वयोर्भवेदेव तद्द्वयापत्तिदूषणम् ॥

टि) पुरुषकारोपायाभ्यां जीवगतदोषगुणहान्योर्निवृत्त्युत्तरमेव जीवरक्षणे चिकीर्षिते तयोर्द्वयोर्दोषगुणहानी स्याताम्। तथाहि- जीवगतदोषगुणयोः स्वकीयत्वापादके मातापितृत्वे सम्बन्धे सत्यपि जीवानङ्गीकारात् तादृशसंबन्धे वैकल्यरूपो दोषः, एतद्दुःखदर्शकृपाया अकरणात् दोष... [illegible] ...दयावात्सल्यगुणहानिश्च स्यात्

15.22. पुरुषकारोपाययोर्वैभवस्वरूपनिरूपणम्

१०-८. अत्याश्चर्यस्वभावाद्दृदयगततया स्वस्तुतौ प्रेरकत्वात्
स्वामित्वात् सर्वभूतान्तरनुगततया स्वस्तुतौ कर्तृभावात् ।
आपद्बन्धुत्वयोगाद्बहुविधसन्निधिस्थानवत्त्वेन देवः
श्रीमानत्यादरः स्यात् स्वजनपरिकरेष्वित्यथो संजगाद ॥
"१२०"

१०-८. लक्ष्मीकान्तत्वयोगाद्विपदि सखितया दिव्यदेशस्थितत्वात्
मोक्षोद्योगात् तदर्थं कृतशपथतया सर्वतस्सान्निध्यभावात् ।
दृष्ट्यन्तः सन्निधानात् सादातिवितरणतः स्वस्वभावप्रकाशात्
स्वामित्वात् तुष्यतीत्थं स्वयमनुपधिकश्रीपतिर्भक्तयोगी ॥
"१२१"

१०-९. स्वामिना श्रीशनारायण इति यशसा विक्रमाद्विष्णुनाम्नां
श्रीमत्वाचक्रपाणित्वजलनिधिशयना आपि गोविन्दभावात् ।
वैकुण्ठस्वामिभावादपि च निजजनानार्चिराद्याख्यगत्या
स्वं लोकं प्रापयेच्छ्रीपतिरिति कथयां श्रीशठारिर्बभूव ॥
"१२२"

१०-१०. क्लेशानन्तःप्रवेशाज्जलनिधिसुतया सान्निध्यदुःखभावात्
दिव्यश्रीविग्रहत्वादखिलतनुतया तत्प्रदीपभावात् ।
पद्मावन्धुत्वभूम्युद्धरणकरणतः पुण्यपापेशितत्वात्
मुक्तेर्दाता नु भाव्यो हरिरिति शठजिद्दर्शयन्मुक्तिमाप ॥
"१२३"

एवं स्वानां गतिं यद्यजदुरितहरास्थानशार्ङ्गहिरागं
सुप्राप्यं भक्तिभाजां बहुविधभजनप्रक्रियं श्रीशठारिः ।
तीव्रोद्योगं स्वदाने स्वजनतनुकृतात्यादरं प्राह चान्ते
स्वेच्छातुष्टं सुखवार्धिमुखसरणिमुरं मोक्षदं मुक्तभोग्यम् ।
"१२४"

यद्वा - तयोः कृत्याकरणरूपो दोषः, अकृत्यकरणरूपा गुणहानिश्च स्यात्। तथाहि- ईश्वरस्य नापि यथा दोषो न दृश्येत तथा यया व्यापरणीयं तस्या जीवदोषदर्शनं अनङ्गीकरणं चाकृत्यकरणम्, ईश्वरेण संयोजनरूपस्य स्वकृत्यस्य चाकरणं अरुषकारस्य। उपायस्याकृत्यकरणं नाम जीवदोषे दृष्टेऽपि तत्र क्षणौपयिकदृत्त्य जसम्बन्धवतः सर्वभूतसुहृदः दोषेऽनिवृत्ते नाङ्गीकुर्यामिति स्थितिरेव। कृत्याकरणं नाम एतन्न्यूनतादृष्ट्वा स्वकृत्यस्य रक्षणस्याकरणम्। इमौ दोषौ तयोः स्वभावमवलम्ब्योक्तौ न तु शास्त्रम्।

(१७) मनुते यदि भक्तोऽयं तद्द्वयस्य मात्मनि।
अथ तस्मिन् प्रसज्येत तद्द्वयस्थितिनिश्चयः॥ द्व॥

(टि) स्वस्मिन् पूर्वोक्तदोषयोर प्रसङ्गार्थं ताभ्यामङ्गीकारे कुर्न्ते यदि चेतनो मन्येत अज्ञयावदनङ्गीकृतवद्द्यामप्यङ्गीकरणं मदीयदोषदोषहानिगुणपूर्तिनिबन्धनमिति। तर्हि चेतने एवमनुसंधानरूपाकृत्यकरणाख्यो दोषः स्वनैन्यानुसंधानतदीयगुणगौरवानुसन्धानरूपकृत्याकरणरूपा गुणहानिश्च प्रसज्येत॥

१८) राक्षसीदोषवृन्दानि प्रसिद्धान्येव सर्वतः॥

(टि) दोषमुपहारीकृत्य पुरुषकारेण रक्षणस्य निदर्शनं दश मासान् हिंसांकुर्वाणानां राक्षसीनां दोषमेव गुणीकृत्य सीतया हनूमतः सकाशात् रक्षणम्॥

१९) जितेन्द्रियाग्रगण्ये चाप्यास्तिकाग्रेसरे तथा।
अर्जुनः केशवस्यात्मस्त्वत्त्या श्रीकृष्णधारके॥
पार्थे को दोष इति चेत् सन्ति दोषा निशाम्यताम्।
बान्धवस्नेहकारुण्यवधभीतय इत्यमी॥

टि) ऊर्वशीनिरसनेन जितेन्द्रियाग्रेसरत्वेन सिद्धस्यार्जुनस्य क्षात्रविरुद्धस्थानस्नेहकारुण्यधर्माधर्मभयानि दोषान् गुणीकृत्य रक्षणं उपायविषये निदर्शनम्॥

२०) द्रौपद्यास्तु परीभावं पश्यन्नपि दृशा स्वया।
असहिष्टत्वयं दोषः मुख्यः श्रीकृष्णचेतसा॥

(टि) द्यूते पराजयात् पूर्वमरक्षणेऽपि "गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागताम्" इति वैष्णवत्तारि द्वयुक्तरंशक्तेन रक्षणस्यावश्यकर्तव्यत्वात् तदकरणं प्रधानदोषः

२१) पाण्डवानां निरासेऽपि कर्तव्ये सति- अतत्क्रिया।
द्रौपदीभद्रसूत्रस्य रक्षणे परमिच्छया॥

२टि) परिभवित दुर्योधनादेरिव तद्वत्पृपाण्डवानां निरासे प्राप्तेऽपि तेषां जीवनदानं द्रौपदीमंगलसूत्ररक्षार्थं न तु दोषाल्पत्वात्। विश्लथकेशदर्शनासहिष्णुः रिक्तक उदर्शनं न सहेत किल॥

२२) पार्थस्य दूत्यं सारथ्यं प्रपत्त्योपदेशनम्।
यच्चक्रे भगवान् कृष्णस्तदप्यस्याः कृते खलु॥

(टि) दूत्यं सारथ्यं सारथ्येन चक्रेण प्रतिपक्षिहननार्थं उपदेशनं

= निगमनम् =

इत्थं सेव्यं सुभोग्यं शुभसुभगतनुं सर्वभोग्यप्रकृष्टं
श्रेयस्तद्धेतुभूतं प्रपदनसुलभं स्वाश्रितानिष्टजिष्णुम् ।
भक्तच्छन्दानुरक्तं निरुपधिसुहृदं सत्पदव्यां सहायं
श्रीशं प्राह स्वसिद्धेः करणमिह स्वयमिह करणं स्वप्रबन्धे शठारिः ॥ "१२५"

आद्ये स्वीयप्रबन्धे शठजिदभिदधे संसृतेर्दुःसहत्वं
द्वैतीयीके स्वरूपाद्यखिलमथ हरेरब्रवीत् स्पष्टदृष्टम् ।
तार्तीयीके स्वकीयां भगवदनुभवे स्फोरयामास तीव्रा-
माशां तुर्ये यथेष्टं भगवदनुभवादाप मुक्तिं शठारिः ॥ "१२६"

श्रीमान् सीमातिलङ्घिस्थिरतरकरुणः सर्ववित् सर्वशक्तिः
स्वामी सर्वस्य जन्तोः स्वचरणयुगलस्वीकृतास्माकभारः ।
किं नः कृत्यं स्वहेतोः किमिह न सुलभं का विपत्तिर्भवित्री
कस्यान्यस्याद्य वर्ण्या वयमिति विदुषामाह तुङ्गहमक्ते ॥ "१२७"

शास्त्रे देहातिरिक्तात्मनि तदधिपतौ तत्प्रसादाप्त्युपाये
तस्मान्निःश्रेयसाप्तौ तदपचरणतोऽनन्ततापाभिजाते ।
सद्भक्तानां प्रभावे तदुपसदनतः स्वान्तकालुष्यशान्तौ
सारं वेद्यं स्ववेदे सकलमकथयत् सानुकम्पः शठारिः ॥ "१२८"

इत्थं सत्सम्प्रदायक्रमसमधिगताशेषवर्णार्हवेद-
भद्रद्राविडद्राशयानामधरयदनघं कौतुकं वेङ्कटेशः ।
सम्यक्त्वे तस्य साक्षाच्च हरिपुरथवा सर्वसाक्षी ससाक्षी
सावज्ञातेऽपि सोढुं प्रभवति भजतामप्रकम्प्यानुकम्पः ॥ "१२९"

करिष्ये वचनं तवेति तमुक्तो जपितुम् इदं सर्वं शरणागताया: केशवनाथम्॥

प्रपत्तेर्विषयनियमातिरिक्तनियमशून्यता

२३)२४) देशकालप्रकाराधिकारिभिः फलतोऽपि च।
नैयत्यं न प्रपत्तेहि (२४) तदस्ति विषये परम्॥

२५) पुण्यक्षेत्रं वसन्तादिकालश्शास्त्रोक्तरीतय:।
त्रैवर्णिका इति प्रोक्ता: व्यवस्था: कर्मणां कृतौ॥

(टि) युद्धकालेऽज्ञानेऽपि अर्जुनं प्रति प्रपत्तेरुपदेशात् किमस्या नियमा नेत्यत्राह देशेति। पुण्यक्षेत्रादिदेशनियम: वसन्तादिकालनियम:, स्नानपादप्रक्षालनादिप्रकारनियम: त्रैवर्णिकाधिकारिनियम: फलनियमश्च कर्मणामेव, नास्या:। अस्या विषयनियम एक एव॥

२६) स एष देश: कालश्चेत्येवं रामायणोदितः।
देशकालव्यवस्थाया विरहोऽस्यां विनिश्चित:॥

(टि) अदेशकाले संप्राप्त: सर्वथा शङ्क्य एव हीति इतरेषु वदत्सु स एष देश: कालश्चेति वदन् हनूमान् चित्तशुद्धिमतो विभीषणस्य शरणागतौ न देशकालवैगुण्यं द्रष्टव्यम्, अयमेव सन् देश: कालश्चेति वदन् देशकालानियमं वदति॥

२७) मन्त्ररत्नेऽप्ययमर्थः सुस्पष्टः प्रथमे पदे॥

(टि) यस्मिन् कस्मिंश्चिदपि देशे काले चापायणमिच्छत: तादृक्क्षणिकविचारपरिवर्तनात् प्रागेव भगवदाश्रयणसिद्ध्यर्थं नित्यसंबन्धं वदन् मन्त्र
अत्र प्रमाणम्

२८) प्रकारनियमाभाव: सर्वत्रापीति वीक्षितुं क्षमम:॥ स्पष्टम्॥

२९) द्रौपदी न खलु स्नाता प्रायुङ्क्त शरणागतिम्।
अर्जुनो नीचमध्ये तु श्रुतवान् नयमी दृशाम्॥ स्पष्टम्॥

३०) अत: शुद्धरशुद्धेर्वा मा भूदन्वेषणे भ्रम:। यथावस्थित एवाधिकारी॥

३१) वेलवेट्टि सूरयेश्रीमत्कलिवैरिगुरूत्तमै:।
अन्वग्रह्यत योह्यर्थ: सोऽत्रस्मरणमर्हति॥

(टि) भगवता समुद्रशरणागतौ प्राङ्मुखत्वादे: करणात् किमत्र नियमविशेषोऽस्तीति पृच्छन्तं वेलवेट्टिपिळ्ळै महात्मानं प्रति कलिवैरिदास आह भगवत आचारशीलत्वात् तथाकरणम्, उपदेष्टापि विभीषणोऽस्नात एव शरणागत इति॥

३२) अथाधिकारिनैयत्यविरहोऽपोपपाद्यते।
पाण्डवा द्रौपदी काक: कालियश्च गजेश्वर:।
विभीषणश्च रामश्च सौमित्रिश्चैतदन्वय:।
प्रापन्ना यतस्तस्मान्नाधिकारिव्यवस्थिति:॥

(टि) क्षत्रियै: पाण्डवै: स्त्रिया द्रौपद्या तिरोहितदेवस्वरूपेण काकेन तिरश्चा प्रतिकूलेन कालियेन तिरश्चानुकूलेन गजेन्द्रेण राक्षसेन विभीषणेन सर्वशरण्येन रामेण ... लक्ष्मणेन च शरणवरणादधिकारिनि

१०. श्लोकः श्लोकत्वमभ्यागत इति वदतः शठजिदोऽर्णवोद्यन्नानाकल्लोलनाथ्यथानुभवरसपरीवाहतः श्राव्यवेदात्।
वेदान्ताचार्यश्रीबहुमतबहुविद्वेङ्कटेशोद्धृतेयं
रम्या तात्पर्यरत्नावलिरनघगुणा रञ्जनी रङ्गभर्तुः॥
॥ १३० ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
द्रमिडोपनिषत्तात्पर्यरत्नावलिः संपूर्णा ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः॥

---

३३) फलनैयत्यनिरहास्त्विदानीमुपपाद्यते।
पाण्डवानां फलं राज्यं द्रौपद्या वसनं फलम्।
काककालिययोः प्राणाः कैङ्कर्यं करिभूपतेः।
विभीषणस्य रामाप्तिः राघवस्याऽब्धिलङ्घनम्।
रामानुवृत्तिः सौमित्रेरतो न नियमो फले॥ टि) स्पष्टम्
३४) गुणपूर्तिस्तु तल्लक्ष्ये प्रयोज्या शरणागतिः।
इति व्यवस्था या सैव विषये नियमो मतः।
अर्चावतार एवास्ति गुणपूर्तिश्च तादृशी।
टि) सौलभ्यादिगुणपूर्तिर्भगवतापि कृत्स्नाऽर्चावतारे एव हि।
३५) अत्रैवानुष्ठिता शश्वत् प्रपत्तिर्दिव्यसूरिभिः।
टि) सर्वस्यात् साक्षात्कृत[illegible]अर्चावतारमेव हि प्रपेदिरे॥

36) "पूर्णमि" इत्युक्तितोऽत्रैव पुष्कलाः सकला गुणाः।
टि) "पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" "सर्वं पूर्णं सहोम्" इत्यत्र प्रमाणम्।
37) सौलभ्याद्या गुणा येऽपि प्रपत्त्यर्थमपेक्षिताः।
अत्रैव ते प्रदीप्यन्ते तमःसद्मनि दीपवत्॥
टि) "वासुदेवोऽसि पूर्णः" इत्युक्ते परवासुदेवे स्थिता गुणाः परमसाम्यापन्नानामेव कार्यकरत्वात् दिनदीपनिभाः, जीवानां कार्यकरत्वादर्चागुणाः तमस्सु दीपवत्॥
38) पूर्तिं स्वतन्त्रतां चात्र नीत्वाऽसत्समतां हरिः।
स्वामिन्ननादरं कुर्वत्स्वपि चादरवान् स्थितः॥
टि) आप्तकामतां स्वतन्त्रतां च तिरस्कृत्य संसारिपरतन्त्रतासापेक्षः अर्चकाधीनस्थितिः इदं सौलभ्यप्रमापणहेतुसमत्वाऽनादरहेतुं कुर्वतः संसारिणोऽपि त्यक्तुमशक्तो ह्यर्चावतारः॥
39) अन्तर्यामिस्थितिः प्रोक्ता पृथिवीगततोयवत्।
परस्थितिस्तु वैकुण्ठे स्यादावरणतोयवत्।
क्षीरसागरवद् व्यूहो विभवास्तु प्रवाहवत्।
अर्चावतारस्तु लभ्यस्स्यात् तत्प्रवाहस्थितैर्ह्रदैः॥
टि) तृषितस्य तदा हि सुलभस्तटाक इवाश्रयेभ्यो सदा हि सुलभोऽर्चावतारः॥
40) सोऽयं शास्त्रैरशिक्ष्याणां विषयान्तरसङ्गिनाम्।
वैमुख्यभाजां मर्त्यानां विमुखत्वं निवर्तयन्।
रुचिप्रजनने शक्तः, उपायो रुचितः परम्।
उपायस्वीकृतौ सत्यां नित्यं भोग्यतया स्थितः॥
टि) शास्त्रैर्भगवति गुणेषु विषये दोषेषु दर्शितेष्वपि दुर्वासनादृढ्यात्तिरस्कुर्वतो चेतनान् सौन्दर्येण वशीकुर्वन् तेषां न पश्येमेति वैमुख्यं दूरीकुर्वन् नित्यमनुभवेमेति रुचिं वर्धयन् ततउपायो भवन् देशान्तरगतिं विना इहैव परमभोग्यः॥
44) —— प्रपत्त्यधिकारिनिरूपणम्॥ ——
41) अत्र प्रपत्तिकर्तारि स्त्रयः स्युरधिकारिणः। स्पष्टम्।
42) अशक्त्याज्ञानाधिक्यात्वापि भक्तेः परवशा इति।
टि) अर्चावतारे प्रपन्नास्त्रयः, साधनानुष्ठानोपयिकज्ञानशक्तिहीनाः, ततोऽपि भगवदत्यन्तपरतन्त्रस्वस्वरूपज्ञानात् साधनान्तरस्वरूपविरोधित्वावगाहिज्ञानपूर्तिमन्तः साधनानुष्ठाने नहि शिथिलकरणा भक्तिपरवशाश्च॥
43) अज्ञानतः प्रपन्नाः हि अस्मदादिषु विद्यते।
ज्ञानाधिक्यात् प्रपन्नत्वं पूर्वाचार्येषु राजते।
भक्तिभूम्ना प्रपन्नत्वं प्रथते दिव्यसूरिषु॥
44) प्राचुर्यमभिसन्धाय व्यवस्थैषा विरच्यते। स्पष्टम्।
45) निरुक्तत्रितयं तत्र त्रयमूलकमुच्यते।
टि) अचित्सम्बन्धहेतुकता देशनाशात्त्योर्हि निरचित्तत्वम्, साधनान्तरस्वरूपविरोधित्वावगाहिज्ञानपूर्तिहेतुतारतम्याभाव्यज्ञानमित्यस्य हेतुरासमत्वम्।
भक्ति [illegible] भगवदनुभवाधिक्यनिबन्धनमित्यस्य हेतुः रागित्वम्।

अथ श्रीमन्निगमान्तमहादेशिकविरचितो द्रमिडोपनिषत्-

सारः प्रारभ्यते ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सेवायोग्योऽतिभोग्यः शुभसुभगतनुः सर्वभोग्यातिशायी
श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः ।
भक्तच्छन्दानुवर्ती निरुपधिकसुहृत् सत्पदव्यां सहायः
श्रीमान् सर्वोन्नतायामुपनिषदि मिषत्येव गाथाशतैर्नः ॥ १ ॥

आद्ये पश्यन्नुपायं प्रभुमिह परमप्राप्यभूतं द्वितीये
कल्याणोदारमूर्तेर्द्वितयमिदमिति प्रेक्षमाणस्तृतीये ।
ऐश्वर्यादिं चतुर्थे विषमधुतुलयाऽनन्यभोग्यत्वमिच्छन्
षड्भिः स्वां पञ्चमाद्यैरनितरगतितामाचचक्षे मुनीन्द्रः ॥ २ ॥

परं निर्वैषम्यं सुलभमपराधप्रसहनं
सुशीलं स्वाराध्यं सरसभजनं स्वार्जवगुणम् ।
सुसात्म्यस्वानन्दप्रदमनघविश्राणनपरं
मुकुन्दं निध्यायन् मुनिरधिजगावाद्यशतके ॥ ३ ॥

द्विकाभ्यां द्व्यष्टाङ्घ्रिर्दुरधिगमनीतिस्थपुटिता
यदन्त्या मीमांसा श्रुतिशिखरतत्त्वं व्यवृणुत ।
तदादौ गाथाभिर्मुनिरधिकविंशाभिरिह नः
कृती सारग्राहं व्यतरदिह संगृह्य कृपया ॥ ४ ॥

३६) "पूर्णमि इत्युक्तितो ऽत्रैव पुष्कला: सकला गुणा:।
टि) "पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" "सर्वं पूर्णं सहोम्" इत्यत्र प्रमाणम्।
३७) सौलभ्याद्या गुणा ये ये प्रपत्त्यर्थमपेक्षिता:।
अत्रैव ते प्रदीप्यन्ते तम:सद्मनि दीपवत् ॥
टि) "वासुदेवोऽसि पूर्ण:" इत्युक्ते परवासुदेवे स्थिता गुणा: परमसाम्यापन्नानामेव कार्यकरत्वात् दिनदीपनिभा:, जीवानां कार्यकरत्वादर्चागुणा: तमस्सु दीपवत्॥
३८) पूर्तिं स्वतनां तां चात्र नीत्वाऽसत्समतां हरि:।
स्वास्मिन्ननादरं कुर्वत्स्वपि चादरवान् स्थित:॥
टि) आप्तकामतां स्वतन्त्रतां च तिरस्कृत्य संसारि प्रतत्सापेक्ष: अर्चकाधीनस्थिति: इदं सौलभ्यमाश्रयणहेतुममत्वाऽनादरहेतुं कुर्वत: संसारिणोऽपि त्यक्तुमशक्तो ह्यर्चावतार:॥
३९) अन्तर्यामिस्थिति: प्रोक्ता पृथिवीगततोयवत्।
परस्थितिस्तु वैकुण्ठे स्यादावरणतोयवत्।
क्षीरसागरवद् व्यूहो विभवास्तु प्रवाहवत्।
अर्चावतारस्तु ल्यस्स्यात् तत्प्रवाहस्थितैर्ह्रदै:॥
टि) तृषितस्य तदात्वे सुलभस्तटाक इव क्षेत्रे क्षेत्रे सदात्वे सुलभोऽर्चावतार:॥
४०) सोऽयं शास्त्रैरशिक्ष्याणां विषयान्तरसङ्गिनाम्।
वैमुख्यभाजां मर्त्यानां विमुखत्वं निवर्तयन्।
रुचिप्रजनने शक्त:, उपायो रुचित: परम्।
उपायस्वीकृतौ सत्यां नित्यं भोग्यतया स्थित:॥
टि) शास्त्रैर्भगवति गुणेषु विषये दोषेषु दर्शितेष्वपि दुर्वासनादाढ्यात्तिरस्कुर्वतां चेतनान् सौन्दर्येण वशीकुर्वन् तेषां न पश्येमेति वैमुख्यं दूरीकुर्वन् नित्यमनुभवेमेति रुचिं वर्धयन् तत उपायो भवन् देशान्तरगतिं विना इहैव परमभोग्य:॥
४१) ——— प्रपत्त्यधिकारिनिरूपणम् ॥———
४१) अत्र प्रपत्तिकर्तार: त्रय: स्युरधिकारिण:। स्पष्टम्।
४२) अज्ञा ज्ञानाधिका श्चापि भक्ते: परवशा इति।
टि) अर्चावतारे प्रपन्नास्त्रय:; साधनानुष्ठानोपायिक ज्ञानशक्तिहीना:, तत्सत्त्वेऽपि भगवदत्यन्तपरतन्त्रस्वस्वरूपज्ञानात् साधनान्तरस्वरूपविरुद्धत्वावगाहि ज्ञानपूर्तिमन्त: साधनानुष्ठाना नर्हा: शिथिलकरणा भक्तिपरवशाश्च॥
४३) अज्ञानत: प्रपन्नत्वमस्मदादिषु विद्यते।
ज्ञानाधिक्यात् प्रपन्नत्वं पूर्वाचार्येषु राजते।
भक्तिभूम्ना प्रपन्नत्वं प्रथते दिव्यसूरिषु ॥ स्पष्टम्।
४४) प्राचुर्यमभिसन्धाय व्यवस्थैषा विरच्यते। स्पष्टम्।
४५) निरुक्तं त्रितयं तत्त्र यमूलकमुच्यते।
टि) अनित्यसम्बन्धहेतुकत्वा दुज्ञानाशक्त्योर्निरपेक्षत्वम्, साधनान्तरस्वरूपविरुद्धत्वावगाहिज्ञानपूर्तिहेतुरात्मयाथात्म्यज्ञानमित्यस्य हेतुरात्मतत्त्वम्। भक्तिपारवश्यं भगवद्विग्रहवैलक्षण्य [illegible] त्वम्।

अथ श्रीमन्निगमान्तमहादेशिकविरचितो द्रमिडोपनिषत्-
सारः प्रारभ्यते ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सेवायोग्योऽतिभोग्यश्शुभसुभगतनुः सर्वभोग्यातिशायी
श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः ।
भक्तच्छन्दानुवर्ती निरुपधिकसुहृत् सत्पदव्यां सहायः
श्रीमान् सर्वोन्नितायमुपनिषदि मिषत्येव गाथाशतैर्नः ॥ "१"

आद्ये पश्यन्नुपायं प्रभुमिह परमप्राप्यभूतं द्वितीये
कल्याणोदारमूर्तेर्द्वितयमिदमिति प्रेक्षमाणस्तृतीये ।
ऐश्वर्यादिश्चतुर्थे विषमधुतुलयाऽनन्यभोग्यत्वमिच्छन्
अद्भिः स्वां पञ्चमाद्यैरनितरगतितामाचचक्षे मुनीन्द्रः ॥ "२"

परं निर्वैषम्यं सुलभमपराधप्रसहनं
सुशीलं स्वाराध्यं सरसभजनं स्वार्जवगुणम् ।
सुसात्म्यस्वानन्दप्रदमनघविश्राणनपरं
मुकुन्दं निध्यायन् मुनिरधित गाथादशतके ॥ "३"

द्विकाभ्यां द्व्यंशाङ्घ्रि दुरधिगमनीतिस्थपुटिता
यदन्त्या मीमांसा श्रुतिशिखरतत्त्वं व्यवृणुत ।
तदादौ गाथाभिर्मुनिरधिकविंशाभिरिह नः
कृती सारग्राहं व्यतरदिह संगृह्य कृपया ॥ ४ ॥

36) "पूर्णमिदमुक्तितो ऽत्रैव पुष्कला: सकला गुणा: ।

टि) "पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" "सर्वं पूर्णं सहोम्" इत्यत्र प्रमाणम् ।

37) सौलभ्याद्या गुणा येये प्रपत्त्यर्थमपेक्षिता: ।
अत्रैव ते प्रदीप्यन्ते तम:सद्मनि दीपवत् ॥

टि) "वासुदेवोऽसि पूर्ण:" इत्युक्ते परवासुदेवे स्थिता गुणा: परमसाम्यापन्नानामेव कार्यकरत्वात् दिनदीपनिभा:, जीवानां कार्यकरत्वादर्चागुणा: तमस्सु दीपवत् ॥

38) पूर्तिं स्व तनातां त्यक्त्वा नीत्वाऽसत्समतां हरि: ।
स्वास्मिन्ननादरं कुर्वत्स्वपि त्वादरवान् स्थित: ॥

टि) आप्तकामतां स्वतन्त्रतां च तिरस्कृत्य संसारि प्रतन्त्रसापेक्ष: अर्चकाधीनस्थिति: इदं सौलभ्यमपाजयणहेतुममत्वाऽनादरेहं कुर्वत: संसारिणोऽपि त्यक्तुमशक्तो ह्यर्चावतार: ॥

39) अन्तर्यामिस्थिति: प्रोक्ता पृथिवीगततोयवत् ।
परस्थितिस्तु वैकुण्ठे स्यादावरणतोयवत् ।
क्षीरसागरवद् व्यूहो विभवास्तु प्रवाहवत् ।
अर्चावतारस्तु लभ्यस्स्यात् तत्प्रवाहस्थितैर्ह्रदै: ॥

टि) तृषितस्य तदाहे सुलभस्तटाक इवाकृत्ये भ्योस्वादाहे सुलभोऽर्चावतार: ॥

40) सोऽयं शास्त्रै रशिक्ष्याणां विषयान्तरसङ्गिनाम् ।
वैमुख्यभाजां मर्त्यानां विमुखत्वं निवर्तयन् ।
रुचिप्रजनने शक्त:, उपायो रुचित: परम् ।
उपायस्वीकृतौ सत्यां नित्यं भोग्यतया स्थित: ॥

टि) शास्त्रै र्भगवतिगुणेषु विषये दोषेषु दर्शितेष्वपि दुर्वासनादार्थ्यात्तिरस्कुर्वतां चेतनान् सौन्दर्येण वशीकुर्वन् तेषां न पश्येमेति वै मुख्यं दूरीकुर्वन् नित्यमनुभवेमेति रुचिं वर्धयन् तत उपायो भवन् देशान्तरगतिं विना इहैव परमभोग्य: ॥

41) —— प्रपत्त्यधिकारिनिरूपणम् ॥ ——

41) अत्र प्रपत्तिकर्तार स्त्रय: स्युरधिकारिण: । स्पष्टम् ।
42) असामर्थ्यज्ञानाधिका भक्तेश्चापि भक्ते: परवशा इति ।

टि) अर्चावतारे प्रपन्नास्त्रय:, साधनानुष्ठानोपयिकज्ञानशक्तिहीना:, ततोऽपि भगवदत्यन्तपरतन्त्रास्वस्वरूपज्ञानात् साधनान्तरस्वरूपविकृत्वावगाहिज्ञानपूर्तिमन्त: साधनानुष्ठाना नर्हा: शिथिलकरणा भक्तिपरवशाश्च ॥

43) अज्ञानत: प्रपन्नाहं मस्मदादिषु विद्यते ।
ज्ञानाधिक्यात् प्रपन्नत्वं पूर्वाचार्येषु राजते ।
भक्तिभूम्ना प्रपन्नत्वं प्रथते दिव्यसूरिषु ॥ स्पष्टम् ।

44) प्राचुर्यमभिसन्धाय व्यवस्थैषा विरच्यते । स्पष्टम् ।

45) निरुक्तत्रितयं तत्र त्रयमूलकमुच्यते ।

टि) अर्चितसम्बन्धहेतुकं तद्ज्ञानाशक्त्योर्हेतुरचित्तत्वम्, साधनान्तरस्वरूपविकृत्वावगाहिज्ञानपूर्तिहेतुरात्मयाथात्म्यज्ञानमिदमस्य हेतुरात्मतत्त्वम् ।
भक्तिपारवश्यं भगवद्विग्रहवैलक्षण्य[illegible] रत्नम् ।

अथ श्रीमन्निगमान्तमहादेशिकविरचितो द्रमिडोपनिषत्-
सारः प्रारभ्यते ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सेव्यो योग्योऽतिभोग्यश्शुभसुभगतनुः सर्वभोग्यातिशायी
श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः ।
भक्तच्छन्दानुवर्ती निरुपधिकसुहृत् सत्पदव्यां सहायः
श्रीमान् सर्वोन्नितायामुपनिषदि मिषत्येव गाथाशतैर्नः ॥ "१"

आद्ये पश्यन्नुपायं प्रभुमिह परमप्राप्यभूतं द्वितीये
कल्याणोदारमूर्तेर्द्वितयमिदमिति प्रेक्षमाणस्तृतीये ।
ऐश्वर्यादेश्चतुर्थे विषमधुतुलयाऽनन्यभोग्यत्वमिच्छन्
षड्भिः स्वां पञ्चमाद्यैरनितरगतितामाचचक्षे मुनीन्द्रः ॥ "२"

परं निर्वैषम्यं सुलभमपराधप्रसहनं
सुशीलं स्वाराध्यं सरसभजनं स्वार्जवगुणम् ।
सुसात्म्यस्वानन्दप्रदमनघविश्राणनपरं
मुकुन्दं निध्यायन् मुनिरधिजगौ गाथाशतके ॥ "३"

द्विकाभ्यां ब्रह्माद्रिं दुरधिगमनीतिस्थपुटिता
यदन्त्या मीमांसा श्रुतिशिखरतत्त्वं व्यवृणुत ।
तदादौ गाथाभिर्निरवधिकविंशाभिरिह नः
कृती सारग्राहं व्यतरदिह संगृह्य कृपया ॥ ४ ॥

४६) [illegible] इति श्रीसूक्तसंथै त्रैधांनुसंहिते।
(किं कुर्यामहमित्येवं श्रीसूक्तयथै) तु संहिते।
तदेतत् तत्र सुगमं भविष्यति विवेकिनाम् ॥

टि) सहस्रगीतौ 5-8-3 सूरिः स्वार्तिं तृष्णां भगवतोऽनुग्रहणात् स्वप्राप्त्युपायानुष्ठानावश्यकतां मन्यते इत्युन्नीय अहं अज्ञः किं कुर्यामित्याह। ततो भगवता मया ज्ञानं दत्तं किलेत्युक्तो तेन स्वरूपयाथात्म्यस्य ज्ञातत्वात् साधनानां स्वरूपविरुद्धत्वं मन्वानोऽहं किं कुर्यामित्याह। तथापि भगवत्प्रापकत्वादनुष्ठीयतामिति तदाशयमुन्नीय त्वया भक्तिरूपापन्नज्ञानस्य दत्तत्वाद्विपिलोऽहं किं कुर्यामिति।

४७) तत्र (सूरिप्रपत्तौ) प्रपत्तिहेतुत्वं भक्तिभूमैकसंश्रयम्। स्पष्टम्।
४८) सैव मुख्यप्रपत्तिर्या भक्ति (नैव स्वहेतुका) भूमनिबन्धना। स्पष्टम्
४९) अविज्ञात इति श्लोके त्रयमेतदकथ्यत॥

टि) अविज्ञाता देवे परिवृढतया वा विदितया स्वभक्तेर्भूम्ना वा जगति गतिमन्यामविदुषाम्। गतिर्गम्यश्चासौ हरिरिति जितन्ताह्वयमनोः रहस्यं प्राह स खलु भगवान् शौनकमुनिः" इति भट्टारकः॥

५०) इदं शरणमज्ञानामित्यत्रापि विचिन्त्यताम्।

टि) इदं शरणमज्ञानामिदमेव विजानताम्।
इदं तितीर्षतां पारमिदमानन्त्यमिच्छताम्॥" इति श्लोकः॥

५१) भक्त्युत्तयां जाते दशाभेदे न्यासनिष्ठाच्युता भवेत्।

टि) भक्तिपारवश्यात् प्रपत्तौ संपन्नायां ततः भगवत्प्राप्तौ त्वरारूपदशायामुदितायां यत्किंचित् कृत्वापि तं प्राप्नुयामेति साधनानुष्ठानात् निष्ठाहानिर्भवति॥

५२) स तु भक्ति दशा भेदः स्वयत्नेऽप्यवगाहयेत्।
धारणक्षमता नहि दशायां धारणं दिशेत्॥

टि) प्रपत्तिनिष्ठानाशिका भक्तिदशा आगमिष्यतस्तस्य कृते आत्मानं स्वांकरणयत्ने योजयेत्, तस्मिन्नागते विना प्रयोजनेन तं गच्छेत् युक्त्याऽऽत्मानं धारयेत्।

५३) ईदृक् स्वभावाः कल्याणगुणेषु च शरेषु च।
नाम्नस्तु क्वणिते वेणोरपि शक्त्या निरीक्षितम्॥

टि) भगवद्गुणान् ज्ञात्वा क्रियेत, महाधिकगुणवान् इत्युक्तिभ्यां गुणेषु, शरधरं, हित्वान्यस्मै मन्मनो न नमेत, शरा एव पीडयन्तीत्युक्तिभ्यां शरेषु, भगवन्नामगायकं स्वकं साञ्जलि प्रणमन्, भगवन्नामानि हिंसन्तीत्युक्तिभ्यां नामसु, अस्मदर्थमेकदा वेणुं कुतो न वादयसीति, तस्य वेणुक्वणितं दुःखदमित्युक्तिभ्यां वेणुध्वनौ च धारकत्वा-धकत्वयोर्वर्णनात् विषयः एकरूपः सन्नेवानुभक्ता मुभयरूपो भवति।

५४) —— प्रपत्तेरनुपायत्वनिरूपणम् ——

५४) अस्याः प्रपत्तेः संमर्शे वक्तुमेवं प्रभूयते।
रक्षाप्रतिज्ञापत्रस्य तातपादसकाशतः
पुत्रेण स्वीकृतिर्यद्वत् तामियं तुलयेदिति॥

टि. नित्यरक्ष्येण जीवेनाद्य रक्षकोऽसि भवेति भगवतः प्रार्थनं तेन स्वीकृतिभक्ति [illegible]

परब्रह्मत्वैरित्थं परिचरणसक्तो गुणगणैः

प्रभुं सेवायोग्यं प्रथमशतके वीक्ष्य वरदम् ।

तमेव स्वात्यर्थप्रियमथ च भोक्तुं व्यवसितो

वरेण्यत्वं तस्य प्रथमवरणीयं प्रथयति ॥ ५ ॥

द्वितीयेऽतिक्लेशक्षणविरहमुत्तुङ्गललितं

मिलत्सर्वस्वादं व्यसनशमनं स्वामिमुदितम् ।

स्वभृत्यत्रस्तं स्वजनसुहृदं मुक्तिरसदं

स्वकैङ्कर्यौदित्ये सुभगसन्निधस्थं निरविशत् ॥ ६ ॥

उपायत्वे कान्तं प्रथममिह सेव्यत्वमुदितं

ततश्च प्राप्यत्वौपयिकमतिभोग्यत्वमवदत् ।

द्वयं तत् स्वासाधारणतनुविशिष्टस्य गणयन्

तृतीये विश्वसं शुभसुभगरूपं कथयति ॥ ७ ॥

अनीदृक्सौन्दर्यं तनुविहितसर्गादिसुभगं

स्वसेवार्थाकारं प्रगुणवपुषं मोहनतनुम् ।

अनश्यल्लब्धा(भ्या)चविभवमतिदास्यावहतनुं

सदा दृश्यं स्तुत्याकृतिमजाविरुद्धाकृतिमिह ॥ ८ ॥

श्रियः कान्तोऽनन्तः शुभतनुविशिष्टः फलमसौ

फलावाप्तौ हेतुः स्वयमिति च निर्धार्य शतकैः ।

इदानीं बुद्धिस्थक्रमत इह युक्त्या मुनिवरः

फलत्वं तस्यैव द्रढयति तदन्येषु विमुखः ॥ ९ ॥

दानं च पुत्रेण पितृसकाशाद्रक्षापत्रस्वीकारवत् निरसिद्धसम्बन्धावबोधः

55) अस्याः स्वरूपं स्वोपायभावासहनता मता।

टि. भगवदुपायत्वधीरूपेयं प्रपत्तिः स्वस्मिन्नुपायत्वधियं न सहते. इदमेतत्स्वरूपं

56) सहायान्तरसंसर्गनिर्हतं नङ्गमुच्यते। साधनरूपप्रवृत्तिनिवृत्ते रङ्गहानिः

57) सिद्धोपायो हृयः स्वामी स हेतोपायतां स्वयम्। स्पष्टम्

58) उपायतां सहायांश्च सहेत प्रापकान्तरम्। स्पष्टम्

59) तदेतदुभयं चापि न सोढुं प्रभवत्यसौ॥ स्पष्टम्

60) आत्मज्ञानानिषेधौ तु फलसिद्ध्यावपेक्षितौ।

टि) प्रपत्तेरनुपायत्वे किं फलसाधनमिति चेत् भगवदेकशेषत्वरक्ष्यत्वज्ञानमप्रतिषेधश्च

61) अन्यथा तस्य शेषित्वपूर्त्योः सावद्यता भवेत्।

टि) अनेवं, फलार्थसाधनावश्यकत्वे, स्वफलत्वेन चेतनरक्षणेऽधिकृतस्य तस्य शेषित्वस्य, सर्वथा चेतनप्रवृत्त्यनपेक्षत्वरूप निरपेक्षोपायत्वरूपपूर्तौ च दोषः स्यात्

62) विनाशयामो वियदमिति भ्रान्त्या प्रवृत्तितः।
तदावाहनमेव स्यात् तस्मादृदिति प्रोच्यते॥

टि) संसाराब्धौ भ्रमतोऽपदमनुसन्धाय आपन्निवर्तकं हरिं स्वप्रवृत्त्या वशीकृत्य तत्प्रसादेनेयमापत् किं न निवर्त्स्येति चेत् स्वप्रवृत्त्याऽऽपन्निवर्तयाम इति भ्रमेण स्वरूपनाशरूपापदः संपादनापेक्षया स्वयत्ननिवृत्तिर्युक्ता, तदा हरिः स्वयं रक्षेत्॥

63) रक्ष्यत्वानुमतिस्त्वेका रक्षणं प्रत्यपेक्षिता।

टि) रक्षापेक्षां प्रतीक्षते इति ह्युच्यते तत्राह तत्रापेक्षाशब्दार्थो शरण्ये रक्षेप्योक्ते तदनुमतिरेव॥

64) सर्वोपायसमानत्वात् चैतन्यकृतितावलात्।
प्राप्त्यावस्थानुवर्तित्वात् स्वरूपानतिरेकतः।
अचिद्व्यावृत्तवेषस्य न योग्या साधनीकृतिः॥

टि) इमामनुमतिमपेक्ष्य तेन रक्षणे किमियमनुमतिर्न साधनमित्यत्राह। इममुपायमनुतिष्ठ इत्युपदिष्टे तथेत्यनुमत्यैव सर्वेषामुपायानां करणीयतयाऽस्याः सर्वोपायसाधारण्यात्, चैतन्यकृत्यरूपत्वात्, उपेयदशायामपि यथेष्टं मां विनियुङ्क्ष्व इत्यनुमतेर्दर्शनात्, अस्याः शेषत्वपारतन्त्र्यकार्यत्वेन स्वरूपानुप्रविष्टत्वात् ज्ञानकार्या अचिद्व्यावृत्तवेषस्येयमनुमतिर्न साधनीकार्या

65) सिद्धोपायैककृतज्ञत्वमुपेये प्रेमबन्धनम्।
इत्येतदुभयं प्राहुरचिद्व्यावृत्ततापलम्॥

टि) भगवत्कृतविविधोपकारस्मरणं कैङ्कर्यप्रेमार्थात् तज्जभगवत्प्रीतिदर्शनजप्रीति

66) [illegible] इति श्रीमत्परकालोक्तरीतितः। तिरोगाच्चिद्व्यावृत्तिफलम्
(तदन्तःकरणेनेति परकालोक्तरीतितः।

प्राप्युपायस्तु भगवत्कर्तृका चिन्तना परम्॥

67) सा तु सर्वेषु कालेषु वर्तते नात्र संशयः।

68) तस्याः फलग्रहित्वं तु निश्चिन्ते सति चेतने॥ [चिन्तानिवृत्तौ।

टि) सर्वकालानुवृत्तभगवत्कर्तृजीवरक्षणमेवोपायः तत्फलतिजीतीयस्वरक्षणचिन्ताभक्ति पारवश्य [illegible]

स्थिरैश्वर्यं तुर्यं सहजबहुभोग्यं निरविशत्

मिथः श्लिष्टं क्लेशावहसहितनुल्यं निजजनाम् ।

कृतार्थीकुर्वन्तं प्रणयिभिषजं सद्बहुगुणं

स्वहेयस्वोपेक्ष्यं स्वमतफलमुच्चैः स्वकगतम् ॥१०॥

उपायत्वं यत्नात् प्रथमशतकेऽभाष्यत विभो-

रनन्योपायस्तद्द्रढयति परं पञ्चमपुरैः ।

निरीहस्त्वादौ निरवधिकनिर्हेतुकदया-

सरित्स्रोतः पद्मं शरणयति नाथस्य चरणम् ॥११॥

दयानिघ्नं भक्तैरजविमथनं प्रेमजनकं

जगद्रक्षादीक्षं स्मृतिसुलभमहंभावविषयम् ।

शरण्यं दीनानां स्वरसकृतदास्याभ्युपगमं

प्रचरन्यौ तं प्राप्तं प्रशाकनकृतं पञ्चमशते ॥१२॥

अनाद्यनन्तानन्दस्वरसकरुणाकन्दजनितः

प्रणेतुर्व्यापारः प्रपदनविपाकार्ह उदितः ।

तमाचार्योपज्ञं चिरविरहि(प्यटि)तस्तात्मघटन-

स्फुरच्छक्तिं षष्ठे मुनिरशरणो याति शरणम् ॥१३॥

गुरुद्वारोपायं स्वयमभिमतं वैरिघटकं

चरित्रैः कर्षन्तं परविघटनं स्वान्तिहरम् ।

निदानं प्रत्यादेर्घटकवशभूतिद्वयमगात्

अनर्हद्वैघटत्वं सविकलशरण्यां स्थितिमिह ॥१४॥

६९) "इदानीं का गतिरिहन्ते त्येतादृक्चिन्तनाक्षमः।
शरणं नास्ति मे काले" इत्यस्मद्व्यतिरिक्तं भाषितम्॥

टि) मुमुक्षुदशायां शिष्यं प्रति यतिनैवमुक्तम्। अतो जैवन्यपि नानिवृत्तौ ईश्वरचिन्ता फलतीति सिद्धम्।

70) प्राप्यञ्च प्रापकः प्राप्त्या हर्षभागी च सोऽच्युतः।

टि) ईश्वरस्य प्रापकत्वे प्राप्यत्वस्य प्राप्तिफलभाक्त्वस्य च जीवनिष्ठत्वाज्जीवस्य चिन्ता युक्ता किलेत्यत्राह। नष्टवस्तुनः प्राप्ता तत्प्राप्तौ हर्षभाक् च स्वाम्येव हि भवति। अतस्तद्रूपो भगवान्॥

71) स्वप्रयत्ननिवृत्तिं तु पारतन्त्र्यफलं विदुः।
स्वप्रयोजनवैराग्यं शेषतायाः फलं जगुः।

टि) जीवस्य चेतनत्वेन कर्तृत्वभोक्तृत्वयोः सत्त्वात् कथं स्वयत्नस्वप्रयोजनयोर्निवृत्तिरित्यत्राह पारतन्त्र्यज्ञानेन स्वयत्नस्य शेषत्वज्ञानेन स्वप्रयोजनस्य निवृत्तिः

72) परप्रयोजनोद्योगं प्रयत्नस्य फलं विदुः।
चैतन्यस्य फलं प्राहुः प्रीतिं तद्दृष्ट्योदिताम्॥

टि) तर्हि तत्त्वं चैतन्ययोः किं फलमिति चेत् कैङ्कर्यप्रवृत्तिर्यत्नस्य तद्दर्श(न)हर्ष

73) अहमर्थस्य दास्यं स्यादन्तरङ्गनिरूपकम्। [निजहर्षश्चैतन्यस्य फलम्
ज्ञानानन्दौ तु सुव्यौ बहिरङ्गनिरूपकौ॥

टि) ज्ञातृत्वादौ शेषत्वादौ चात्मधर्मे सति शेषत्वस्यान्तरङ्गत्वेन ज्ञातृत्वादिकं कुतो विनियोज्यमित्यत्राह। ज्ञातृत्वे सति शेषत्वं निर्दिष्टं जीवलक्षणं, तत्त्वान्तरव्यावर्तकत्वात्। तत्र जडव्यावृत्तेरनुभवसिद्धत्वात् ईश्वरव्यावर्तकमुज्जीवनप्रदं शेषत्वमेवान्तरङ्गदलम्॥

74) नैतदागन्तुकं दास्यं कदाचिदपि चेतने।

टि) आचार्यसमाश्रयणोत्तरमागन्तुकतयाऽऽचार्योपदेशोपाधिकतया च प्रतीयमानं दास्यं कथं नित्यात्मनः स्वरूपनिरूपकम्, तथाहि हि नित्यत्वेन भाव्यमित्यत्राह।
नित्यसिद्धमेवेदं कण्ठचामीकरन्यायेनाचार्येण बोध्यते॥

75) स्वातन्त्र्यमन्यशेषत्वमागन्तुकमिति ध्रुवम्।

टि) अहं मदीय इति अभिमानः स्वातन्त्र्यम्। अन्यत् स्पष्टम्॥

76) स्वातन्त्र्यमिति यत् तत् तु शेषत्वेन विरुध्यते।
शेषता तु तदन्यस्मिन् तच्छेषत्वविरोधिनी॥

टि) निरुक्तं स्वातन्त्र्यं यत्किंचित् प्रत्ययपि शेषत्वस्य विरोधि, तदितरशेषत्वं भ

77) अहंकाराभिधानस्याच्छादनस्यापनोदने [गवच्छेषत्वविरोधि॥
अभिधा चेतनस्य स्याद्दास इत्येव शाश्वती॥ स्पष्टम्।

78) ग्रामवंशादितो जातं नामध्येयमनर्थकृत्॥ अहंकारवर्धकत्वात्॥

79) एकान्ती व्यपदेष्टव्यस्तु किमिह चिन्त्यताम्।

टि) एकान्ती व्यपदेष्टव्यो नैव ग्रामकुलादिभिः। विष्णुना व्यपदेष्टव्यस्तस्य सर्वं [स एव हीति वच

उपायोपेयनिष्ठानिरूपणम्

80) उपायाध्यवसायांशे मैथिली द्रौपदी तथा।
श्रीकृष्णमञ्जुल स्वार्थं चानुसन्धेयतां दधुः।
सौमित्रिश्च जटायुश्च सुगन्धक्षेत्रगायकः।
चिन्तयन्तीच साध्यांशे ह्यनुसन्धेयतां दधुः॥

टि) श्रीकृष्णेति। तिरुक्कण्णमङ्गैयाण्डान्। ... मङ्गलमर्थस्यैव ...

तदेवं षष्ठान्ते विहितसविशेषप्रपदनः
फलालाभात् खिन्नस्त्वरितहृदयः सप्तमशते ।
अनिष्टोपन्यासप्रभृतिभिरनिष्टप्रशमने
स्वतःसिद्धोद्योगं प्रभुमभिमुखं सम्मुखयति ॥ "१५"
सहन् शाठ्याशङ्कामुपशमितगर्हः प्रकटयन्
स्वगोप्तृत्वं गुप्तिक्रममखिलजन्तुप्रणयिताम् ।
श्रिताक्रन्दश्रुत्या स्मरणविशदामित्रविभवः
स्तुतौ युञ्जन् स्तोत्रव्यसनजिददर्शि प्रभुर्नरः ॥ "१६"
अथानिष्टान् पुंसां स्वयमुपजिहीर्षन्नपि विभुः
स्तदिच्छां बाह्येषु प्रशमयितुकामः क्रमवशात् ।
निजेच्छासंसिद्धित्रिविधचिदचिद्वस्तुविततिः
श्रितेच्छावैचित्रीवश इति वदत्यष्टमशते ॥ "१७"
दिदृक्षायां दृश्यः प्रभुरगणि निःसंगसुलभः
स्वविश्लेषैकान्तः श्रुतिविहितसौफल्यविभवः ।
अपेक्षासापेक्षस्ववितरणसज्जो हृदि रतः
स्वदास्यं तन्निष्ठां तदवधिमपीह प्रकटयन् ॥ "१८"
अभीष्टं विश्वास्मिन् विषमफलकांक्षिण्यविषमं
प्रयच्छन्तं दृष्ट्वा परमपुरुषार्थैकरसिकः ।
निरस्तान्यापेक्षो निखिलजगदीशस्य नवमे
निदानं सिद्धीनां स्वनिरुपधिसुहृत्त्वं गणयति ॥ "१९"

८१) विशेषः शक्त्यशक्तिभ्यां भूमिद्रुपदकन्ययोः।

टि) श्रीसीता शक्ता, शीतो भवेति वह्नौ भस्मी भवेत्यपि वक्तुं शक्ता। द्रौपदी त्वशक्ता।

८२) सीता स्वशक्तिमजहात् लज्जां तु द्रुपदात्मजा।
स्वव्यापारं जहौ श्रीमत्कृष्णमङ्गलदेशिकः॥

टि) श्रीनाथमुनिशिष्यः [illegible] स्वपालकव्यापारं स्वयत्नं जहौ।

८३) पक्वस्य पच्यमानस्याप्योदनस्योपभोजने।
कृतकी क्षुधितो यद्वत् तथा सौमित्रिरात्मवान्।
वनप्रस्थानसमये विश्लेषासहतां वदन्।
कैङ्कर्यं करवै सर्वाः कैङ्कर्यीः करवाण्यहम्।
आज्ञाप्य दास्यमादेयमिति च प्रत्यपादयत्।
अयोध्यागमनात् पश्चात् छत्रमेकेन पाणिना।
अन्येन चामरं चैव गृह्णन् कैङ्कर्यमातनोत्।
स्वयंपाकी यथान्येन सह भुक्तिं सहेत न॥

टि) उपेयाधिकारिषु लक्ष्मणस्याचरणे "कुरुष्व मामनुचरम्" "न च सीता त्वया हीना," "भवांस्तु सह वैदेह्या", "परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते। स्वयं तु रुचिरे देशे क्रियतामिति मां वद॥" इति वचनानि प्रमाणम्। अभिषेके लक्ष्मणे ~~छत्र~~ छत्रचामरग्रहणं चाद्य उक्तम् "छत्रं च चामरं दिव्यं धृतवान् लक्ष्मणस्तथा" इति।

८४) उपेक्षिषातां स्वं देहं जटायुर्गायिका च सः
विग्रहं चिन्तयन्त्यास्तु स्वत एव व्यलीयत॥

टि) लुगन्ध क्षेत्रगायकः पूर्वदिशे श्रीनारायणपुरदिव्यदेशे वेदनारायणं भगवन्तं सेवमानः तत्र शत्रुभिरजनो प्रयुक्ते भगवन्तं हातुमशक्नुवन् सकुटुम्बो भगवन्तमालिङ्ग्य दग्धोऽभूत्। वेणुध्वनिनाऽऽहूता गुरुजनमुल्लङ्घ्य गन्तुमक्षमा कालिन्दीपि "तच्चित्तविमलाह्लादक्षीणपुण्यचया तदा। तदप्राप्तिमहादुःखविलीनाशेषपातका। चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम्। निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका।"

८५) उपायांशे शक्तिलज्जायत्नानां स्यादपोहनम्।
कांक्षिताः प्रेमवैराग्यधारणाक्षमताः फले॥

टि) उपाये सीतावत् स्वरक्षणशक्तित्यागः, द्रौपदीवत् स्वरक्षणार्थोपायान्तरत्यागे लोका हसेयुरिति लज्जात्यागः, कृष्णमंगलस्वामिवत् स्वपारतन्त्र्य विरोधिस्वयत्नत्यागः। उपेये सौमित्रिवत् कैङ्कर्ये प्रेमा, गायकजटायुवद् द्विरूपविजये आपद्दर्शितदसहनेन शरीरत्यागः चिन्तयन्तीवत्त[illegible]॥

८६) यदस्य विधितः प्राप्तं सुत्यजं स्यात्तदेव हि। 'भ देहधारणं च'॥
यदेव रागतः प्राप्तं नियतं दुस्त्यजं हि तत्॥

टि) आग्नेयादिषु मोक्षसाधनतयोक्तो भगवद्धर्मे देहत्यागः सिद्धसाधननिष्ठस्यायुक्तः किन्त्वत्राह वैधस्य त्याज्यत्वे रागप्राप्तोऽयं दुस्त्यजो यत इति॥

८७) उपायतानुसन्धानं प्रवृत्तिभ्यो निवर्तकम्।
उपेयतानुसंधानं प्रवृत्तिषु नियोजकम्॥ स्पष्टम्॥

भक्तिपारवश्यं भगवद्विग्रहवलद[illegible]

अभाव्येको बन्धुर्गिरिकृतदयः शीलजलधिः
स्वसम्बन्धाद्दोषा स्वगुणगरिमस्मारणपरः।
अशक्यो विस्मर्तुं नरकदुखनिस्रम्भाविषपान्
सुभजानिः सिद्ध्युन्मुखसमयइच्छावसरम् ॥२०॥

उदन्तैरित्येवं निरुपधिकसौहार्दपिशुनै-
रुदन्यासु द्वेलामुपजनितवन्तं निजपदे।
त्रिवर्गातिक्रान्तास्थिरनगरपण्टापथगतेः
सहायीकुर्वाणा परमशठको विन्दति मुनिः॥
॥२१॥

गतिं व्यध्वक्लेशाखिदमपदशङ्कास्पदरसं
भजद्भिः सुप्रापं विविधभजनप्रक्रियमिह।
फले तीव्राद्योगं स्वविषयकृताद्यादरमगाद्-
यदृच्छा तुष्टं सत्सरणिमपुनर्जन्मिसुलभम् ॥२२॥

परं प्राप्यं पश्यन् परिचरणहेतुं विगणयन्
परिष्कुर्वन्नाज्ञामनितरशरण्यः शरणयन्।
अनिष्टप्रध्वंसप्रभृतिषु निदानं च कथयन्
मुहुर्देवं लक्ष्म्या सहितमिह भेजे मुनिवरः॥
॥२३॥

पुरा शोकः श्लोकोऽभवदिति नयादित्युपनिष-
न्मुनेः पुण्यश्लोकादजनि नरभक्तेः (तैः) परिणतिः।
व्यपोह्य स्वं भावे हरिचरणसन्तान कलिका-
मविक्षत् योगी यत्तनुमतनुकारुण्यविवशः ॥२४॥

८८) अप्राप्तविषयासक्ते तत्क्लिष्टौत्कट्यमीक्ष्यते।
स्वप्राप्तविषयासक्तमाधिकृत्य किमुच्यताम्॥

टि) दासीसक्तस्य स्वशिरश्छेदेनापि तत्प्राप्तीच्छायां सत्यां प्राप्तविषयासक्तस्य किं वाच्यम्। अतः पुरुषार्थत्वबुद्ध्या स्वदेहत्यागप्रवृत्तिर्युज्यते।

८९) अनुष्ठानाननुष्ठाने न गाहेते उपायताम्।

टि) उपायाधिकारिणोऽनुष्ठानत्वेनोक्तः शक्तित्यागादिः, उपेयाधिकारिणोऽनुष्ठानत्वेनोक्तः प्रेमादिश्च तत्तदधिकारकोटौ निविशते, न तूपायकोटौ, साधनबुद्ध्याऽकरणात्। अन्यथा प्रपन्नस्य दिव्यदेशवासादिरप्युपायः स्यात्। अतोऽस्य देहत्यागस्योपायत्वबुद्धिं विनाकृतस्य शास्त्रोक्तत्वमात्रेण नोपायत्वं शंक्यम्॥

~~९०)~~ अत्राननुष्ठानं-प्रपन्नस्वरूपविरुद्धस्याननुष्ठानम्॥

९०) अनन्योपायतानन्योपेयतानन्यदैवताः।
व्यावयन्तीः प्रवृत्तीर्हि पश्यामः प्रेमशालिषु।

टि) यद्वा उपायः सन्नप्ययं देहत्यागः प्रेमनिबन्धनत्वान्न दोषः दिव्यसूरिषु अनन्योपायत्व विरोधिनो व्रतमडलग्रहणादेः, अनन्योपेयत्वविरोधिनोऽलंकरणादेः स्वातिशयाधानस्यानन्यदेवत्वविरोधिनः कामदेवप्रार्थनस्य च दर्शनात्॥

९१) विज्ञानपाकजाज्ञानमूलकं साध्यतेऽखिलम्।

टि) प्रेममूलकज्ञानमूलको दिव्यसूरीणामाचारः कुतो न दोष इत्यत्राह

९२) सिद्धोपायकृपेः सिद्धमुपेयान्तर्गतं च यत्।
उपायं कार्यकर्तृत्वं प्रतिबन्धुमलं न तत्॥

टि) किमियमतिप्रवृत्तिः सिद्धोपायस्य कार्यकरत्वं न प्रतिबध्नीयादित्यत्र सिद्धोपायकृपाफलभूतभक्तिवृद्धिमूलकत्वात् मद्धर्मितावत् क्रियतइति भगवन्मुखोल्लासहेतुत्वाच्च कैङ्कर्यकोटिगेयं न प्रतिबन्धिका।

९३) साध्याद्नतिरेकीति विलम्बासहमित्यपि।
कारणद्वितयादेव ह्युत्कर्षः सिद्धसाधने।
साध्यप्रावण्यमूलं हि साधने चावगाहनम्।

टि) क्षीरौषधन्यायेन भोग्यतायामुपेयसन्निभत्वं शीघ्रकारित्वमित्येतद्द्वयं हेतुः। स हि उपायान्तराणि हित्वा सिद्धोपायस्यावलम्बनम्। अतस्तीव्रप्रेमसाकृतेयमतिप्रवृत्तिः सिद्धोपायोत्साहयेन्नैव प्रतिबध्नीयात्॥

९४) ये ये चात्मगुणा अस्य प्रजायन्तेऽधिकारिणः।
तेषां प्रधानहेतुः स्यात् प्रावण्यमिदमेव हि॥ स्पष्टम्।

९५) मार्पाल् मनं शुष्प्पेति, कण्णुकेट्टुनुमो नन्दिति।
(स्वामिलग्नं मन इति दृष्ट्वा श्रुतेति गायने।)
परमात्मनि यो रक्त इत्यादिकमपि ह्युच्यताम्॥

टि) महत्त्वोन्मेगिना मनसः व्यामुग्धेलग्नत्वात् स्त्रियस्त्यक्ता इत्युक्तम्।

९६) शठकोपस्वामिनादिव्यदम्पती ष्वर्पितेन्द्रियत्वं स्वतत्त्वानहमित्युक्तं
शमो दमो च मुख्यः स्यात् सर्वेषां [illegible]। स्पष्टम्

सतामित्थं सारं द्रमिडनिगमस्यान्वकथयद्
बहूनां विज्ञानां बहुमतिपदं वेङ्कटकविपतिः।
दिशासौ यत्प्रोणीदृढघटित जैत्रध्वजपटी-
परामर्शश्लिष्यत्प्रतिमत निराबाधनिगमः॥ २५॥
मनुव्यासप्राचेतसपरिषदहो काचिदिपं
सुधासिक्ता सूक्तिः स्वयमुदयमन्विष्यति जवे।
निरुन्धुः के विन्ध्याचलविकटसन्ध्यानट-
जटापरिश्रान्ता पङ्गोरुपरि यदि गङ्गा निपतति॥ २८॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्-
वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
द्रमिडोपनिषत्सारः सम्पूर्णः

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

श्रीमते निगमान्तमहादेशिकाय नमः॥

---

११) उभयोरनयोः सिद्धौ गुरुर्हस्तगतो भवेत्।
गुरौ हस्तगते मूलमन्त्रः करगतो भवेत्।
मन्त्रे करगते श्रीमानीश्वरः प्राप्नुयात् करम्।
ईश्वरे हस्तमायाते प्राप्यभूमिः करस्थिता

वैकुण्ठमानगरं कैयदिति ह्याह पराङ्कुशः।
(वैकुण्ठनगरं हस्तगतमाह पराङ्कुशः) । स्पष्टम्।
98) प्रापकात् प्राप्यलाभः स्यात् मन्त्रः प्रापकलाभकृत्।
मन्त्रलाभस्तु गुरुणा गुरुलाभः शुभैर्गुणैः। स्पष्टम्
99) ऐश्वर्यप्रार्थकानां चोपासनानिरतात्मनाम्
प्रपत्त्याधिकृतानां च शमादिकमपेक्षितम्। स्पष्टम्
100) विशिष्य तु प्रपन्नानामेतदत्यर्थकाङ्क्षितम्। स्पष्टम्
101) निषिद्धविषयत्यागमात्रं पर्याप्तमन्ययोः।
विहितांशेऽपि वैराग्यं प्रपन्नानां प्रकर्षदम्।
टि) धर्मबुद्ध्या स्वदारगमनेऽपि भोग्यताधीरवर्ज्येति अनन्यभोग्यत्व
हानिः स्यादिति अनन्यभोग्यत्वस्वरूपरक्षणार्थं प्रपन्नानां विहितभोग
त्यागः॥
102) ननु जायेत सौन्दर्यात् भक्तिभूम्ना प्रपेदुषाम्।
ज्ञानभूम्ना प्रपन्नानां भगवत्कृपयोदियात्।
अज्ञानतः प्रपन्नानां स्यादाचार्यानुसंहितेः॥
टि) स्वधर्मदारगतौ भोग्यताबुद्धाविव दुर्निवारायां सत्यां धर्मबु-
द्धिहेतुकगमननिषे[illegible]ओ व्यर्थ इत्यत्र भोग्यताबुद्धिहानि
माह॥
103) सौन्दर्यमग्नतां सूते कारुण्यमरुचिं तथा।
आचारो जन्मनयेद्भीतिमिति वैराग्यसंभवः॥ स्पष्टम्
104) प्राचुर्यदृष्टितस्तावदेवं नामाभिधीयते। स्पष्टम्
(सर्वेषु सत्स्वप्यपि प्राचुर्यादेवमीरितम्)
105) अरुचेर्जननार्थं तु दोषदृष्टिरपेक्षिता।
टि) भगवत्सौन्दर्यमग्नानां विषयेषु तुच्छताबुद्धिरुक्ता, सदाचारानुवर्तिनां
भीतिरपि युक्ता, नहि कालादनुभूतेषु विषयेषु द्वेषरूपाऽरुचिः कथमित्यत्रा
ह॥
106) सा न प्रधानहेतुः स्यात् (107) अपि तु प्राप्तता परम्।
टि) अनन्यभोग्यत्वरूपस्वरूपानुगुणत्वमेवाप्राप्तता प्रधानहेतुः।
108) भगवद्विषये चापि गुणदृष्ट्या न गाहनम्।
स्वरूपप्राप्तमित्येव।
टि. भगवदवगाहने गुणदर्शनमिव विरक्तौ दोषदृष्टिर्हेतुरस्तु इत्यत्र दूषणान्
109) वैपरीत्ये ऽनुधीयताम्। [मेव निपटयतितत्रापि प्राप्ततैव हेतुरिति॥
गुणहीन इति भ्रान्तिकाले तत्रावगाहनम्।
न घटेत तथा दोषध्यानकाले च संसृतौ॥
टि) भगवत्सार्वण्यस्य गुणदेहदर्शनमेव हेतुरिति स्वीकारे प्रार्थितका-
ले भगवदनुभवे नागमनेन भगवान् गुणहीन इति भ्रमाध्यवसाये सति
पि स्वीक्षण: पुनः सः पुनः भजत्येव प्रवृत्ति दृश्यमाना नोपपद्येत। विष-
वत्र विरक्त्यनुत्पत्तिर्दृश्यमाना दोषस्य प्रधानहेतुत्वे संसारे दुःखं दोषं पश्यतामपि
भक्तिपारवश्यं भगवद्विषयेऽव्यवलक्षणं [illegible] तस्मान्नातः प्राप्यप्राप्तिरेव हेतुः॥

वादिकेसरि:

अथ श्रीसुन्दरजामातृमुनिकृत द्रमिडोपनिषत्सङ्गति-

रारभ्यते ॥

यत्प्रकारसकलार्थसंपदां व्यञ्जनीं द्रमिडवेदसङ्गतिम् ।

तं द्वितीयशठकोपमन्वहं स्तौमि सुन्दरवराह्वयं मुनिम् ॥

आचार्योदितपद्धत्या द्राविडाम्नायसंगतिम् ।

अभिभास्ये विशेषज्ञैरादराद् गृह्यतामिह ॥ १ ॥

श्रीमान् गुणाम्बुधिरवाप्तसमस्तकाम:

शौरि: शठारिमनुजन्म परिभ्रमन्तम् ।

आकस्मिकेक्षणवशादतिनित्यमुक्त-

बृन्दातृणीकरणशक्तिधरं चकार ॥ १ ॥

आद्ये वयस्यपि ततोऽनुभवन्मुरारि-

प्रस्तन्यपानरसिकश्शठजिन्मुनीन्द्र: ।

आस्थाय मौनमवधीर्य च लोकवृत्त-

मापोडशाब्दमतिवाहितवान् दिनानि ॥ २ ॥

ये राघवे भरतलक्ष्मणजानकीनां

ये गोपसुभ्रुजसुदृशामपि नन्दसूनौ ।

भावा रसैकवपुष: प्रथिता: शठारि-

स्तानेव वा तदधिकान् नुत तत्र लेभे ॥ ३ ॥

110) "आहिलं कोडियेत्येवं" "नान् पिंकुं नयवेनि" ति ।
"अथापि मन्मनस्तास्मिन्" "न वृणे तत्पदः परम्"
आहतु (इत्यूचतु) हि शठाराति (शठजित्) परकालमुनीश्वरौ ।

टि) प्रार्थितकालेऽनुजानाति(?)त्वा च निर्दयत्वादिदोषान् भगवति वदन्नपि
शठजिदाह अथापि क्रूरं मन्मनस्तास्मिन्नेव वर्तते इति । इक्षुसमे त्वयि नि
न्धायमाने सत्यपि निम्बक्रिमिरिवाहं त्वदन्यन्न कामये इति परकाल आह ।

111) मुख्यं नैसर्गिकं दास्यं दास्याद् गुणकृतादपि ।

टि) तर्हि अहमस्यावरो भ्राता गुणैर्दास्यमुपागतः इति कथं लक्ष्मणोक्तिः । त-
त्राह सा न स्वरूपकृतदास्य० यत् पूर्वं अहमस्यावरो भ्रातेत्युक्तेः ।
गुणकृतदास्यमौपाधिकत्वादप्रधानं, स्वरूपकृतं तु न तथात्वात् प्रधानमिति वि
वेकः ।

112) यद्गुणमनस्त्यायै मैथिल्या स्मर्यतामिह ॥
सीताहानसूयां मम पत्यौ भक्तिः स्वरूपकृता । तस्य गुणैर्दुर्वियोजनात्
लोको गुणकृतां मन्यते, किमहं कुर्यामिति ॥

113) स्वप्रवृत्तिः कथं तर्हि भगवद्विषयेऽन्वियात् ।
इति चेदुच्यते तत्र हेतुः प्रावण्यमेव हि ।
कारणं तत्र सम्बन्धः स तु नोपाधिसंभवः ।
किन्त्वात्मसत्तामारभ्य सुदीर्घमनुवर्तते ॥

114) प्रावण्यकार्यनिर्भवो यदा नपठते तदा ।
सा सत्ता हीयते काममतथात्वाय याः क्रियाः ।
संभवन्ति हि ताः सर्वा अवर्ज्या उचिता अपि ।
अतः संघटते सेति सर्वमेतत् समञ्जसम् ॥

टि) 113. इत्थं स्वरूपप्रयुक्तदास्यस्य प्राधान्ये शेषिणा क्रियमाणस्य त-
स्य तस्य दर्शनादरे अतिरिक्ततया अनन्योपाय यत्स्वरूपनाशिका म-
डलग्रहणादिकाऽतिप्रवृत्तिः कथं युज्यते इत्यत्राह प्रवृत्तेर्हेतुः प्रावण्यं त-
स्य शेषशेषिभावसम्बन्धः स च निरुपाधिकः सत्ताप्रयुक्तः, अतः प्रावण्य-
कार्येऽनुभवेऽसति सत्तानाशोन्मुखी भवति, अत आत्मधारणार्थमतिः
त्यक्तायामपि दुस्त्यजाः शेषातिशयवहाः स्वरूपप्रयुक्ता अतिप्रवृत्तयो यु-
ज्यन्ते, स्वरूपसत्ताप्रयुक्तसम्बन्धनिबन्धनप्रेमातिशयात् त्यक्तजलमत्स्य-
न्यायेन नाशोन्मुख नानामुक्तमाधिकारिणामतिप्रवृत्तिः "अत्यन्तभक्तियुक्ता-
नां नैव न शास्त्रं नैव च क्रमः इति० यायान्महनीयैवेति ॥

इति प्रथमप्रकरणं समाप्तम् ॥

अथ द्वितीयप्रकरणम् ॥

115-तः 133 पर्यन्तम् उपायान्तरदोषनिरूपणम् ॥

115) प्रापकान्तरसंत्यागो नाज्ञानाशक्तिहेतुकः ।
स्वस्वरूपविरोधित्व प्रधानतमहेतुकः ॥

टि) विजय त्यागस्य भगवत्परिग्रहस्य च प्रधानहेतुः अप्राप्तता प्राप्तौ चेति
निरूपितचरम् । अथ प्रपत्तिव्यतिरिक्तानां कर्मज्ञानभक्तीनामुपायान्तराणां
त्यागस्य प्रधानहेतुर्निरूप्यते । तत्राज्ञानाशक्ती न प्रधानहेतुः, प्राक् ज्ञान-
भक्ति पारवश्य ... अत्यन्तपारतन्त्र्यरूपस्वरूपविरोध एव ॥

प्रह्लादनारदमुखप्रभवा च भक्तिः
स्नेहस्तथा दशरथार्जुनबान्धवोत्थः।
सर्वे च ते शठजितः पुरुषे परस्मिन्
नानन्दने पदजुषामतिमात्रमासन्॥४॥

इत्थं हरेरनुभवामृतवारिराशि-
रन्तर्मुनेश्शठरिपोरमितश्शरीरे।
सूक्त्या बहिः परिवहन् सुतरां जगन्ति
सद्यः सिषेच जनसंसरणानलानि॥५॥

मालाणितप्रभृतितोऽपि च वत्सलत्वात्
सर्वोपकारचणलाभ्य शठजिन्मुनीन्द्रात्।
वेदश्चतुर्विधतया विदितः स साक्षा-
दाविर्बभूव हि निबन्धचतुष्टयात्मा॥६॥

शब्दस्य संस्कृततया यदि गौरवं स्याद्
बौद्धादिशास्त्रवचसामपि न प्रसङ्गः।
वाच्येन चेत् कथितमुत्तमवाच्यमेषु
भाषानिकर्ष इह तेन न शक्यशङ्कः॥७॥

पुंस्त्वं निशम्य पुरुषोत्तमताविशिष्टे
स्त्रीप्रायभावकथनाज्जगतोऽखिलस्य।
पुंसां च रञ्जकवपुर्गुणवृत्तयापि
शौरेश्शठारियमिनोऽजनि कामिनीत्वम्॥

116) स्वरूपज्ञानरिक्तानामुपायः प्रापकान्तरम्। स्पष्टम्।

117) अपाय एव तज्ज्ञानसंपन्नानां महात्मनाम्॥

118) स्वरूपनाशकत्वेन तस्यापायत्वनिर्णयः॥

टि) स्वप्रवृत्तिरूपं स्वप्रयत्नरूपमुपायान्तरमत्यन्तपारतन्त्र्यरूपस्य स्वरूपस्य [नाशकं हि॥

119) नेरिकाट्टु इति दिव्योक्तिः श्रीशठारेरिहेक्ष्यताम्॥

(मार्गं प्रदर्श्येति सूक्तिः श्रीशठारेरिहेक्ष्यताम्॥)

टि) शठारेराह किं त्वं तद्व्यतिरिक्तमुपायं प्रदर्श्य मां निवर्तयितुमिच्छसीति। निवर्तनं नाम परतन्त्रवस्तुनः स्वतन्त्रकार्ये उपाये प्रवर्त्य स्वस्मात् पृथक्करणम्

120) वर्तते मे महाभीतिरित्युक्त्या भयकारणम्।

यन्माशुच इति प्रोक्तं तत् शोकस्य च कारणम्॥

टि) "कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत। शरीरे च गतौ चापि वर्तते मे महद्भयम्॥" इति जितन्तायामुपायान्तरम् तदनुष्ठानोपयिकदेशकालशरीरादिविषये महाभयं भवतीति वर्णनात् उपायान्तरं भयजनकम्। तथोपायान्तराणि त्यक्तानीत्यनुक्तेन च भगवता माशुच इत्युक्तेः शोकजनकञ्च॥

121) नाङ्गीक्रियेत चेदेवं प्रापकान्तरसंगमे।

प्रायश्चित्तविधानं तु नोपपत्तिं समश्नुते॥

टि) उपायान्तरस्य स्वरूपनाशकत्वाभावे "अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत्" "उपायानामुपायत्वस्वीकारेऽप्येतदेव हि" इति उपायान्तरे प्रवृत्तौ जातायां पूर्वप्रपत्तिस्मरणरूपप्रायश्चित्तं विधीयमानं सुरापानस्येव विरु[असंगतं स्यात्] द्धतां गमयति।

122) मदिराबिन्दुसम्मिश्रहेमकुम्भस्थतीर्थवत्।

अहङ्कारेण सम्मिश्रमुपायान्तरमित्यसौ।

श्रीमुकुन्दकाञ्चीशगुरुसूक्तिरिहेक्ष्यताम्॥

टि) स्वेनैतत्सम्पन्नदूरमपि शुद्धवस्तु स्वतोऽपि दूरमापादयति मद्यबिन्दुः तीर्थजलं स्वतः शुद्धं, स्वर्णकुम्भस्थं किं पुनः, तदपि दूषयति मद्यबिन्दुः, तथा कुम्भस्थानीयमात्मवस्तु भगवदनन्यार्हशेषत्वादितः परमपवित्रम्, तत्स्थं तीर्थजलस्थानीया भक्तिर्भगवदेकविषयत्वात् परमशुद्धा, तामपि दूषयति मद्यबिन्दुस्थानीयोऽहङ्कारः। उपायान्तरे चाहमिदं करोमीत्यहंकारो नियतः॥

123) वराटिकेव रत्नस्य राज्यस्य लिकुचं यथा।

तथा विसदृशं ह्येतत्फलमस्तु तमं प्रति॥

टि) द्वीपान्तरीयाः वराटिकाभूषणधारणव्यसनिनो जनाः रत्नानि दत्वा वराटिका गृह्णन्ति, राजा उपहृतं लिकुचं गृहीत्वा तेभ्यो राज्यं ददाति, तथा भक्तिचपलो भगवान् चेतनगतं भक्तिमात्रमुद्दिश्य महार्घं मोक्षं ददाति, अतो भक्तिः फलविसदृशी।

124) दरिद्रत्वात् प्रदेयं तु स्वात्मनो नास्ति किंचन।

टि) वराटिकादातारो रत्नमिव लिकुचदातारो राज्यमिव हरेर्मोक्षं ग्रहीष्याम इति चेत् न, तत्र तेषां देयं स्वीयं किंचिदस्ति, अस्य स्वकीयमिति न किंचित्, सर्वस्य भगवच्छेषत्वात्॥

125) अथ तद्दत्तदाने तु क्रमेण यदि दीयते।

अनुपायोऽक्रमेणाथ यदि, चौर्यं स्फुटीभवेत्॥

टि) चौले चित्रे दक्षिणेव भगवद्दत्तमेव भगवते दीयतामिति चेत्, भगवदीयमिति धिया दाने ऽनुपायः [illegible] यस्य कस्याप्यदानात्, स्वकीयत्वधिया दाने चौर्यं [स्यात्]

126) भर्तृभोगस्य मूल्यं चेद् दास्यते भार्यया ततः।

यथोभयोरवद्यं स्यात् तथाऽत्रापि न संशयः॥

या प्रीतिरस्ति विषयेषु विवेकभाजां
सैवाच्युते भवति भक्तिपदाभिधेया।
भक्तिस्तु काम इह तत्कमनीयरूपे
तस्मान्मुनेरजनि कामुकवाक्यभङ्गी ॥९॥

या भोक्तसैव विशदानुभवः परस्मिन्
संश्लेष एष गुणरत्नमहाम्बुराशौ।
विच्छित्तिरस्य विरहास्त्विह याङ्गसङ्गा-
लाभन्यथाविरचिता मुनिपुङ्गवस्य॥१०॥

तत्रार्थयन्नवशमं प्रथमे प्रबन्धे
शौरेर्गुणं शठजिदन्वभवद्द्वितीये।
तृष्णामवर्धयत भोक्तुमिमं तृतीये
यावन्मनोरथमलभ्य फलं चतुर्थे॥११॥

कैङ्कर्यमस्य नियमावधि वैर्युपाय-
तत्स्वीक्रियाविषयबाधनिरासने च।
शीलं हरेरधिगताधिगमं शठारि-
स्तुर्यप्रबन्धशतकैर्दशभिर्जगाद॥१२॥

इति द्रमिडोपनिषत्सङ्गतेरूपोद्घातः सम्पूर्णः॥

टि) भर्तृभोगोत्तरं पत्युः सकाशात् पत्न्या उदरपोषणाय मूल्यग्रहणं यथा पतित्वस्य पत्नीत्वस्यापि अवद्यावहं भवति, तथा भगवद्वैलक्षण्यानुभव ... भोगरूपाया भक्तेः मोक्षसाधनत्वापादने शेषं स्वं स्वीकृत्य ... भगवतः तथैव इति कृतनाम्नः स्वस्य नाशः स्यात्। एवमेतदुक्तं केशवसूक्तिरपि वर्तते॥

127) उपायत्वेन वेदान्ताः कथं विदधतीति चेत्।

128) औषधं सेवितुं ये न कामयन्तेऽथ तान् प्रति।
तद्गुडादिषु संमिश्र्य यथा वा संप्रदीयते।
तथौषधसमो विष्णुर्गुडतुल्य प्रवृत्तिषु। एणु
साम्येऽत्रितो व्यधायीति वेदितव्यं विवेकिभिः॥

टि) हितानुशासि शास्त्रमुपासनं स्वरूपविरोधादिदोषवत् किमर्थं विधत्त इति चेत् गुडजिह्विकान्यायेन संसारौषधस्य भगवतः स्वप्रयत्न ... वृत्तिनिवृत्तिपूर्वं सेवनार्थमुपदिष्टे सति अनादि ... स्वयत्नवासनया निबद्धानां चेतनानां कृते वत्सलं शास्त्रं स्वयत्नरूपे उपासने अङ्गतया (ध्येयतया) भगवन्तं संमिश्र्य विधत्ते, यथा तत्र गुडं न रोगनिवर्तकं तथेह उपासनम्, यथा तत्रौषधमेव निवर्तकं तथेह सिद्धोपायो भगवान्, यथा तत्र गुडमिश्रौषधेन विलम्बेन रोगनिवृत्तिः तथेहोपासनेन विलम्बेन संसारनिवृत्तिः; यथा तत्र केवलौषधेन शीघ्रं [तथेह केवलभगवता शीघ्रम्]

129) परहिंसां व्युदसितुं प्रवर्तितमभूदिदम्।

130) पूर्वं चोदितहिंसावत् तदेतत्प्राणकान्तरम्।
विधेस्तथा निषिद्धस्याप्यसाङ्गत्यं न विद्यते।

131) ... शास्त्रविश्वासकृते तत् पूर्वहिंसनम्।
इदं स्वरूपविश्वासकृते तु विधिचोदितम्॥

टि) गुणवत्सु गुणहीनेषु पुत्रेषु वत्सला मातेव तामसराजससात्त्विकेषु वत्सलं शास्त्रं ... मपि स्वतात्पर्यविषये आरोपयितुं लतायाः उपघ्ने आरोपणाय लघुकाष्ठेष्वारोपणवत् श्येनादारभ्योपासनपर्यन्तं साधनकलापं पूर्वपूर्वसाधनत्याजनपूर्वमुत्तरोत्तरसाधनविधानक्रमेण यथाधिकारं हितमनुशास्ति। शास्त्रेषु विश्वासहीनानां तामसानां शास्त्रविश्वासोत्पादनाय श्येनविधिः, राजसानां कृते काम्यविधिः। स्वातन्त्र्यान्यशेषत्वव्यामोहवतां सात्त्विकानां तन्निवर्तनार्थमुपासनविधिः। उपासने प्रवृत्त्य स्वातन्त्र्यमन्यशेषत्वं चागन्तुकं भगवच्छेषत्वमेव स्वाभाविकं रूपं इति ज्ञाने उदिते तं परमसात्त्विकं प्रति प्रपत्तिविधिः। यथा नास्तिकानां कृते विहितः श्येनः काम्याधिकारिणां राजसानां कृते निषिध्यते, तथा स्वातन्त्र्यान्यशेषत्वाभिमानिनं प्रति विहितमुपासनं पारतन्त्र्यशेषत्वज्ञानवतां कृते निषिध्यते। तत् शास्त्रविश्वासार्थम्, इदं स्वरूपविश्वासार्थम्॥

132) तत्तु चर्मणि लीयेत मर्मस्पृगिदमुच्यते॥

टि) अथापि मोक्षफलदमुपासनमभिचारवत्तु न हानिकरमित्यत्राह। अभिचारकर्म देहाभिमानिनः कृत्यं वर्णाश्रमादिविशिष्टवेषविरोधि दुःखोदर्कमित्येव, उपासनं तु अहंकारगर्भं आत्मज्ञस्य कृत्यं भगवदतिशयावहशेषत्वरूपनिष्कृष्टवेषविरोधि भगवत्पारतन्त्र्यरूपस्वरूपनाशकं च। तत् शारीरदुःखदम्, इदं [तु मर्मनाशकम्]

133) एतत्तु दुष्करं च स्यात् कर्मसाध्यत्वहेतुना। स्पष्टम्

134) प्रपत्तिसंज्ञोपाये तु नैतादृग्दोषसंभवः।

टि) उपायान्तराणामुक्ताः स्वरूपनाशकत्वं, अपायत्वं, भयजनकत्वं, शोककजनकत्वं, फलविसदृशत्वं, दुष्करत्वाद्यो दोषाः ... किन्तु अनुपायत्वेऽपि उपायत्वभक्तिपारवश्य ...

१-१- तत्रादिमे तु शतके दशके तदाद्ये
सम्यग्गुणाकृतिविभूतिसमेतमीशम् ।
अध्यक्षयन् परमनुग्रहनस्तदीयात्
तद्दास्ययोजितमनाः शठजिद्बभूव ॥ १३॥

१-२- संसारिणोऽप्यनुजिघृक्षुरसौ दयालु-
रल्पास्थिरेतरपुमर्थरुचिं निरस्यन् ।
तत्त्यागपूर्वहरिभक्तिसुखां कृपाना-
मुद्दीपिनीमुपदिदेश मुनिर्द्वितीये ॥१४॥

१-३- दूरस्थमप्यथ मुनिः कमलासहाय-
मैच्छैस्समुद्गवशतैः सुलभीभवन्तम् ।
आख्याय भक्तिमपि तत्र विधाय तस्य
सेवां च कांक्ष करणत्रयतस्तृतीये ॥१५॥

१-४- तत्काङ्क्षितानधिगमेन मुनिर्विषण्णः
प्राप्तो दशां च हरिभुक्तविमुक्तनार्याः ।
सर्तापराधसहतामवबोध्य दूतैः
शौरेः स्वदोषपरतामलुनाच्चतुर्थे ॥१६॥

१-५- स्वालिङ्गनादिचपले पुरुषोत्तमेऽपि
स्वायोग्यतामभिदधद्विमुखः शठारिः ।
त्रैविक्रमादिचरितं प्रतिबोध्य तेन
नीतः स्वशीलवशतामथ पञ्चमेऽभूत् ॥१७॥

बुद्ध्यर्हतास्य एक एव दोषो वर्तते ॥

135) आत्मयाथात्म्यविज्ञानकार्यत्वात् प्राप्त आत्मनः ।
"शित्त वेण्डैति शठजिद्दिव्यसूक्तिप्रकारतः ।
भाटितं यमिति श्रीमच्छठजित्सूक्तिरीतितः ।
क्रियानिवृत्तिसाध्यत्वात् सुकरोऽप्य भवत्यसौ ।

टि) पारतन्त्र्यस्वरूपज्ञानपूर्वकत्वात्प्रपत्तिः स्वरूपानुरूपा स्वप्रवृत्तिनिवृत्तिसाध्यत्वात् सुकरा च ॥

136) प्रपन्नविषयत्वेन वैभवानुगुणं यथा ।
तथा न सुशकं तस्मिन्नुपायत्वसमर्पणम् ॥

टि) स उपाय इत्यध्यवसायेन स्वयत्नत्यागः कथं युज्यते, तत्प्रसादनार्थं किमप्युपहरणीयं किं नेति चेत्, तद्योग्यतानुगुणं ह्युपहरणीयं, तच्च न शक्यं तस्य पूर्णत्वात् ॥

137) सन्तोषोऽभिमुखीभावसूचकक्रियया परम् ।

टि) तर्हि तस्य सन्तोषः कथं जायेतेति चेत्, अनादेः कालात् यत्किञ्चिन्निमित्तीकृत्य पृथग्भूयाश्रितेन पराङ्मुखस्याभिमुख्यमात्रेण स तुष्यति ॥

138) दुराराधत्वधीजन्यवैमुख्यं विनिवर्त्य च ।
प्रावण्यातिशयं ह्येव प्रसूते पूर्णता हरेः ॥
("अनादरं विनाऽऽसत्त्या प्रवृत्तिः पूर्तिहेतुका" इति समीचीनोऽनुवादः)

टि) तस्य पूर्तिं दृष्ट्वा सम्पूर्णोऽकिञ्चनैः कथं प्रसाद्यतेति चिन्तया किमयं न निवर्तेतेत्यत्राह न निवर्तेत, स स्वतः पूर्णः नास्मत्तः काङ्क्षी, अतः इदमुपहृतं इदं नोपहृतमित्यविमृश्य उपहृतमित्येतावतैव तुष्यन् कार्यं कुर्वीतेति अत्यासक्तिपूर्वमाश्रयणस्यैतोपयुक्तं पूर्णत्वम्। यद्वा= भगवतः पूर्तिः तं कथं सन्तुष्यन्तमनुमन्येत, उपेक्षां कारयित्वा तं किं न निवर्तयेदित्यत्राह नेति। अयं यावन्नोपहृतवान् अत उपेक्षणीयमिति तस्य धियं नोत्पादयेत् पूर्तिः किन्तु, आभिमुख्याधिकं किमनेनास्मभ्यं कार्यम् इति धियमुत्पादयन्त्य पूर्तिः तं जीवरक्षणे सोत्साहं प्रवर्तयेत् पूर्तिगुणः ॥

139) "पत्रं पुष्पं फलं तोयम्" "अन्यत् पूर्णादपाम्" इति ।
"पुकै पूवे" इति श्रीसूक्त्यर्थश्चिन्त्या भवद्भिः ॥
"अर्घ्यो धूपः पुष्पम्" इति श्रीसूक्त्यर्थो विचिन्त्यताम् ॥

टि) तस्याल्पसन्तोषित्वे प्रमाणान्याह, "पत्रं पुष्पम्" प्रसिद्धम्, "अन्यत् पूर्णादपां कुम्भादन्यत् पादावनेजनात् । अन्यत् कुशलसंप्रश्नान्न चेच्छति जनार्दनः" इदं पाण्डवदूतं श्रीकृष्णं सुष्ठूपचरितुकामं धृतराष्ट्रं प्रति सञ्जयवचनम्, सर्वेण पेयं जलं मधुरे शीतीक्रियते किल, स पूर्णस्तत्परतो निष्पीयताम्, नाधिकमपेक्षते, सामान्यशास्त्रविहितमतिथिपादप्रक्षालनं तद्विषये क्रियताम्, आगतं प्रति कुशलप्रश्नः लोकाचारः किल, अयं तद्विषये क्रियताम्, नेतोऽधिकं सोऽपेक्षते, "पुकै पूवे" इति सूरिवचनम् ॥

140) व्याजं प्रदर्श्य चाहूय व्याजस्यैव प्रदानवत् ।
फलसाधनयोर्नैव भेदः (141) तस्मात् सुखात्मकः ॥

टि) 136तः एतावत् प्रासङ्गिकम्, अथ उपायान्तराणामिव प्रपत्तेः फलवैसादृश्यं नेत्याह व्याजं प्रदर्श्य परं वशीकृत्य तस्मै तस्यैव भोज्यतयाऽर्पणे यथा फलसाधनयोर्न भेदः, तथेह भगवान् सुन्दररूपप्रदर्शनेन जीवमाकर्षन् उपायभूतः प्राप्तस्तस्यैव अनुभाव्यतया दाने नोपेयश्चेति फलसाधनभेदाभावात् इयमुपायवरणरूपा प्रपत्तिः न च दुःखरूपा, प्रत्युत सुखरूपा, यद्वा- अञ्जल्यादिरूपा प्रपत्तिरेव भगवद्वशीकरणे साधनीभवन्ती फलदशायामपि शेषवृत्तिरूपेति न फलसाधनभेदः ॥

— 142तः 178 पर्यन्तं स्वगतस्वीकारानुपायत्वपरगतस्वीकारोपायत्वयोर्निरूपणम् —

142) अयं हि चेतनो यदा तमीश्वरं हि लिप्सते ।
[illegible] साधनीभवत्यहो ॥

१-५- दास्येषु देशसमयाङ्गकलापकर्तृ-
द्रव्यादिना न नियमः पुरुषोत्तमस्य।
भक्तिः परं बहुमता तत एव सोऽयं
स्वाराध्य इत्युपादिदेश मुनिस्तु षष्ठे ॥१८॥

१-६- पुंसः स्त्रियः प्रणयिनः पुरुषार्थसीम्नो
निन्दन् फलान्तरपराञ्जिरवद्यगन्धात्।
तद्रस्यताहगुणजातसमर्थनेन
तत्सेवनं सरसमाह स सप्तमेन ॥१९॥

१-८ कौटिल्यवत्सु करणत्रितयेऽपि जन्तु-
ष्वात्मीयमेव करणत्रितयैकरूप्यम्।
सन्दर्श्य तानपि हरिः स्ववशीकरोती-
त्याचष्ट सान्द्रकरुणो मुनिरष्टमेन ॥२०॥

१-९- आमार्जनानुभवकौतुकिनोऽस्य शौरि-
रात्मोपभोगरुचिमभ्यधिकां दधानः।
देव्यादिवद्रसयिता क्रमशोऽखिलाङ्ग-
न्याशिश्रियत्तदवदन्नवमे शठारिः ॥२१॥

१-१० इत्थं श्रियःपतिकृतस्वसमस्तदेह-
संश्लेषलक्षणफलस्य सुदुर्लभस्य।
भक्त्यादिवत् स्वगणनेऽपि च तत्प्रसादा-
न्निर्हेतुकत्वमवदद्दशमे शठारिः ॥२२॥

टि = एतावता प्रपत्तौ उपायान्तरगतदोषाभावं गुणपूर्तिं चोक्त्वाऽथास्या स्वगतस्वीकाररूपाया अनुपायत्वमाह, स्वामिना स्वस्य रक्षणे इव तस्मिन्नेव स्वात्मानं परिहृति सति दर्शनमात्रेऽपि कृतोऽयं चेतनः स्वं फलप्राप्त्यारं मत्वा स्वस्वीकारेण स्वतन्त्रो तं प्रेरयेच्चेत् तस्या निष्कृत्यायां सत्या प्रकरीत्याऽ(भु)क्तमापि प्रपत्तिर्न साधनम्॥

143) यदा तु सर्वलोकनाथ एनमीप्सति स्वयम्।
तदा तु नैव पातकं विरोधनाय कल्पते॥

टि) स्वामी स्वतन्त्रः स स्वं परतन्त्रमेनं स्वेच्छया प्राप्तव्यतया संकल्पयेत् चेत् पातकमपि न प्रतिबन्धकम्। "चितः परमचित्कृतेः प्रपत्तिरपि नोपधिः। विपर्यये तु नैवास्य प्रतिबन्धाय पातकम्" इत्यत्र भाव्यं

144) एतद् द्वयं श्रीभरते गुहे चस्फाम किल॥ स्पष्टम्॥

145) भरतस्य तु साद्गुण्यं दोषभावमविन्दत।
निषादपतिदौर्गुण्यं गुणरूपमभासत॥

टि) विवृणोति = भगवतोऽभिषेकं स्वस्य स्वरूपानुरूपदास्यलाभेनोज्जीवनं च वहोः कालान्मनोरथयता भरतेन दूरादेव महार्ता कृता प्रपत्तिर्भगवदभिप्रायाद् दोषरूपा जाता। भगवता स्वयमेव दोषाकरस्य गुहस्याङ्गीकारसमये तद्गतदोषमेवोपहारं मत्वाऽङ्गीकरणात् तद्दोष एव गुणो जातः। "यत् यत् प्रियं तदिह पुण्यमपुण्यमन्यत्" इतिहि तल्लक्षणम्॥

146) सर्वेषामपराधानां प्रायश्चित्तात्मिका हि या।
प्रपत्तिरपि दोषः सन् (मन्तुः सन्) क्षामणं खल्वपेक्षते॥

टि) प्रपत्तेर्भगवदनभिमतत्वेऽपराधत्वमुक्तम्। अथ प्राचीनजीवचरितानुरोधेनाप्यपराधत्वमाह। दोषाकरे चेतने प्रपन्ने तं प्रसन्नमापादयन्तीं सर्वापराधप्रायश्चित्तरूपां प्रपत्तिं गद्येऽनुष्ठितवान् श्रीभाष्यकारः स्वपूर्वसूक्तेर्(?)नुसंहिते प्रपत्तावप्यपराधकोटौ भासमानायां सत्यां हमेव मातेति क्षमोपयिकनानासंबन्धवर्णनपूर्वकं तस्मात् प्रणम्येति श्लोकेन निर्भयं श्रीसन्निधौ कृतो [illegible]ऽयं प्रपत्तिरूपोऽपराधः क्षन्तव्य इति प्रार्थयामास किल। अतः स्वशरणवरणपरामर्शे क्षामणीयमनुकोटौ किलेयमस्ति॥

147) चिरादन्यपरा भार्या लज्जाभयविवर्जिता।
आसाद्य भर्तृसान्निध्यं मां स्वीकुर्विति काङ्क्षति।
इति यत् तत्सधर्मा स्यात् न्यासः चेतनकर्तृकः॥

टि) बहोः कालात् भर्तृसंबन्धं निराकृत्य व्यभिचारं कुर्वती स्त्री, एतादृशी अहं तस्य पुरतः कथं गच्छेयमिति लज्जां, अद्य यावत् कृतं सर्वं वृत्तं दृष्टवानपस्य "इदानीं मामेतापेक्षते कथम्" इति दण्डयेत चेत् किं कार्यमिति भयं च हित्वा भर्तारमुपसृत्य मां स्वीकुर्विति अपेक्षेत चेत् यथापराधो भवति। तथा भागवतसम्बन्धं हित्वाऽन्यनादेः कालादन्यपरो जातोऽयं चेतनः स्वपूर्ववृत्तानुसन्धानजलज्जो स्वतन्त्रः स दण्डयेत चेत् किं कार्यमिति भयं च हित्वा निःसंकोचं तत्सन्निधौ गत्वा मां स्वीकुर्विति प्रार्थयेत चेदिदं शरणवरणमप्यपराध एव। एतावता स्वगतस्वीकारानुपायत्वं परगतस्वीकारस्योपायत्वं च प्रतिष्ठापितम्॥

148) पारतन्त्र्यात् कृपाधीनात् स्वातन्त्र्यायत्तसंभवात्।
पारतन्त्र्यं बलिष्ठं स्यात् (149) नायमात्मेति हि श्रुतिः॥

टि) प्रपन्नविषये ईश्वरस्य स्वतन्त्रस्यापि पारतन्त्र्यं प्रपत्तिप्रसूतकृपाहेतुकम्, निर्हेतुककृपया स्वेनाङ्गीकृतानां विषये पारतन्त्र्यं स्वस्वातन्त्र्यहेतुकम्, पूर्वं स्वातन्त्र्येण बाध्यतापि, परं तु नितरामिति स्वगतस्वीकारात् परगतस्वीकारो विशिष्यते। अयं नायमात्मेति मन्त्रदत्तोऽपि विशेषः

150)

२-१- पूर्वानुभूतमुरवैरिगुणप्रवृद्ध-
तद्वाहयसंगमरुचिस्तदलाभखिन्नः।
सर्वानपि स्वसम दुःखिन एव जाता-
नाह द्वितीयशतकस्य शठारिरादौ ॥२३॥

२-२- संश्लिष्य दुःखशमनान्मुदितः प्रसङ्गा-
तन्मूलमब्जनयनस्य महेश्वरत्वम्।
आहान्वयादितरतोऽपि मनुष्यभावे
पौराणिकोक्तनयतश्शठजिद्द्वितीये ॥२४॥

२-३- अन्तस्थसर्वरसमम्बुजलोचनस्य
संयोगरूपमवगाह्य सुखामृताब्धिम्।
तद्दैशिकप्रथमसूरिगणैकदास्यात्-
सङ्गो ममेत्यकथयत् स मुनिर्द्वितीये ॥२५॥

२-४- तत्प्रार्थितानधिगमेन समुत्थितार्ति-
रग्रे हरेः परमुखेन यथा विधेयम्।
आर्तेर्निवेदनमपाकरणार्थनं च
मूर्च्छां तथा पुनिरगान्महतीं चतुर्थे ॥२६॥

२-५- आगम्य सूरिसहितस्समपाकृतार्ति-
रत्युज्ज्वलं मरकताकृतिसान्निभाङ्गः।
ईशः प्रफुल्लकमलाक्षिकराङ्घ्रिरासीत्-
तत् पञ्चमे स कथयन्मुनिरानन्द ॥२७॥

150) अपेक्षानिरपेक्षः सन् स्वीकारोऽयं परात्मनः।
वात्सल्ये निषेधाधिपतौ च समपद्यत ॥

टि) अयं परगतस्वीकारः भगवता स्वयमेव गंगाणंपातीरमेत्यापेक्षणरहितयोरपि हनूम

= 151) —— 151-तः 151 पर्यन्तं द्वयोः पुरुषकारावश्यकता — [द्वयोः स्वीकरणं सिद्धः
यान् पुरस्कुरुते जीवस्तानेव भगवानपि।
विभीषणाभीतिदानप्रसङ्गे चैतन्निरीक्ष्यताम् ॥

टि) स्वतन्त्रो जीवाङ्गीकारी ईश्वरः हनूमतः स्वीकारे लक्ष्मणं गुहस्वीकारे सीतां च
यथा पुरुषकारीकृतवान् तथा किमन्यत्र सदृशमिति चेत्, जीवैः पुरस्क्रियमाणा भगवतापि पुरस्क्रियन्त इत्येतत् विभीषणस्वीकारेऽपि स्फुटं, निवेदयत मां क्षिप्रमिति विभीषणपुरस्कृतेषु वानरेषु मुख्यस्य सुग्रीवस्य आनयैनं हरिश्रेष्ठेति भगवतापुरस्करणात्। रावणेन हरणकाले भूषणादिपातनपूर्वं सीतया सुग्रीवादीनां कटाक्षणात्, लङ्कायां विभीषणो राममात्रयत् [illegible] अपि।
[श्रीपुरुषकारः

152) द्वयोरेव पुरस्कारः स्वस्वदोषाणनुत्तये।

टि) निरुपाधिकशेषत्वात् चेतनः स्वयमेवाश्रयितुमलम्, निरुपाधिकशेषित्वादीश्वरः स्वयमेवाङ्गीकर्तुमलम्, किमर्थमुभाभ्यां पुरुषकारस्य पुरस्करणमिति चेत्, अनादेः कालात् वैमुख्य विषयान्तरपरत्व भगवदाज्ञातिलङ्घन रूप स्वदोषदर्शिनीश्वरेण कोपस्याकरणार्थं जीवेन पुरुषकारः पुरस्क्रियते, चेतनेन सह दुस्त्यजे सम्बन्धे सत्येव ईश्वरेण यथाकर्म दण्डनमवश्यम्भावी यत् कृतं तस्य दोषस्य दर्शनेन जीवस्य वैमुख्या भावाय ईश्वरेण पुरुषकारस्य पुरस्कारः ॥

153) स्वरूपसिद्धिश्चैतस्मादित्येतत् पारमार्थिकम्।

टि) उभाभ्यां पुरुषकारपुरस्करणात् [illegible]: उभयोः स्वरूपमपि सिद्ध्यतीति अपि फलम्, भागवतपारतन्त्र्यं जैवं स्वरूपं आश्रितपारतन्त्र्यमैश्वरं स्वरूपं च सिद्धम् [ति।

154) औपाधिकं च नित्यं च पारतन्त्र्यं द्वयोर्हि हि।

टि) जीवानां भागवतपारतन्त्र्यं भागवत इमे इति भगवत्सम्बन्धहेतुकत्वादौपाधिकम्, उपाधेर्नित्यत्वान्नित्यं च। ईश्वरस्याश्रितपारतन्त्र्यं माश्रिता इमे इत्याश्रयणोपाधिकत्वात् औपाधिकं, उपाधेर्नित्यत्वान्नित्यं च ॥

155) अनित्यमुभयोः पारतन्त्र्यं नश्येदनेन हि ॥

टि) अन्यदपि फलं पुरुषकारपुरस्करणस्येदं यत् जीवेश्वरयोः कर्मपारतन्त्र्यं नश्यतीति। स्वकृतमवश्यं भोक्तव्यमिति जीवस्य कर्मपारतन्त्र्यम्, यथाकर्म फलं देयमितीश्वरस्य कर्मपारतन्त्र्यम्, उभयमप्यनित्यं यावन्मोक्षमेवानुवृत्तेः। पुरुषकारः ईश्वरस्य कोपं शमयित्वा जीवस्य समाधानं कृत्वोभयं नाशयति।

156) स साक्षिकमिमं बन्धं निन्होतुं नार्हतस्त्विमौ।

टि) अनादेः कालात्स्वतन्त्रो विषयप्रवणो जीवोऽयं खलु समाश्रयणं स्वीकृतवान्, अतः प्रकृतिस्थत्वात् दुर्वासनावशादिमं रक्ष्यरक्षकभावसम्बन्धं निराकुर्यात् यदि, यदि च निरङ्कुशस्वतन्त्रो यथा कर्मफलदानार्थं जीवं लीलारसे विनियुङ्क्ते ईश्वरः इमं सम्बन्धं निराकुर्यात् तर्हि किं कार्यमिति चेत् न, अयं सम्बन्धः पुरुषकारसाक्षिकत्वादुभाभ्यां निराकर्तुं न शक्यते ॥

157) न लभेन्, [illegible] इति सूक्तौ प्रपन्नस्य (
मां त्यक्ष्यत्यपीति श्रीकमलस्त्री प्रियेति च)
[illegible]

२-६- नीचं च मामधिगतोऽयमिति स्वशक्त्या
जातां हरे स्वबिरहागमनेऽतिशङ्काम्।
षष्ठे निरस्य दृढसङ्गगिरा शठारि-
-रात्मान्वयिष्वपि तदादरतोऽभ्यनन्दत् ॥२८॥

२-७- ते कैशवाभियतनामभजन्त हन्त
ये मामका इति वदन्नधिसप्तमं सः।
तस्य स्वरूपरूपगुणचेष्टितवाचिनाम-
भूतद्विषत्कृसुरवरा मुमुदे मुनीन्द्रः ॥२९॥

२-८- आत्मान्वयिष्वपि हरेः प्रियतामवेक्ष्य-
सतस्मिनः स्वजनयन् मुनिरष्टमेन।
मोक्षप्रदत्वमुपदिश्य तदाभिमुख्य-
लाभात् स्वलाभमधिकं बहुमन्यते स्म ॥३०॥

२-९- मोक्षादरं स्फुटमवेक्ष्य मुनेर्मुकुन्दे
मोक्षं प्रदातुमसदृक्षफलं प्रवृत्ते।
आम्रेडमस्य पदकिङ्करतैकरूपं
मोक्षाख्यवस्तु नवमे निरणायि तेन ॥३१॥

२-१०- एतावितार्थितमिहैव हरिः प्रदातु-
-मासेदिवान् वनमहीध्रमित्यवेक्ष्य।
प्राप्यं तमेव च तदन्वयिनां च सर्वं
प्राचीकशत् स दशमे दशके मुनीन्द्रः ॥३२॥

टि) नन्वेवं लक्ष्मीं कथं त्यजेत् इति प्रथमगाथा नीलायां पुरुषकारभूतायां सत्या नित्यसूरिमध्ये मामङ्गीकृतवान् सर्वशक्तोऽपि मां त्यक्तुं न प्रभुरिति प्रतिपादनात् भगवानस्मत्सम्बन्धं न निराकुर्यादित्यत्र प्रमाणम्। द्वितीयगाथा, महालक्ष्म्याः प्रियत्वात् तत्परिग्रहे मयि प्रीत्या बहूपकृत्य मयि संश्लिष्य तां प्रापकत्वेन अभिव्यक्तत्वात् चेतनस्य संबन्धं न निराकुर्यादित्यत्र प्रमाणम् ॥

१५८) श्रीशब्दे कर्मणि व्युत्पत्त्युपादाने तु सेवने।
कर्तृसंकोचराहित्यं स्वरूपगुणसंगतम्।
अत्र चिन्तयितुं योग्यमिति प्राहुर्मनीषिणः ॥

टि) ससाक्षिकसम्बन्धादुभयोर्जीवे पुरुषकारं प्रत्युभयोर्नित्यपारतन्त्र्यं हेतुरिति प्रमाणमाह शेषत्वात् स्वरूपात् जीवैः श्रीयते, प्राप्यत्वाद् गुणादीश्वरेण श्रीयते इति श्रीशब्दस्य कर्मणि व्युत्पत्तौ कर्तृसंकोचराहित्यमुभयोः पारतन्त्र्यमानम्

१५९) घटकान्वयनैयत्यमधिकारिद्वयस्य च।

टि) अपराधक्षामणार्थं अज्ञानाधिकभक्तिपरवशानां त्रयाणां पुरुषकार आवश्यकः यद्वा ऐश्वर्यार्थिकैवल्यार्थिभगवच्चरणार्थिनामपि पूर्ववत् आवश्यकः ॥

१६०) स्वस्मै स्वेनेप्सितं भोग्यः पापवत् प्रतिबन्धकम्।

टि) शेषिणि भोगदशायां व्यामोहात् नैच्येन व्यवहृति सति स्वशेषत्वरक्षणार्थं प्रहृत्या स्वेप्सितमानं शेषत्वात् अनादिस्वातन्त्र्याभिमानवद्भोगप्रतिबन्धकम्

१६१) सौन्दर्यपि धृतः चोलः समाश्लेषं रुणद्धि हि।

टि) शेष्यभिमतमात्मनोऽलङ्कारभूतं शेषत्वं कथं भोगविरोधीति चेत् सौन्दर्यार्थं धृतः पत्यभिमतः चोलो भोगदशायामालिङ्गनविरोधी यथा, तथेदमपि स्यात्।

१६२) हारोऽपि नार्पितः कण्ठे इति श्लोकोऽत्र चिन्त्यताम्।

टि) सौन्दर्यहेतुरनुभवविरोधीत्यत्र "हारोऽपि नार्पितः कण्ठे स्पर्शसंरोधभीरुणा। आवयोरन्तरे जाताः पर्वताः सरितो द्रुमाः" इति रामवचनं मानम्। श्रीकृष्णेति निङ्ग्यत्यय।

१६३) पुण्यवत् पारतन्त्र्यं च पराङ्गभञ्जकम्।

टि) तर्हि किं पारतन्त्र्यं समीचीनमित्यत्राह शेषत्वमिव भोगदशायां प्रतिघ्नकं दानरोधकं अचिद्वदवस्थानहेतुभूतं पारतन्त्र्यमपि भोगप्रतिबन्धकम्

१६४) शेषत्वादिवदेव स्याद्देहो ह्यासनमप्यरिः।

टि) आत्मनोऽन्तरङ्ग निरूपकगुणौ शेषत्वपारतन्त्र्ये यथा भोगरात्रू, तथा चेतनेन सनिर्बन्धं कार्यमाणा प्रकृतिसंबन्धनिवृत्तिरपि कंचित्कालं सदेहमेनं स्थापयित्वा मुमुक्षोः शीघ्रतरस्य भोगविरोधिनी ॥

१६५) भूषादिकमनुद्दिश्य मालिन्यं हि प्रियं भुवि।

टि) प्रकृतिसम्बन्धदोषयुक्ते परिहृते आत्मनि भोग्यमिति दोषनिवृत्तेरनभिमतत्वं दोषस्याभिमतत्वं कथमित्यत्राह लोके विषयिणामभिमतविषयैः कल्याहेतुभूषणमनभिमतं मालिन्यमभिमतं हि दृश्यते इति ॥

१६६) स्नानं रोषस्य जनकमिति वाग्नि हृ वीक्ष्यताम्।

टि) कारावासक्लेषदिग्धो रामस्य सीतास्नानं रोषजनकं ह्यासीत्। अत एव स आह "दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढम्" इति ॥

१६७) वध्ज कूलवन्, मङ्गवो द्विधे तत् सूक्तिद्वयं तथा।
(भतारकभोर इति नारायेति द्वयं तथा)

टि) विषयिणां मालिन्यमित्यं मलिनदेह ईश्वरस्याभिमतः क्व दृष्ट इति चेत शठकोपसूरिः १०.७.१तः १०.७.१० पर्यन्ते भगवतः सशरीरं स्वं चैकं नेतुमिच्छायां सत्यां नैवं कार्यम् ... द्वितीये शरीरं नाशयेति द्वयं तथा ... नायं ... किल ॥

३-१. आद्ये तृतीयशतकस्य वनाद्रिभर्तु-
रापादमौल्यवयवाभरणाभिरूप्यम् ।
ब्रह्मादिवागविषयं च महाप्रभावं
सौन्दर्यमग्नहृदयश्शठजित्प्रशंस ॥३३॥

३-२. संकोचितस्वकरणः स हरिं यथेष्टं
भुञ्जे न चाहमिति भिन्नमतिः शठारिः ।
आश्वासितश्च हरिणा स्वमहत्तयैव
भोगेष्वसक्तिरिति तत्कथितं द्वितीये ॥३४॥

३-३. सर्वत्र सर्वसमये सकलास्ववस्था-
स्वभ्यर्थयन् निखिलदास्यरसान्मुनीन्द्रः ।
श्रीवेङ्कटाद्रिनिलयस्य परस्य पुंसो
निःसीमशीलगुणमप्यवदत्तृतीये ॥३५॥

३-४. सर्वं जगत् समवलोक्य विभोः शरीरं
तद्वाचिनश्च सकलानपि शब्दराशीन् ।
तान् भूतभौतिकमुखान् कथयन् पदार्थान्
दास्यं चकार वचसैव मुनिश्चतुर्थे ॥३६॥

३-५. पूर्णेन दास्यविधिना पुरुषार्थसीम्ना
हर्षप्रकर्षविवशः खलु पञ्चमे सः ।
आनन्दनैरविकृतान् विनिनिन्द सर्वान्
शौरेर्गुणैस्तु विकृतान् प्रशशंस भूयः ॥३७॥

१५९) दृष्टौ यद् धारणं ... काश्चिज्जनं त्वकामेनानयात् ।
बुभुक्षते स देहं तु ज्ञानिनं भक्तवत्सलः ॥

टि) न केवलं अभिमतविषयमालिन्यन्यायादादरणीयत्वं, किंतु ज्ञानपरिमलमस्मिन् शरीरे विकसतीति हेतोरप्यादरणीयता, यथा परिमलतत्वज्ञाः हृदि निराकृताः परिमलं ... तथा ज्ञानवसितशरीरवन्तो ... भगवान् अनुबुभुक्षति ॥

१५९) परमार्तस्य पुंसो ... शरीरस्थितिकारणम् ।
तच्छरीरमहाकामि ... भगवत्कामनानयात् ॥

टि) तीव्रभगवत्प्रेमप्रयोजकपरमार्तिमतो ... शरीरस्थितेः प्रयोजकं न प्रारब्धकर्म, सर्वपापेभ्यो मोक्षयिष्यामीति तेन प्रतिज्ञानात्, किं तु शरीरैतद्बुभुक्षारूपा भगवदिच्छैव हेतुः ॥

१६०) सर्वेषां दिव्यदेशेषु क्रियमाणं महादरम् ।
तिरुमालिरुञ्चोलै ... गाथाकीर्तितरीतितः (श्रीण्या ... इत्येतं गाथेति पाठः)
एतच्छरीरैकदेशे कुरुते भक्तवत्सलः ॥

टि) सर्वेषु दिव्यदेशस्थाना ... इत्य परमेतच्छरीरे स करोति, तिरुमालिरुञ्चोलै पर्वतं क्षीरसमुद्रं ... अभ्यधा ॥

१६१) वासस्साधनमन्यत् सु साध्यं शठहृदि स्थितिः ॥ (... शठार्यकृतात् ॥)

टि) दिव्यदेशवासाभिनिवेशस्य ज्ञानिशरीरवासाभिनिवेशे महान् विशेषः, दिव्यदेशवासे चेतनसुधारणाविहात् साधनम्, सुधृतस्तु चेतनहृदयवासलाभस्तु तत्फलम्, अतो महान् विशेषः ॥

१६२) "कल्लुं कडलुम्" इत्यादिरीत्या सिद्धे फले ततः । "शिल्लं समुद्रं" ... ॥
आदरो दिव्यदेशेषु भवसल्पतरो हरेः ॥

टि) दिव्यसूरिहृदयवासे लब्धे भगवान् क्षीराब्धिप्रभृतिदिव्यदेशवासे स्वादरो ह्रसतीति

१६३) दूलङ्की ... निडेलिलापपेतार्थनीयता । बालालयं न त्यजेः सूर्यक्रमम् ॥

टि) मद्हृदयप्रवेशार्थं बालालयायमानेषु दिव्यदेशेषु वासं न त्यजेरिति तदाभक्तेन प्रार्थनीयं भवति ।

१६४) स्व प्राप्यभूतस्वस्मी ... तिगोचरताबलात् ।
कान्तिस्या ... तत्स्तेषु भगवत्प्रीतिपात्रता ॥

टि) ईश्वरस्य दिव्यदेशावासात् चेतनहृदयवासस्यात्यन्ताभिमतत्वे पुनस्तत्र वासस्य को हेतुरिति चेत्, स्वप्राप्यभूतचेतनाभिमता इति हेतोः एतद्वासादेव चेतना लब्धा इति कान्तिस्याच्चे तेऽ ईश्वरस्याभिमताः ॥

१६५) तस्माद्दोषापगमवद् विरोधी चान्तरो गुणः ॥

टि) अस्मद्दोषनिवृत्तिः स्वरूपप्रकाशोपयिकत्वेऽपि दोषबुभुक्षुणेश्वरेणानभिमतत्वात् सा दोषनिवृत्तिर्यथा परानुभवविरोधिनी, तथा पारतन्त्र्यमात्मगुणोऽपि परानुभवविरोधी भवति ।

१६६) बुभुक्षु भगवद्बुद्ध्या दोषो दोषनिवर्तनम् ।

टि) मालिन्यं विनिवर्त्य स्वात्मानं पत्ये समर्पयितुमिच्छन्त्या कामिन्येव आगन्तुकदोषनिवृत्तिवृत्तिपूर्वं शुद्धं स्वस्वरूपं भगवते विनियोज्यमिति ... कृत्वा चेतनेन क्रियमाणा दोषनिवृत्तिः सदोषमेनं बुभुक्षोः परम ... भोगविरुद्धत्वात् तद्दृष्ट्या दोषो भवति ॥

१६७) स्वयत्नसाध्यं श्रेयस्तु क्रयक्रीतपयस्समम् ।
भगवत्कृपिजं श्रेयः स्तनस्नुतपयस्समम् ।
इति श्रीकुरुकाधीशगुरुवर्यस्य भाषितम् ॥

टि) स्वयत्नसाध्यश्रेयसस्त्याज्यत्वे भगवत्कृपिजश्रेयस उपादेयत्वे च कुरुकाधीशवार्ता, एवं क्रयक्रीतपयोवत् औपाधिकं विरसं सम्प्राप्यं च । उत्तरं इदमस्य भवतु इति स्वेच्छया प्रदीयमानं श्रेयः स्तन्यवत् निरुपाधिकं सरसं प्राप्तं च भवति ॥ इति ॥
(१६७ तः १२० पर्यन्तं स्वेन ... स्योद्दिधीर्षानिर्थपर्यवसायिनीति निरूपणम्)

१६८) स्तन ... यं पित्रोर्हस्तादर्शम सौनिके ।
तदर्पणसमं स्वस्य स्वयं श्रेयोऽधिकीर्षणम् ।

टि) स्वयं स्वश्रेयःसंपादनार्थं ... क्रियमाणोऽनर्थपर्यवसायी, प्राप्तेन आ... नारायणेन तस्य श्रेयसि संपाद्ये सति, अतथा विपरीतेन स्वेन श्रेयः संपादनोद्योगः मातापितृसकाशाद्बुद्धीत्वा शिशोः निःशंकोच्छहननं मांसविक्रयरतसौनिकहस्ते ... इव दुर्नयपर्यवसी, अतो स्वचेतनस्य ... ... पितास्तु ... इति सिद्धम्

३.६- तान् निन्दितानपि विहातुमसावशक्तः
शौरेर्दुरासदतया विमुखान् विचार्य ।
अर्चावतारसुलभत्वमुवाच तेषा-
मेवं च तेषु विमुखेषु शुशोच षष्ठे ॥३८॥

३.७. तच्छोकशान्तिविधये हरिणा प्रसादा-
दाविष्कृतान् स्वगुणचेष्टितभोगशीलान् ।
आलोक्य वैष्णवजनांन्मुनिरात्मनाथान्
आख्याय तानतिजहर्ष च सप्तमे सः ॥३९॥

३-८.. षष्ठे बहिर्नयनतो हरिमाप्तुमाशा
जाता मुनेरथ तदीयजनावलोकात् ।
उत्तम्भिता स्वकरणैरपि कामयन्तो
शोकातिरेकजननी पुनरष्टमेऽभूत् ॥४०॥

३.९. अन्यस्तवेन विषयानधिगन्तुमिच्छून्-
आलोक्य विस्तृतनिजव्यसनो दयालुः ।
तस्मान् निवार्य मनुजान् विफलस्स शौरे-
रन्येष्वनर्हकरणं नवमे स्वमाख्यत् ॥४१॥

३-१०. भूयोऽवतीर्य भुवि दिव्यवपुः स्वकीयं
प्रत्यक्षयन्तमखिलांश्च गुणाननन्तान् ।
स्तुत्या मुनेः स्वचरितार्थतया न किञ्चि-
त्सन्नमेत्यतितरां दशमे तुतोष ॥४२॥

…सौ [illegible] त्यसौ हानिं स्वात्मनः स्वयमेव हि ।
१७९) संपादयत्यसौ हानिं स्वात्मनः स्वयमेव हि ।
टि) स्वयं स्वस्य कथमयं नाशकः स्यादिति चेत्, भगवत एतद्रक्षणार्थमवसरप्रतीक्षा- तयाऽवस्थानात् स नास्य कदापि नाशहेतुः, अतोऽयमेव स्वस्य नाशकः ॥
१८०) अहंकारोऽल्पविषयप्रावण्यं चात्मनः क्षतिः ॥
टि) स्वेन स्वस्य नाशनं नामाहङ्कारोऽल्पविषयप्रावण्यमेव च ।
१८१) अहंकारस्तु नियतमग्निस्पर्शसमो मतः ।
टि) अहंकारस्य क्रौर्यं दर्श्यते, अहंकारोऽग्निरिवाश्रयमेव नाशयति, रूपं परावर्तयति ।
१८२) "न कामकलुषं चित्तम्" "न हि मे जीवितेन च"
"न देहमिति पद्यानामत्र स्यादनुसंहितिः ।
"एम्पा वीट्टुत्तिरम्" इति श्रीशठारिगिरोऽपि च ॥ "महदैकुण्ठ माहात्म्ये"
टि) अस्याहंकारस्य क्रौर्यं "न कामकलुषं चित्तं मम ते पादयोः स्थितम् । कामये वैष्णवत्वं तु सर्वजन्मसु केवलम् ॥" इति निरुपाधिकशेषिणस्तव पादयोः स्थितं मे चित्तं वैकुण्ठादिषु स्वार्थकामनारूपकामकलुषं न भवति, सर्वजन्मसु वैष्णवत्वमेव न तु स्वशेषतया किमपि कामये इति प्रतिपादयता श्लोकेन स्वार्थबुद्ध्या काम्यमानस्य मोक्षपर्यन्तस्य सर्वस्याहङ्कारगर्भत्वात् त्याज्यत्वं सूचयताऽहङ्कारस्य त्याज्यत्वमुक्तम् । "न हि मे जीवितेनार्थो नैवार्थैर्न च भूषणैः । वसन्त्या राक्षसीमध्ये विना रामं महारथम् ॥" इति श्लोकेन भगवद्विषये विनियोगमन्तरा स्वार्थबुद्ध्या परिगृह्यमाणानामहंकारगर्भत्वात् त्याज्यत्वं वदताऽहंकारक्रौर्यं स्फुटीकृतम् । "न देहं न प्राणानिति" श्लोकेन भगवच्छेषत्वविभवान्वहिर्भूतं स्वार्थबुद्ध्या परिगृह्यमाणं सर्वमपि अहंकारगर्भत्वात् त्याज्यम्, अतस्तत्पीभूतं देहं तद्धारकान् प्राणान् सर्वाभिलषितं सुखं अन्यत् पुत्रमित्रकलत्रादिकं सर्वं भोग्यमात्मानं च न सहे, सर्वमिदं नश्यतु, सत्यमिदं विज्ञापनम्, असत्यत्वे वृत्तो मञ्जुना नृभूतां दशोभो [illegible] इति वदताहंकारस्य क्रौर्यमुक्तम् । श्रीशठारिं भगवति [illegible] मोक्षं गृहाणेत्युक्तवति मदर्थं दीयमानं मोक्षमतिविलक्षणमपि न काङ्क्षे" इति शठारिसूक्त्या चेदं स्फुटीकृतम् ।
१८३) प्रतिकूलेषु विषयेष्वादरो विषभुक्तिवत् ।
अतादृग्विषयस्पर्शो विषमिश्रोपभुक्तिवत् ॥
टि) अथ विषयक्रौर्यं निरूप्यते, विषयो द्विधा प्रतिकूलोऽनुकूलश्चेति, लोकविरुद्धो नरकहेतुर्निषिद्धविषयः प्रथमः, लोकाविरुद्धो नरकाहेतुः विहितविषयो द्वितीयः, प्रतिकूलविषयस्पर्शो विषस्पर्शवत् स्पष्टप्रातिकूल्यः, अनुकूलविषयस्पर्शो विषमिश्रान्नभोजनवत् तिरोहितप्रातिकूल्य इति भेदः ॥
१८४) विषयग्रामसङ्गेन सुखवाप्त्यभिकाङ्क्षणम्
अग्निज्वालोपभोगेन पिपासाशान्तिकामवत् ।
न त्यद्भुजङ्गमच्छायामहे वा कवचं हि ॥ स्पष्टम् ।
१८५) ईशाभोगैकसक्तस्य शुद्धप्रकृतिशालिनः ।
विषयान्तरदृष्ट्यैव केवलं विलयोदयः ।
केकयास्य विहङ्गस्य विलयोदयसोदरः ॥
टि) अशङ्कुमानामा [illegible] मृदुगीतद्रुतमनाः केकयपक्षी कटुपटहध्वनिश्रवणेन यथा म्रियते, तथा भगवद्गुणानुभवद्रुतचित्तः अनन्यभोग्यस्वरूपना- शकविषयदर्शे म्रियेत ।
१८६) "पलकद्धि पडुष्पायो" इति ह्याह पराङ्कुशः ।
(बहुप्रश्रे दृश्यहो हंसि किमित्याह पराङ्कुशः) स्पष्टम् ।
१८७) अज्ञानी विषयासक्तः शुद्धनास्तिक सोदरः ।
ज्ञानवान् विषयासक्तो … आस्तिक नास्तिकः ।

४.१. आद्ये चतुर्थशतके दशके शरारि-
स्तुष्टस्तथा परहितं दयया विवृण्वन् ।
राज्यस्वरात्मपरिभोगचलात्मभावौ
सम्यक् प्रसाध्य हरिमेव पुमर्थमाह ॥४३॥

४.२. तं पूरुषार्थमितरार्थरुचेर्निवृत्त्या
सान्द्रस्पृहासमयदेशविदूरगं च ।
ईप्सुश्शुचा तदनवाप्तिभुवा द्वितीये
स्त्रीभावनां समधिगम्य मुनिर्मुमोह ॥४४॥

४.३. प्रीतं परं हरिमुपेत्य तथा स्वभावाद्
एतन्मनोवचनदेहकृतक्रियाभिः ।
स्रक्चन्दनप्रमुखसर्वविधस्वभोगः
संश्लिष्टवानिदमुवाच मुनिस्तृतीये ॥४५॥

४.४. तेन प्रहर्षमतिमात्रभवं स्वकीयं
सात्म्यं विधातुमथ दूरगते मुकुन्दे ।
संबन्धिनश्च सदृशांश्च विलोक्य शौरे-
र्भ्राम्यंस्तमेव मुनिरार्तिमगाच्चतुर्थे ॥४६॥

४.५. आनन्दनिर्भरमदीनविभूतियुक्तं
वैकुण्ठनाथमथ वीक्ष्य मुनिस्स्तुवन् सः ।
नान्यः समोऽस्ति मम नाप्यनकम्यमदो-
दानन्दपु रमाधिपञ्चममासंसाद ॥४७॥

टि) स्वरूपविरोधादि विषयदोषादन्यविषयासक्तः केवलनास्तिकवत्। तद्वान् नु

१८८) कदाचिच्छिक्षणं नेतुमर्हः केवलनास्तिकः। तत्सक्तः आस्तिकनास्तिकवत्॥
कदाचिदपि नैवार्हो भक्त्यास्तिकनास्तिकः॥ अयं प्रतिबोधनीयार्थभिव्यात्॥

—— १८९ तः २४३ पर्यन्तं भागवतापचारस्य क्रूरतानिरूपणम् ——

१८९) न केवलमिदं द्वन्द्वं स्वरूपेण विनाशयेत्।
विरोधं भगवद्भक्तेष्वेवमुत्पाद्य विनाशयेत्॥ अहंकारविषयप्रावण्यरूपं द्वन्द्वम्

१९०) नामरूपधराः सन्तो भक्तद्रोहपरायणाः।
दग्धवस्त्रसधर्माणस्तद्वथो उपपाद्यते।

१९१) सम्यक् दग्धं धियाच्छादितं वस्त्रं दह्यते यदि वह्निना।
अनूचीनतिरश्चीन वस्तुसंस्थानं भिद्यते।
अथापि मारुते वाति तूलवद्गगनं व्रजेत्॥

टि) ननु भागवतापचारिणो अपि अविनष्टप्राचीननामरूपाः संचरन्ति किलेत्यत्राह
दग्धपटसंनिभा एते भगवन्निग्रहवाते वहति स्फुटं नश्येयुः।

१९२) अवतीर्येश्वरो यद्यदितिमानुषचेष्टितम्।
चक्रे तदखिलं चैव भक्तद्रोहासहत्वतः।
इति वेदान्तवेद्यास्य यतीन्द्रोऽनुगृहीतवान्।

टि) भागवतापचारिणः ईश्वरो दण्डयेदित्यत्र वेदान्तिवच्यः, संकल्पमात्रेण नाशयितुं समर्थेनापीश्वरेण स्वस्वरूपं परिवर्त्य नानायोनिषु जनित्वा हिरण्यरावणादीनां हननं प्रह्लादमहर्षिप्रभृतिद्रोहिणः एते न संकल्पमात्रेण वध्याः, किंतु हस्ताभ्यां चित्रवधेन

१९३) अवमानक्रियेत्येष श्लोकोऽत्र व्याख्यानमर्हति॥ वध्या इत्याशयात्
"या प्रीतिर्मयि संवृत्ता मद्भक्तेषु सदाऽस्तु ते। अवमानक्रिया तेषां संहरत्यखिलं शुभम्"॥

१९४) हरिभक्तापचारस्तु नानाविध इति श्रुतम्।
१९५) विधास्तु तासु मुख्यं स्यात् तेषु जन्मनिरूपणम्।
१९६) अर्चावतारोपादानचिन्तातः क्रूरमेव तत्।

टि) भागवतापचारो नाना, जन्मज्ञानाचारदेहस्थितिबन्धुवासस्थाननिरूपणभेदात्।

१९७) मातृयोनिपरीक्षायास्तुल्यं तद्धि निगद्यते।
"अर्चावतारोपादानवैष्णवोत्पत्तिचिन्तनम्। मातृयोनिपरीक्षायास्तुल्यमाहुर्मनीषिणः"

१९८) कर्मचण्डालतां त्रिशङ्कुसमतां गतः।
चर्मप्रायी भवद्यज्ञसूत्रः स्यादुक्तदोषवान्॥

टि) भागवतापचारे जातमात्रे एवायं त्रिशङ्कुवत् कर्मचण्डालः स्यात्, यज्ञोपवीतमेव चर्मरज्जुः

१९९) कदाचिज्जातिचाण्डालो भक्तो भवितुमर्हति। तस्मिन्नन्यस्मिन्वा जन्मनि स्यात्।
आर्हन्ती सापि नश्येत्तु तस्याथः प्रोक्तदोषवान्। (भागवतापचारी) निभगवत्कटाक्षात्।

२०० आरूढपतितत्वे हि हेतुरत्रेति बुध्यताम्।

टि) भागवतस्वरूपमुच्चस्थानं प्राप्यातिक्रूरभगवन्निग्रहहेतुभागवतापचारेणाधः पतितवान्॥

२०१) निषेध्येऽस्मिंस्तु नास्त्येवाधिकारिनियमो ध्रुवम्।

टि) जन्मज्ञानाभ्यां नीचैरपि चरितव्यं, ताभ्यामुच्चैरपचरणेऽपि न दोष इत्यधिकारिनियमोऽत्र नास्ति।
यैः कैश्चिद्येषां केषांचिद्विषयेऽपचरणेऽपि दोषावश्यंभावात्। दोषो भगवन्निग्रहः।

२०२) तमर्गलिलिति श्रीमद्दिव्यगाथात्र चिन्त्यताम्।

टि) "स्वीयाग्रणी" इति श्रीमद्दिव्यगाथात्र चिन्त्यताम्। "स्वीयभक्तेष्विति" इति पाठः
इच्चतुर्वेदादासाग्रण्यो अतिश्रुताः अपि तद्भक्तनिन्दकास्तत्क्षणं एव चण्डालाः इति भक्ताङ्घ्रिरेणुगाथा ध्येया॥

२०३) वैनतेयस्य वृत्तान्तः स्मरणीयोऽत्र साधुभिः।
पिल्लै पिल्लै समाख्यात्र कूरनाथोक्तव्[illegible]

टि) सर्विभ[illegible]मित्रण कृतः श्यामकर्णान् हयान् चन्द्रवर्चसाम्। अष्टौ शतानि

४·६- स्वप्नोपमादनुभवादमुतोऽप्यलब्ध-
स्वापेक्षिते शठजिति व्यसनाब्धिसंज्ञे।
ये क्षुद्रदेवमुखतः परिहर्तुकामा-
स्ते वारितास्तदुचितज्ञगिरैव षष्ठे॥४८॥

४·७· नन्दूषजात् स हरिनामकथाप्रसङ्गात्
सँज्ञामुपेत्य मुनिरुद्रुटदुःखबोधः।
आपत्सखत्वमुखतान्वकतास्तदुच्चै-
राक्रुश्य तांश्छेतमयाचत सप्तमेन॥४९॥

४·८· एवं रुदन्नपि शठारिरलब्धकामः
स्वोपेक्षणैकपरतामवधार्य शौरेः।
तच्छेषतादिरहिते सकले स्वकीये
स्वस्मिन्नपि स्फुरितनिस्स्पृहतोऽष्टमेऽभूत्॥
॥५०॥

४·९· शोचन् मुनिः स्वसदृशं च सहायमिच्छन्-
लोकं विलोक्य विपरीतरुचिं निषण्णः।
अत्यन्तनासमसहन् हरिणा स्वनासं
वैकुण्ठकं प्रकटितं नवमे ददर्श॥५१॥

४·१०- बन्धे समेऽपि हरिणा निखिलात्मराशेः
संसारहेतुमितरत्र परत्वबोधम्।
वेदेतिहासमुखतः परिहृत्य शौरे-
रन्योन्नतोः स दशमे व्यवृणोत् परत्वम्॥
॥५२॥

मे देहि गच्छ गालव मा चिरम्" इति निर्दिष्टाया गुरुदक्षिणाया विषये खिन्नं गालवं [illegible] स्व-पृष्ठे आरोप्य तदर्थं त्रिलोकीभ्रमणं गरुडः प्रतिश्रुतः ... ऋषभपर्वते विश्रामार्थं तत्रत्यया वैष्णव्या शाण्डिल्या सत्कृतो ... निहीनस्थानादिमां दिव्यस्थाने ... नेष्यामीति चिन्तयन् तत्स्थाननिहीनचिन्तनापचाराद्दूनपक्षः तां प्रसादयन् तदनुग्रहेण प्रवृद्धपक्षो जात इति भारते उद्योग ॥ २ ॥
अभिजात्याद्यहंकाराद्भागवतेषु अपचरन् पिल्लैपिळ्ळै स्वामी ग्रहणावसरे गुरुणा कूरेशेन निकरणेन भागवतापचारं करिष्यामीति प्रतिज्ञां याचितः तथा प्रतिजानानः पुनर्वासनावशात् अपचरन् आत्मनाशभयेनोपतसन् गुरुणा कूरेशेन मानसापचारोऽनुतापेन शाम्यति, शारीरं दण्डत्यागेन क्रियाः "प्रापणाद् सस्येऽयो[illegible]नीं गां नि वारयेत्" इत्युपदिष्ट इति कथा भाव्या ॥
२०४) ज्ञानानुष्ठितिहानेऽपि यथा भागवतान्वयः ।
कल्पते फलसंसिद्ध्यै तथा सत्यपि तद्द्वये ॥
अलं फलप्रच्युतये ऽपचारस्तेषु केवलम् ॥ स्पष्टम्
२०५) उक्तेऽस्मिन् विषये जन्मवृत्तादिनियमात्ययः ।
२०६) श्येषः कैशिकवृत्तान्तात् कथयोर्ध्व सोऽपि ॥
टि) जन्माचारोत्कृष्टभागवतसम्बन्ध एव पुरुषार्थहेतुः, तथा जन्माचारोत्कृष्टभागवतापचार एव नाशहेतुरिति नियमो नास्ति, यस्य कस्यापि भागवतस्य संबन्धः फलस्य अपचारो नाशस्य तु रित्येव। अयमर्थो निहीनजातीय नम्पाडुवान् चरित्रे उत्कृष्टजातीयापरिज्ञवसुचरित्रे च प्रत्यक्षः। चण्डालजातीयो नम्पाडुवान् स्वीयकैशिकगानांशफलदानेन ब्रह्मरक्षा उद्धार इति कैशिकमाहात्म्ये। प्रत्यक्षपितृ पशुविषये देवर्षिवादेन पक्षपातेन वदन् परिचरवसुः ऋषिशापपपातेति भारते शा
२०७) वेदाध्यायादिसंपन्न्या भगवद्भक्तकारणम् ।
इत्यतः खलु विप्रत्वे भूयते स्पृहणीयता ।
यदि प्रच्युतिहेतुः स्यात् तदेव त्याज्यमेव हि ॥
टि) शास्त्रे ब्राह्मण्यस्य प्रशस्तता जन्मोत्कर्षो निरर्थकः कथमित्यत आह | उक्तविधयैव ब्राह्मण्योत्कर्षो नान्यथा ॥
२०८) उत्कर्षो वाऽपकर्षो वा जन्मवृत्तानुबन्धिकः ।
फलाय न हि कल्पेत न च प्रच्युतये तथा ॥ उत्कृष्टानामपि दोषि[illegible] मध्योगते निकृष्टजानामपि गुणिना सङ्गतेः शास्त्रसिद्ध[illegible]
२०९) कल्पते भगवत्सङ्ग (हरिसंबन्ध) तदभावे तु केवलम् ॥
२१०) भागवत्सङ्गसङ्गेव साम्यं खलु तयोर्द्वयोः ।
२११) इति चेदुच्यते (२११) नैव साम्यमित्यवधीयताम् ।
२१२) उत्कृष्टभ्रमभूजन्म (ब्राह्मण्यम्) भ्रंशसंभावनाबलात् ।
"शरीरे च" ति वाक्योक्त भ्रमस्य जनकं भवेत् ।
२१३) तत्र नैसर्गिकं नैच्यमनुकर्तव्यमेव च । साहङ्कारत्वात्स्वरूपप्रयुक्तं नैच्यं तस्यानुस
२१४) अपकृष्टभ्रमाधारस्योत्कृष्टस्य तु जन्मनः । रस्यद्रवस्य ।
२१५) नास्त्येव दोषद्वितयं नैच्यभाजम्मासिद्धिमत् । ^२१५)
टि) भ्रंशसंभावना — उपायान्तरे योग्यताधानशङ्कैः तत्र प्रवर्तनेनानर्थहेतुत्वात् ।
२१६) श्वपचोऽपि महीपाल त्येतद्वचन मीक्ष्यताम् । उत्तमवर्णात्स्वपि यतिर्न [illegible] ।
टि) श्वपचोऽपि महीपाल विष्णुभक्तो गुणाधिकः । विष्णुभक्तिविहीनस्तु यतिश्च श्वपचाधमः
२१७) निकृष्टजन्मसंभूत्या यो दोष उपजायते । निकृष्टजन्म ब्राह्मणजन्म ॥
स विलक्षणसंबन्धादेव प्रशममाप्नुयात् ॥
टि) अहंकारहेतुनिकृष्टब्राह्मण्यादिमतुकस्य नैच्यानुकरणाद्दोषस्य निवृत्तिर्जन्मसिद्धनैच्याज्ञ उपायान्तरान्वययोग्यतागन्धरहितानां विलक्षणाधिकारिणां विषयेशेषत्वसं
२१९) सम्बन्धयोग्यतासिद्ध्यै भूयात् (इष्टो) जन्मक्षतेः क्षयः ॥ [illegible]
२२०) जन्मक्षतिः परीहारस्तस्या इत्युभयं त्विदम् ।
पञ्चदृत्यादि (निर्दोषित्या टि) गाथायां श्रीमाला यां प्रकीर्तितम् ।
टि) जन्मनो दोषः अभिजात्यादिहेतुकाहंकारः तत्परिहारः तद्दोषहीनविलक्षणभागवत
२२१) विलक्षणानां स्पर्शवीथिहिरण्यवत् ॥ | विषये शेषत्वसंब
टि) जन्मदोषे निवृत्ते विलक्षणसम्बन्धे जाते किमयं विलक्षणः स्यादित्यस्य द्विधा
२२२) [illegible] कता [illegible] रते भागवस्य को स्थितिः ॥

२१८) तस्मात् जन्मनिकृष्टत्वाल्लोके [illegible] नीयताम् ॥

५.१. आद्ये मुनिः स शतकस्य तु पञ्चमस्य
श्रेयः स्वकीयहितबोधनमीक्षमाणः।
एतद्विरोधिबहुलस्य ममात्र हेतुः
शौरेः कृपैव महतीति शशंस भूयः॥५३॥

५.२. आप्तोपदेशविभवैः शमितापवृन्द-
मारब्धवैष्णवसमृद्धिसमिध्यमानम्।
आलोकयन् क्षितितलं कलिनाप्यधृष्य-
माशास्त मङ्गलममुष्य मुनिर्द्वितीये॥५४॥

५.३. पूतानुसंहितमनोहरशौरिमूर्तेः
संश्लेषलोलहृदयस्तदलाभखिन्नः।
लाभे स्वयत्नमपि कर्तुमियेष दुःखाद्-
आर्याद्दशां च परिगृह्य मुनिस्तृतीये॥५५॥

५.४. तां च त्वरां विदधती सकलेन्द्रियाणा-
माच्छादिका सविधगां श्च विसंज्ञयन्ती।
वेलातिगा विरहिणी त्वरुषो मुनेस्तु-
मोहाह्वया रजनिरभ्युदिता चतुर्थे॥५६॥

५.५. तादृक्स्वमोहगलने सति भावनाया
भूम्ना हरेरवयवाभरणादि दृष्ट्वा।
प्रत्यक्षतस्तदनुभूत्यनवाप्तितश्च
प्रीत्या रुजा मुनिरयुज्यत पञ्चमे सः॥५७॥

१७९) संपादयत्यसौ हानिं स्वात्मनः स्वयमेव हि।
टि) स्वयं स्वस्य कथमयं नाशकः स्यादिति चेत्, भगवत एतद्रक्षणार्थमवसरप्रतीक्षा-
तयाऽवस्थानात् स नाऽस्य कदापि नाशहेतुः, अतोऽपायान्तरसत्त्वेऽप्ययमेव स्वस्य नाशकः॥
१८०) अहंकारोऽल्पविषयप्रावण्यं चात्मनः क्षतिः॥
टि) स्वेन स्वस्य नाशनं नाम अहङ्कारोऽल्पविषयप्रावण्यमेव च।
१८१) अहंकारस्तु नियतमग्निस्पर्शसमो मतः।
टि) अहंकारस्य क्रौर्यं दर्शयन् अहंकारोऽग्निरिवाश्रयमेव नाशयति, रूपं परावर्तयति।
१८२) "न कामकलुषं चित्तम्" "नहि मे जीवितेन च"
"न देहमिति" पद्यानामत्र स्यादनुसंहितिः।
"एम्पावीट्टुत्तिरम्" इति श्रीशठारिगिरोऽपि च॥ "महद्वैकुण्ठ माहात्म्यं"
टि) अस्याहंकारस्य क्रौर्यं "न कामकलुषं चित्तं मम ते पादयोः स्थितम्। कामये वै-
ष्णवत्वं तु सर्वजन्मसु केवलम्॥" इति निरुपाधिकशेषिणस्तव पादयोः स्थितं मे
चित्तं वैकुण्ठादिषु स्वार्थकामनारूपकामकलुषं न भवति, सर्वजन्मसु वैष्णवत्वमेव
न तु स्वशेषतया किमपि काम्ये इति प्रतिपादयता श्लोकेन स्वार्थबुद्ध्या काम्यमान-
स्य मोक्षपर्यन्तस्य सर्वस्याहङ्कारगर्भत्वात् त्याज्यत्वं सूचयताऽहङ्कारस्य त्याज्यत्व-
मुक्तम्। "नहि मे जीवितेनार्थो नैवार्थैर्न च भूषणैः। वसन्त्या राक्षसीमध्ये विना रामं
महारथम्॥" इति श्लोकेन भगवद्विषये विनियोगमन्तरा स्वार्थबुद्ध्या परि-
गृह्यमाणानामहंकारगर्भत्वात् त्याज्यत्वं वदताऽहंकारक्रौर्यं स्फुटीकृतम्। "न देहं
न प्राणानिति" श्लोकेन भगवच्छेषत्वविभवात् बहिर्भूतं स्वार्थबुद्ध्या परिगृह्यमाणं सर्व-
मपि अहंकारगर्भत्वात् त्याज्यम्, अतस्तथाभूतं देहं तद्धारकान् प्राणान् सर्वाभिलषितं
सुखं अन्यत् पुत्रमित्रकलत्रादिकं सर्वभोक्तारमात्मानं च न सहे, सर्वमिदं नश्यतु, सत्य-
मिदं विज्ञापनम्, असत्यत्वे त्वत्तो मञ्जनन्द्भूतं दण्डो भोक्ष्यः इति वदताहंकारस्य क्रौर्यमुक्तम्।
श्रीशठारिं भगवति [illegible] मोक्षं ग्रहणे त्वुक्तवति मदर्थं दीयमानं मोक्षमपि विलक्षणमपि
न काङ्क्षे" इति शठारिश्रीसूक्त्या चेदं स्फुटीकृतम्।
१८३) प्रतिकूलेषु विषयेष्वादरो विषभुक्तिवत्।
अतादृग्विषयस्पर्शो विषमिश्रोपभुक्तिवत्॥
टि) अथ विषयक्रौर्यं निरूप्यते, विषयो द्विधा प्रतिकूलोऽनुकूलश्चेति, लोकविरुद्धो
नरकहेतुर्निषिद्धविषयः प्रथमः, लोकाविरुद्धो नरकाहेतुः विहितविषयो द्वि-
तीयः, प्रतिकूलविषयस्पर्शो विषस्पर्शवत् स्पष्टप्रातिकूल्यः; अनुकूलविषयस्पर्शो
विषमिश्रान्नभोजनवत् तिरोहितप्रातिकूल्य इति भेदः॥
१८४) विषयग्रामसेङ्गेन सुखावाप्त्यभिकाङ्क्षणम्
अग्निज्वालोपभोगेन पिपासाशान्तिकामवत्।
नृत्यद्भुजङ्गमच्छायामाहेवाकवज्जहि॥ स्पष्टम्।
१८५) ईशभोगैकसक्तस्य शुद्धप्रकृतिशालिनः।
विषयान्तरदृष्ट्यैव केवलं विलयोदयः।
केकयारव्यविहङ्गस्य विलयोदयसोदरः॥
टि) अशृण्वन् मानाया मधुरगीत द्रुतमनाः केकयपक्षी कटुपटहध्वनिश्रवणे
न यथा म्रियते, तथा भगवद्गुणानुभवद्रुतचित्तः अनन्यभोग्यस्वरूपना-
शकविषयदर्शने म्रियेत।
१८६) "पलकाह्लि पडुप्पायो" इति ह्याह पराङ्कुशः। श्री
(वहुप्रदर्शके दृश्यहौ हंसि किमित्याह पराङ्कुशः) स्पष्टम्।
१८७) अज्ञानी विषयासक्तः एतद्द्वे नास्तिकसोदरः।
[illegible] विषयासक्तो यथा ह्यास्तिक नास्तिकः।

४.१. आद्ये चतुर्थशतके दशके शठारि-
स्तुष्टस्तथा परहितं दयया विवृण्वन् ।
राज्यस्वरात्मपरिभोगचलत्वभावौ
सम्यक् प्रसाध्य हरिमेव पुमर्थमाह ॥४३॥

४.२. तं पूरुषार्थमितरार्थरुचेर्निवृत्त्या
सान्द्रस्पृहासमयदेशविदूरगं च ।
ईप्सुश्शुचा तदनवाप्तिभुवा द्वितीये
स्त्रीभावनां समधिगम्य मुनिर्मुमोह ॥४४॥

४.३. प्रीतं परं हरिमुपेत्य तथा स्वभावाद्
एतन्मनोवचनदेहकृतक्रियाभिः ।
स्रक्चन्दनप्रमुखसर्वविधस्वभोगः
संश्लिष्टवानिदमुवाच मुनिस्तृतीये ॥४५॥

४.४. तेन प्रहर्षमतिमात्रभवं स्वकीयं
सात्म्यं विधातुमथ दूरगते मुकुन्दे ।
संबन्धिनश्च सदृशांश्च विलोक्य शौरे-
र्भ्राम्यंस्तमेव मुनिरार्तिमगाच्चतुर्थे ॥४६॥

४.५. आनन्दनिर्भरमदीनविभूतियुक्तं
वैकुण्ठनाथमथ वीक्ष्य मुनिस्तुवन् सः ।
नान्यः समोऽस्ति मम नाप्यनकम्प्यमद्यो-
त्यानन्दपूरमपि पञ्चममाससाद ॥४७॥

टि) स्वरूपविरोधादिविषयदोषादृश्यविषयासक्तः केवलनास्तिकवत् तद्दृशानु
१८८) कदाचित्क्षणं नेतुमर्हः केवलनास्तिकः। तत्सक्तः आस्तिकनास्तिकवत्॥
कदाचिदपि नैवार्हो भक्त्यास्तिकनास्तिकः॥ अमुं प्रतिबोधनीयार्थमिव तत्॥

१८९तः २४३ पर्यन्तं भागवतापचारस्य क्रूरतानिरूपणम्

१८९) न केवलमिदं द्वन्द्वं स्वरूपेण विनाशयेत्।
विरोधं भगवद्भक्तेष्वपचारस्य विनाशयेत्॥ अहंकारविषयप्रावण्यरूपं द्वन्द्वम्
१९०) नामरूपधराः सन्तो भक्तद्रोहपरायणाः।
दग्धवस्त्रसधर्माणस्तद्वद्यो उपपाद्यते।
१९१) सम्यग्दग्धं धौतं वस्त्रं दह्यते यदि वह्निना।
अनूचीनतिरश्चीन वस्तुसंस्थं न भिद्यते।
अथापि मारुते वाति तूलवद्गगनं व्रजेत्॥
टि) ननु भागवतापचारिणो अपि अविनष्ट प्राचीननामरूपाः संचरन्ति किलेत्यत्राह
दग्धपटसंनिभा एते भगवन्निग्रहवाते वहति स्फुटं नश्येयुः।
१९२) अवतीर्येश्वरो यच्च दर्शितमानुषचेष्टितम्।
चक्रे तदखिलं चैव भक्तद्रोहासहत्वतः।
इति वेदान्तवेद्यस्य यतीन्द्रोऽनुगृहीतवान्।
टि) भागवतापचारिणः ईश्वरो दण्डयेदित्यत्र वेदान्तिवन्द्यः, संकल्पमात्रेण नाशयितुं समर्थेनापीश्वरेण स्वस्वरूपं परिवर्त्य नानायोनिषु जनित्वा हिरण्यरावणादीनां हननं प्रह्लादमहर्षिप्रभृतिद्रोहिण एते न संकल्पमात्रेण वध्याः किन्तु हस्ताभ्यां पित्रनखेन
१९३) "अवमानक्रियेत्येष श्लोकोऽत्र ध्यानमर्हति॥ वध्या इत्याशयात्
"या प्रीतिर्मयि संवृत्ता मद्भक्तेषु सदाऽस्तु ते। अवमानक्रिया तेषां संहरत्यखिलं शुभम्"॥
१९४) हरिभक्तापचारस्तु नानाविध इति श्रुतम्।
१९५) विधास्तु तासु मुख्यं स्यात् तेषु जन्मनिरूपणम्।
१९६) अर्चावतारोपादानचिन्तातः क्रूरमेव तत्।
टि) भागवतापचारो नाना, जन्मज्ञानाचारदेहस्थितिबन्धुवासस्थाननिरूपणभेदात्।
१९७) मातृयोनिपरीक्षायास्तुल्यं तद्धि निगद्यते।
"अर्चावतारोपादानवैष्णवोत्पत्तिचिन्तनम्। मातृयोनिपरीक्षायास्तुल्यमाहुर्मनीषिणः"
१९८) कर्मचण्डालतां त्रिशङ्कुसमतां गतः।
चर्मप्रायोऽभवद्यज्ञसूत्रः स्यादुक्तदोषवान्॥
टि) भागवतापचारे जातमात्रे एवायं त्रिशङ्कुवत् कर्मचण्डालः स्यात्, यज्ञोपवीतमेव चर्मरज्जुः
१९९) कदाचिज्जातिचाण्डालो भक्तो भवितुमर्हति। तस्मिन्नन्यस्मिन्वा जनः स्यात्
आर्हन्तीं स्थापिनश्येत्तु तस्त्वयः प्रोक्तदोषवान्। (भागवतापचारी) निभगवत्कटाक्षात्।
२०० आरूढपतितत्वे हि हेतुरत्रेति बुध्यताम्।
टि) भागवतस्वरूपमनुसरणं प्राप्यातिक्रूरभगवन्निग्रहहेतुभागवतापचारेणारूढपतितः॥
२०१) विषयेऽस्मिंस्तु नास्त्येवाधिकारिनियमो ध्रुवम्।
टि) जन्मज्ञानाभ्यां श्रीवैष्णवपिचरितव्यं, तदभ्यामुच्चैरपचरणेऽपि न दोष इत्यधिकारिनियमोऽत्र नास्ति।
यैः कैश्चिद्येषां केषांचिद्विषयेऽपचरणेऽपि दोषावश्यंभावात्। दोषो भगवन्निग्रहः
२०२) तमर्गलि लिति श्रीमद्दिव्यगाथात्र चिन्त्यताम्।
टि) "स्वीयाग्रणीरपि" ति श्रीमद्दिव्यगाथात्र चिन्त्यताम्। "स्वीयभक्तेष्विति" इति पाठः
इच्छतुर्वेददासाग्रण्योऽतिक्रम्य अपि तद्भक्तनिन्दकास्तत्क्षण एव चण्डालाः इति भक्त-
२०३) वैनतेयस्य वृत्तान्तः स्मरणीयोऽत्र साधुभिः। [illegible]रेणुगाथाध्येया॥
पिल्लै पिल्लै समाख्याय कुरनाथेन [illegible]
टि) सर्वि[illegible] एकतः श्यामकर्णानां हयानां चन्द्रवर्चसाम्। अष्टौ शतानि

४.६- स्वप्नोपमादनुभवादमुतोऽप्यलब्धा-
स्वापेक्षिते शठजिति व्यसनाब्धिसंज्ञे।
ये क्रुद्धदेवमुखतः परिहर्तुकामा-
स्ते वारितास्तदुचितज्ञगिरैव षष्ठे॥४८॥

४.७. नद्धेषजात् स हरिनामकथाप्रसङ्गात्
संज्ञामुपेत्य मुनिरुद्गतदुःखबोधः।
आपत्सखत्वमुखतांकतस्तदुच्चै-
राक्रुश्य ताञ्छठेतमयाचत सप्तमेन॥४९॥

४.८. एवं रुदन्नपि शठारिरलब्धकामः
स्वोपेक्षणैकपरतामवधार्य शौरेः।
तच्छेषतादिरहिते सकले स्वकीये
स्वस्मिन्नपि स्फुरितनिस्स्पृहतोऽष्टमेऽभूत्॥५०॥

४.९. शोचन् मुनिः स्वसदृशं च सहायमिच्छन्-
लोकं विलोक्य विपरीतरुचिं निषण्णः।
अत्यन्तनासमसहन् हरिणा स्वनासं
वैकुण्ठकं प्रकटितं नवमे ददर्श॥५१॥

४.१०- लब्धे समेऽपि हरिणा निखिलात्मराशेः
संसारहेतुपितरत्र परत्वबोधम्।
वेदेतिहासमुखतः परिहृत्य शौरे-
र्लोकान्नोः स दशमे व्यवृणोत् परत्वम्॥५२॥

मे देहि गच्छ गालव मा चिरम्' इति निर्दिष्टाया गुरुदक्षिणाया विषये खिन्नं गालवं [illegible] स्व-
पृष्ठ आरोप्य तदर्थं त्रिलोकीं भ्रमन् गरुडः पश्चिमसमुद्रे ऋषभपर्वते विश्रामं तत्रत्यया वैष्ण
व्या शाण्डिल्या सत्कृतो ऽस्मान्निहीनस्थानादिमां दिव्यस्थानं [illegible] नेष्यामीति चिन्तयन् तत्स्थानान्निहीन
च्या शाण्डिल्या सत्कृतो ... इति भारते उद्योग ॥ २ अ
पराधे नापचाराद् दग्धपक्षः तां प्रसादयन् तदनुग्रहेण प्ररूढपक्षो जात इति भारते उद्योग ॥ २ अ
भिजात्याद्यहंकाराद्भागवतेष्वपचरन् पिल्लैपिल्लै स्वामी ग्रहणानन्तरं गुरुणा कूरेशेन निकरणेन
न भागवतापचारं करिष्यामीति प्रतिज्ञां याचितः तथा प्रतिज्ञाना नः पुनर्वासनावशादपचरन् आत्मनाशा-
भयेनापतसन् गुरुणा कूरेशेन मानसापचारोऽनुतापेन शाम्येत्, शारीरं दण्डभयान्न कुर्याः "प्राप्यवाद-
सस्ये वाचारणीं गां निवारयेत्यु पदिष्ट इति कथात्र भाव्या ॥

२०४) ज्ञानानुष्ठितिहानेऽपि यथा भागवतान्वयः ।
कल्पते फलसंसिद्ध्यै तथा सत्यपि तद्द्वये ॥
अलं फलप्रच्युतयेऽपचारस्तेषु केवलम् ॥ स्पष्टम्

२०५) उक्तेऽस्मिन् विषये जन्मवृत्तादिनियमात्ययः ।
२०६) ज्ञेयः कैशिकवृत्तान्तात् कथयोर्ध्वव सोऽपि ॥

टि) जन्माचारोत्कृष्टभागवतसम्बन्ध एव पुरुषार्थहेतुः, तथा जन्माचारोत्कृष्टभागवता-
पचार एव नाशहेतुरिति नियमो नास्ति, यस्य कस्यापि भागवतस्य संबन्धः फलस्य, अपचारो नाशस्य
हेतुरित्येव । अयमर्थो निहीनजातीय नम्पाडुवान् चरित्रे उत्कृष्टजातीयापचारस्तु [illegible] चरित्रे च प्र-
दृश्यः । चण्डालजातीयो नम्पाडुवान् स्वीयकैशिकगानांशफलदानेन ब्रह्मरक्षः उद्धारेति कैशिक-
माहात्म्ये । प्रत्यक्षपि प्रष्ट विषये देवर्षिवादेन पक्षपातेन नदन्तु परिचरस्तु ऋषिशापः पपातेति
भारते शा

२०७) वेदाध्यायादिसंपन्न्या भगवल्लाभकारणम् ।
इत्यतः खलु विप्रत्वे श्रूयते स्पृहणीयता ।
यदि प्रच्युतिहेतुः स्यात् तदेव त्याज्यमेव हि ॥

टि) शास्त्रे ब्राह्मण्यस्य प्रशस्तत्वाज्जन्मोत्कर्षो निरर्थकः कथमित्यत्राह । उत्कृष्टविषयैव ब्राह्मण्योत्क-
र्षो न त्वन्यथा ॥

२०८) उत्कर्षो वाऽपकर्षो वा जन्मवृत्तानुबन्धिकः ।
फलाय न हि कल्पेत न च प्रच्युतये तथा ॥ उत्कृष्टानामपि दोषि[illegible] मयोगे तेनिकृष्ट-
२०९) कल्पेते भगवत्सङ्ग(हरिसंबन्ध) तदभावौ तु केवलम् ॥ नामपि गुणिना सङ्गतेः शास्त्रसिद्धत्वात्

२१०) भगवत्सङ्गसद्भावे साम्यं खलु तयोर्द्वयोः ।
२११) इति चेदुच्यते (२११) नैव साम्यमित्यवधीयताम् ।
२१२) उत्कृष्टभ्रमभूर्जन्म (ब्राह्मण्यम्) भ्रंशसंभावनाबलात् ।
"शरीरेऽजे" ति वाग्गीता भ्रमस्य जनकं भवेत् ।
२१३) तत्र नैसर्गिकं नैच्यमनुकर्तव्यमेव च । साहङ्कारत्वात्स्वरूपप्रयुक्तं, नैच्यं तस्यानुक-
२१४) अपकृष्टभ्रमाधारस्योत्कृष्टस्य तु जन्मनः । स्वद्रष्टस्य ।
२१५) नास्त्येव दोषद्वितयं नैच्यभाजन्मासिद्धिमत् । ^२१५)

टि) भ्रंशसंभावना — उपायान्तरे योग्यताभानशङ्कं तत्र प्रवर्तनेनानर्थहेतुत्वात् ।
२१६) श्वपचोऽपि महीपाल त्येत दृच्यनमीक्ष्यताम् । उत्तमवर्णान्यापि यतिर्नीचः ।
टि) श्वपचोऽपि महीपाल विष्णुभक्तो गुणाधिकः । विष्णुभक्तिविहीनस्तु यतिश्च श्वपचाधमः
२१७) निकृष्टजन्मसंभूत्या यो दोष उपजायते । निकृष्टजन्म ब्राह्मणजन्म ॥
स विलक्षणसंबन्धादेव प्रशममाप्नुयात् ॥

टि) अहंकारहेतुनिकृष्टब्राह्मण्यादिप्रयुक्तस्य नैच्याननुकरणादिदोषस्य निवृत्तिर्जन्मसिद्धनै-
च्यानामुपायान्तरान्वययोग्यतागन्धरहितानां विलक्षणाधिकारिणां विषयेशेषत्वसं
२१९) सम्बन्धयोग्यतासिद्ध्यै भूयात् (इष्टा) जन्मक्षतेः क्षयः ॥ न्यायानुव-
२२०) जन्मक्षतिः परीहारस्तस्या इत्युभयं विदम् ।
पञ्च(?) दृत्यादि(निर्दोषिल्यादि) गाथायां श्रीमालायां प्रकीर्तितम् ।

टि) जन्मनो दोषः आभिजात्यादिहेतुकाहंकारः तत्परिहारः तद्दोषहीनविलक्षणभागवत
२२१) विलक्षणानां स्पर्शवेधि हिरण्यवत् ॥ [विषये शेषत्वसंब-
टि) जन्मदोषे निवृत्ते विलक्षणसम्बन्धे जाते किमयं विलक्षणः स्यादित्यत्रस्याह
२२२) साम्याभ्याधिकतानुद्भवो रेते [illegible]

२१६) तस्मात्तु [illegible] (left margin, vertical)

भक्ति पारवश्य भावाद्[illegible]

५.१. आद्ये मुनिः स शतकस्य तु पञ्चमस्य
श्रेयः स्वकीयहितबोधनमीक्षमाणः।
एतद्विरोधिबहुलस्य ममात्र हेतुः
शौरेः कृपैव महतीति शशंस भूयः॥५३॥

५.२. आप्तोपदेशविभवैः शमिताद्यवृन्द-
मारब्धवैष्णवसमृद्धिसमिध्यमानम्।
आलोकयन् क्षितितलं कलिनाप्यधृष्य-
माशास्त मङ्गलममुष्य मुनिर्द्वितीये॥५४॥

५.३. पूर्वानुसंहितमनोहरशौरिमूर्तेः
संश्लेषलोलहृदयस्तदलाभखिन्नः।
लाभे स्वयत्नमपि कर्तुमियेष दुःखाद्-
आर्यादशां च परिगृह्य मुनिस्तृतीये॥५५॥

५.४. तां च त्वरां विदधती सकलेन्द्रियाणा-
माच्छादिका सविधगां श्च विसंज्ञयन्ती।
वेलातिगा विरहिणीत्वजुषो मुनेस्तु
मोहाह्वया रजनिरभ्युदिता चतुर्थे॥५६॥

५.५. तादृक्स्वमोहगलने सति भावनाया
भूम्ना हरेरवयवांश्चरणादिदृष्ट्या।
प्रत्यक्षतस्तदनुभूत्यनवाप्तितश्च
क्रीडया रुजा मुनिरयुज्यत पञ्चमे सः॥५७॥

२२३) गुरुतुल्या इति, स्वरूपात्संसारिभ्यो दूरेऽपि।
आधिका इति च ध्यानं साम्याभ्यधिकता मती।

२२४) आचार्यसाम्यधीमूलमाचार्यस्योपदेशगीः।
टि) अन्यत्र क्वचिदपि आचार्यतुल्यत्वे (मन्तव्ये सति इह तन्मते हेतुरस्य तुल्यत्वे न स्त्री [वैष्णवा दृश्या इत्याचार्यवाक्]

२२५) ईदृशध्यानविरहोऽप्यपचारो भवेन्महान्॥
टि) तेषु आधिक्यस्य दृश्यभावोऽप्यपचारः॥

२२६) "पयिलुम्" नेडु" कण् शोर" नण्णा" तेट्टरुम्" इत्यमूः।
("वर्धमान" महत्" चक्षुर्" अनाश्रित" सुदुर्लभ"।)
दशकात्मकगाथाभिः श्रीमाल्लान्तिमपञ्चकम्।
इतिहासपुराणानि चामुमर्थं विवृण्वते॥

टि) अयमर्थः "अभिवर्धमान" दशके ([illegible] 7-3) "महतो व्यामोहवतो दासयाकारेण" इति दशके ([illegible] 8-10) "चक्षुर्यो भ्राम्येदिति दशके ([illegible] 7-4) "अनाश्रितासुमदये" इति दशके ([illegible] 2-6) स्वयानदुर्लभेति दशके ([illegible] 2-1, श्रीमाल्लान्तिमगाथापञ्चके इतिहासपुराणेषु च विशदं द्रष्टुं शक्यते॥

२२७) क्षत्रियः कौशिकस्तावद् ब्रह्मर्षिः समजायत।

२२८) विभीषणं दशग्रीवः कुलपांसनमभ्यधात्।
इक्ष्वाकुवंशजं महान्तं बभाषे रघूद्वहः।

२२९) जटायोः कृतवान् रामः स एव ब्रह्ममेधिकम्।

२३०) अशरीरिवचः श्रुत्वा ज्ञानाधिक्यं विचिन्त्य च।
ब्रह्ममेधेन संचस्क्रे विदुरं च युधिष्ठिरः।

२३१) धर्मव्याधस्य भवने परिक्रम्य महर्षयः।
धर्मसन्देहवृन्दानामुपशान्तिमलीकरन्।

२३२) भीष्मद्रोणादिभवनान्युपेक्ष्य यदुनन्दनः।
भवने बुभुजे श्रीमद्विदुरस्य महात्मनः।

२३३) रामभद्रः स भगवान् बुभुजे शबरीकरात्॥

टि) इतिहासेषु भागवतवैभवस्य प्रतिपादनेऽपि "न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः" "स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः" इत्यादिकमर्थवाद इत्येव पुरुषम् अपकृष्टजातीयस्य तास्मिन्नेव उत्कृष्टजातीयत्वस्यासंभवात् इति शङ्कायामुदाहरणे क्रान्तस्मात्। क्षत्रियस्य विश्वामित्रस्य तपोविशेषो बा दुरिष्ठ वाक्येन ब्राह्मण्यसिद्धिः "आस्थाहि मम न तेन राक्षसानां बलाबलम्" इति विभीषणं प्रति रामवाक्ये कुलदूषकेनापि रावणेनोक्ता राक्षसानामिव तुले रामस्य विभीषणं राक्षसत्वान्महऽक्ष्वाकुवंशीयत्वमिह हानं, जटायो रामेण ब्रह्ममेधेन संस्करणम्, विदुरस्य जातिज्ञानो कर्णे च दृष्ट्वा किंकर्तव्यतामूढेन युधिष्ठिरेणाशरीरिवाचा तस्य ब्रह्ममेधेन संस्करणम्, ऋषिभिः सपरिक्रमं धर्मव्याधं संसेव्य धर्मसन्देहनिराकरणम्, श्रीकृष्णेन भीष्मादीनतिक्रम्य विदुरगृहे भोजनम्, श्रीरामेण शबरीहस्ताद् भोजनं चात्रोदाहरणम्। विभीषणस्य बन्धुत्यागभगवदङ्गीकाराभ्यांफलति इति भगवदानुकूल्ये जाते बन्धवो नस्मदीयमिति बन्धेयः भागवोत्स्य कुर्यात्

२३४) महापूर्णेन गुरुणा श्रीरामानुजयोगिने।
मारनेरिनम्बूतं समाधिकयोदितवचः।

२३५) प्रादुर्भावोरात[illegible]कमात्रस्मरणं हतः॥

५-६. शोकं च तं परिजिहीर्षुरिवाखिलानां
सर्गादिकर्तुरनुकाररसेन शौरेः।
तस्य प्रवृत्तिरखिलाऽऽचरिता मयेति
तद्भावभावितमना मुनिराह षष्ठे ॥५८॥

५-७. एवं सोऽनधिगताभिमतस्तदाप्तौ
नारायणादितरसाधनशून्यतां स्वाम्।
तस्मै निवेद्य तदुपायधियैव किंचिद्
आश्वस्तवानथ मुनिः किल सप्तमेन ॥५९॥

५-८. आश्वासलब्धधृतिना मनसा समेत्य-
श्रीकुम्भघोणशयमप्रतिमाभिरूप्यम्।
आलोक्य सान्त्वनवचः परिरम्भणादी-
न्प्राप्तवान्मुनिरखिद्यत सोऽष्टमेन ॥६०॥

५-९. अन्यं मुनिः प्रतिहतस्तत एव खेदाद्
गन्तुं प्रवृत्तमनसापि तु दिव्यदेशम्।
तद्भोग्यतामभिदधत्तदधीशपादौ
याचां कदेत्यकथयन्नवमे स्वदैन्यम् ॥६१॥

५-१०. अर्चीच मौननियतामपहाय शौरे-
रालापयोग्यविभवे पुनरागतोऽसौ।
चित्तस्य तद्गुणगणस्मरणे निजस्य
शैथिल्यविघ्नशमनं तमयाचतान्ते ॥६२॥

टि) श्रीयामुनाचार्यशिष्येण मारनेरनम्बिना स्वान्तिमदशायां आलवन्दार-
भिमानविषयमिदं प्रकृतिबन्धवः स्पृशेयुश्चेत् किं कार्यमिति व्याकुलेव पुरो
डाशः श्वभ्यो न दीयतामिति बोधितः स ब्रह्मचारी महापूर्णः तस्य चरमसंस्कारं
स्वयं कृतेयिवान् श्रीरामानुजाचार्येण शास्त्रमनुल्लङ्घ्य यता हि कार्यं करणीयम्, परद्वा
रा कुतो न कृतम्, भवद्भिरेव कुतः कृतमिति दृष्टः; किं सन्ध्यावन्दने परः प्रतिनिधीक्रि
यते, किमहं श्रीराम कृष्टः; किमहं जटायोर्निकृष्टः; किं [illegible]
[illegible] इत्यादयः दिव्यसूरिसूक्तयः समुद्घोषः, गोणरीत्यापि
दिव्यसूरिवन्द्यः परिपाल्यं हीत्यतोऽचत् ॥ "प्रादुर्भावैः सुरनरसमो देवदेवस्तदीयाः
जात्या वृत्तैरपि च गुणतस्तादृशो नात्र गर्हा। किंतु श्रीमद्भुवनभवनत्राणतोऽन्येषु
वृत्तप्रायो भवति विजाता कल्पकल्पः प्रकर्षः"॥ इति श्लोकोऽत्र भाव्यः। अस्या
र्थः = भगवान् प्रादुर्भावैः सुरनरसमो न तरति, तथैव तदीया अपि जात्या वृत्तैर्गुणतश्च
इतरसमा भवति, तथापि गर्हा न कार्या भुवनत्राणार्थत्वात् तथात्वस्य, अभागवतेषु वर्त
मानो विद्यावृत्तप्रायो प्रकर्षः विजातानां कारसम इति।

२३६) वेदाभादिविशेषज्ञो[s]प्यभागवत एव यः।
तं कुङ्कुमभरोत्क्षाहि गर्दभोपममूचिरे ॥

टि) "चतुर्वेदधरो विप्रो वासुदेवं न विन्दति। वेदभारभराक्रान्तः स वै ब्राह्मणगर्दभः" इति
बल्लभाष

२३७) तिर्यक्स्थावरजन्मानि चकमे कुलशेखरः।

टि) एतावता भगवत्सम्बन्धरहितमुत्कृष्टजन्मापि सद्भिर्निन्दितमित्युक्तम्। अ
थ भगवत्सम्बन्धवन्निकृष्टजन्मापि सद्भिः प्रार्थितमित्याह। श्री कुलशेखरः वि
ल [illegible] इति दशके भगवत्सम्बन्धवत् तिर्य

२३८) द्विजाग्र्यो विष्णुचित्तार्यो गोदां तस्यामजापि [illegible] गजन्मापि प्रार्थयामास।
स्वात्मन्यावाहयामास गोपजन्मेति विश्रुतम्। ——— स्पष्टम्

२३९) अविद्यादिष्ववश्येषु नष्टेषु सकलात्मनाम्।
नारीणामुत्तमायास्तु स्थितिरुन्मिषति स्वयम् ॥

टि) इत्थं निहीनजन्मनामोरमपणे ऽपि वास्तवं स्वरूपं कीदृशमित्यत्राह। अ
विद्याद्यागन्तुकसर्वदोषविरहे आत्मनां लक्ष्मीसाम्यं भवति।

२४०) विशुद्धात्मस्वरूपस्य श्रीसाम्यं षट्प्रकारतः।

टि) अनन्यार्हशेषत्वमनन्यशरणत्वमनन्यभोग्यत्वं संश्लेषे धारणं विश्ले
षे धारणाभावः तदेकनिर्वाह्यत्वमिति षड्भिः प्रकारैः श्रीसाम्यं। २३९-२४० प्रा
[सङ्गिकम्]

२४१) दृष्टे पुमर्थे तूत्कर्षोऽहंकारैकनिबन्धनः।
अदृष्टपुरुषार्थे स तद्राहित्यनिबन्धनः।

टि) कुलशेखरादिभिरुत्कृष्टजन्मोपेक्ष्य निकृष्टजन्म कुतः प्रार्थितमित्य
त्राह आभिजात्यैश्वर्यादिषूत्कर्षः विश्वामित्रादेरितोद्योगनर्थकाहंकारात्।
अदृष्टपुरुषार्थे [s]त्र उत्कर्षः नैच्यानुसन्धानहेतुभूतादहंकारराहित्यात्।

२४२) चतुर्मुखोऽपि सन् हन्त फलतः प्रच्युतोऽभवत्।
सती गोपालकन्यापि काचित् फलवती ह्यभूत् ॥

टि) अहंकारिणा चतुर्मुखस्यापि भगवत्प्राप्तिः अनहंकारिण्यागोपिका
त्वपनया भगवल्लाभो [s]भूत्। अतः कुलशेखरादयः अहंकारवर्जकमु
त्कृष्टजन्मोपेक्ष्य तदभावरहितं निकृष्टजन्म वाञ्छन्॥

प्रपन्नादि [illegible] निरूपणम्

६.१. आद्ये तु षष्ठशतकस्य मुनिस्तथार्तो
नारीसमाधिमधिगम्य निजामवस्थाम्।
अन्वीहरिं कमपि पक्षिभिरान्तकस्थै-
रापन्नरक्षणसदीक्षमबोधयत् सः॥६३॥

६.२. तावद्विलम्बमसहन् प्रणयेन रोषात्-
कृष्णं समागतमपि त्वरया विनिन्द्य।
तेन स्वसंगममनोरथिना द्वितीये
सान्त्वोक्तिभिः समनुनीय समाहितोऽभूत्॥६४॥

६.३. कोपं मम प्रणयजं प्रशमय्य कृष्णः
स्वाधीनतामलनुमेति सविस्मयः सः।
स्वीयां विरुद्धजगदाकृतितां च तेन
संदर्शितामनुबभूव मुनिस्तृतीये॥६५॥

६.४. आनन्दशीतलितवागनुसन्दधीय
कृष्णस्य वीर्यचरितान्यह मादरेण।
इत्थं पुरा स्वयमपेक्षितवान्मुनिस्त-
ल्लब्ध्वा समोऽस्ति न ममेत्यवदच्चतुर्थे॥६६॥

६.५. तस्यापि मानसतयाऽनुभवस्य बाह्य-
संश्लेषणैकपरचित्तमनःशरीरः।
आत्मानुरञ्जनमात्मनि निस्स्पृहत्वं
नित्येऽधिपञ्चममतिप्रवणोऽच्युते सः॥६७॥

शोच्यतैव प्रपंचस्य ... मतावपस्य ... स्वात्मैव शत्रुः तत्कार्यभूतविषयप्रावण्यस्य च जन्मभूः।

२४२) एवं सर्वप्रकारेण नाशहेतोरहंकृतेः। तत्कार्यभूतविषयप्रावण्यस्य च जन्मभूः।
स्वात्मैव हि यतस्तस्मात् स्वस्मिन् शत्रुदृशांदिशन्। तद्दौर्बल्ये(?)षु ... दन्दशूकदृशं वहन्।
तन्निवर्तकसद्‌गुरुवर्गे बन्धुदृशं दधत्। ईशं पितृसमं पश्यन् गुरुमब्धिमिवातुरः।
"अहंकारार्थकामाः खल्वनुकूलेष्वनादरम्। प्रावण्यं प्रतिकूलेषूपेक्षाकारिष्वपेक्षणम्।
उत्पादयेयु"रित्येवं चिन्तयन् चकितो भवन्। नास्माभिर्न परैश्चापि सुसंपादाः शुभा गुणाः
सदाचार्यप्रसादोऽथ भगवत्कृपया परम्। संपद्येरन्निति ध्यायन् देहयात्रामुपेक्षयन्(?)।
आत्मयात्राभिलाषी च प्राकृतार्थविभोग्यता। ईशाराधनसंभूतिप्रसादप्रतिपत्तिता।
शरीरधारणे स्यादित्येवं बुद्धिविशेषकः। स्वस्य संभविते क्लेशे "तदिदं कर्मणः फलम्
यद्वा कृपाफलं स्या"दित्युदानी प्रीतिसंततिः। स्वानुष्ठाने ऽपायत्वप्रतिपत्तेरपोहनम्।
वाञ्छा विलक्षणानां तु ज्ञानानुष्ठानसंपदि। आदरातिशयोऽथास्तु मङ्गलाशासने रुचिः।
अरुचिश्चात्मविजये व्यावृत्तिश्च नियमोऽशने। अनुवर्तनमैयत्यमनुकूलैः सह स्थितिः।
निवृत्तिः प्रतिकूलानां सहवासस्य चोत्तमा। गुणा यथा विवर्धेरन् सदाचार्यप्रसादतः।
तथा वर्तेत नियतं यः प्रपन्नाधिकारवान्(?) ॥

द्वितीयप्रकरणं ——— समाप्तम्।

हि) अथ प्रपन्नाधिकारिणो दिनचर्याविशेष उच्यते। इत्थं सर्वथा स्वरूपनाशकस्याहंकारस्य तज्जस्य विषयप्रावण्यस्य जन्मभूः स्वात्मेति स्वात्मनि दृष्टे शत्रौ दृष्ट इवोद्विग्नेन भाव्यम्। तादृशाहंकारस्य विषयप्रावण्यस्य च दुर्बोधिनैर्वर्तकेषु संसारिषु दृष्टेषु सर्पेषु दृष्टेष्विव भीतेनापसर्पता भाव्यम्। एतान् दोषानुपदेशादिभिर्निवारयतां श्रीवैष्णवानां दर्शने आप्तबन्धुदर्शन इव तेऽस्माकं सत्सहायभूता इत्याद्रियमाणेन भाव्यम्। सदा अस्माकं हितमेव चिन्तयत ईश्वरस्य दिव्यदेशेषु दर्शने हितैषिणः पितुर्दर्शन इव भक्तिभीतिविनयान् वहता भाव्यम्। ज्ञानभक्तिविरक्तीरुपजनय्य भगवद्विषयं दर्शितवतो आचार्यस्य दर्शने बुभुक्षुणाऽन्ने दृष्ट इव सोत्कण्ठमनुभूय तृप्यता भाव्यम्। स्वविधेयस्य शिष्यस्य दर्शने अभिमतविषयदर्शन इव संभ्रमेण भाव्यम्। अहंकारोऽनुकूलानां श्रीवैष्णवानां विषयेऽनादरं कारयेत्, अर्थः प्रतिकूलानां संसारिणां समीपे प्रसारयेत्, कामः सनिकारं स्वं तिरस्कुर्वतामपि विषये आशां वर्धयेत् इति अहंकारार्थकामानां दोषान् विचिन्त्य तेभ्यो परमं भीतेन भाव्यम्। शमदमादय आत्मगुणा न स्वप्रयत्नेन न वा कर्मवश्यानां परेषां प्रयत्नेन सुसंपादाः, किंतु आचार्याभिमानमूलकभगवदनुग्रहेणैव प्राप्तव्या इति चिन्तयन् (?) प्रार्थयमानेन भाव्यम्। देहरक्षणौपयिकेषु व्यापारेषु अनुत्सहमानेन भाव्यम्। भगवद्गुणानुभवकैङ्कर्यसंवृत्तिषु उत्तरोत्तरमुत्सहमानेन भाव्यम्। अन्नवस्त्रादिमात्रे तद्विषयेषु भोग्यताबुद्धिरहितेन भाव्यम्। देहधारणार्थं पर्याप्तभोजनं भगवदाराधनसमाप्तिरूपप्रतिपत्तिकार्यस्य सन्दधता भाव्यम्। एतच्छरीरविशिष्टतादृशायां स्वस्य तापत्रयेष्वन्यतमस्य कस्यचिदुपनिपाते "इदमनुभवैकनाश्यप्रारब्धफलं किल, एवं विद्यमानानां कर्मणां नाशपर्यन्तं किलानेन शरीरेण संहास्मानिहेश्वरोऽवस्थापयति, ततो निमित्तान्तरेषु अन्यतमस्य नाशं प्राप्तवन्तः किलास्मः" इत्यनुसन्धाय, अथवा दुर्वासनया इमं देहं सत्तुमनुसहमानान् सारहीनान् विषयाननुभूय संसारसक्तानस्मान् अस्मान्निर्विण्णयितुमीश्वरोऽस्माकमस्मिन् शरीरे जिहासाजननार्थं किलेमानि दुःखान्यनुभावयति तत्कृपाफलं किलैतत्" इत्यनुसन्धाय वा आश्वस्तेन भाव्यम्। प्रपन्नस्य स्वस्याधिकारानुगुणानुष्ठीयमानान् पुरुषार्थोपायानमभिमन्यमानेन भाव्यम्। विलक्षणानां ज्ञानानुष्ठाने स्वेनापि प्राप्येऽत इत्याशासमानेन भाव्यम्। दिव्यदेशेषु नित्याभिनिवेशिना भाव्यम्। मङ्गलाशासनपरेण भाव्यम्। विजयान्तरं जुगुप्समानेन भाव्यम्। भगवद्भागवतविषये स्वेन क्रियमाणाः शेषवृत्तीर्विनियोक्तीश्च विस्मरता ... अन्यविषये कुर्वता भाव्यम्। ...

... सहता संक्षणमप्यजहता स्वरूपनाशकप्रतिकूलेषु दृष्टि-

६-६- तस्मात् परप्रवणताविभवात् परस्मिन्
पुंस्येव कुङ्क्तिमतिः पुरुषार्थसारे।
स्वस्य स्वकीयविषयेष्वखिलेषु षष्ठे
स्तोयत्वबुद्धिरवशाद्गलितेत्यबोचत् ॥६८॥

६-७. कृष्णेन धारयितृ पोषकभोग्ययोगी
प्राप्तानतिप्रथितधीरखिलान् विहाय।
स्यादप्यनन्यफल इत्यवहीयमानः
पार्श्वस्थितैर्मुनिरभूदधिसप्तमं सः ॥६९॥

६-८. अप्येवमात्मफलदानविलम्बवन्त-
मालोक्य शौरिमथ यत्र च कुत्र चापि।
आवेद्य मत्स्थितिमधीनविभूतियुग्माः
स्यातेत्ययाचत सतो मुनिरष्टमेन ॥७०॥

६-९. आलोकनेऽपि विषयस्य भृशं विभग्नो
रूपे हरेः सकललोकमये निराशः।
अप्राकृते वपुषि लोलमना स्तमुच्चैः
प्राकारयत् प्रलपितैर्नवमे शठारिः ॥७१॥

६-१०. आर्तस्तथागततया मुनिरञ्जनासा-
माशिल्य संघटनकर्मणि जागरूकाम्।
आवेद्य चाधिदशमं स्वमकिञ्चनत्वं
श्रीवेङ्कटेशचरणौ शरणं प्रपेदे ॥७२॥

पातमप्यकुर्वता भाव्यम्। अस्य सर्वस्याचार्यानुग्रहायत्तत्वात् तत्कुलं पुष्कलं भाव्यम्।

इति द्वितीयप्रकरणं समाप्तम्। अथ तृतीयप्रकरणमारभ्यते॥

२४४ तः २५८ पर्यन्तं मङ्गलाशासनसमर्थनम्

२४४) मङ्गलाशासनं किं स्वरूपोचितं वो भवतीति चेत् प्रक्ष्य रक्षित्रयोः। (नौ)
ज्ञानकालेऽवास्थितिः स्याद्यथावत्तयोः प्रेमकालेऽवास्थितिः स्याद्विपर्यासिता॥

टि) द्रष्टारः दिनचर्याश्लोकेषु ये विवरणीया अर्थाः, तेषु मङ्गलाशासनं विविच्यते। ईश्वरो न्यूनतारहितः सकलमङ्गलनिधिः, तद्द्वाराऽस्मासु सन्ति अमङ्गलानि, अस्मान्ते मङ्गलानि चोत्पाद्यानीति युक्तम्। तद्रक्षायै रस्माभिस्तस्य रक्षणमर्थ्यं मङ्गलाशासनकरणमुभयगतस्य रक्ष्यरक्षकभावस्य किं न विरुद्धमित्यत्राह, मङ्गलेति। स रक्षकः वयं रक्ष्या इति वैशद्येनानुसन्धानं ज्ञानदशा, अस्य सौन्दर्यसौकुमार्यादीनि दृष्ट्वाऽस्य विषयस्य कोऽप्यनर्थ आपतिष्यतीत्यतिशङ्कनं प्रेमदशा इत्यवस्थाद्वयमस्ति। तत्र प्रथमदशायां "निवर्तिय दुःखं मा वा निवर्तिकाल स्वकन्योऽहमिल्लकरीत्या स्वगतानिष्टनिवृत्तिप्रभृतौ स एवाधिकरोतीति वीसतात् रक्ष्यरक्षकभावो यथास्थानं स्थितो भवति। प्रेमदशायां तु ईश्वररक्षणार्थं वैयाकुल्यात् रक्ष्यत्वमीश्वरे रक्षकत्वं स्वस्मिन्निति विपर्यस्तस्थानं वर्तते॥

२४५) स्यात् स्वरूपं हरेर्निर्जितं चेत्ततः स्वस्य रक्षामसौ चेतनो लिप्सते।
सौकुमार्याद्यनुसन्धान काले पुनः स्वेन तं केशवं रक्ष्यमाकाङ्क्षति॥

टि) सर्वज्ञस्य सर्वशक्तस्य सर्वरक्षकस्य तस्य स्वरूपेऽनुसन्धीयमाने तं रक्षकत्वेनाश्रित्य स्वात्मारक्षितुं युज्यते। सर्वशक्तित्वादिकं विस्मृत्य प्रथमदृष्टिपातविषयस्य तदीयस्य सौकुमार्यादेः दर्शने तस्य रक्षककोटावात्मानमवस्थाप्य मङ्गलाशासनं क्रियते॥

२४६) एतत् पङ्क्तिस्थे राशि मैथिल्यां कुशिकात्मजे।
दण्डकारण्यवास्तव्यमहर्षिषु हनूमति।
सुग्रीवे नन्दगोपे च विदुरे चापि किङ्करे। [illegible]
अन्यत्रापि च भूयस्तु भक्तेष्ववीक्षणमर्हति॥

टि) तारकातारकेयनिरासकरामवीर्यज्ञोऽपि दशरथः परशुरामप्रसङ्गे धातरोषात् प्रशान्तस्त्वं ब्राह्मणोऽसि महायशाः। बालानां मम पुत्राणामभयं दातुमर्हसि" इति प्रार्थयमानः मूर्च्छन् पराजिते तस्मिन् गते "गतो राम इति श्रुत्वा हृष्टः प्रमुदितो नृपः। पुनर्जातं तदा मेने सुतानात्मानमेव च॥" इत्युक्तेर्मङ्गलाशासनपरोऽभूत्। श्रीसीता अभिषेकार्थमलंकृतं दशरथप्रासादं प्रतियान्तं रामं पश्यन्ती आदित आरभ्य भगवद्वैभवज्ञापित सौन्दर्यपरत्वात् अतिशङ्कमाना "पतिसम्मानिता सीता भर्तारमसितेक्षणा। आद्वारमनुवव्राज मङ्गलान्यभिदध्युषी" "पूर्वां दिशं वज्रधरो दक्षिणां पातु ते यमः। वरुणः पश्चिमामाशां धनेशस्तूत्तरां दिशम्" इति मङ्गलाशासनमकरोत्। जनकः सीताविवाहे सौन्दर्यसौकुमार्यमुग्धः "इयं सीता मम सुता सहधर्मचरी तव। प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना" इति तस्यापि रूपदामधस्य क्षेमं मङ्गलाशासनमकरोत्। अहं वेद्मि महात्मानमित्यादि वदन् विश्वामित्रः ताटकाक्रमणकाले सौकुमार्यमग्नः "विश्वामित्रस्तु ब्रह्मर्षिर्हुकारेणाभिभर्त्स्य ताम्। स्वस्ति राघवयोरस्तु जयं चैवाभ्यभाषत॥" इत्युक्तेर्मङ्गलाशासनमकरोत्। दण्डकारण्यवासिनो महर्षयः भगवान् रक्षकोऽस्तीति साधनानुष्ठानेन कृतपूर्विणो भगवति सन्निहिते तत्सौकुमार्यमग्नहृदयाः "ते तं सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणः। मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन् दृढव्रताः" इत्युक्तेर्मङ्गलाशासनमकुर्वन्। हनूमान् प्रथमदर्शने "आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः। सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः" इति बाहुसंस्थानेन पराक्रमं जानन्नपि तत्सौन्दर्यदर्शने दृष्टिदोषमतिशङ्कमानः भगवतो रक्षां [illegible] सर्वदा भगवन्तं रक्षितुमनुवर्तमानो मङ्गलाशासने दक्षार्यं प्रारब्धवान्। सुग्रीवः मालिवधा-

८.१. आद्ये मुनिः स शतकस्य तु सप्तमस्य
तस्मिन्नपि प्रयतने विफले विषण्णः।
ईशेन पातितमिव स्वमवेत्य गर्वे
तस्मै स्वभीतिमवदद्विषयेन्द्रियेभ्यः॥८३॥

८.२. आत्मप्रबन्धमसमाप्य हितं जनाना-
मात्मेष्टमक्षमतया हरिणा प्रदातुम्।
श्रीरङ्गिणाप्यसुशकप्रशमार्थचिन्तां
भूयस्तरामरतिमाप मुनिर्द्वितीये॥८४॥

८.३. श्रीरङ्गभर्तुरशरण्यशरण्यभाव-
प्रस्तावनन्यगतिरस्य गतौ स भूयः।
स्वस्मिन् हितप्रियपरेतरनिर्विशेष-
मासीदवार्यबहुलाभिरुचिस्तृतीये॥८५॥

८.४. आतन्वता हितमथात्मदशानुरूप-
माविष्कृताननुपमान् कुरुशोत्तमेन।
आत्मापदानविभवानतिलोभनीयान्
अप्यक्षय(?)शठजिदन्वभवच्चतुर्थे॥८६॥

८.५. आत्मैकरक्षणपरानवतारहेतून्
अन्यादृशान्गुणगणानपहाय शौरेः।
अन्यत् कथं मतिमतामवलोकनीय-
मित्यान्यपर्यमलुनोदथ पञ्चमे सः॥८७॥

दिभिर्भगवद्भक्तोऽपि भगवत्सौकुमार्यमननः शरणागतविभीषणविषयेऽस्मा-
त्प्राणभूतश्रीरामवधेनास्मान् सर्वान् जिघांसतीति दोषमारोपयन् "एष सर्वायु-
धोपेतश्चतुर्भिः सह राक्षसैः। राक्षसोऽभ्येति पश्यध्वमस्मान् हन्तुं न संशयः"
"वध्यतामेष तीव्रेण दण्डेन सचिवैः सह। रावणस्य नृशंसस्य भ्राता ह्येष
विभीषणः" "रावणेन प्रणिहितं तमवेहि निशाचरम्। तस्याहं निग्रहं मन्ये क्षमं क्ष-
मवतां वर" इत्यादि वदन् भगवता "पिशाचान् दानवान् यक्षान् पृथिव्यां चैव
राक्षसान्। अङ्गुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर" इति स्वबलं कपोतो-
पाख्यानं कण्डूपाख्यानं च श्रावयित्वा विश्वासयितव्य आसीदित्यहो मंगला-
शासनपरतास्य श्रीवत्स्य। तथा जयतु महाराजः चतुर्दशसहस्रराक्षसहन्तृरामवि-
क्रमं जानन्नपि सीताविरहजकार्श्यं सौकुमार्यं राक्षसशात्रवं च पश्यन् तव प्राण-
समा सीता मम प्राणाश्च रावणेन हृताः इति वदन् "यामोषधिमिवायुष्मन्नन्वेष-
सि महावने। सा देवी मम च प्राणा रावणेनोभयं हृतम्" इति आयुष्मन्निति संबोध-
यञ्जायुराशास्त। श्रीनन्दगोपः पूतनानिरसनेन कृष्णपराक्रमं जानन्नपि शैश-
वप्रयुक्तसौकुमार्यदत्तदृष्टिः मुह्यन् "रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत्" इति रक्षामकरोत्। किञ्च श्रीविदुरः कृ-
ष्णप्रभावज्ञोऽपि दुर्योधनसभायां दुर्योधनदत्तदुष्टासनासनादाद्धर्यात्
स्वगृहे स्वभक्तमप्यासनं "तं स्पृशन्नासनं शौरेर्विदुरः स महामतिः" इति स्पृ-
ष्ट्वा निरन्वैक्षीद्। [illegible] इत्युक्तोऽपानुजस्वामी
भगवतः प्रभावं विरक्तत्वं जानन्नपि प्रेमान्ध्यात् भगवतो नौविहारे भगवति ई-
श्वरे ईषदपि कम्पने जाते आत्महत्यां कुर्यामिति विकोशखड्गं विभ्राणोऽनुवर्तते-
स्मेति प्रसिद्धम्। अन्यत्रापि च भूयस्तु भक्तेषु इत्यनेन "स्त्रियो वृद्धास्तरुण्यश्च
सायं प्रातः समाहिताः। सर्वान् देवान्नमस्यन्ति रामस्यार्थे यशस्विनः" इति रामा-
भिषेकानन्तरे वर्णिता अयोध्यावासिनः "यन्मङ्गलं सुपर्णस्य विनताऽकल्प-
यत् पुरा। अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम्" इति वदन्ती कौसल्या
"जातोऽसि देवदेवेश शङ्खचक्रगदाधर। दिव्यरूपमिदं देव प्रसादेनोपसंहर"
इति वदन् श्रीवसुदेवः "उपसंहर सर्वात्मन् रूपमेतच्चतुर्भुजम्। जानातु
माऽवतारं ते कंसोऽयं दितिजन्मजः॥" इति वदन्ती श्रीदेवकी च संग्राह्याः॥

२४७) सौमित्रावतिशङ्काद्य श्रीगुहेऽप्यतिशङ्कया।
व्याख्या: परिकरास्तस्य ररक्षुः किल राजवत्।

टि) विषयवैलक्षण्यं सर्वानपि मङ्गलाशासने प्रवर्तयेदित्यत्रेदं निदर्शनम्।
शृङ्गवेरपुरे श्रीगुहाय दर्शनदानानन्तरं लक्ष्मणास्तृतपर्णशय्यायां श्रीसीताराम-
योः सुप्तयोः सतोः एतन्मिथुनेऽन्यथातिशङ्कया धनुष्पाणौ लक्ष्मणे तौ परिक्रामति
तं दृष्ट्वा श्रीगुहे एको ज्ञातानान् द्वारा वनं प्रेषयामास, अयं किन्नु कुर्यादित्यतिशङ्कया दौ-
ष्ट्ये लक्ष्मणहननार्थं तमनु परिक्रामति उभयोर्विषयेऽतिशङ्कयावनेचराः पर्यक्रा-
मन्नित्य धमर्पि श्रीभरतं प्रतिगुहोक्ते "नियम्य पृष्ठे तु तलाङ्गुलित्रवान् शरैः सुपूर्णा-
वामिषुधि परन्तपः। महद्धनुः सज्यमपोह्य लक्ष्मणो निशामतिष्ठत् परितोऽस्य
केवलम्। ततस्त्वहं चोत्तमचापबाणधृत् स्थितोऽभवं तत्र स यत्र लक्ष्मणः। अतन्द्रिभिर्ज्ञा-
तिभिरात्तकार्मुकैर्महेन्द्रकल्पं परिपालयंस्तदा" इत्युक्तश्लोकयोरवगम्यते॥

२४८) कदाचित् स्वमुखाम्भोजे दत्तदृष्टिर्महात्मनः।
भागवतसौख्य... कुल प्रयत हो।।

भक्ति पारवश्य भगवान्...

८.६. तादृग्गुणप्रविशदानुभवप्रवृद्ध-
स्वापेक्षिताभिरुचितार्त्तिमहार्णवः सन्।
प्राप्यं शरण्यमपि वीक्ष्य कदाऽनुगः स्या-
मद्ध्येस्तवेति विललाप मुनिः स षष्ठे ॥७८॥

८.७- नत्प्रार्थितानधिगमेऽपि च भावनाया-
भूम्नः पुरस्स्थितमिवाननमच्युतस्य।
आलोकयन्नपि करेण न संस्पृशन् स
पीडाप जाण महतीमथ सप्तमेन ॥७९॥

८.८. संङ्गं निवर्त्य मम संसृतिमण्डले मां
संस्थापयन् कथयसीत्यनुचोदितेन।
आश्चर्यलोकतनुतामपि दर्शयित्वा
विस्मारितः किल शुचं हरिणाष्टमेन ॥८०॥

८.९. पृष्टः फलं स्वनसतेरिह दुःशकायाः
स्वैन प्रबन्धरचनां फलमाह शौरिः।
अन्येषु सत्स्वपि तदा समुपेक्षमाण-
मप्रस्तुपक्रियममुं नवमे जगौ सः॥
"८१"

८.१०- आनन्दमाकलयितुं कमलासखस्य
संश्राव्य तत्करुणया स्वकृतं प्रबन्धम्।
अर्हे तदादरणशालिनि दिव्यदेशे
यात्रामनोरथमसौ दशमे चकार ॥८२॥

टि) श्रीगुहतत्परिकरान् सकृद्दृष्ट्वा भगवन्मुखानपि भगवत्सौन्दर्यमेवं कर्म कारयति ॥

२४९) निदिष्टास्तु निषादाद्या अस्मत्कक्ष्यास्थिता इति ।
बान्धवतां स्तुवते दिव्यसूरयः शठजिन्मुखाः ॥

टि) मंगलाशासने दिव्यसूरीणामभिनिवेशो दृष्टे एते सर्वेऽपि भगवत्प्रेमधुर्यास्तत्कल्पाः ।

२५०) सर्वेभ्यो दिव्यसूरिभ्यो विष्णुचित्तो विशिष्यते ।
टि) सर्वे दिव्यसूरयः एकजटायां विष्णुचित्तोऽपरधन्यचरमस्त्वेवमस्मत्तेभ्यो विशिष्टः

२५१) कादाचित्कमिदं तेषामेतस्य तु सनातनम् । इदं मंगलाशासनं । स्पष्टम्

२५२) यत्र ते विनिमज्जन्ति तत्रासौ प्रतितिष्ठति ।
टि) तत्र हेतुः क इति चेत् उच्यते, श्रीभगवत्सौन्दर्यमन्येषां सूरीणां चक्षुषी मनो च हृत्वा स्वस्मिन्निमज्जयेत् , ते तत्रासक्ता मङ्गलाशासने प्रवर्तन्त इत्येव अयं तु अस्य सौन्दर्यस्य को ऽनर्थो भविष्यतीत्यतिशङ्कया मंगलाशासने प्रवर्तत इति तत्सौन्दर्यमेवास्यो ऽत्युपकारकस्थानं भूत्वा एनं धृतं करोति ॥

२५३) तेषां विनाश्य भगवद्दृक्तो भयशेषताम् ।
स्वरूपं स्वनिमग्नं सत् कुरुते या तु सौन्दरी ।
साऽस्योभयविद्दूर्या समुत्तारयतेऽथ तत् ॥

टि) भगवच्छेषत्वे भागवतशेषत्वे चान्येषां सूरीणां स्वरूपे सत्यपि भगवत्सौन्दर्यं अन्येषां सूरीणां तद्विनाशाय दृश्यते । भगवति विलम्ब्यागते तत्तिरस्करणात् सौन्दर्यस्य भगवत्~~सौन्दर्य~~च्छेषत्वनाशकत्वं दृष्टम्, नायिकाभावे भगवति अदृष्टे सति व्याकुलां पुत्रीं प्रति तत्प्रेमसूचनाय मात्रादिषु वदन्तीषु नायिकया पुत्र्यतां लब्धं संक्षिप्यापीत्युक्त्या भागवतशेषत्वनाशकत्वं दृष्टम् । अस्य विषये तु तथा न, भगवत्सौन्दर्यमस्य भगवतः तदीयलक्ष्मीप्रभृतीनां मङ्गलाशासने प्रवर्तनाद्भयवर्धकम्

२५४) भीनेश्वर्त कशौर्यादिगुणेभ्यो भीतिशालिता ।
प्रतिकूलजनानामप्यनुकूलतया कृतिः ।
भूतकालिकचर्यार्थमुत्तरत्रावसन्नता ।
मङ्गलाशासनं हेव प्राप्तेः फलमितीरणम् ।
निरीक्ष्यानिमिषान्तिके: उरकल उरकल इति, जागर्ति ऑगटतिस्तिति ।
इत्यमीषां स्वभावानां विष्णुचित्ते सदा स्थितिः ।

टि) भगवतः पराक्रमे दिव्यायुधेषु च दृष्टेषु निर्भयतयाऽवस्थातव्ये सति एषामपि कोऽप्यनर्थो भवे दिति भीतिः; प्रतिकूलानामैश्वर्यार्थिनां कैवल्यार्थिनामपि मङ्गलाशासनार्थमनुकूलीकरणम्, चिरातिवृत्तं हिरण्यरावणवधादि विचिन्त्य तदर्थमद्य मङ्गलाशंसनम्, नित्यप्रबुद्धान् नित्यसूरीन् प्रति जागतो भूत्वा मंगलाशासनं कुरुतेति प्रबोधनं चेति मङ्गलाशासनैकयात्रोऽयं सूरिः ॥

२५५) श्रीवृष्णामपि वक्तृणां विहन्तुमसहायताम् ।
यथा हृत्कुपदिशत्यन्यो नैवं भाष्यकृदेव च ।
किं तु तस्य हरेरेव विहन्तुमसहायताम् ।
आकुमारिरिती यं गीराचाष्टे खलु तस्य ताम् (तिरुवाय्मोली
न दासयति दासानित्येवं गीराह तस्य ताम् ॥ ४.३.३.

टि) सर्वेन्तरेभ्योऽस्य वरेरांचार्यान्तरेभ्योऽस्य भाष्यकारस्य चोपदेशोऽस्ति विशेषः अन्ये वक्तृणां स्वेषां श्रीवृष्णां चासहायतां निवर्त्य ससहायतासंपादनायोपदिशन्ति, इमौ तु न

[illegible] मानस्या ।
भाऊ पारवश्य [illegible]

८.१. आद्येऽक्रमस्य शतकस्य यथेष्टसिद्धि-
मप्राप्य खिन्नमतिराश्रितपारतन्त्र्यम् ।
सर्वेश्वरत्वमपि शङ्कितवान् शठारि-
रीशस्य तेन पुनरेव विबोधितोऽभूत् ॥८३॥

८.२. संप्राप्तकेऽपि च विभौ निजवाञ्छितार्थ-
प्राप्तेर्विघात इतरेषु च पाशलेशः ।
स्वस्येति शङ्कितमनाः स्वहितेऽपि वर्गे
स्वस्मिन्नपि प्रवणतां मुमुचे द्वितीये ॥८४॥

८.३- प्रेमाधिकेन विवशः सुकुमारमूर्तेः
क्षेमाय खिन्नहृदयः पुरुषोत्तमस्य ।
तद्दर्शितात्मपरनित्यमुमुक्षुमुक्तैः
किंचित् समाहितमनाः शठजित्तृतीये ॥८५॥

८.४. क्षेमं स्वशौर्यमधिकं विमतैरधृष्यं
ग्रामं च कंचन निजाव स्कथायमानम् ।
तत्र द्विजानरिजितः स्वसमानं प्रदर्श्य
निर्भरिकारि नितरां स मुनिश्चतुर्थे ॥८६।

८.५- सुक्षेमसुन्दरतनुं परिलिप्सुरीशं
शोचन् मुनिर्दहनलीढ इतातितप्तः ।
एह्येवमित्युपगतस्य बहुप्रकारान्
आनन्दाय शौरिरधिप च्यममाजुहाव ॥८७॥

सहायस्य भगवतः सहायानापादयितुमपदिशन्तः ॥

२५६) सत्तासमृद्धयो ऽन्येषां तीर्थानुभव दास्यतः ।
मङ्गलाशासनेनैव विष्णुचित्तमुनेस्तु ताः ॥

टि) अन्ये सूरयः भगवद्दर्शनानुभवाभ्यां स्वस्य सत्तेति तत्कैङ्कर्येण स्वस्य समृद्धिरिति मन्यन्ते, अस्य भट्टनाथस्य तु तत्सर्वं मङ्गलाशासनेन भवति ।

२५७) दिव्यदेशान् सन्त्याने विहाय शयनाशने ।
अस्यैव यात्रा सर्वेषामस्माकं भवितुं क्षमा ।

टि) श्रीरङ्गादिदिव्यदेशेषु विराजमानस्य भगवतः स्थितौ अनुसंहितायां अथवा प्रदेसंसारे विराजमानस्यास्य को ऽनर्थः स्यादिति धिया ऽस्माभिः शयनाशने हित्वा ऽस्य भट्टनाथस्य मङ्गलाशासनयात्रैव स्वयात्रात्वेन ग्रहीतव्या ॥

२५८) मङ्गलाशासनं तस्मात् स्वरूपानुगुणं मतम् । स्पष्टम् ॥

२५९ तः २७२ पर्यन्तमनुकूलप्रतिकूलनिरूपणम्

२५९) येषां तु परमात्मनि ज्ञानभक्तिविरक्तयः ।
विशिष्य भान्ति प्रसङ्गं ते ऽनुकूलाः प्रकीर्तिताः ॥

टि) २४२ सूत्रे उक्तः अनुकूलसहवासः प्रतिकूलसहवासनिवृत्तिश्चेतः परं निरूप्यते । स्पष्टम्

२६०) एकस्मिन् सति केदारे पूरिते पयसा ततः ।
यथा तत्पार्श्वगं क्षेत्रमपि क्लिन्नं प्रतीयते ।
तथा ज्ञानादिशून्यानामप्यमीभिः सहान्वयात् ।
तदभावप्रयुक्तस्य तापस्य विलयो भवेत् ॥

टि) अनुकूलसहवासेन किं सिध्यतीत्यत्राह, यथैकस्मिन् केदारे पयःसंभृते जलाभावाच्छुष्यत्सस्यं केदारान्तरं शोषहीनं क्लिन्नं भवति, तथा ज्ञानभक्तिवैराग्याभावात् शुष्यत्स्वरूपा अपि एतत्सहवासेनेषद्दिमान् गुणान् लब्ध्वा एतदभावहेतुकतापहीना भवन्ति ॥

२६१) सरित्प्रवाहसान्निध्ये तदौपयिकलक्षणाम् ।
पयोत्पत्तिस्तथैतेषां भगवत्प्राप्तिसान्निध्यौ ।
संपर्केण स्वतः कामं ज्ञानभक्त्याद्युपोद्गताः ॥ स्पष्टम्

२६२) एवं संपद्यमानाभिर्ज्ञानभक्तिविरक्तिभिः ।
चरमं वपुरित्येवं स्वस्यैव स्याद्विनिर्णयः । स्पष्टम् ।

२६३) ये देहात्माभिमानाढ्या अन्यशेषाः स्वतन्त्रकाः ।
उपायान्तरनिष्णाताः स्वप्रयोजनतत्पराः ।
प्रतिकूलास्तु ते प्रोक्तास्तानुद्दिश्याथ कथ्यते ॥ स्पष्टम्

२६४) एतेषां भिन्नभिन्नं स्यादुद्देश्यप्राप्यकं त्रयम् । उद्देश्योपायोपेयाः ॥

२६५) देहात्मज्ञानिनां तावदुद्देश्या देहवर्धकाः ।
अर्थस्तु साधनं, साध्यमैहिकार्थोपभोजनम् ।
स्वतन्त्राणामथोद्देश्याः स्वर्गप्रमुखभुक्तिदाः
उपेयं स्वर्गभोगादि रुपायः कर्मणां कृतिः ।
अथान्यशेषोद्देश्यास्तु ब्रह्मरुद्रादयः सुराः ।
उपायः सेवनं तेषां तत्सायुज्यफलं स्मृतम् ।

८.६. सद्यः स्वसंगमकृतौ भविता न साम्या

प्रीतिः समेति हरिराप्तुमनाः शनैर्माम्।

वैकुण्ठतोऽधिगतवान् मतिरित्यनन्यां

स्थाने क्वचिद्बहुमतिं विन्दधे स षष्ठे॥८९॥

८.८. मद्विप्रयोगमसहन् स्वयमेव चार्थी

मामल्पकैकनिलयं बहुमन्यमानः।

शौरिः समाश्लिषदिदं मतिविभ्रमः कि-

मित्यात्मनो मुदमभाषत स प्रमेन॥९०॥

८.८. स्वायोज्यतामतिनिवर्तनलोलुपेन

श्रीकौस्तुभेन कमलास्तनतोऽपि तुल्यम्।

आत्मैकशेषमनबोधितमीश्वरेण

स्वस्य स्वरूपमवदन्मुनिरष्टमे सः॥९१॥

८.९. अन्यार्हताश्रवणमप्यथ शेषतायाः

सोढुं न शक्यत इति स्वदशाविशेषम्।

अन्यापदेशमवलम्ब्य तदोपयुक्तं

नारायणैकपरधीर्नवमे जगाद॥९२॥

८.१०. तां शेषतामपि तदीयतदीयसीमा-

शेषत्वपर्यवसितां पुरुषार्थसीमाम्।

आविष्कृतां भगवता मुनिरात्मरुच्या-

माध्यात्विकृतवान् दशमे[illegible]ऽमर्थमन्ये॥९३॥

अन्योपायरतो दृष्ट्यः देवतान्तःस्थितो हरिः।
उपायः कर्म जीभक्तिः फलं भुक्तिः परालनः।
स्वप्रयोजनसक्तानां दुदृश्या ~~नामयो~~ हरिः। अजितसंकालितदृष्ट्याद्रुहः
साधनं स्वीकृतिः स्वीया प्राप्यं तु स्वार्थकैङ्कर्यम्॥ स्पष्टम्॥
२६६) निग्रहे लक्ष्यभूतास्ते प्रथमं कथिता स्त्रयः।
अनुग्रहशरव्यत्वमन्ययोरुभयोरथ॥
टि) सर्वथा भगवत्सम्बन्धहीनत्वादात्मस्वरूपो निग्राह्याः। उभौ त्वनुग्राह्यौ
२६७) त्रयाणामादिमानां तु कर्म नाश्यं हि भक्तितः।
प्रायश्चित्तविनाश्यं तत् चतुर्थस्याधिकारिणः।
अथो पुरुषकारेण विनाश्यं पञ्चमस्य तु॥
टि) प्रथमानां त्रयाणामनुभवैकविनाश्यं पुण्यपापरूपं कर्म, उपायान्तरनिष्ठस्य प्रायश्चित्तरूपोपायान्तरनाश्यम्, स्वप्रयोजनपरप्रपन्नस्य तु लक्ष्म्याः पुरुषकारत्वेनाश्रयणात् तदर्थं भगवान्क्षमते इति पुरुषकारविनाश्यं कर्म॥
२६८) स्वीकारकाले तूपायः पुमांसं (पुरुषं) घटकं (पुरुषकारं) तथा।
अपेक्षेत, क्रियाकाले तूभयापेक्षको नहि॥
टि) सिद्धोपायस्य भगवतः पुरुषकारसापेक्षत्वे निरपेक्षोपायत्वं हीयेतेति चेन्न, स्वीकाररूपशरणवरणवेलायां कर्तृरूपपुरुषकारेतदुभयसापेक्षत्वेऽपि इष्टप्रापणानिष्टनिवर्तनरूपकार्यकरणकाले तन्नैरपेक्ष्येणादोषात्। तदा तत्सापेक्षत्वे हि दोषः।
२६९) स्वप्रयोजनसक्तेषु सर्वेषु प्रतिकूलता।
कथं भावयितुं योग्या भवतीत्यत्र कथ्यते।
२७०) आचारदोषजं त्वत्र स्वप्रयोजनशब्दितम्।
२७१) ततो न दोषो, (२७२) विषयदोषजं दुस्त्यजं खलु।
२७३) तत्राष्टनेत्तादिपद्यं शेविडर् वार्तै इत्यपि। तथा बधिरवागिति।
श्रीसूक्तिद्वयमत्र स्यादनुसन्धानगोचरः॥
टि) २६९-२७३. स्वप्रयोजनपराणां सर्वेषां प्रतिकूलत्वे दिव्यसूरीणामपि प्रतिकूलत्वमापद्यते, ते षामपि मडल् ग्रहणादिभिः स्वप्रयोजनपरत्वदर्शनादित्यत्राह अत्र स्वप्रयोजनशब्देनानुभवकैङ्कर्ययोः पच्चेतनगताविद्यारुचिवासनारूपदोषनिबन्धनं स्वप्रयोजनमेव विवक्षितम्, न तु भगवद्विषयभूतभगवद्विग्रहवैलक्षण्यरूपदोषजं स्वप्रयोजनमपि। दिव्यसूरीणां स्वप्रयोजनपरत्वं नाश्रयदोषजं किंतु विषयदोषजम्। विषयदोषजस्वप्रयोजनपरत्वं तद्गतः प्रावण्यं तत्तत्सिद्ध्यर्थव्यापारात् स्वरूपविरुद्धत्वज्ञाने सत्यपि दुस्त्यजाः दुस्त्यजत्वं तवाष्टत स्यादिनीति लोके मूकबधिर वार्तैति गोदासूक्तौ च स्पष्टम्।
~~२७४)~~ —— प्रपन्नवस्तुत्वादिनिरूपणम् —— २७४
२७४) सदाचार्यप्रसादेन सर्वे रेते गुणा यदि।
अभिवृद्धिर्वा [illegible] [illegible]

९.१. आद्ये चकार नवमे शभके शठारि-
स्तच्छेषतानुभवसन्मतिसंमतेन।
निश्चित्य सर्वविधबन्धुतया तमीश-
मापत्सखं प्रणमतेति परोपदेशम्॥९४॥

९.२. बन्धुत्वतः स्वमनुकम्पितवन्तमादा-
वाप नवधाम्नि भुजगाधिपतौ शयानम्।
स्वापेक्षितं मुनिरयाचत तं द्वितीये
तस्यैकरूपशयनेऽपि च दुःखितोऽभूत्॥९५॥

९.३. नारायणे मयि सति स्वभरार्थचिन्ता-
नार्हा तवेति विभुना बहुमानभाजा।
आविष्कृतां निरवधिं निजशीलवत्ता-
मन्यादृशीमनुबभूव मुनिस्तृतीये॥९६॥

९.४. शीलाधिकः प्रियमुरस्स्थलतो दधानोऽ
प्यात्मेप्सितं न दिशतीत्यतिमात्रखिन्नः।
लब्ध्वा ततः किमपि तस्य कृपाकटाक्ष-
मद्राक्षमीशमिति सम्प्रजहर्ष तुर्ये॥९७॥

९.५. आलोकनं च तदपाङ्ग्रुपमित्यथार्तो-
दृष्ट्वा च तत्स्मरणहेतुपदार्थजातम्।
आसन्नहानिकतयाऽवसितस्सुसक्तो
दुःखेन दुस्सहतरेण स पञ्चमेऽभूत्॥९८॥

आचार्यभागवतासु वक्तव्यं स्थलमुच्यते।
वक्तव्यं गुरुमाहात्म्यं निकृष्टस्वात्मनस्तथा।
जपार्थं मन्त्ररत्नं च गुरूणां च परम्परा।
परिग्राह्यं तु पूर्वार्यसूक्तं च तदनुष्ठितिः।
वैष्णवेतरसङ्गोऽभिमानोऽथ त्याज्यमुच्यते। तदभिमानविषयत्वम्
कर्तव्यं ननु कैङ्कर्यमाचार्यस्येश्वरस्य च॥

२६५ तः २८७ पर्यन्तं कैङ्कर्यशोधनम्

२६५) भगवत्परिचर्याया विज्ञानं शास्त्रफलकम्। तस्यवाचंयमत्वात्।
आर्यकैङ्कर्यविज्ञानं (आचार्यसेवाविज्ञानं) शास्त्रवस्तन्मुखादपि। स्पष्टम्
२६६) २६७) इष्टानिष्टकृतित्यागाविति (२६६) द्वेधा हि कैङ्करी।
२६८) तत्तद्वर्णाश्रमात्मस्वरूपं चावलम्ब्य हि।
इष्टानिष्टे विराजेते इति ज्ञेयं विवेकिभिः॥
टि) इष्टकरणमनिष्टत्याग इति द्वेधा कैङ्कर्यम्। किमिष्टं किं चानिष्टमिति चेत्
वर्णाश्रमोचितानुष्ठानमिष्टं, तद्विरुद्धानुष्ठानमनिष्टम्, आत्मस्वरूपोचितानु
ष्ठानमिष्टम्, तद्विरुद्धाचरणमनिष्टम् इति विभागः
२६९) सुकृतात् चकितः साधु दुष्कृतं न किलाचरेत्।
टि) वर्णाश्रमस्वरूपविरुद्धानामनुष्ठानमनिष्टमिति प्रबोध्य किमस्य तस्मा
न्निवर्तनं कार्यमिति चेत् न, पुण्यस्य भगवदनुग्रहहेतुतया शास्त्रसिद्धत्वेऽ
पि मोक्षविरोधित्वात् तदनुष्ठाने संकुचन्नयं भगवन्निग्रहहेतुत्वेन शा
स्त्रसिद्धसामान्यैरपि त्यक्तं पापाचरणं मनसाऽपि न स्पृशेदिति कैमुत्यसिद्धम्
२७०) जीवस्य पापभीः पुण्ये, पापे पुण्यमतिर्हरेः।
तस्य तत् सुलभं न स्यात्, यदेष न तदाचरेत्॥
टि) तदा विद्वान् पुण्यपापे विधूयेति पुण्यस्यापि भगवत्प्राप्तिप्रतिबन्धक
त्वात् प्रपन्नः पुण्यमपि पापं मन्यते, दोषभोग्यो भगवांस्तु तदीयं पापमपि
पुण्यं मन्यते। स नाश्नातीसेव, न पुनरश्नाति, प्रपन्नो न पापस्य सर्वथाऽनाचरणात्।
२७१) कैङ्करी चेन्न भक्त्या स्यात्, अथ भीत्यापि नो भवेत्।
टि) कैङ्कर्येण भक्तिप्रसक्तेन भाव्यम्। अथवा कैङ्कर्याभावे शेषत्वं नश्येदिति
धिया भीतिप्रसक्तेन वा भाव्यम्। अन्यथा शेषत्वरूपेऽधिकारे शेषिकृपा
रूपे उपाये तत्प्रसक्तोत्तरूपे उपेये च आन्वयो नश्येत्॥ तदिदमुच्यते
२७२) तथा भीतिप्रयुक्तापि कैङ्करी चेन्न सिध्यति।
अधिकारे तथोपायोपेययोश्चान्वयश्च्युतः॥ स्पष्टम्।
२७३) कैङ्कर्ये फलहेतुत्वधीस्त्याज्या तत् स्वयं फलम्।
२७४) स्वस्य याचकता मा भूत्, ईश्वरे साऽधिरोप्यताम्।
टि) दृष्टमदृष्टं वा फलमनभिसन्धाय स्वयंप्रयोजनबुद्ध्या कैङ्कर्यं कार्यम्
तत्रोत्थम्, स्वयं याचकत्वं त्याज्यम्, "ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम्"
इत्युक्तरीत्या स्वगतां कृतिमनभिसन्धाय यथा स याचको भूत्वा प्रतिगृह्णीया
त्, तथा कार्यम्

९.८- स्वस्यात्मतामगणयन् स्वयमर्थयित्वा
स्वं प्राप्य हर्षविवशो हरिरित्यधस्तात् ।
यच्छील्लमन्वभवदस्य तदेव दैवात्
संस्मृत्य स द्रुतमना व्यसनी स जज्ञे ॥९९॥

९.८० स्वीयं वियोगिजनहन्तनिजाभिरूप्यं
विस्मृत्य संश्रितजनैर्वसतस्सहैव ।
अप्यहरेः क्वचन तत्प्रतिबोधनाय
दूतीश्चकार विहगानधि सप्तमं सः ॥१००॥

९.८ ईशे समाजिगमिषत्यपि दूतवाक्यै-
स्तानधिलम्बमसहन् मुनिरस्य भौमम् ।
दूतीजुषः कमपि देशविशेषमाराद्
सायां कदेत्यवदार्थयदष्टमेन ॥ १०१॥

९.९- स्वप्राप्तिकालमविभावयती त्रिदशे (न्दि)
कृष्णे गवामवनधर्मिणि गोपिकानाम् ।
सायं समागमविलम्बिनि योऽनसाद-
आसीत् स एष नवमे स्फुरितः शठारिः ॥
॥१०२॥

९.१० प्राप्तिप्रदानसमयोऽयमिति प्रकाश्य
स्वस्य प्रियं महति कृष्णपुरे वसन्तम् ।
ईशं यथाशकनमाश्रयतेति हर्षा-
दन्योपदेशमकरोद्दशमे मुनीन्द्रः ॥१०३॥

२८५) दत्ता प्रतिजिघृक्षा तु सर्वथापि न युज्यते।
दत्तं यत् स्वीकृतं तेन तदर्थं श्रुतिरर्प्यताम्॥

२८६) विदुरो माल्यकृत् कुब्जेत्येतेषां वरिवस्यनम्।
अनुस्मृत्य कृतौ सत्यां स्वरूपं स्यात् समुज्ज्वलम्॥

२८७) प्रयोजनान्तरापेक्षागन्धलेशविवर्जिताम्।
खलु प्रदत्तवन्तोऽमी अन्नं पुष्पं च चन्दनम्॥

टि) लोको भोजयित्वा धनं ग्रहणार्थं भोक्तुः कीदृशत्वं परीक्षते, तथा कटिपरीक्षां हित्वा नमन्नं विदुरो ददौ। अग्निस्पर्शे पुष्पं दुर्गन्धं विसृजति, तथा प्रयोजनान्तरपर स्वरूपाग्निस्पर्शगन्धरहितं पुष्पं मालाकारो ददौ। -कूबरीकुब्जा (कंसदासी) स्पर्शे चन्दनं महिमहीनं भवति, प्रयोजनान्तरपरत्वस्पर्शरहितं चन्दनं कुब्जा ददौ॥

== २८८ तः २९४ पर्यन्तं दशाचतुष्क निरूपणम् ==

२८८) इत्थं कैङ्कर्यदशायां तत्पूर्वदशास्वपि च स्वरूपस्य।
औज्ज्वल्यमार्जनीयम् (२८९) दशाश्चतस्रो हि सन्ति पूर्वम्॥

२९०) ज्ञानदशा वरणदशा प्राप्तिदशा प्राप्यभुक्त्यवस्थेति॥ स्पष्ट

२९१) तत्र ज्ञानदशायामज्ञानस्य तु पुरस्क्रिया भवति।
अथ वरणस्य दशायां भवत्यपूर्तेः पुरस्क्रिया तावत्।
अथ च प्राप्तिदशायामार्तिभरस्य तु पुरस्क्रिया भवति।
प्राप्यानुभूति काले स्वाभिनिवेशः पुरस्कृतो भवति।

टि) कैङ्कर्यदशायामिव तत्प्राक्तनदशास्वपि स्वरूपमुज्ज्वलं कार्यम्, ता दशाश्चतस्रः, आचार्योपदेशात् ज्ञानप्राप्तिदशा ज्ञानदशा, सिद्धोपायस्य सर्वेश्वरस्योपायत्वेन वरणदशा द्वितीया, संसारत्यागपूर्वं भगवत्प्राप्तिदशा तृतीया। ततः प्राप्यानुभवदशा तुर्या। ततः प्रीतिप्रेरिता कैङ्कर्यदशा भवति। तासु दशासु स्वरूपस्योज्ज्वलीकरणमित्थम् - प्रथमदशायामाचार्येणोत्तरोत्तरमज्ञानज्ञापनस्य संपत्त्यर्थं तत्तद्धितपुरुषार्थेषु स्वस्याज्ञानं पुनः पुनर्विज्ञाप्यम्। सिद्धोपायवरणदशायामाकिञ्चन्यरूपा अपूर्तिरनुसन्धेया। प्राप्तिदशायां यदा लभ्येत तदा लभेमहि इत्यनवस्थाय कदा कदेत्यार्तिरावेदनीया। तुर्यदशायां तृषार्तेन पयसि पीतेऽपि पुनः पुनर्यथा पिपासा वर्धमाना निवेद्यते, तथाऽनुभवेऽप्यतृप्त्या पुनः पुनर्भोग्यानुबुभूषारूपाभिनिवेशः पुरस्कार्यः॥

२९२) अज्ञानस्य विलोपस्त्वाचार्यज्ञानभूमतो भवति।
सर्वेश्वरस्य पूर्त्या विलयं प्राप्नोत्यपूर्तिरितरस्य।
आर्तिक्षयस्तु कृपयाऽभिनिवेशलयस्तु नियतमनुभूत्या।

टि) पूर्वोक्तरीत्या प्रथमदशायामज्ञाने विज्ञापिते आचार्यज्ञानेनाज्ञानं नश्यति। वरणदशायामाकिञ्चन्ये निवेदिते भगवतः सहकारिनिरपेक्षत्वरूपपूर्त्याऽऽकिञ्चन्यं निवर्तेत। तृतीयदशायां आर्तिनिवेदने कृते तस्य वत्सलो ईश्वरः कृपयाऽऽर्तिं निरस्येत्। तुर्यदशायामभिनिवेशे निवेदिते उत्तरोत्तरानुभवेनाभिनिवेशो नश्येत।

२९३) अज्ञानमपराधात् स्यात् अपूर्तिर्ज्ञानपूर्तितः।
आर्तिस्तु लाभात् सौन्दर्यात् जायेताभिनिवेशनम्।

टि) अज्ञानस्य ... बुद्धिपूर्वकागोकरणरूपोऽपराधोऽज्ञानस्य मूलम्। आ-

१०.१. आद्येऽन्तिमस्य शतकस्य मुनिस्स्वयात्रां
निश्चित्य वर्त्मनि सहायमपेक्षमाणः।
आप्तं हितज्ञमहिताच्छिदमम्बुजाक्षं
मोहूरधीशमुरवैरिणमाश्रयत् सः॥१०४॥

१०.२. वैकुण्ठमेत्य करणीयमशेषदास्य–
मत्रैव केवलमनन्तपुरे बिधित्सन्।
प्राप्यत्वमस्य दुरितौघनिवर्तनं च
प्राचीकथत्तनुभृतां शठजिद्द्वितीये॥१०५॥

१०.३. गोपीनियुक्तमपि गोचपलं वियुक्तं
दास्यन्तमस्य चिरमेव हरिं निरीक्ष्य।
स्वापेक्षकं तमतिशङ्क्य मुनिः स तेन
विस्रम्भितो विपुलतृष्णतया तृतीये॥१०६॥

१०.४. आसक्तिनिश्चययुतः स्वफलागमस्य
स्वार्थात् परार्थपरधीरनुकम्पया सः।
उज्जीवनाय जगतामुपदिष्टपूर्वां
कभक्तिं हरौ फलगुतां निजगाद तुर्ये॥
॥१०६॥

५. वैकुण्ठधामनि विकेशयिषुं स्वमीशं
तच्च स्वकीयविधिनैव विधातुकामम्।
पश्यन् मुनिः प्रमुदितोऽनुबभूव पञ्चे
[illegible] स्तुतीयः॥१०७॥

किञ्चान्य निवेदनौपयिकी ज्ञानशूर्तिराकिञ्चन्यस्य हेतुः इति भगवदलाभ आर्ति-हेतुः। अनुभूयमानमपि तद्विरहितोत्तरमनुभूयमानं सौन्दर्यमभिनिवेशहेतुः॥

२९४— आर्तिरभिनिवेशश्चेत्यनयोरुभयोः स्थितिः।
आर्तिरिक्यातिग्नौ प्रागेव प्रत्यपादात ॥ स्पष्टम्।

—— २९५ ततः २९९ पर्यन्तं गुणचतुष्क निरूपणम् ——

२९५) चत्वारोऽस्य गुणाः सन्ति चतस्रो हि दशा यथा। स्पष्टम्

२९६) ते तावत् ज्ञानमज्ञानं शक्तिश्चाशक्तिरेव च। स्पष्टम्

२९७) एते गुणास्तु चत्वारः सन्ति सर्वेश्वरस्य च। स्पष्टम्

२९८) तदीयज्ञानलक्ष्यं स्यादतदीयो गुणः परम्।
अज्ञानस्य तु लक्ष्यं स्यादतदीयापचारिता।
अस्य रक्षा च हानं च शक्त्यशक्त्योरिति क्रमः॥

टि) अथ तदीयगुणानां विषयो निरूप्यते। तेषु ज्ञानस्य विषय तदीयोऽद्वेषादिर्गुणः, अज्ञानस्य विषयोऽपचारः तदीयः, शक्तेर्विषयो रक्षा, अशक्तेर्विषयस्तत्त्यागः, सद्गमनस्य क्षम इति भावः॥

२९९) अथास्य ज्ञानमज्ञानं शक्तिश्चानन्तलक्षयेत्।
आचार्यगुण, तद्दोष, तच्छुश्रूषा यथाक्रमम्।
अशक्तेस्तु शरण्यं स्यान्निषिद्धा नामनुष्ठितिः॥ स्पष्टम्

—— ३०० ततः ३०७ पर्यन्तं निषिद्ध चातुर्विध्य निरूपणम् ——

३००) निषिद्धानि चतुर्धा स्युश्चातुर्विध्यं च तच्छृणु। स्पष्टम्

३०१) अकृत्यानां च करणं भगवदपचारिता।
तद्भक्तापचारश्च तथाऽसह्यापचारिता। स्पष्टम्

३०२) परहिंसा परस्तोत्रं परदारपरिग्रहः।
परद्रव्यापहारश्चासत्यकथनं तथा।
अभक्ष्यभक्षणं चान्यदकृत्यकरणं मतम्॥

३०३) भगवदपचारो हि देवतान्तरसाम्यधीः।
श्रीरामाद्यवतारेषु मर्त्यसाजात्यधीस्तथा।
वर्णाश्रमविपर्यस्तोपचाराणामनुष्ठितिः।
अर्चावतारोपादानचिन्तनं स्वेपमातनः। स्वदोषतत्त्वस्वात नाम्यबुद्धिःस्तोयम्
भगवद्द्रव्यचौर्यं चेत्यादिकं परिकीर्त्यते॥

३०४) भगवद्द्रव्यवर्गस्य स्वात्म नामोपणं तथा।
अर्थं तस्यापहर्तॄणां सहकारितया स्थितिः।
तेषां सकाशाद्धा आत्तोऽ(यपा) आत्तोऽपि वा स्पृहः।
इत्येतानि ह्यनिष्टानि भवन्ति भगवद्दृष्टि॥

३०५) हरिभक्तापचारः स्यादहंकारार्थकामतः।
श्रीवैष्णवानां विषये विद्रोहकरणं हि यत्॥

३०६) स्यादसह्यापचारस्तु निर्निबन्धनभावतः
भगवद्यथ तद्भक्तेष्वसहिष्णुतया स्थितिः।
आचार्येषु च तद्भक्तेष्वपि विद्रोहकारिता।

३०७) उत्तरोत्तरमेते स्वलपचारः सुदारुणाः।
[illegible] विरोधिवाम्। स्पष्टम्

१०-७. अस्मिन्नुपैम्यमुमिति स्वशरीरलोलं
तद्दोषमुग्धमपि तत्त्यजने स्वयाच्ञाम् ।
सार्थान्तिकीं श्रुममधिगम्य हरिं तदीये
शीले मुनिः स खलु सम्मतो ममज्ञ ॥११०॥

१०.८ व्यामोहमार्गानि विलोक्य विभोरवेलं-
मत्यादरे मयि कथं त्वमनादरः प्राक् ।
हेतुं वदोचितमिहेत्यनुपृच्छ्य चैनं
दत्तोत्तरो मुनिरनेन न चाप्तमेऽभूत् ॥१११॥

१०.९. सत्कारमञ्जनि सुरैरपि सन्निकृष्टे
प्रत्युद्गतिं परमधाम्नि जनैस्तदीयैः ।
तत्रास्थितिं सुखमयीं च हरिप्रियाणा-
मासादितो मुनिरभून्नवमे शठारिः ॥११२॥


१०.१० तद्दर्शनं च मनसैव न चक्षुषेति
भक्त्या स्तुतः परमया भगवान् शठारिः ।
पद्माज्ञया भगवतः परिहृत्य मान्यं
स्वाभीष्टमच्युतपदं दशमे प्रपेदे ॥११३॥

इति तार्किकेसरि श्रीसुन्दरजामातृमुनिकृतद्रविडोप-
निषत्सङ्गतिः संपूर्णा ॥

आचार्योदितपद्धत्या द्रविडाम्नायसंगतिम् ।
[illegible] ॥

टि) चेतनो जीवनार्थमुत्तरोत्तरं कृषिं कुर्वतो भगवतः कृपाया मुख्योल्लासस्य च शक्तताप्यान्ति ॥
— ३०८तः ३२० पर्यन्तमाचार्यविषये यथार्थनिरूपणम् —
३०८) हितोपदेशसमये स्वस्मिन् शिष्ये फले पि च ।
प्रतिपत्तिर्विपर्यस्ता क्रूरपातक मुच्यते ॥
टि) अथ सदाचार्यलक्षणं सच्छिष्यलक्षणं तयोस्सद्व्यवहारश्च निरूप्यन्ते । अन्यून पूर्वोक्तकृत्स्नाधिकारिलक्षणं स्वमाश्रित्य प्रार्थ्यमानानां सच्छिष्याणामुपदेशसमये गुरोः शिष्यस्य उपदेशफलस्य च विपर्यस्तग्रहणं महानिषिद्धम्
३०९) स्वस्मिन्नाचार्यताबुद्धिः श्रोतरि स्वात्मशिष्यधीः ।
दृष्टप्रयोजनापेक्षा शिष्योज्जीवन कामना ।
भगवत्कैङ्कर्यकाङ्क्षा सहवासाभिलाषिता ।
चतुष्टयमिदं तावत् फलांशे धीविपर्ययः ॥
टि) उपदेशकाले स्वाचार्य एवोपदिशति, स्वयं करणभूत इत्यभिसन्धायोपदेष्टव्ये सति तथाऽकृत्वा अहमस्याचार्य इति मतिः स्वविषये विपर्यस्तमतिः । अयमुपदेशश्रोतापि स्वाचार्यस्य शिष्य इत्यभिमन्तव्ये सति अयं स्वस्य शिष्य इति मतिः शिष्यविषये विपर्यस्तमतिः । अस्यात्मनः सुधारणपूर्वकं मङ्गलाशासनार्हत्वं एव फलत्वेनाभिसन्धातव्ये सति तथा अकृत्वा शिष्यद्वारा सिध्यति दृष्टप्रयोजनं शिष्योज्जीवने नन्दनवनसुधारणन्यायेन शिष्यसुधारणरूपभगवत्कैङ्कर्ये वा स्वसहवासार्हत्वे वा फलत्वबुद्धिः फले विपर्यस्तमतिः ।
३१०) फलान्यमूनि चत्वारि कथं सिध्यन्त्यकामतः ।
इति चेत्, शेषशिष्यस्य बुद्ध्या दृष्टफलोदयः ।
ईश्वरस्य धिया शिष्यो जीवनं सिद्धिमश्नुते ।
आचार्यबुद्ध्या भगवत्कैङ्कर्यं ननु सिध्यति ।
उपकारस्मृतेर्भूम्ना सहवासोऽथ सिध्यति ॥
टि) कामनाया निषिद्धत्वे इमानि चत्वारि फलानि कथं सिध्येयुरिति चेत्, शिष्ये च्छया शुश्रूषादि दृष्टप्रयोजनं सिध्यति, भगवतः कृपाख्यसंकल्पेन शिष्यस्योज्जीवनं सिध्यति । हितोपदेशपूर्वकं मङ्गलाशासनार्हतयाऽऽत्मसुधारणं भगवन्मुखोल्लासहेतुत्वाद्भगवत्कैङ्कर्यं किलेत्याचार्यस्य विचारस्य उपदेष्टुः स्वस्य भगवत्कैङ्कर्यं सिध्यति । अनादेः कालादहंकारममकारदुष्टमांसुधाय मंगलाशासनार्हं कुर्वन् महोपकारकः खल्वयमिति शिष्यस्योपकारस्मृत्या शिष्यस्य सहवासः सिध्यति ॥
३११) साक्षात्फलस्य त्वाचार्यत्वस्य सिद्धिः कथं ननु ।
इति चेदात्मनो बुद्ध्या बुद्ध्या सर्वेश्वरस्य च ।
टि) उपदेशपात्रस्यास्य मङ्गलाशासनार्हत्वरूपं मुख्यं फलं सिध्यतीति चेत् अकैतवं स्वेनायमेवं भूयादिति धियोपदेशनात् तत् सिध्यति । स्वस्याचार्यत्वेऽनभिमन्तव्ये सति तत् कथं सिध्यतीति चेत् इत्थं स्वशिष्यफलेष्वविपर्यस्तबुद्धिः सन् यथावेदं वेत्त्यु उपदेशार्हज्ञानपरिधिकवान् यमस्य गुरुर्भवत्विति ईश्वराभिप्रायेणास्याचार्यत्वं सिध्यति ॥

॥ अथेश्वरकृष्णविरचिता सांख्यकारिका प्रारभ्यते ॥



दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ १ ॥

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥ २ ॥

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ ४ ॥

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु ॥ ५ ॥

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥ ६ ॥

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च ॥ ७ ॥

सौक्ष्म्यात् तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः ।
महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च ॥ ८ ॥

असदकरणादुपादानग्रहणात् सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥ ९ ॥

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ ११ ॥

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ १२ ॥

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ १३ ॥

अविवेक्यादेः सिद्धिस्त्रैगुण्यात् तद्विपर्ययाभावात्।
कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ॥ १४ ॥

भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥ १५ ॥

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥ १६ ॥

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥ १७ ॥

जननमरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ १८ ॥

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ १९ ॥

तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ २० ॥
पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥
प्रकृतेर्महाँस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि ॥ २२ ॥
अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥ २३ ॥
अभिमानोऽहंकारस्तस्माद्द्विविधः प्रवर्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ॥ २४ ॥
सात्त्विक एकादशकः प्रवर्तते वैकृतादहंकारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥ २५ ॥
बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः ॥ २६ ॥
उभयात्मकमत्र मनः संकल्पकमिन्द्रियं च साधर्म्यात् ।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥ २७ ॥
शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥ २८ ॥
स्वालक्षण्यं वृत्तिस्त्रयस्य सैषाभवत्यसामान्या ।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ २९ ॥

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥ ३० ॥
स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम्।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम् ॥ ३१ ॥
करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्।
कार्यञ्च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च ॥ ३२
अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३
बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि
वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि ॥
सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥ ३५
एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥ ३६ ॥
सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः।
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥ ३७
तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥ ३८ ॥
सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ॥ ३९ ॥

पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम् ।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥४०॥

चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथा छाया ।
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥४१॥

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।
प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम् ॥४२॥

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः ।
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ॥४३॥

धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥४४॥

वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात् ।
ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ॥४५॥

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः ।
गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत् ॥४६॥

पञ्च विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात् ।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥४७॥

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः ।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥४८॥

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा ।
सप्तदश वधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥४९॥

आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
बाह्या विषयोपरमात् पञ्च नव तुष्टयोऽभिमताः॥५०॥
ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः॥५१॥
न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः।
लिङ्गाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्तते सर्गः॥५२॥
अष्टविकल्पो दैवस्तैर्यग्योनाश्च पञ्चधा भवति।
मानुषश्चैकविधः समासतो भौतिकः सर्गः॥५३॥
ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः॥५४॥
तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः।
लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन॥५५॥
इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः॥५६॥
वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥५७॥
औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्॥५८॥
रङ्गस्य दर्शयित्वा प्रवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥५९॥

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति॥६०॥

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।
या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य॥६१॥

तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥६२॥

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण॥६३॥

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्॥६४॥

तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः॥६५॥

दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या।
सति संयोगे च तयोः प्रयोजनं नास्ति सर्गस्य॥६६॥

सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः॥६७॥

प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति॥६८॥

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम्।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्॥६९॥

एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्॥७०॥

शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम्॥७१॥

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि॥७२

॥ इति श्रीमदीश्वरकृष्णविरचिता सांख्यकारिका संपूर्णा॥

---

३१२) पूर्वोक्तप्रतिपत्तीनां प्रहाणेनोपदेशने।
आचार्यशिष्ययोर्नैव स्वरूपं सिद्धिमाप्नुते॥
टि) पूर्वनिषिद्धं विपरीतबुद्ध्योपदेशने उपदेशरूपभावान्न शिष्याचार्यस्वरूपसिद्धिः
३१३) शिष्ये कृपालुता मुख्या गुरौ स्वे
स्यात् पारतन्त्र्यं च गरुत्तमस्य।
टि) आचार्ये मुख्यतयेदं गुणद्वयमपेक्षितम्, उज्जीवनार्थमाश्रिते शिष्ये तदोपदेशोपायिकी कृपा स्वस्य करणत्वोपयिकमाचार्यपारतन्त्र्यं च।
३१४) शिष्यस्वरूपं कृपया तु सिध्येत् स्यात् पारतन्त्र्येण निजस्वरूपम्॥
टि) आभ्यां गुणाभ्यां किं सिध्यतीति चेत् शिष्ये कृपयाऽहरहः स्वरूपनैर्मल्यात् शिष्यस्वरूपं स्वाचार्यपारतन्त्र्येण स्वस्वरूपं च सिध्यति
३१५) संसारधापकृन्मूलमज्ञानदेष्टा महान् गुरुः।
३१६) संसारवर्धकान् क्षुद्रान् मन्त्रान् भगवतो हरेः।
ये खलूपदिशन्त्येते नाचार्यत्वं न यान्ति ते॥
३१७) ३१८) संसारवर्धकत्वेन (३१७) क्षुद्रत्वेन च कीर्तनम्
भगवन्मन्त्रवर्गेषु फलद्वारोपपद्यते॥
३१९) एतदौपाधिकं ध्येयम् (३२०) उपाधिस्तु रुचिश्चेतसाम्।
टि) संसारनिवर्तकत्वेऽपि स्वाक्षरोपदेष्टुर्गुरुः।फलद्वारा क्षुद्रमन्त्राणां तादृक्फलचेतनरुच्यधीनत्वादौपाधिकं न स्वाभाविकम्। ... पाचार्यत्वप्रतिः। ते ... तथा च चेतनरुच्यनुरोधेनैव ... फलानि ददाति इति

ब्रह्मसूत्राणि प्रारभ्यन्ते

हरिः ओम्। ओं अथातो ब्रह्मजिज्ञासा ॥१॥ जन्माद्यस्य यतः ॥२॥
शास्त्रयोनित्वात् ॥३॥ तत्तु समन्वयात् ॥४॥ ईक्षतेर्नाशब्दम् ॥५॥
गौणश्चेन्नात्मशब्दात् ॥६॥ तन्निष्ठस्य मोक्षोपदेशात् ॥७॥ हेय-
त्वावचनाच्च ॥८॥ प्रतिज्ञाविरोधात् ॥९॥ स्वाप्ययात् ॥१०॥ गति-
सामान्यात् ॥११॥ श्रुतत्वाच्च ॥१२॥ आनन्दमयोऽभ्यासात् ॥१३॥
विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥१४॥ तद्धेतुव्यपदेशाच्च ॥
१५॥ मान्त्रवर्णिकमेव च गीयते ॥१६॥ नेतरोऽनुपपत्तेः ॥१७॥ भेद-
व्यपदेशाच्च ॥१८॥ कामाच्च नानुमानापेक्षा ॥१९॥ अस्मिन्न-
स्य च तद्योगं शास्ति ॥२०॥ अन्तस्तद्धर्मोपदेशात् ॥२१॥ भेद-
व्यपदेशाच्चान्यः ॥२२॥ आकाशस्तल्लिङ्गात् ॥२३॥ अत एव प्रा-
णः ॥२४॥ ज्योतिश्चरणाभिधानात् ॥२५॥ छन्दोऽभिधानान्नेति
चेन्न तथा चेतोऽर्पणनिगमात्तथा हि दर्शनम् ॥२६॥ भूतादि-
पादव्यपदेशोपपत्तेश्चैवम् ॥२७॥ उपदेशभेदान्नेति चेन्नो-
भयस्मिन्नप्यविरोधात् ॥२८॥ प्राणस्तथाऽनुगमात् ॥२९॥ न
वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॥३०॥
शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥३१॥ जीवमुख्यप्राणलिङ्गान्ने-
ति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥३२॥

॥ इति प्रथमाध्यायस्य प्रथमः पादः ॥

सर्वत्र प्रसिद्धोपदेशात् ॥१॥ विवक्षितगुणोपपत्तेश्च ॥२॥ अ-
नुपपत्तेस्तु न शारीरः ॥३॥ कर्मकर्तृव्यपदेशाच्च ॥४॥ शब्द-

भगवता संकल्पिता इतरमन्त्राः, अष्टाक्षरस्तु मोक्षप्रदो भगवतेति संकल्पित [इति विशेषः ॥

३२१ तः ३२५ शिष्यलक्षण निरूपणम्

३२१) फलसाधनशुश्रूषां साध्यान्तरनिवृत्तताम्
आर्त्यादि रानसूयान्च बिभ्राणः शिष्य उच्यते ॥

टि) झटिति मोक्षप्राप्तिरार्तिः, आचार्ये आदरः, परेषु अनसूया, फलान्तर निवृत्तिः परमपुरुषार्थसाधनशुश्रूषा एतद्वान् सच्छिष्यः ॥

३२२) मन्त्रश्च देवता चैव फलं तदनुबन्धिनः।
फलसाधनम्, अत्रत्या भोगास्तु निखिला अपि।
आचार्य एक एवेति स्यादेतस्यानुसंहितिः ॥

टि) शिष्य आचार्ये कथं प्रतिपत्तिं कुर्यादिति चेत्, श्रीमन्त्रो मन्त्रप्रतिपाद्यमाना देवता तत्फलभूतः कैङ्कर्यपुरुषार्थः तदनुबन्धिनः अविद्यानिवृत्तिपूर्वकस्वरूपाविर्भावाद्यः निरुक्तपुरुषार्थसाधनं पुत्रदारगृहक्षेत्रादिरूपैहिकभोगः सर्वोऽपि आचार्य एवेति प्रतिपद्येत ॥

३२४) माता पितेति पद्योऽप्यमर्थमाह महागुरुः। स्पष्टम्

३२५) उपकारस्मृतिर्मूलमनुसन्धानमीदृशे।
टि) नित्यसंसारिणं मां स्वार्थनिरपेक्षपरिशुद्धमकरोदित्युपकार

३२६) आचार्यः प्रथमं लक्ष्यमुपकारस्मृतेर्मतिः। [स्मृतिः
सीमाभूमितया प्रोक्तस्तस्याः सर्वेश्वरो हरिः ॥

टि) उपकारस्मृतेः प्रथमावधिश्चरमावधिश्चास्ति अयं चेतनः आदौ आचार्यकृतमुपकारमनुसन्धत्ते इति आचार्ये कृतज्ञता प्रथमसोपानम्, आचार्यस्य गौरवे मनसि दृढे भवति सति एतत्सम्बन्धकर्तुरीश्वरस्य कृपौन्मुख्यं भवति भगवद्विषयप्रदाता आचार्येणाकृतउपकारेऽनुसन्धीयमाने तु ईश्वरविषये कृतज्ञता चरमसोपानं भवति। एतद् द्वैधे मनसि गाढं प्रविशति सति एतदाचार्यप्रदातुरीश्वरकृतज्ञता पूर्णा

३२६ तः ३४२ पर्यन्तं शिष्याचार्यव्यवहारनिरूपणम्

३२६) प्रवर्तयितामन्योन्यं शिष्याचार्यौ प्रियं हितम्।
टि) शिष्य आचार्यस्य प्रियहिते आचार्यश्च शिष्यस्य प्रियहिते कुर्यात्

३२७) शिष्यः प्रियं स्वयं कुर्याद्दाराद्यैर्हितं चरेत्।
गुरुर्हितं स्वयं कुर्यादीशाद्वारा प्रियं चरेत् ॥

टि) उभाभ्यामुभयस्य साधनप्रकारमाह. शिष्यः स्वरूपानुरूपमाचार्यमुखोल्लासजनकत्वात् एतद्विकृतिस्वाभाव्यात् आचार्यस्य प्रियं कुर्यात्। मञ्जुलन्येण नोत्पत्तव्यम्, उत्पत्तौ निवर्तनीयमिति एवं प्राप्यहितं साधयेत्। आचार्यो हितैकपरत्वात् शिष्यस्य स्वरूपहान्यप्रसङ्गरूपसंयद् नियमनरूपं हितं स्वयं कुर्यात्। शिष्यस्य शरीरधारणार्थं सामग्रीन्यूनतानिबन्धनक्लेशोऽस्यात्क्लेशेन जीवनं भवितुं ईश्वरं प्रार्थ्य तेन हितं साधयेत् ॥

३२८) शिष्यः प्रहर्षे निर्णाधार गुरुरुज्जीवने तथा।
टि) निर्णायात-दृत दृष्टिः स्यात् उभयोरुभयं न सम्प्रधानम्. शिष्यस्याचार्यप्रसादकत्वे सेवैव प्रधानम्. आचार्यस्य शिष्योज्जीवनमेव प्रधानम्।

विशेषात् ॥५॥ स्मृतेश्च ॥६॥ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति
चेन्न निचाय्यत्वादेवं व्योमवच्च ॥७॥ संभोगप्राप्तिरिति चेन्न वै-
शेष्यात् ॥८॥ अत्ता चराचरग्रहणात् ॥९॥ प्रकरणाच्च ॥१०॥ गु-
हां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥११॥ विशेषणाच्च ॥१२॥ अ-
न्तर उपपत्तेः ॥१३॥ स्थानादिव्यपदेशाच्च ॥१४॥ सुखवि-
शिष्टाभिधानादेव च ॥१५॥ अत एव च स ब्रह्म ॥१६॥ श्रुतोप-
निषत्कगत्यभिधानाच्च ॥१७॥ अनवस्थितेरसंभवाच्च ने-
तरः ॥१८॥ अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् ।
॥१९॥ न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च ॥२०॥ उभयेऽ-
पि हि भेदेनैनमधीयते ॥२१॥ अदृश्यत्वादिगुणको धर्मोक्तेः ।
॥२२॥ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥२३॥ रूपोपन्यासा-
च्च ॥२४॥ वैश्वानरः साधारणशब्दविशेषात् ॥२५॥ स्मर्यमा-
णमनुमानं स्यादिति ॥२६॥ शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च ने-
ति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते ॥
२७॥ अत एव न देवता भूतं च ॥२८॥ साक्षादप्यविरोधं जैमि-
निः ॥२९॥ अभिव्यक्तेरित्याश्मरथ्यः ॥३०॥ अनुस्मृतेर्बादरिः ॥
३१॥ संपत्तेरिति जैमिनिस्तथा हि दर्शयति ॥३२॥ आमनन्ति
चैनमस्मिन् ॥३३॥ ॥ इति प्रथमाध्यायस्य द्वितीयः पादः ॥
द्युभ्वाद्यायतनं स्वशब्दात् ॥१॥ मुक्तोपसृप्यव्यपदेशाच्च ॥
॥२॥ नानुमानमतच्छब्दात्प्राणभृच्च ॥३॥ भेदव्यपदेशाच्च ॥४॥

प्रकरणात् ॥५॥ स्थित्यदनाभ्यां च ॥६॥ भूमा संप्रसादादध्युप-

शिष्यस्य प्रियं प्रधानम्, आचार्यस्य हितं प्रधानमिति सारः ॥

३२९) ततः शिष्यो गुरोर्हर्षलक्ष्यभावमियात् परम् ।
तद्रोषलक्ष्यतां प्राप्तुमवकाशं न विन्दति ॥

टि) आचार्यैककरस्य शिष्यस्याचार्यानिष्टकरणरूपनिग्रहविषयताव[काशो न]

३३०) निग्रहेऽपि च संजाते हितरूपो यतो हि सः
उपादेयो भवेत् सोऽयमुभयोर्गुरुशिष्ययोः ॥

टि) प्रकृतिसम्बन्धेन सर्वदा एकरूप्येण वर्तनायोगात् कदाचित् कालुष्या-न्निग्रहे उत्पन्नेऽपि स निग्रह उभयोरप्युपादेय एव निग्रहस्य शिष्यस्य [अभि]मानिग्रहेतुत्वात् आचार्यशिष्याभ्यामेवं निग्रहः कर्तव्यः प्राप्त इति नो [मन्तव्यम्], शोचितव्यम् अयमन्तरान्तरा हितहेतुरित्यभिसन्धाय प्रसन्नाभ्यां भाव्यम् ।

३३१) निग्रहस्य निदानं यत् तच्छिष्यस्त्यक्तुमर्हति ।

टि) निग्रहस्योपादेयत्वे तदुत्करणरागोऽप्युपादेयः स्यादिति चेन्न, स्वप्रमादात् निग्रहे जाते उद्वेगो न कार्य इत्यत्रैव तात्पर्यात्, न तु निग्रहहेतुपरावानुष्ठाने तात्पर्य[म्] ।

३३२) प्राप्यान्तर्गत एवासौ भगवन्निग्रहो यथा । असौ निग्रहः । [म]

टि) स्वाचार्येण स्वविषये हितरूपेण क्रियमाणो निग्रहः स्वविरोधिनिवर्तनोपयिकत्वात् भगवन्निग्रहवत् पुरुषार्थकोटौ अन्तर्भवति ॥

३३३) शिष्यस्वरूपमाचार्यो रक्षेच्छिष्यो गुरोर्वपुः ।

टि) आचार्यशिष्ययोः प्रधानयोर्हितकरणप्रियकरणयोः स्वरूपमनेन विविच्यते ।

३३४) उभयं चोभयोः प्राप्यं भगवत्कैङ्कर्यं च तत् । प्राप्यं स्वरूपप्राप्यम् ।

टि) कथमिदं भगवत्कैङ्कर्यं संपद्यते इति चेत्, वस्तुतो भगवच्छेषत्वतया तस्यानर्हस्य शिष्यरूपस्यात्मनः तथाविधविनियोगमन्तरा वर्तमानस्य [अ]नो भगवदभिमतस्याचार्यविग्रहस्य रक्षणमपि भगवत्प्रीत्यावहत्वात् कैङ्कर्यं भवति किं [न] संपद्यते कि[म्]

३३५) स्वरूपहानिराचार्यस्यात्मविग्रहरक्षणम् ।
स्वरूपहानिः शिष्यस्य स्वस्वरूपाभिरक्षणम् ।

टि) पूर्वोक्तनियमः कुतः ? आचार्येण स्वदेहरक्षणे शिष्येण स्वात्मरक्षणे च क्रियमाणे को दोष इत्यत्राह स्वदेहरक्षाया उपेक्ष्या वर्तनार्हस्याचार्यस्य देहरक्षणे इदं मम स्वरूपमिति शिष्ये कर्तव्ये सति आचार्येण तत्करणमाचार्यत्वहानिहेतुः । आचार्ये न्यस्तभरेण शिष्येण आचार्यकृते स्वरक्षणे [द्र]ष्टव्ये सति स्वरक्षणस्य स्वेन करणं शिष्यत्वस्वरूपहानिहेतुः ॥

३३६) अहंकारो विरोधी स्याद् गुरुकर्तृकरक्षणे ।
ममकारो विरोधी स्याच्छिष्यकर्तृकरक्षणे ॥

टि) आचार्येणोपदेशादिना शिष्यात्मरक्षणे क्रियमाणे अहं रक्षामीत्यहंकारो न कार्यः तस्य स्वाचार्यपारतन्त्र्यरूपस्वाधिकारविरुद्धत्वात् । एवं शिष्येणाचार्यदेहरक्षणे क्रियमाणे मम द्रव्यैः करणैश्च रक्षामीति ममकारो न कार्यः, शरीरमर्थं प्राणं चेत्युक्तरीत्या सर्वमाचार्यस्वामिकमिति अभिमानार्हशिष्याधिकारविरोधित्वात् तस्य ममकारस्य ॥

३३७) स्वदेहरक्षामाचार्यः कुर्वीत स्वीयवस्तुभिः ।
आचार्यवस्तुभिः कुर्यात् शिष्यः [illegible] ॥

द्देशात् ॥७॥ धर्मोपपत्तेश्च ॥८॥ अक्षरमम्बरान्तधृतेः ॥९॥ सा च-
प्रशासनात् ॥१०॥ अन्यभावव्यावृत्तेश्च ॥११॥ ईक्षतिकर्मव्यपदेशा-
त् सः ॥१२॥ दहर उत्तरेभ्यः ॥१३॥ गतिशब्दाभ्यां तथाहि दृष्टं लि-
ङ्गं च ॥१४॥ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥१५॥ प्रसिद्धेश्च
॥१६॥ इतरपरामर्शात् स इति चेन्नासंभवात् ॥१७॥ उत्तराच्चेदावि-
र्भूतस्वरूपस्तु ॥१८॥ अन्यार्थश्च परामर्शः ॥१९॥ अल्पश्रुतेरिति-
चेत्तदुक्तम् ॥२०॥ अनुकृतेस्तस्य च ॥२१॥ अपि स्मर्यते ॥२२॥
शब्दादेव प्रमितः ॥२३॥ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥२४॥
तदुपर्यपि बादरायणः संभवात् ॥२५॥ विरोधः कर्मणीति चेन्नानेक-
प्रतिपत्तेर्दर्शनात् ॥२६॥ शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमा-
नाभ्याम् ॥२७॥ अत एव च नित्यत्वम् ॥२८॥ समाननामरूपत्वाच्चा-
वृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥२९॥ मध्वादिष्वसंभवादनधि-
कारं जैमिनिः ॥३०॥ ज्योतिषि भावाच्च ॥३१॥ भावं तु बादरायणोऽस्ति
हि ॥३२॥ शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि ॥३३॥ क्षत्रि-
यत्वगतेश्च ॥३४॥ उत्तरत्र चैत्ररथेन लिङ्गात् ॥३५॥ संस्कारपराम-
र्शात् तदभावाभिलापाच्च ॥३६॥ तदभावनिर्धारणे च प्रवृत्तेः ॥३७॥
श्रवणाध्ययनार्थप्रतिषेधात् ॥३८॥ स्मृतेश्च ॥३९॥ कम्पनात् ॥४०॥
ज्योतिर्दर्शनात् ॥४१॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥४२॥
सुषुप्त्युत्क्रान्त्योर्भेदेन ॥४३॥ पत्यादिशब्देभ्यः ॥४४॥

॥ इति प्रथमाध्यायस्य तृतीयः पादः ॥

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृ-

टि) शरीरमर्थं चेत्युक्तरीत्या शिष्यसर्वस्वस्य दावाचार्याय समर्पितत्वात् आचार्यः स्वदेहरक्षणोपयिकं कालोचितेन तेन किंचित्क्रियमाणं वस्तु तदीयमिति समत्वा किंतु स्वकीयमिति मत्वा तद्धि निकुञ्जीत। शिष्यसर्वस्वस्य आचार्यस्वामिकत्वसिद्धेः आचार्यवस्तुत्वाभिप्रायेण तेन स्वदेह (रक्षेत्

३३८) शिष्यस्य वस्तून्यादद्यादाचार्यो न कदाचन।
स्वीयवस्तूनि नो दद्यात् शिष्यस्तु गुरवे सदा॥

टि) शिष्येण स्वकीयत्वेनाभिमतं वस्तु आचार्यो न स्वीकुर्यात्। शिष्येण स्वकीयत्वेनाभिमतवस्तुनो विषसंनिभत्वात् तत्प्रदानस्य विषदानसमत्वात् अहंकारममकारविषमिश्रं वस्तु शिष्यो नाचार्याय समर्पयेत्॥

३३९) आदाने तु दरिद्रः स्याद्दाने भवति तस्करः।
३४०) दानादानोद्वय तावत् सम्बन्धः शिथिलीभवेत्॥

टि) शिष्येण स्वकीयत्वेनाभिमतवस्तुन आचार्येण ग्रहणे भगवति योगक्षेमनिर्वाहके सति मम का न्यूनता इत्येवरूपानादि(?)विकल्पः(?) वर्ण्यः आचार्यः देहयात्रौपयिकसम्पदापि हीनो दरिद्रः सिध्येत्। शिष्येण स्वकीयत्वधिया कस्यचिद्वस्तुन आचार्याय समर्पणे पूर्वमेवाचार्याय समर्पिते वस्तुनि ममकारकरणात् आचार्यस्व चोरः पापी स्यात्। ततोऽजगुरुशिष्ययोः सम्बन्धो (शिथिलोभवेत्

३४१) अकिंचनोऽयं नो दद्यात् नाददीत स चार्तिमान्।

टि) सर्वमाचार्यस्वं, न मम किंचिदिति वर्तमानोऽकिंचनः शिष्यः स्वकीयत्वधिया आचार्याय किमपि न दद्यात्। योगक्षेमनिर्वाहको भगवान्, मम काचिन्न्यूनतेति वर्तमानो गुरुः शिष्यममकारदुष्टं न गृह्णीयात्॥

३४२) स्वरूपजीवनं तस्य प्रत्यर्थि दारिद्र्यतोऽस्य तु।

टि) शिष्यममकारदुष्टाग्रहणौपयिकदारिद्र्यमाचार्यस्वरूपं जीवति, स्वकीयत्वधिया दानावकाशासहाकिञ्चिन्न्येन शिष्यस्वरूपं जीवति॥

३४३ तः ३६५ पर्यन्तं शिष्यावश्येयार्थनिरूपणम्

३४३) तर्हि शिष्येण गुरवे न कार्यं किमनागपि
इति चेत् (३४४) अस्ति भूयस्तदाचार्यस्याप्रियाप
३४५) ज्ञानञ्च वासितिप्रेमसमाचारा इति स्थितिः॥ (रम्

टि) इत्थमादानप्रदानौपयिकयोग्यताभावेऽपि कृतज्ञेन शिष्येण महोपकारकस्याचार्यस्य विषये कर्तुमर्हः किंकश्चिदप्युपकारो नास्तीत्यत्राह, स्वरूपज्ञस्य शिष्यस्य बुद्ध्या न कदाप्यस्ति, स्वकृषिः फलितेति हृष्यतः आचार्यस्य प्रियोऽस्ति, स क इति चेत्, स्वरूपयाथात्म्यज्ञानं तदनुगुणउपायाध्यवसायः उपेयप्रेम त्रितयानुगुणमनुष्ठानं चेति॥

३४६) आचार्यप्रीतये त्वस्यं त्रितयं हेयमुच्यते।
भगवद्द्रव्यचौरत्वं भगवद्भक्तिबाधनम्।
आचार्यमिनाच्छेत्तु परा(?)ति क्रियात्तथा॥

३४७) स्वातन्त्र्यमन्यशेषत्वं भगवद्द्रव्यचौरता।
भगवद्भक्तिभङ्गस्तु तद्द[illegible]

गृहीतेर्दर्शयति च ॥१॥ सूक्ष्मं तु तदर्हत्वात् ॥२॥ तदधीनत्वादर्थवत् ॥३॥ ज्ञे-
यत्वावचनाच्च ॥४॥ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥५॥ त्रयाणामे-
व चैवमुपन्यासः प्रश्नश्च ॥६॥ महद्वच्च ॥७॥ चमसवदविशेषात् ॥८॥
ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॥९॥ कल्पनोपदेशाच्च मध्वा-
दिवदविरोधः ॥१०॥ न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥
॥११॥ प्राणादयो वाक्यशेषात् ॥१२॥ ज्योतिषैकेषामसत्यन्ने ॥१३॥
कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥१४॥ समाकर्षात् ॥
॥१५॥ जगद्वाचित्वात् ॥१६॥ जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्या-
तम् ॥१७॥ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥
॥१८॥ वाक्यान्वयात् ॥१९॥ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥२०॥ उ-
त्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥२१॥ अवस्थितेरिति काशकृ-
त्स्नः ॥२२॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥२३॥ अभिध्यो-
पदेशाच्च ॥२४॥ साक्षाच्चोभयाम्नानात् ॥२५॥ आत्मकृतेः ॥२६॥
परिणामात् ॥२७॥ योनिश्च हि गीयते ॥२८॥ एतेन सर्वे व्याख्याताः ॥२९
व्याख्याताः ॥

इति प्रथमाध्यायस्य चतुर्थः पादः ॥ प्रथमाध्यायः सम्पूर्णः

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोष-
प्रसङ्गात् ॥१॥ इतरेषां चानुपलब्धेः ॥२॥ एतेन योगः प्रत्युक्तः ॥३॥
न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥४॥ अभिमानिव्यपदेश-
स्तु विशेषानुगतिभ्याम् ॥५॥ दृश्यते तु ॥६॥ असदिति चेन्न प्रति-
षेधमात्रत्वात् ॥७॥ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥८॥ न तु
दृष्टान्तभावात् ॥९॥ स्वपक्षदोषाच्च ॥१०॥ तर्काप्रतिष्ठानादपि ॥११॥

३४८) प्राक् प्रपन्नपरित्राणे प्रोक्त सङ्क्षेपताक्रमः।
गुरोः परिभवो नाम यथाशास्त्रमननुष्ठितेः।
अज्ञावो ऽनधिकारिभ्य उपदेश इति द्वयम्।
मन्त्रे परिभवो नाम तदर्थे विस्मृतिस्तथा।
अर्थानां विपरीतानां प्रतिपत्तिरिति द्वयम्।
अप्राप्तविषयग्रामे करणत्रयसञ्ज्ञानम्।
प्राप्ते तत्प्रवृत्तिश्च देवतायां पराभवः॥ स्पष्टम्॥

टि) भागवद्रोपन भञ्जनं नाम - रक्ष्यवर्गरक्षणं भगवद्धारकृतमिति, तेन रक्षणस्य यथावसरो न स्यात् तथा स्वतः परतो वा स्वरक्षणे प्रयतनं तद्भञ्जनम्।

३४९) आशरीरान्तमेतस्य स्वाचार्यविषये पुनः।
"एञ्जौतीमनमित्येवं" "मरुवित्तो" इत्यपि।
"मद्दुमनो नाशितवान्" "प्रेमार्च्य मनोऽददाः"
उक्तरीत्योपकारस्य स्मृतिरावश्यकी मता॥

टि) अस्याधिकारिण आशरीरान्तं महोपकारकाचार्यविषये, "मदीयं दुष्टं मनो नाशितवानसि, अनन्यप्रयोजनानुकूलवृत्त्योपयिकं मनोऽददाः" इति कृतज्ञानानुसन्धानमावश्यकम्॥

३५०) "एञ्जौतीमन" मित्युक्ता दुष्टता नाम चेतसः।
मद्दुर्मन इत्युक्ता दुष्टता नाम चेतसः।
हरितद्भक्तदोषाणां स्वगुणानां च चिन्तनम्॥

टि) शमादिगुणानां स्वस्मिन्नुत्पत्तावपि स्वस्याकिञ्चन्येऽनुसन्धेये सति इमे गुणा मयि सन्तीति स्वगतगुणोत्कर्षानुसन्धानम्, रामकृष्णावतारेषु भगवति भागवतेषु चापाततः प्रतीतदोषाणामनुसन्धानं च मनसो दोषः॥

३५१) गुणानामिव दोषाणां वस्तुगत्या यतः खलु।
नास्ति सत्ता ततस्तेषां चिन्तना न प्रसज्यते॥

टि) यथा स्वास्मिन् सन्तो दोषा नानुसन्धेया इत्युच्यते, तथा किं परेषु सन्तो दोषा नानुसन्धेया इति निषिध्यते इत्यत्राह नेतथा, वस्तुतः परेषु दोषाभावात् दोषा नानुसन्धेया इत्युच्यते, असतां चिन्तनं ह्ययुक्तम्॥

३५२) हरितद्भक्तविषये यदि दोषो निचिन्त्यते।
वस्तुतस्तदतो नैषः, किन्तु स्वात्मगतः परम्॥

टि) परेषु दोषोऽस्तीति ज्ञाने स दोषो न परगतः, किन्तु द्रष्टृस्वगतः॥

३५३) तस्य स्वात्मगतत्वं तु (३५४) स्वदोषात् सम्भवतोऽपि च।

टि) परगतत्वेन प्रतीयमानो दोषः स्वकीयः कथं स्यादित्यत्राह, यथा तैमिरिकस्य द्वौ चन्द्रौ भातः, यथा च पित्तोपहतस्य शङ्खः पीतो भाति, तथा निर्दोषेषु परेषु दोषदर्शनोपयिकदुर्वासनावत एव परत्र दोषो भातीति स्वदोषात् स स्वदोषः। किञ्च सन्तानस्य दोषो यथा पितुः तथात्र दोषाणां स्वकीयत्वापादकात् सम्बन्धविशेषादपि स स्वदोषः॥

३५५) गुणधीर्हि प्रवर्तेत स्वदोषविरहे सति।

टि) तिमिराभावकालेऽन्य इति प्रतीतिवत् दुर्वासनाभावे गुणधीः प्रवर्तेत गुण [illegible] स्वयमस्तीति ज्ञातव्यम्॥

अन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॥१२॥ एतेन शिष्टा-
परिग्रहा अपि व्याख्याताः ॥१३॥ भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकव-
त् ॥१४॥ तदनन्यत्वमारम्भणशब्दादिभ्यः ॥१५॥ भावे चोपलब्धेः ॥१६॥
सत्त्वाच्चावरस्य ॥१७॥ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्य-
शेषाद्युक्तेः शब्दान्तराच्च ॥१८॥ पटवच्च ॥१९॥ यथा च प्राणादिः ॥
॥२०॥ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥२१॥ अधि-
कं तु भेदनिर्देशात् ॥२२॥ अश्मादिवच्च तदनुपपत्तिः ॥२३॥ उपसं-
हारदर्शनान्नेति चेन्न क्षीरवद्धि ॥२४॥ देवादिवदपि लोके ॥२५॥ कृ-
त्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥२६॥ श्रुतेस्तु शब्दमूलत्वात् ॥
॥२७॥ आत्मनि चैवं विचित्राश्च हि ॥२८॥ स्वपक्षदोषाच्च ॥२९॥ स-
र्वोपेता च तद्दर्शनात् ॥३०॥ विकरणत्वान्नेति चेत्तदुक्तम् ॥३१॥ न
प्रयोजनवत्त्वात् ॥३२॥ लोकवत्तु लीलाकैवल्यम् ॥३३॥ वैषम्य-
नैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति ॥३४॥ न कर्माविभागा-
दिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च ॥३५॥ सर्वध-
र्मोपपत्तेश्च ॥३६॥ ॥ इति द्वितीयाध्यायस्य प्रथमः पादः ॥
रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च ॥१॥ पयोऽम्बुवच्चेत्तत्रा-
पि ॥२॥ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥३॥ अन्यत्राभावा-
च्च न तृणादिवत् ॥४॥ पुरुषाश्मवदिति चेत्तथाऽपि ॥५॥ अङ्गित्वा-
नुपपत्तेश्च ॥६॥ अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥७॥
अभ्युपगमेऽप्यर्थाभावात् ॥८॥ विप्रतिषेधाच्चासमञ्जसम् ॥९॥
[illegible] ॥१॥ उभयथापि न कर्मातः

महद्दीर्घवद्वा ह्रस्व[illegible]

३५६) यदि सा न प्रवर्तेत दोषध्यानेव दुष्यति।
टि) गुणानुसन्धान वसति दोषानुसन्धाने व हि प्रवर्तेत, स च दोषो भगवन्निग्रहहेतुः
३५७) दोषाणामनुसन्धाने नावकाशोऽस्य विद्यते।
टि) अस्य सर्वस्य वक्तृत्वता दोषानुसन्धानस्यावकाशे सति किल भवति, स्वदोषानुसन्धानस्य भगवद्भागवतगुणानुसन्धानस्य चैव काले पर्याप्ते सति अगवद्भागवतदोषचिन्तनस्यावकाश एव नास्ति।
३५८) स्वदोषहरितद्गुणचिन्ताव्यवस्थितेः। अयं शब्दशेषः व्याख्यास्यातः
३५९) असौ संसारिणां दोषं स्वदोषत्वेन चिन्तयेत्।
३६०) चिन्तने तादृशे हेतुः सम्बन्धज्ञानमुच्यते॥
३६१) "ईरैप्पोलुदुमेण्णीम्" इत्युक्त्या दोषो न भास्यति।
क्षणं न चिन्तयेमे इति हृदुक्त्या दोषो न भास्यति॥
३६२) यदि भास्यति तदानं तन्निवृत्त्यर्थमेव तु॥
टि) संसारिगतानां देहात्मबुद्धिप्रभृतिदोषाणां दर्शने ततो हेतोस्तान् वयम् व्यामोहेन सता त्य एषामस्माकं च कः सम्बन्धः इति न मन्तव्यम्, किन्तु तेषां दोषाः स्वदोष इति मन्तव्यम्। तत्र हेतुः नारायणत्व प्रयुक्तं सम्बन्धज्ञानम्, सर्वेषामीश्वरसम्बन्धस्य समहात् तया विधया तैः सह स्वस्य सम्बन्धसम्भवात् स्वस्याऽनर्जनीयानां प्रकृतिबन्धूनां विषये जातं दोषं यथा स्वदूषकत्वेन प्रतिपद्येत तथा संसारिणां दोषोऽपि स्वदोषत्वेन भाव्यः। केवल देहपोषणादिपरान् संसारिणः क्षणमपि न चिन्तयेम इति दिव्यसूरिभिः तद्दोषज्ञानमस्याधिकारिणा न स्यादेव हेत्वभावात्, तथापि बहुषु स्थलेषु संसारिणां दोषो दिव्यसूरीणाम् दृष्टिपथमायातीति चेत्, तन्निवर्तनार्थमेव तेषां स भाति॥
३६३) यथा पुरा जरासुता (सीता) निशाचरीगणैः कृतान्
महापराधसंचयान् रघुप्रहेन्न मारुतौ।
निवेदयाञ्चकार नो, तथा परैः कृतागसः
निवेदनं न कथ्यते हरौ च ताद्दृशे तेषु च॥
टि) दशमासानेकरूपेण राक्षसीभिः कृतानपराधान् यथा सीता राघवे हनूमति वा एकमात्रमपि न निवेदयामास, तथा स्वविषये परकृतानपराधान् हरौ तद्भक्तेषु न निवे
३६४) अत्र "शूर्पं न्दडियार वेण्डिनिति गाथार्थ ईक्ष्यताम्।" [दयेत्]
अत्रा "हेत्यू दासकामे" इति गाथार्थ ईक्ष्यताम्॥
" वन्दनाभिकृतौ मूकः सर्वज्ञानां च च्छादयेत् " अयं यथा सत्र विव
टि) सर्वेश्वरः सौशील्यसौलभ्यादीन् प्रदर्श्य संसारिणो दासत्वेन गृहातुमस्यां लीलाविभूतावतीर्य इह लानावत्य स्वयं मम दासा भवत इति अपो क्षमापणस्ते कृतं मेऽहं मे इत्युक्तरीत्याऽचमत्सु अभिषेदन्, एष दासभावं प्राप्तेषु लीलाविभूतिर्हि जीवस्वन्यास्यात्, लीलाविभूतिस्थापका ह्येते प्रसीदन् वैकुण्ठपतिः। यस्याः पुरतः सन्तानदोषः प्रख्यापितः तस्यां जगन्मातरि सर्वरहस्यनिवेदनपात्रभूतायां लोकमातरीमं परिभूतिं इति, इतिभगवानपि संसारिदोषं सर्वज्ञानामपि विधेय प्रच्छादयति चेत् अस्मकृत्यविषये किमु वक्तव्यम्॥
३६५) आपास्वेषु जनेषु स्पृहः क्षान्तिर्व करुणा तथा।
इसन च प्रह्वीवाचरूपकारस्मृतिस्तथा॥
टि) आगासिनां विषये प्रत्युपकारमसंकल्पयता क्षमिणा भाव्यम्, अस्माभिः क्षमाकरेणऽपि सर्वापराधिदण्ड्यिष्यते किं कुर्म इति दया कार्या, अस्माकं परत्ने कर्तरिमे विहन्तुं न शक्यते, ऐहिक विरोध एव कर्तुं शक्यते ताहशाभावे यद्यपि स्ववत्कः स्यैव प्रत्युपकारः इत्युक्ते, ते दृश्यमाणाः शरीरादिषु शत्रुबुद्धि

स्तदभावः ॥११॥ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥१२॥
नित्यमेव च भावात् ॥१३॥ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥१४॥
उभयथा च दोषात् ॥१५॥ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥१६॥ समुदा-
य उभयहेतुकेऽपि तदप्राप्तिः ॥१७॥ इतरेतरप्रत्ययत्वादुपपन्नमिति-
चेन्न संघातभावानिमित्तत्वात् ॥१८॥ उत्तरोत्पादे च पूर्वनिरोधात् ॥
॥१९॥ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥२०॥ प्रतिसंख्या-
प्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥२१॥ उभयथा च दोषात् ॥
॥२२॥ आकाशे चाविशेषात् ॥२३॥ अनुस्मृतेश्च ॥२४॥ नासतो दृष्ट-
त्वात् ॥२५॥ उदासीनानामपि चैवं सिद्धिः ॥२६॥ नाभाव उपलब्धेः ॥२७॥
वैधर्म्याच्च न स्वप्नादिवत् ॥२८॥ न भावोऽनुपलब्धेः ॥२९॥ सर्वथा-
नुपपत्तेश्च ॥३०॥ नैकस्मिन्नसंभवात् ॥३१॥ एवं चात्माकार्त्स्न्यम् ॥
॥३२॥ न च पर्यायादप्यविरोधो विकारादिभ्यः ॥३३॥ अन्त्यावस्थिते-
श्चोभयनित्यत्वादविशेषः ॥३४॥ पत्युरसामञ्जस्यात् ॥३५॥ अधिष्ठा-
नानुपपत्तेश्च ॥३६॥ करणवच्चेन्न भोगादिभ्यः ॥३७॥ अन्तवत्त्वमस-
र्वज्ञता वा ॥३८॥ उत्पत्त्यसंभवात् ॥३९॥ न च कर्तुः करणम् ॥४०॥ विज्ञा-
नादिभावे वा तदप्रतिषेधः ॥४१॥ विप्रतिषेधाच्च ॥४२॥

॥ इति द्वितीयाध्यायस्य द्वितीयः पादः ॥

न वियदश्रुतेः ॥१॥ अस्ति तु ॥२॥ गौण्यसंभवाच्छब्दाच्च ॥३॥
स्याच्चैकस्य ब्रह्मशब्दवत् ॥४॥ प्रतिज्ञाऽहानिरव्यतिरेकात् ॥५॥
शब्देभ्यः ॥६॥ यावद्विकारं तु विभागो लोकवत् ॥७॥ एतेन मात-
रिश्वा व्याख्यातः ॥८॥ असंभवस्तु सतोऽनुपपत्तेः ॥९॥ तेजोऽतस्तथा

तैर्विनाश्यमानेषु पदार्थेषु प्रतिकूलत्वबुद्धिं च वहता तेन स्वशरीरादिवद् आयामिव स्वप्रतिकूलनाशनेऽपि संतुष्यताऽभाव्यम्। अस्मद्विश्वसितानं स्वदोषानुसन्धानस्थानतया आभिमुख्यस्थितिर् तेषु कार्या ॥

══ ३६६ तः ४०८ पर्यन्तं भगवन्निर्हेतुककृपाविषयीकारप्रकरणम् ══

३६६) स्वकीयानां तु दोषाणां चिन्तनं भयकारणम्।
भगवद्गुणचिन्तनं भवेदभयकारणम् ॥

टि) पूर्वं ३५८ तमे सूत्रे स्वदोषानुसन्धानस्य भगवद्भागवतगुणानुसन्धानस्यैव च कृते कालः पर्याप्त इत्युक्तम्। अथ भागवतगुणानुसन्धानं वक्ष्यमाणत्वेन पश्चात्कृतत्वादुपयुक्तस्य स्वदोषानुसन्धानस्य भगवद्गुणानुसन्धानस्य फलमुच्यते। स्वदोषाणामनात्मगुणानां तन्मूलाविद्यादीनां चानुसन्धानमितो तीव्रसंसारोपनतो किं करवाणीति भयस्य हेतुः। भगवद्गत दयाक्षमादिकल्याणगुणानुसन्धानं इतरस्मिन्नभयस्य निवृत्ते हेतुः ॥

३६७) भयाभयविपर्यासः संसिद्ध्येदज्ञता परम् ॥

टि) अनेवम्, अनादेः कालात् संसारे पातयिताऽयं हि स्वतन्त्रोऽयमितः परमपि एवं कुर्याच्चेत् किं कुर्याम इति ईश्वरस्वभावपरामर्शेन भयम्, अभयं पुनः अस्माकमिदानीमात्मगुणानां विकासात् पुरुषार्थो हस्तगतः अतस्तथैव भावीति स्वस्वभावपर्यालोचनेन भयेन यदि स्यात्, तदपि विवेक एव प्रकाशेन। स्वयं स्वस्य नाशक इति भयमीश्वरो रक्षक इत्यभयं च नहि विवेकिकृत्यम् ॥

३६८) तदुत्थिता कथं सूक्तिः "नलिवानिन्न"मित्यसौ।
"आत्तङ्करै" इतीयं च (३६९) तदनुबन्धानुसंहितेः ॥
तदुत्थिता कथं सूक्तिः "क्लेशयेत्पर"मित्यसौ।
" तीरस्थवृक्षवदि"ति, (३६९) तदनुबन्धानुसंहितेः ॥

टि) ३७०) शिशुर्दीप्त्यां परिक्षिप्तो मातुः पृष्ठे विमर्दनम्।
करोतीति यदस्त्येतद् उदाहरणं भवेत् ॥

टि) एवं सति श्रीशठकोपस्वामी मां पञ्चभिरिन्द्रियैः हिंसितुमिच्छतीति भगवन्तं प्रति यदुदति, अपरकालस्वामी प्राणिनः पुनरपि किं जन्म परिवर्तयिष्यसीति ~~यदाह तत्कथमिति चेत्~~ तीरस्थवृक्षवदभिभूत इति यदाह तस्य तात्पर्यं किमिति चेत्, लाभे हानिश्च भगवत एवेति उक्तिः सहेन भगवता सह स्वस्य सम्बन्धोऽनुसंहिते एवं गतं भवति, स्वयं कृतानर्थस्य तत्कृतत्वं सम्बन्धानुसन्धानेनापि कथमुपपादयितुं शक्यत इति चेत्, क्रीडार्थं तदग्नौ संलग्नः शिशुः स्वकृतक्लिष्टपादो रुदन् इह मेत्यदं दुःखं मातृकृतमिति मत्वा यथा मातरं पृष्ठे प्रहरति, तथा दुःखस्य सम्बन्धेन चेतनकर्माणि प्रकृतिप्राकृतानि च सर्वाणि स्वाधीनानि कुर्वन् यथा कर्मप्रकृतिप्राकृतैः कृतामस्य पीडां निवारयितुं क्षमः सन्नपि भगवान् न निवारयतीति हेतोः स्वयमेव हिनस्तीति व्यपदिश्यते ॥

३७०) निरुपाधिकबन्धुत्वात् सर्वशक्तित्वतो माधवः।
अनर्थं न रुणद्धीति हेतोस्तादृग्वचः खलु। इदं शर्वशेषसूत्रम्।

३७१) कूपकूलाच्छिशुं माता यदि नाकृष्टिति स्वयम्।
टि) सैव तं पातयामासेत्येवहि प्रथितं भवेत्...
अनिवारणेन कारयितृत्वं कृतम् इत्यत्र च दृष्टान्तः ॥

ह्याह ॥१०॥ आपः ॥११॥ पृथिवी ॥१२॥ अधिकाररूपशब्दान्तरेभ्यः ॥
॥१३॥ तदभिध्यानादेव तु तल्लिङ्गात् सः ॥१४॥ विपर्ययेण तु क्रमोऽत-
उपपद्यते च ॥१५॥ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चे-
न्नाविशेषात् ॥१६॥ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्त-
द्भावभावित्वात् ॥१७॥ नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥१८॥ ज्ञोऽत एव ॥
॥१९॥ उत्क्रान्तिगत्यागतीनाम् ॥२०॥ स्वात्मना चोत्तरयोः ॥२१॥ ना-
णुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥२२॥ स्वशब्दोन्मानाभ्यां च ॥
॥२३॥ अविरोधश्चन्दनवत् ॥२४॥ अवस्थितिवैशेष्यादिति चेन्ना-
भ्युपगमाद्धृदि हि ॥२५॥ गुणाद्वा लोकवत् ॥२६॥ व्यतिरेको गन्धवत् ।
तथा हि दर्शयति ॥२७॥ पृथगुपदेशात् ॥२८॥ तद्गुणसारत्वात्तु तद्व्यपदेशः
प्राज्ञवत् ॥२९॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥३०॥ पुंस्त्वादि-
वत्त्वस्य सतोऽभिव्यक्तियोगात् ॥३१॥ नित्योपलब्ध्यनुपलब्धिप्र-
सङ्गोऽन्यतरनियमो वान्यथा ॥३२॥ कर्ता शास्त्रार्थवत्त्वात् ॥३३॥ उपा-
दानाद्विहारोपदेशाच्च ॥३४॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशवि-
पर्ययः ॥३५॥ उपलब्धिवदनियमः ॥३६॥ शक्तिविपर्ययात् ॥३७॥ समा-
ध्यभावाच्च ॥३८॥ यथा च तक्षोभयथा ॥३९॥ परात्तु तच्छ्रुतेः ॥४०॥ कृत-
प्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥४१॥ अंशो ना-
नाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥
॥४२॥ मन्त्रवर्णात् ॥४३॥ अपि स्मर्यते ॥४४॥ प्रकाशादिवत्तु
नैवं परः ॥४५॥ स्मरन्ति च ॥४६॥ अनुज्ञापरिहारौ देहसम्बन्धा-
ज्ज्योतिरादिवत् ॥४७॥ असन्ततेश्चाव्यतिकरः ॥४८॥ आभास एव च ॥

३६२) रक्ष्यस्यानुमतिः प्राप्ते नहि हेतुर्यथा, तथा।
रक्षकस्यानुमतिरप्यनर्थस्य न कारणम् ॥

टि) अप्रतिषिद्धमनुमतं भवतीति न्यायेन किं तदीयानुमतिस्तदीयानर्थस्य हेतुरित्यत्राह नेति। यथा रक्ष्यस्यास्य रक्ष्यत्वानुमतिरचिद्व्यावृत्तवेषमात्रत्वान्न पुरुषार्थहेतुः, तथा रक्षकस्यास्य संसारानुमतिरपि न हानिहेतुः, स्वाज्ञारूपशास्त्रमर्यादाजीवनार्थं कालक्रमेण तिरुद्धरामि इति एतदीयरुचिप्रतीक्षणेन अवस्थानमात्ररूपा साऽनुमतिः ॥

३६३) उभयं चैतदुभयोः स्वरूपान्नातिरिच्यते।

टि) परतन्त्रस्यास्य स्वरक्ष्यत्वानुमतिर्न स्वरूपाद्बहिर्भूता, स्वतन्त्रस्य तस्य स्वरक्ष्यवस्तुरक्षणे स्वाज्ञारूपशास्त्रानुसारेण निर्वहणाय संसारानुमतिः स्वातन्त्र्यवैभवात् स्वरूपानतिरिक्ता ॥

३६४) अनर्थहेतुः स्वकर्म प्राप्तिहेतुः कृपा हरेः।

टि- अव्याजानन्दभगवल्लाभस्य अनादिकर्म, लाभहेतुकहेतुर्भगवत्कृपा ॥

३६५) वैपरीत्येन कथनं नित्यप्रच्युति (हानेर्वृद्धि) कारणम्।

टि) ईश्वरस्वातन्त्र्यमलाभहेतुः, चेतनसद्गुणो लाभहेतुरिति पूर्वोक्तविपरीतप्रतिपत्तौ ईश्वरो न प्रयतेत अपक्षेते तिष्ठन् प्रतिपत्तिरस्य आचरणाल्लाभरूपहानिहेतुः ॥

३६६) उद्दिधीर्षिणं दृष्ट्वा "त्वमेव पातयो मा माम्।
इत्यारोपणवादः स्यादुद्धारविनिवृत्तये ॥

टि) प्रमादात् कूपे पतितमुद्धर्तुकामं दयालुं प्रति स्वपतनकालेऽयं सहासीदिति तन्मानमवलम्ब्य तं प्रति त्वमेव मां कूपे पातयसि इत्युक्तौ अयमस्मदुक्तं पातनमस्मासु स्वारोपयतीति तस्य कूपादुद्धरणस्य सोऽर्थः प्रयोजिका भवति, तथा स्वकर्मणा संसारगर्ते पतितं जीवमुद्धर्तुकाममीश्वरं प्रति एतावन्तं कालं त्वमेव मां संसारे न्यपातय इत्युक्तिरपि अनुद्धरणहेतुः स्यात्। अतो नालाभं प्रतीश्वरस्वातन्त्र्यं हेतूकार्यम् ॥

३६७) एतत् शीतमुक्तं" त्यस्मिन् वाक्ये स्पष्टीकृतं च तैः।
इदं च "कुर्वेदि" त्यस्मिन् वाक्ये स्पष्टीकृतं च तैः ॥

टि) तीरस्थतरुपक्षिविहगैर्मीलुक्तपूर्वीपरकालस्वामी अननारमेवाहं कर्मणि संसरतां जीवानां स्वसंसरणस्येश्वरस्वातन्त्र्यं हेतुरित्युक्त ...

३६८) रोषस्स्यादिति विज्ञाय ततश्च कथनं कथम्?।
कारुण्यमात्रिश्चानन्यगतिर्वा वाचयेत् तथा ॥

टि) रोषः स्यादिति ज्ञातेऽपि पुनरपि निःसंकोचमेव ईश्वरमेव कथं कथयतीति चेत् तत्कोपनाशिका तत्कृपा कोपदर्शनजमुक्तिभावनाशिका उद्भूता संसारात् कोपेन निराकृतोऽपि गत्यन्तराभावरूपमनन्यगतित्वं च तथा वाचयेत् ॥

३६९) रोषे सत्यपि पादाब्जग्रहणाहुतयास्थिते।
प्राप्ते हरौ यथेष्टं हि वक्तुं भक्तैः प्रभूयते ॥

टि) ननु अनन्यगतित्वादिसद्भावेऽपि कोपवर्धकं कथं वक्तुं युज्यत इति चेत्, निरोऽप्युपसर्पणोपायिकपरमकृपावति लब्धे सर्वं वक्तुं युज्यते, तथात्र ॥

३७०) वध्यहमपि काकुत्स्थः "शितत्वाली न ताथिति (कोपेन जननीति-) एवमादि प्रमाणानि स्मरणीयान्यहो इह ॥

टि) सतं निपतितं भूमौ शरण्यः शरणागतम्। वध्यहमपि काकुत्स्थः कृपया पर्यपालयत् इति रामायणवचनं बुद्धिपूर्वं जनन्या कोपेन निराकृतोऽपि शिशुस्तत्कृपामेव यथा प्रतीक्षते ...

॥४९॥ अदृष्टानियमात् ॥५०॥ अभिसन्ध्यादिष्वपि चैवम् ॥५१॥ प्रदेश-
भेदादिति चेन्नान्तर्भावात् ॥५२॥ इति द्वितीयाध्यायस्य तृतीयः पादः ॥
तथा प्राणाः ॥१॥ गौण्यसंभवात् तत्प्राक्श्रुतेश्च ॥२॥ तत्पूर्वकत्वाद्वाचः ॥
॥३॥ सप्तगतेर्विशेषितत्वाच्च ॥४॥ हस्तादयस्तु स्थितेऽतो नैवम् ॥५॥
अणवश्च ॥६॥ श्रेष्ठश्च ॥७॥ न वायुक्रिये पृथगुपदेशात् ॥८॥ चक्षु-
रादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥९॥ अकरणत्वाच्च न दोषस्तथा हि द-
र्शयति ॥१०॥ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥११॥ अणुश्च ॥१२॥
ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात् ॥१३॥ तस्य च
नित्यत्वात् ॥१४॥ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥१५॥ भे-
दश्रुतेर्वैलक्षण्याच्च ॥१६॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदे-
शात् ॥१७॥ मांसादि भौमं यथाशब्दमितरयोश्च ॥१८॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥
॥१९॥
इति द्वितीयाध्यायस्य चतुर्थः पादः ॥ द्वितीयाध्यायः संपूर्णः ॥
तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥१॥ त्र्यात्म-
कत्वात्तु भूयस्त्वात् ॥२॥ प्राणगतेश्च ॥३॥ अग्न्यादिषु गतिश्रुतेरिति चेन्न
भाक्तत्वात् ॥४॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥५॥ अश्रुत-
त्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥६॥ भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्श-
यति ॥७॥ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥८॥
चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥९॥ आनर्थक्य-
मिति चेन्न तदपेक्षत्वात् ॥१०॥ सुकृतदुष्कृते एवेति तु बादरिः ॥११॥ अ-
निष्टादिकारिणामपि च श्रुतम् ॥१२॥ संयमने त्वनुभूयेतरेषामारोहाव-
रोहौ तद्गतिदर्शनात् ॥१३॥ स्मरन्ति च ॥१४॥ अपि सप्त ॥१५॥ तत्रापि तद्व्या-

अथ चतुर्थप्रकरणम्

३८१) त्रिपाद्विभूतौ परिपूर्णभोगे संपद्यमानेऽपि ततो न तृप्तः।
दरिद्रपुत्रे विनिविष्टचेताः पितेव संसारिषु दत्तचित्तः।
विश्लेषमेषामसहिष्णुरीशः श्रीमान् समाश्लिष्य वधूपुरःस्थः।
दत्तेन्द्रियग्रामकलेवरे, तद्दयापारणार्थं च वितीर्यशक्तीः।
प्रत्यक्षभावे शपथेन रोद्धुं शक्याश्चमी इत्यथ सन् परोक्षः।
शिशुं स्वपन्तं परिरभ्य पृष्ठे यथा हि शेते जननी तथाऽसौ।
स्वशान्तसम्बन्धत एव चित्ते संश्लिष्य तान् बद्धजनाननुत्यजन्।
अथानुभूतेरपि चानुवृत्तिर्युक्तेति मत्वा धृतजीवसत्ताः।
एतेषु सत्कर्मकृतिप्रवृत्तेष्विमानन्यान्ननुमन्यमानः।
तिष्ठन्नुदासीनवदेव, यौत्याञ्जिवर्तिनेच्छुः समयप्रतीक्षी।
सत्कर्मसंज्ञार्हमसच्चरित्रं यत्किञ्चिदप्येष न वीक्षमाणः।
व्यर्थे गते कालपरीक्षणेऽपि निराशदुःखीव सबाष्पनेत्रः।
व्याजं मनाग् जातु निरीक्षमाणः संतोषसीम्नि स्थितिमान् हरिः सः।
मदीयधामाभ्यगमः किल त्वं मदीयनामाभ्यवदः किल त्वम्
मद्भक्तरक्षामकरोः किल त्वं तत्तापशान्तिं व्यदधाः किल त्वम्।
छायाममीषाम ददाः किल त्वमित्यादिरीत्या सुकृतावभासान्।
यथा मृषैवाम्रशलाटुचोरस्यारोपणं तद्वदिहाध्यरोप्य।
सौवर्णिको हेम निघृष्य शाणे ततो मधूच्छिष्ट आददानः।
एतावदासीन्ननु तावदासीदित्येव सन्ततमुल्लयते यथैव।
तथाह्यसौ जन्मपरंपरासु याद्दृच्छिकादीन् सुकृतप्रभेदान्।
स्वेनैव संकलय्य ततश्च तेषां भूयस्तया वर्धनमादधाति॥

टि) पूर्वं ३६६तमे स्त्रे भगवद्गुणानुसन्धानमभयहेतुरित्युक्तं स्यार्थस्योपपादनार्थं ईश्वरेणास्य जीवस्योज्जीवनार्थं क्रियमाणा कृषिपरम्परा वर्ण्यते॥ श्रीवैकुण्ठे श्रीभगवान् नित्यैर्मुक्तैश्च सह परिपूर्णानुभवं कुर्वन्नपि तेनातृप्तः। ~~न त्वेतु चित्~~ पुत्रः पिताऽन्येषु पुत्रेषु समीपस्थितेष्वपि विदेशगते तस्मिन् कर्मेव पुत्रे चिन्तयन् यथा परितप्यते, तथाऽयमपि संसारिणामस्मदादीनां वियोगेन परितप्यमानः, अस्मदादिभिः संव्यवहारार्थं करणकलेवराणि तदधिष्ठानशक्तीश्च दत्त्वा महाहङ्कारिणामस्माकं पुरः प्रत्यक्षतया स्थाने स्वयमवलोकयन् तेषामपि दूरीकुर्यामिति बुद्ध्या अस्मत्परोक्षः सन्, स्वपन्तीं प्रजां पृष्ठे आश्लिष्यन्ती मातेव श्रीभगवानपि स्वेन सार्धं सम्बन्धमेव हेतूकृत्यास्मान् अत्यजन् अन्तर्यामितयाऽनुवृत्त्यास्माकं सत्तां संरक्षन्, अस्मासु असत्कर्मप्रवृत्तेष्वप्रतिषेधन्ननुमन्यमान उदासीनवत् परावर्तनार्थमवसरं प्रतीक्षमाणः, अस्माभिः क्रियमाणेषु असत्कर्मसु अन्यतममपि सत्कर्मेत्यभिधातुं लभ्येतेति परीक्षमाणः तथाभूतान्यसत्कर्माणि द्वादशोऽसि मद्धाममभ्यगमः मन्नामाभ्यवदः मद्भक्तानरक्षः, तेषां परितापमशमयः तेषां छायाममददाः इत्येवं "~~निष्पत्त्रकस्य~~ कानिचित् सुकृतानि भवन्त्येव्य स्वयमेवाम्रफलानि वस्त्रे निबध्नन् आम्रफलचोरस्यापनवत् तत्कृत सुकृतत्वेन राध्य यथा स्वर्णकारः परस्वर्णपरीक्षायां निकषनं स्वर्णशकलमनुपेक्षमाणो मधूच्छिष्टेन संगृह्य वर्धयति, तथा चेतनानां जन्मपरंपरासु याद्दृच्छिक आनुषङ्गिक प्रासङ्गिक –

भक्ति पारवश्य भगवद्विग्रहवर्णन

पारादविरोधः ॥१६॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥१७॥ न तृतीये
तथोपलब्धेः ॥१८॥ स्मर्यतेऽपि च लोके ॥१९॥ दर्शनाच्च ॥२०॥ तृतीयशब्दा-
वरोधः संशोकजस्य ॥२१॥ तत्स्वाभाव्यापत्तिरुपपत्तेः ॥२२॥ नातिचिरेण
विशेषात् ॥२३॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥२४॥ अशुद्धमिति चे-
न्न शब्दात् ॥२५॥ रेतःसिग्योगोऽथ ॥२६॥ योनेः शरीरम् ॥२७॥

॥ इति तृतीयाध्यायस्य प्रथमः पादः ॥

सन्ध्ये सृष्टिराह हि ॥१॥ निर्मातारं चैके पुत्रादयश्च ॥२॥ मायामात्रं
तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥३॥ पराभिध्यानात्तु तिरोहितं
ततो ह्यस्य बन्धविपर्ययौ ॥४॥ देहयोगाद्वा सोऽपि ॥५॥ सूचकश्च
हि श्रुतेराचक्षते च तद्विदः ॥६॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च
॥७॥ अतः प्रबोधोऽस्मात् ॥८॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥९॥
मुग्धेऽर्धसंपत्तिः परिशेषात् ॥१०॥ न स्थानतोऽपि परस्योभयलिङ्गं स-
र्वत्र हि ॥११॥ भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥१२॥ अपि चैवमेके ॥१३॥
अरूपवदेव हि तत्प्रधानत्वात् ॥१४॥ प्रकाशवच्चावैयर्थ्यात् ॥१५॥ आह च
तन्मात्रम् ॥१६॥ दर्शयति चाथोऽपि स्मर्यते ॥१७॥ अत एव चोपमा सूर्यकादिवत्
॥१८॥ अम्बुवदग्रहणात्तु न तथात्वम् ॥१९॥ वृद्धिह्रासभाक्त्वमन्तर्भावा-
दुभयसामञ्जस्यादेवं दर्शनाच्च ॥२०॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवी-
ति च भूयः ॥२१॥ तदव्यक्तमाह हि ॥२२॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥२३॥
प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥२४॥ अतोऽनन्तेन तथा
हि लिङ्गम् ॥२५॥ उभयव्यपदेशात्त्वहिकुण्डलवत् ॥२६॥ प्रकाशाश्रयवद्वा
तेजस्त्वात् ॥२७॥ पूर्ववद्वा ॥२८॥ प्रतिषेधाच्च ॥२९॥ परमतः सेतून्मा-

प्रासङ्गिकानुषङ्गिकानि सुकृतानि कल्पयन् तान्यनेकान्याग्रांयेनि तेतिते।
अज्ञातसुकृतं यथा — इदं सुकृतमित्यज्ञात्वा क्रियमाणं कर्म, यथा कोऽयं गिरिरिति प्रश्ने वेङ्कटगिरिरिति दिव्यदेशनामग्रहणम्। याहृच्छिकसुकृतं यथा — सुकृतमिति ज्ञाने सत्यपि तत्साधनज्ञानप्रकारा क्रियमाणं कर्म, यथा गवां भ्रमण समये ता अनुसरता संपद्यमानमालयप्रदक्षिणादि। आनुषङ्गिकं यथा = अन्योद्देशेन प्रवृत्तौ अप्राधान्येन क्रियमाणं कर्म, यथा ग्रामं गच्छता भागवतेषु तत्पादपथ्येन गमनम्। प्रासङ्गिकं यथा — प्रसक्तौ सत्यां तादर्थ्येन नैव क्रियमाणं कर्म, यथाऽऽपणार्थं काञ्चीगमने अर्थाद्वरदर्शनम्। स्वामान्यबुद्धिस्थलं यथा — फलान्तरे मोक्षं वा उद्दिश्य सकर्मत्वधिया क्रियमाणोत्सवयात्रादौ वेश्यानुसरणार्थं पिनःपुनरालयप्रवेशोऽपि विषय प्रवणस्य याहृच्छिकसुकृतम्। शिशुपालादिविनिन्दार्थं भगवन्नामग्रहोऽपि अज्ञातसुकृतम्।
382) एषोऽर्थो विस्तृतः प्रष्टव्यो ललिताचरितादिषु।
टि) अज्ञात सुकृतस्य भगवदङ्गीकारहेतुत्वं विष्णुधर्मे ललिताचरिते स्पष्टम्। तथाहि — विदर्भराजदुहिता काशिराजपत्नी ललिता त्रिशतसपत्नीमध्ये सुन्दरी भर्तृवल्लभा रात्रिं दिवं भगवत्सन्निधौ दीपमारोपयन्ती सपत्नीभिः सौन्दर्यबाहुल्यप्रदीपारोपणहेतुं पृष्टा जातिस्मरा आह पूर्वजन्मनि सौवीरराजपुरोहितस्य मैत्रेयस्य भगवदालये मूषिकारूपेण वर्तमानाऽहं तत्र कार्तिकमासे भगवदालये आरोपिते दीपे शाम्यति सति तद्ग्रासग्रहणार्थं तत्र गता तदाकोपस्तबिडालध्वनिना मरणभयकम्पान्तो तदा प्रमादात् मुखाग्रस्पर्शेन दीपवर्तिकायामुत्तेजितायां दीपे प्रज्वलति मृता तादृशाज्ञातसुकृतवशात् जातिस्मरा विदर्भराजदुहिताऽहं एवंभूता, अतो दीपमारोपयामीति, अत्र सुव्रतोपाख्यानादिकमपि प्रमाणीकार्यम्। तथा हि वेदवित् कस्यचिद्ब्राह्मणस्य पुत्री सुव्रता बाल्ये एव मातरि मृतायां पोषके पितर्यपि मृते देहन्यासोत्सुका। तदा होपनतेन दयालुना यमेन पूर्वजन्मनि सुन्दरीनाम्नी वेश्या त्वं तयि असमस्तुत्रो हतः अतो जन्मान्तरे त्वं पितृहीना शोचिष्यतीति शापं हेतुं आपिता नि श्रामेक रात्रे सम दर्शिनि भगवद्ध्यानपरे कस्मिंश्चिद्भागवते हृदि वितहमानीय सत्कृतवत्यसि, अत उत्तमं जन्म लब्धमिति बोध्यते इति इतिहाससमुपेयं सुव्रतोपाख्यानं वितते।
383) अज्ञानरा दानमात्रं न्यूस्य वन्धा, विशिष्य न।
टि) इत्थं याहृच्छिक सुकृतादिकं संकल्प्यानुगृह्णतो भगवतो निर्हेतुकविषयीकारे ऽतिप्रद्भायां कर्तव्यायां सत्यां अभिलेकि नस्त्वमजानानाः सन्तः उपकृतवानित्येतावन्मात्रमेवानु संदध्यते॥
384) "इन्नेन्नै पोरुळ्" "एन्नान्नि" "नडुवे" "यरियादन)
"पोरुळ्क्कोडु" "मरुवि" "एन्नैत्तीमनम्" इत्यहो
"अद्य मामर्थमापाद्य स्वं मयि स्थापितं त्वया"

भक्ति पारवश्य भगवद्ग्रह...

नसम्बन्धभेदव्यपदेशेभ्यः ॥३०॥ सामान्यात्तु ॥३१॥ बुद्ध्यर्थः पादवत् ॥३२॥
स्थानविशेषात् प्रकाशादिवत् ॥३३॥ उपपत्तेश्च ॥३४॥ तथान्यप्रतिषेधात् ॥
॥३५॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥३६॥ फलमत उपपत्तेः ॥३७॥
श्रुतत्वाच्च ॥३८॥ धर्मं जैमिनिरत एव ॥३९॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥४०॥

। इति तृतीयाध्यायस्य द्वितीयः पादः ॥

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥१॥ भेदान्नेति चेन्नैकस्यामपि ॥२॥ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥३॥ दर्शयति च ॥४॥ उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥५॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥६॥ न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥७॥ संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॥८॥ व्याप्तेश्च समञ्जसम् ॥९॥ सर्वाभेदादन्यत्रेमे ॥१०॥ आनन्दादयः प्रधानस्य ॥११॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥१२॥ इतरे त्वर्थसामान्यात् ॥१३॥ आध्यानाय प्रयोजनाभावात् ॥१४॥ आत्मशब्दाच्च ॥१५॥ आत्मगृहीतिरितरवदुत्तरात् ॥१६॥ अन्वयादिति चेत्स्यादवधारणात् ॥१७॥ कार्याख्यानादपूर्वम् ॥१८॥ समान एवं चाभेदात् ॥१९॥ सम्बन्धादेवमन्यत्रापि ॥२०॥ न वा विशेषात् ॥२१॥ दर्शयति च ॥२२॥ संभृतिद्युव्याप्त्यपि चातः ॥२३॥ पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥२४॥ वेधाद्यर्थभेदात् ॥२५॥ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम् ॥२६॥ साम्पराये तर्तव्याभावात् तथा ह्यन्ये ॥२७॥ छन्दत उभयाविरोधात् ॥२८॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥२९॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥३०॥

" सुकृतं किंनु वाऽकार्षं यतो मे हृदि काशते।"
" अन्तराले समागत्योऽजीवयन् नाथः" इत्यपि।
" अज्ञातज्ञापक स्वामिन् दासो नो वेद्मि तत्कृतम्"
" अपदार्थं पदार्थं मां कृत्वा दासं चकर्थ भोः।"
" मद्मनो नाशितवान्" "प्रेमासक्तं मनो ददौ"॥
इत्यादिसूक्तिभिः प्राज्ञाज्ञ शं निद्धा भवन्ति हि॥ स्वप्रम्
३८५) काले यतीन्द्रस्य कदाचन श्रीरङ्गेश यात्राप्रतिपालकानाम्।
श्रीमन्महामण्डपमूलभाजां गुरूत्तमानां महनीयगोष्ठ्याम्।
प्रस्तावमासे प्रकृतार्थरत्ने पालित प्रजाताः सुगिरोऽत्र भाव्याः॥
टि) अस्य निर्हेतुकविषयीकारस्य ख्यापकमैतिह्यं यथा — श्रीभाष्यकार-
काले श्रीरङ्गनाथयात्रोत्सवे प्रतीक्षमाणेषु श्रीवैष्णवेषु महामण्डपे समु-
दितेषु केनचित् श्रीवैष्णवेषु इतः कस्य दारिकस्य निर्गमिं प्रतीक्षमाणैरस्मा-
भिः कालो यापितो न ज्ञायो, अद्य प्राप्तशेषिणो यात्रां प्रतीक्षामहे, किंनु
सुकृतमकार्षम् इति प्रकृतार्थे प्रस्तुते, नित्यसंसारिणोऽस्य कदाचित् भ-
गवद्विषये रुच्युत्पत्तेः को हेतुरिति विचारयन्तु, यादृच्छिकसुकृतमिति
के चित् अज्ञातसुकृतमिति परेषु च कथयत्सु, तदानीं तत्रोपस्थिते कि-
डाम्बि पेरुमाल् स्वामिनि किमस्माकं भगवानिव सुकृतदेव इति कलिदाम्य
णीयोऽस्तीति पृच्छति पिल्लैतिरुनरैयूरयरैयर् स्वाम्याह सुकृतमि-
त्यपि स एव भगवानुच्यत इति। अयं भावः — अज्ञातसुकृतं सदपि न पु-
रुषार्थहेतुः, किंतु तद् व्याजीकृत्याङ्गीकुर्वन् भगवानेव पुरुषार्थहेतुरिति॥
३८६) इत्थं च सिद्धं भगवत्कटाक्षस्त्वज्ञात पुण्यैक वितीर्णजन्मा॥
टि) अतः सिद्धं यत् सर्वमुक्तिप्रसङ्गपरिहारार्थं अस्मात् चेतनाद् बुद्धिपूर्वं
संपन्नं सुकृतं व्याजीकृत्य श्रीभगवान् कटाक्षयतीति॥
३८७) एतान्यपि यथाऽस्य स्युस्तथेमं स पुराऽसृजत्।
टि) अज्ञातसुकृतावलम्बनेन कटाक्षणे श्रीकारस्य सहेतुकत्वं किं न स्यादि-
त्यत्राह न स्यात्। इमानि सुकृतान्यपि यथाऽस्मात् संपद्येरन् तथा करण-
कलेवरादिप्रदानपूर्वं स्रष्टा स एवेति कटाक्षहेतुतयोक्तं सुकृतमपि
तत्कृतमिति फलमेव। करणकलेवरप्रदानमपि कर्मानुरूपं किमेतिचेत्
तत्तत्कर्मविपाकानुसारेण भिन्नभिन्नकाले सर्जनीकर्तव्ये युगपत्सर्जनमनु
३८८) तद्विमर्शे कृते जीवस्तु तानीको भवितुं क्षमः। [ग्रहकार्यं हृ
टि) अचिद्विशिष्टाय कृपया तेन कोऽकरणकलेवरदाने पर्यालोचिते
अनेनो जीवन विजयेतेन क्रियमाणस्य दर्शनादधिकं न कार्यमिति सि
३८९) चिरात् कर्षणमवापः फलनं चेत्यमूः क्रिया॥ [ध्यति
क्रमाद्ध्याने केदारे सिलधान्यं स्वतोऽङ्कुरत्।
यथा स्यात् फलपर्यन्तम्, तथैतानि श्रमं विना।
स्वत एव समु...नि कर्तुं शक्तां कृषिं किल।
३९०) संसारसंग्रामसाक्षी दीशोऽभक्तिकृष्णीबलः॥
एतानीति गिरोदिता न्यथ का...॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥३१॥ अनियमः सर्वेषा-
मविरोधः शब्दानुमानाभ्याम् ॥३२॥ अक्षरधियां त्ववरोधः सामान्यतद्भा-
वाभ्यामौपसदवत्तदुक्तम् ॥३३॥ इयदामननात् ॥३४॥ अन्तराभूतग्रामवत्
स्वात्मनोऽन्यथाभेदानुपपत्तिरिति चेन्नोपदेशवत् ॥३५॥ व्यतिहारो
विशिंषन्ति हीतरवत् ॥३६॥ सैव हि सत्यादयः ॥३७॥ कामादीतरत्र तत्र-
चायतनादिभ्यः ॥३८॥ आदरादलोपः ॥३९॥ उपस्थितेऽतस्तद्वचनात्
॥४०॥ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् ॥४१॥
प्रदानवदेव तदुक्तम् ॥४२॥ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥४३॥
पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥४४॥ अतिदेशाच्च ॥४५॥
विद्यैव तु निर्धारणाद्दर्शनाच्च ॥४६॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥४७॥
अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥४८॥ न सा-
मान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥४९॥ परेण च शब्द
स्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥५०॥ एक आत्मनः शरीरे भावा-
त् ॥५१॥ व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॥५२॥ अङ्गाव-
बद्धास्तु न शाखासु हि प्रतिवेदम् ॥५३॥ मन्त्रादिवद्वाऽविरोधः ॥५४॥
भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥५५॥ नानाशब्दादिभेदात्
॥५६॥ विकल्पोऽविशिष्टफलत्वात् ॥५७॥ काम्यास्तु यथाकामं समुच्ची-
येरन् न वा पूर्वहेत्वभावात् ॥५८॥ अङ्गेषु यथाश्रयभावः ॥५९॥ शिष्टेश्च
॥६०॥ समाहारात् ॥६१॥ गुणसाधारण्यश्रुतेश्च ॥६२॥ न वा तत्सह-
भावाश्रुतेः ॥६३॥ दर्शनाच्च ॥६४॥ इति तृतीयाध्यायस्य तृतीयः पादः ॥
[illegible] बादरायणः ॥१॥ शेषत्वात् पुरुषार्थवादो-

पुरुषार्थोऽतः शब्दादिति बादरायणः

३९) प्राग्जन्मकृतपुण्यापुण्यकर्मफलं तन्तु स्वर्गादि [illegible]
स्वर्नरकादिस्थानेषु स्थितिं परिभुज्य च ।
वासनामात्रशेषः सन् अज्ञकर्मानुचेतनः ।
कोऽहं कास्मि स्थितिर्यातः का गतिर्नन्विह भाविनी ।
इत्यादिरीत्या विमृश्य पादिमर्शान् खलु कांश्चन ।
ते वा भवेयुः, प्राग्उक्तस्तु कृतान्यथवा पुनः ॥

२) ईश्वरस्येच्छयाऽस्य जायमाना विशेषा निर्हेतुकविषयीकारप्रयोजकाः याद्-
च्छिकसुकृतादिरूपा इत्येव ०।, अन्येऽपि विशेषा भवन्ति, ते वर्ण्यन्ते । वर्के
कालाकालगुणनाशफलं नक्रियाशालिनि प्राणकेदारे यथा कुण्याम्‌पाय[illegible]
वेऽपि स्वयंपतितं कणिकाधान्यं अङ्कुरं फलपर्यन्तं भवति, तथैव [illegible]
माना निरूपणविशेषा यादृच्छिकसुकृतानि यथा खत [illegible] वाङ्कुरेषु तथा ।
किमयं भोक्तृकर्मावलोऽनादिः संसारयात्रा निर्वृतिः तत्र पूर्वकृतपुण्यपाप-
कर्मफलेषु स्वर्गनरकादिषु न युक्तालं भुक्तेषु सत्सु " इत्यतः परं पूर्वकर्म-
वासनायैव पुण्ये पापे वा प्रवर्तितव्यं न कारणान्तरेण कर्मणा इति स्थितौ स-
त्यां अर्थात् कृपनिन्य नाशपूर्व कर्मफलानुभवस्यान्यायां दशायां अहं किं
देह [illegible] दिरूपस्तद्व्यतिरिक्तो वा, स्वतन्त्रः परतन्त्रो वा, अहं कः, इति,
किमहं यावन्नाशो यथा स्यात् तथा तिष्ठामि, उतात्मोज्जीवनं यथा स्यात्
तथा तिष्ठामि, एवं तिष्ठतो ममात्मोज्जीवनोपायिकः प्रकारः कस्येवं भूता
निरूपणविशेषाः पूर्वोक्तसुकृतानि च खत (?) दूषानि ॥

३०) "यथा हि मोचकाः पान्थे" इत्युपक्रम्य विस्तरात् ।
एतस्य परिपाटी तु [illegible]गतन्यासत्र ईरिता ॥

टि) अयं निर्हेतुकविषयीकारक्रमः श्रीपाञ्चरात्रे ऽहिर्बुध्न्यसंहितायां प्रतिपाद्यते,
"यथा हि मोचकाः पान्थे परिगृह्य ये युषि । निवृत्तमोषके घोरास्तदा सन्त
उदासते । अनुग्रहाभिकाङ्क्षास्तु शक्तेः पातभाग् तथा । उदासते समीभूय
कर्मणि ते शुभाशुभे । तत्पातानन्तरं जन्तुर्युक्तो मोक्षसमीक्षया । प्रवर्तमा-
[illegible] न वैराग्यो विशेषेऽभिनिवेशवान् । आगमानुसंचिन्त्य गुरूनुपस-
सतस्ति [illegible] कालेऽस्य [illegible] क्रमुपेत्य श्रीनारदे संशयान् पृष्टवति स
उत्तरयन् अहिर्बुध्न्यः अपि संसारमोक्षहेतुभूते निग्रहानुग्रहशक्ती इति
देशकाले सर्वभावस्थः तत्र निग्रहशक्त्या जीवः स्वस्वरूपादीनि विस्मृत्य
संसारी भवतीति विस्तरेण प्रतिपाद्य अनुग्रहशक्त्या संसारान्मुक्तिप्राप्तिप्र-
कारप्रतिपादनावसरे "यथा हि मोचकाः पान्थे" इत्युपक्रम्य अयमर्थो येन
भारवाहिनि पान्थे स्वकीयं भारं विधाय नाहिते भारे चोर्यैरुक्तः [illegible] ना:
गवतोऽनुग्रहशक्त्या तद्विषये प्रसर्पन्त्यां सत्यां एते जीवे स्वमार्गे आक्र[illegible]
स्वविषये प्रवृत्तायामयं चेतनः मोक्षरुचिमान् विवेकी शास्त्राभ्यासी स-
दाचार्यमुपसद्य लब्धसत्त्वः क्रमेण संसारोन्मुक्तः परमपदं प्राप्तो भवतीत्युक्तम्
३३) "वैरिदैवरुचि" इत्यादिना सोऽयमर्थः स्फुटीकृतः ।
निर्हेतुकं दयैवेति [illegible]

यथाऽन्येष्विति जैमिनिः ॥२॥ आचारदर्शनात् ॥३॥ तच्छ्रुतेः ॥४॥ सम-
न्वारम्भणात् ॥५॥ तद्वतो विधानात् ॥६॥ नियमात् ॥७॥ अधिकोपदेशा-
त्तु बादरायणस्यैवं तद्दर्शनात् ॥८॥ तुल्यं तु दर्शनम् ॥९॥ असार्वत्रि-
की ॥१०॥ विभागः शतवत् ॥११॥ अध्ययनमात्रवतः ॥१२॥ नाविशेषात्
॥१३॥ स्तुतयेऽनुमतिर्वा ॥१४॥ कामकारेण चैके ॥१५॥ उपमर्दं च ॥१६॥
ऊर्ध्वरेतःसु च शब्दे हि ॥१७॥ परामर्शं जैमिनिरचोदना चापवदति
हि ॥१८॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥१९॥ विधिर्वा धारणवत् ॥२०॥
स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥२१॥ भावशब्दाच्च ॥२२॥ पारि-
प्लवार्था इति चेन्न विशेषितत्वात् ॥२३॥ तथा चैकवाक्योपबन्धात् ॥२४॥
अत एव चाग्नीन्धनाद्यनपेक्षा ॥२५॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्व-
वत् ॥२६॥ शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामव-
श्यानुष्ठेयत्वात् ॥२७॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥२८॥
अबाधाच्च ॥२९॥ अपि स्मर्यते ॥३०॥ शब्दश्चातोऽकामकारे ॥३१॥ विहि-
तत्वाच्चाश्रमकर्मापि ॥३२॥ सहकारित्वेन च ॥३३॥ सर्वथापि त एवो-
भयलिङ्गात् ॥३४॥ अनभिभवं च दर्शयति ॥३५॥ अन्तरा चापि तु त-
द्दृष्टेः ॥३६॥ अपि स्मर्यते ॥३७॥ विशेषानुग्रहश्च ॥३८॥ अतस्त्वितर-
ज्ज्यायो लिङ्गाच्च ॥३९॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपा-
भावेभ्यः ॥४०॥ न चाधिकारिकमपि पतनानुमानात् तदयोगात् ॥
॥४१॥ उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥४२॥ बहिस्तूभय-
थापि स्मृतेराचाराच्च ॥४३॥ स्वामिनः फलश्रुतेरित्यात्रेयः ॥४४॥

२९४) शेषनारकं किंति तत्रैव कृपाहेतोः कीर्तितः।
इति चेत् तर्हि वैरिदे' इत्युक्तिर्न घटेत हि ॥
कृर्वतामिति तत्रैव कृपाहेतुश्च कीर्तितः।
इति चेत् तर्हि स्तेहे तु मित्रोक्तिर्न घटेत हि ॥
टि) अनुमर्थं निर्हेतुकविषयीपात्रभूतं श्रीशठकोपदिव्यसूरिस्तत्रापि प्रमाणयति। स ६/७/४ गाथायां भगवान् निर्हेतुकं कृपां [illegible] करोतीत्याह। न च तत्र [illegible] इति कुर्वतामित्युक्तेः कृपोपयिक प्रीति हेतुकृतोपायानुतिष्ठत्स्वेव स कृपां करोतीति प्रतीयत इति वाच्यम्, तथा सति वैरिदे इति निर्हेतुकतोक्तिर्न घटेत। तर्हि [illegible] इत्यस्य कृतामित्यर्थं कृत्वा कृपापात्राणि भवन्तु इति भगवता संकल्पितानामित्यर्थः कार्यः
२९५) भगवत्याभिमुख्यं तु सुकृतेन न जायते।
भगवत्कृपयैवेति वाम मभ्युपगम्यते।
अद्वेषः सुकृतेनेति ब्रूम इत्यपि नोचितम्।
महाफलस्य तस्यैतत् साधनीकर्तुमक्षमम् ॥
टि) भगवति चेतनस्याद्वेषमाभिमुख्यमित्युभयमास्ति, तत्राभिमुख्यस्य यादृच्छिकसुकृतादिहेतुकत्वाभावेऽपि भगवत्कृपाहेतुकत्वेऽपि तद्द्वेषद्वेषं यादृच्छिकसुकृतजमिति केचिदाहुः। तन्न, सर्वापगुणनिधानस्यात्मोपजीवन परमफलस्याद्वेषस्य तुच्छयादृच्छिकसुकृतहेतुकत्वानुपयोगात् तस्यापि भगवत्कृपाहेतुकत्वमेव युक्तमात् ॥
२९६) शास्त्रेणाविहिते चास्मिज्ज्ञानस्याप्यगोचरे।
कृत्ये सुकृतमित्येतन्नाम कर्तुं कथं वयम्।
अधिकारिण इत्येवं चोदयन्त्यपि केचन।
कृतं तन्नाम नास्माभिः किं त्वीशेनेति विस्मृतम् ॥
टि) शास्त्रविहितं चेतनेन बुद्धिपूर्वमनुष्ठितं हि सुकृतमिति सुवचम्, शास्त्रेणेदं कर्तव्यमिति अविहितं इदं सुकृतमकार्यमेतत्पस्माभिरप्यननुसंहितं यादृच्छिकादिकं कथमस्माभिः सुकृतमिति व्यवहार्यमिति चेत्, नास्माभिस्तथा नामक्रियते, किंतु सर्वमुक्तिप्रसङ्गपरिहाराय सर्वेश्वरेणेति पूर्वं उक्तम् ॥
२९७) सूक्तेषु दिव्यसूरीणमास्थिन्नर्थे परस्परम्।
विरोध इव भासेत, तन्निरासस्य वैखरीः
अन्यद्ग्रन्थे भातव्यं न ब्रूमो विस्तराद्भिया ॥
टि) तिरुमालिरुञ्चोलै मलै येन्नेनन्न" इत्यादिसूक्तीनां न सहेतुकत्वे तात्पर्यं, किंतु व्याकृत्यमात्ररूपमिदं हेतुत्वेन शायोपरि पतन्त्याः कृपाया निर्हेतुकत्वलालतर्थमित्यादिरीत्या परस्परविरुद्धतया प्रतीयमानदिव्यसूरिसूक्तिनिवहो वि[illegible]लिस्यते। तथा- "एवं संसारनिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः। जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते। निर्हेतुककटाक्षेण मदीयेन महामते। आचार्यविषयीकारात्प्राप्नोति परां गतिम्। नासौ पुरुषकारेण न चाप्यन्येन हेतुना। केवलं [illegible] इत्यादिकं भी व्यम्

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥४५॥ सहकार्यन्तरवि-
धिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥४६॥ कृत्स्नभावात्तु गृहिणोप-
संहारः ॥४७॥ मौनवदितरेषामप्युपदेशात् ॥४८॥ अनाविष्कुर्वन्न-
न्वयात् ॥४९॥ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥५०॥ एवं मुक्ति-
फलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥५०॥

इति तृतीयाध्यायस्य चतुर्थः पादः। तृतीयाध्यायः सम्पूर्णः॥

आवृत्तिरसकृदुपदेशात् ॥१॥ लिङ्गाच्च ॥२॥ आत्मेति तूपगच्छ-
न्ति ग्राहयन्ति च ॥३॥ न प्रतीके न हि सः ॥४॥ ब्रह्मदृष्टिरुत्कर्षात्
॥५॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥६॥ आसीनः संभवात् ॥७॥ ध्या-
नाच्च ॥८॥ अचलत्वं चापेक्ष्य ॥९॥ स्मरन्ति च ॥१०॥ यत्रैकाग्रता त-
त्राविशेषात् ॥११॥ आप्रायणात् तत्रापि हि दृष्टम् ॥१२॥ तदधिगम उ-
त्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥१३॥ इतरस्याप्येवमसं-
श्लेषः पाते तु ॥१४॥ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥१५॥ अग्नि-
होत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥१६॥ अतोऽन्यापि ह्येकेषामु-
भयोः ॥१७॥ यदेव विद्ययेति हि ॥१८॥ भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते॥

॥ इति चतुर्थाध्यायस्य प्रथमः पादः॥

वाङ्मनसि दर्शनाच्छब्दाच्च ॥१॥ अत एव सर्वाण्यनु ॥२॥ तन्मनः
प्राण उत्तरात् ॥३॥ सोऽध्यक्षे तदुपगमादिभ्यः ॥४॥ भूतेषु तच्छ्रुतेः।
॥५॥ नैकस्मिन्दर्शयतो हि ॥६॥ समाना चासृत्युपक्रमादमृतत्वं चानु-
पोष्य ॥७॥ तदापीतेः संसारव्यपदेशात् ॥८॥ सूक्ष्मं तु प्रमाणतश्च त-
थोपलब्धेः ॥९॥ नोपमर्देनातः ॥१०॥ अस्यैव चोपपत्तेरेष ऊष्मा ॥११॥

३९८) न स्मा चेतन वैपुरस्येऽप्युज्जीवनकृते कृषिम्।
कृषस्तु हरेश्चाभि सदा निर्भरिता वरम् ॥

टि) ईश्वरकृतस्याप्युज्जीवनकृषिप्रकारस्यैवं रूपत्वात् अस्य चेतनस्य वै- मुख्यावस्थायामपि उज्जीवनार्थं कृषिं कुर्वीत गुणोदधावीश्वरेऽनुसं- हिते "अयमेवास्मान् प्राक् कर्मसमसारयत्" इत्यभिध्यता हृत्यस्तु हस्तेन स

३९९) "एट्टिर् शटु पु लिति श्रीमच्छठारि सूक्तिरिह कथ्यताम् पितुं युक्तम्
"अमृतो ऽभिराम्या तत्व" शठारि सूक्तिरिह कथ्यताम्

टि) श्रीशठारिणा सम्ग्रहणार्थमेतत् सर्वं व्याप्य भगवान् वर्तते इत्युक्तेः सकलचैतन्यो- तेनाज्जीवनार्थमित्थमेव कृषिं भगवान् करोतीति स्पष्टम् ॥

४००) एकस्य तु निलीनस्य ग्रहणाय यथा पुरीम्।
कृत्स्नां व्याक्रम्येत तद्वत् व्याप्तिर्भगवतो ऽप्यस्तु ॥

टि) एकस्य ग्रहणार्थं सर्वव्याप्तिः किमर्थमिति चेत् यथा एकस्य चोरस्य ग्रहणा- र्थं कृत्स्नो ग्रामो व्याप्यते, तथैकं चेतनं ग्रहीतुं कृत्स्नं विश्वं व्याप्यते ॥

४०१) व्याप्तिं स्वस्य वतारादिवत् स्वार्थां मेनिरे बुधाः।

टि) भगवतः स्वस्यावतारादिर्यथा जीवकल्याणाय तथा व्याप्तिरपि जीवग्रहण

४०२) कृपाफलमपि प्रोच्यं भुक्ता, कर्मफलं यथा। [येति बुधा मन्ये]

टि) यथा कर्मफलमनुभवैकविनाश्यम्, तथा नित्यसूरिपरिषन्निवे- शनोत्सुकनिर्हेतुककृपाफलमपि अनिच्छतापि अनुभवेनैव क्षपणीयम्

४०३) स्वत्वमुखे कृपापूरे स्वातन्त्र्याद्भयोरपि।
स निरोद्धुमशक्यः सन् उद्वेलं परिजृम्भते ॥

टि) एवंविधा कृपा अनादेः कालादनुवर्तमानापि यथाऽयं यातनजीवकर्मभि- रीश्वरस्वातन्त्र्येण च निरुद्धा, तथाऽयमेऽपि किं न रुध्येतेत्यत्राह. निर- हुशस्वतन्त्रेणेश्वरेणास्य जीवस्य कर्मादिगुणं प्रवर्तने कृपागुणस्याभ- यस्वातन्त्र्याभ्यां निरुद्धेऽपि यदास्य तैलमुपरि निपत्याभिवर्धाति, तदा कृपागुण उभय स्वातन्त्र्यकूलं भिन्दन् प्रवहेत् ॥

४०४) भयहेतुस्तु कर्म स्यात् कारुण्यमभयंकरम्।

टि) इत्थं स्वदोषानुसन्धानं भयहेतुः भगवद्भागवतगुणानुसन्धानमभ- हेतुरित्यत्र स्वदोषेषु प्रधानं कर्मेति भगवद्गुणेषु प्रधानं कृपेत्युपपादितम्। अत्र कर्मणि चिन्तिते भयं कारुण्ये चिन्तिते ऽभयमिति तदेतोपसंहितम्।

४०५) स्यातामा भगवत्प्राप्ति पर्यायेण भयाभये।

टि) इत्थं भयाभये कियत्कालमनुवर्तेयातामिति चेद् भगवत्प्राप्तिपर्यन्तम्

४०६) निवर्त्यभूतविद्यादिज्ञानं साध्वस कारणम्।
निवर्तक कृपाज्ञानं मभयोदय कारणम् ॥

टि) भगवद्गुणानुसंदधता सर्वदा निर्भयं कुतो न स्थातुं शक्य- मिति चेत्, निवर्तककृपाज्ञानस्याभयहेतोः सहोऽपि निवर्त्याविद्यादिक- ज्ञानस्य ... दर्शिनः ... [illegible] ... र तिभ

प्रतिषेधादिति चेन्न शारीरात् स्पष्टो ह्येकेषाम्॥१२॥ स्मर्यते च॥१३॥
तानि परे तथा ह्याह॥१४॥ अविभागो वचनात्॥१५॥ तदोकोऽग्रज्वलनं-
तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च
हार्दानुगृहीतः शताधिकया॥१६॥ रश्म्यनुसारी॥१७॥ निशि-
नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च॥१८॥ अतश्चाय-
नेऽपि दक्षिणे॥१९॥ योगिनः प्रति स्मर्येते स्मार्ते चैते॥२०॥

इति चतुर्थाध्यायस्य द्वितीयः पादः॥

अर्चिरादिना तत्प्रथितेः॥१॥ वायुमब्दादविशेषविशेषाभ्याम्
॥२॥ तडितोऽधि वरुणः सम्बन्धात्॥३॥ आतिवाहिकास्तल्लिङ्गात्॥४॥
वैद्युतेनैव ततस्तच्छ्रुतेः॥५॥ कार्यं बादरिरस्य गत्युपपत्तेः॥६॥ वि-
शेषितत्वाच्च॥७॥ सामीप्यात्तु तद्व्यपदेशः॥८॥ कार्यात्यये तदध्यक्षे-
ण सहातः परमभिधानात्॥९॥ स्मृतेश्च॥१०॥ परं जैमिनिर्मुख्यत्वात्
॥११॥ दर्शनाच्च॥१२॥ न च कार्ये प्रत्यभिसन्धिः॥१३॥ अप्रतीकाल-
म्बनान्नयतीति बादरायण उभयथापि दोषात् तत्क्रतुश्च॥
॥१४॥ विशेषं च दर्शयति॥१५॥ इति चतुर्थाध्यायस्य तृतीयः पादः॥

सम्पद्याविर्भावः स्वेन शब्दात्॥१॥ मुक्तः प्रतिज्ञानात्॥२॥ आत्मा प्रक-
रणात्॥३॥ अविभागेन दृष्टत्वात्॥४॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः
॥५॥ चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः॥६॥ एवमप्युपन्या-
सात्पूर्वभावादविरोधं बादरायणः॥७॥ संकल्पादेव तच्छ्रुतेः॥८॥
अत एव चानन्याधिपतिः॥९॥ अभावं बादरिराह ह्येवम्॥१०॥ भा-
वं जैमिनिर्विकल्पामननात्॥११॥ द्वादशाहवदुभयविधं बादराय-

४०८तः ४६३ पर्यन्तं चरमपर्वनिष्ठाप्रकरणम्

(४०७) स्वतन्त्रस्योपायतया वरणे खल्विमं कथा।

टि) एतावता सिद्धोपायः सर्वेश्वर एव मोक्षसिद्धेर्निरपेक्षसाधनं, स च यथाकर्म संसारयितुं कारुण्यान्मोचयितुं च स्वतन्त्र इति तस्य [illegible] स्वदोषानुसन्धानात् भगवत्कृपानुसन्धानाच्च भयाभये यावन्मोक्षं परिवर्तेते इत्युक्तम्। अथ सा क्षा नारायणो देवः कृतमलमियां तनुमिमुकरोत्। सिद्धोपायबहिर्भूतस्य सिद्धोपायसीमाभूतस्य संसारमोक्षसाधारणहेतुतां विना मोक्षमात्रहेतोः, कदापि न भयं नयं सदा निर्भयं न भवितुं यत्कृपिति स्थितिप्रयोजकस्य सदाचार्यस्याभिमान एव चरमोपाय इति सकलपूर्वाचार्यैः श्रीवचनभूषणमिमुसंहितं प्रणादि रहस्यार्थं निरूपयति।
यथाकर्म संसारयितुं करुणया मोचयितुं च सामर्थ्यस्य स्वतन्त्रस्योपायत्वे हि भयाभययोः [illegible] आचार्ये उपायतया परिगृहीते सदा निर्भयेन भवितुं युज्यत इति भावः।

(४०८) वर्तन्ते भगवद्भोगलाभालाभदशाद्वये।
मिथो विरुद्धवक्तारो दशसंख्या महाशयाः।

(४०९) तेषां सूक्तीरुपादाय न्यायमर्थोऽवधार्यते।
अथ तान् अतिशेते यः (प्रहसनपोऽस्ति) तत्र किमवलम्बयतु।

टि) इदं प्रमेयं केन प्रमाणेन निश्चीयत इति चेत्, प्रथमपर्वणि चरमपर्वणि च सज्जं विशेषं जानन्तोऽपि प्रथमपर्वण्यपि रज्यमानाः भगवदनुभवे लब्धे किमपि अलब्धे विरुद्धं किमपि भाषमाणाः दशसंख्याः सन्ति, तद्वचनानुरोधेन न्यायमर्थो निर्धार्यते, तेषामिमं पर्वद्वयं दोःपरिवृत्ति दरन्ती प्रहसन स्वाचार्यचरणावेव प्राप्यप्रापकत्वेनाध्यवस्यन् [illegible] मधुरकविः तत्सूक्तिं [illegible] अनुसृत्य निर्धार्यते इति

(४१०) स्वरूपस्य तु याथात्म्यं प्राप्यस्य च तथैव यत्।
तयोः खल्वनुरूपेण भाव्यं हि प्रापकेण तु॥

टि) स्वरूपफलानुरोधेन हि उपायेन भाव्यम्, स्वरूपं तद्धि [illegible] भगव[illegible] अनुरुद्धं भागवतशेषत्वरूपं भवति, फलेऽपि भगवत्कैङ्कर्यं प्रथमावधिः भागवतकैङ्कर्यं चरमावधिः इत्थं स्वरूपफलयोर्याथात्म्ये सति तदीयेषु तेषां येऽपि भाव्यमानुरूप्यात् तेषु तदीयेषु आचार्यः आत्मानं स्वीकृत्य तज्ज्ञानं प्रदाय बहुप्रकारेण आचार्यस्य शेषता सर्वभागवताभिमता स्वरूपस्य सीमाभूता भवति, अस्याः स्वरूपस्यानुगुणं फलं आचार्यकैङ्कर्यमिति। स्वरूपफलयोरेवं आचार्य एवोपाय इति भावः।

(४११) श्रीवत्सचिह्नमिश्रार्यम्, तथा दाशरथिं गुरुम्।
कुलदयास्थितौ यादान्ध्रपूर्णाभिधो गुरुः॥

टि) शठकोपं मधुरकविरिव श्रीभाष्यकारमेतौ पायसपं चाव्यवस्यन् वटुकपूर्णः तथाभूतापि संसारात् भगवत्सन्निधौ मोक्षार्थं दत्तापूर्वं प्रदर्शयन्तौ दाशरथिकूरेशौ अभयकुलरूपावित्याह॥

(४१२) प्राप्यांशे प्रथमं पर्व भवत्याचार्यकैङ्करी।
मध्यमं भगवद्दास्यमन्त्यं भागवतेषु तत्॥

टि) फले प्रथमं पर्व आचार्याभिमतमाचार्यपुरतोल्लासार्थं क्रियमाणं भगवत्कैङ्कर्यं, तथा मध्यमपर्व भगवदभिमतं भागवतदास्यं, चरमपर्व भागवताभिमतं भागवतमुखोल्लासकमाचार्यदास्यम्

(४१३) पुरुषार्थतया शास्त्रं स्वरूपानिरं परं जगौ।
अथ प्राप्तिफलत्वेन यथा कैङ्कर्यसंभवः।
तथा साध्यविवृद्धिः सत् चरमं पर्व सिध्यति।

टि) इदं चरमपर्व आचार्यकैङ्कर्यं [illegible] शास्त्रं [illegible]

णोऽतः ॥१२॥ तन्वभावे सन्ध्यवदुपपत्तेः ॥१३॥ भावे जाग्रद्वत् ॥१४॥ प्रदीपवदावेशस्तथा हि दर्शयति ॥१५॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥१६॥ जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥१७॥ प्रत्यक्षोपदेशान्नेति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥१८॥ विकारावर्ति च तथा हि स्थितिमाह ॥१९॥ दर्शयतश्चैवं प्रत्यक्षानुमाने ॥२०॥ भोगमात्रसाम्यलिङ्गाच्च ॥२१॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥२२॥

इति चतुर्थाध्यायस्य चतुर्थः पादः। चतुर्थाध्यायः सम्पूर्णः ॥

॥ इति ब्रह्मसूत्राणि संपूर्णानि ।

॥ पातञ्जलयोगसूत्राणि ॥

ओम् । अथ योगानुशासनम् ॥१॥ योगश्चित्तवृत्तिनिरोधः ॥२॥ तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥३॥ वृत्तिसारूप्यमितरत्र ॥४॥ वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥५॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥६॥ प्रत्यक्षानुमानागमाः प्रमाणानि ॥७॥ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥८॥ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥९॥ अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥१०॥ अनुभूतविषयासंप्रमोषः स्मृतिः ॥११॥ अभ्यासवैराग्याभ्यां तन्निरोधः ॥१२॥ तत्र स्थितौ यत्नोऽभ्यासः ॥१३॥ स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ॥१४॥ दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥१५॥ तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ॥१६॥ वितर्कविचारानन्दास्मितारूपानुगमात् संप्रज्ञातः ॥१७॥ विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ॥१८॥ भवप्रत्ययो विदेहप्रकृति-

संपन्न स्वेन रूपेणाभिनिष्पद्यते इति स्वरूपाविर्भावफलत्वेऽप्यनन्यत्वे... आविर्भूतशेषत्व विषये किंचित्कारत्वे... संपाद्यत्वात् ... विर्भावपरिवाहतया भगवदनुभवजनितप्रीतिकारित कैंकर्यं सिध्यति, भगवतः स्वकैंकर्यादपि भागवतकैंकर्यस्याभिमतत्वात् भागवतकैंकर्य... रूपेण भाग-वतकैंकर्यं, भगवतानां स्वकैंकर्यादपि आचार्यकैंकर्यस्याभिमतत्वात् तद्वृद्धिरूपेण...

414) एतत्तु दुर्लभं हन्त दौर्लभ्यं तन्निरूप्यते। | आचार्यकैंकर्यं प्राप्यते

415) विषयेषु च रक्तानां विषयांस्तान् विसृज्य तु।

भगवद्विषये प्राप्तौ यावान् आयास ईक्ष्यते।

न तावान् केवलं, तं च त्यक्त्वा चरमसंगतौ॥ | ततोऽप्यधिक इति भावः

टि) चरमपर्वनिष्ठा दुर्लभा, विषय दोषदर्शनेन विषयान् हित्वा भगवत्प्रावण्यं सुकरम् भगवति दोषाभावात् प्रथमपर्वभूतं भगवन्तं हित्वा आचार्यनिष्ठा दुष्करा॥

416) दोषदर्शनतः शक्यं विषयासङ्ग धूननम्।

ईशे तस्याप्रसक्तत्वात् दुःशकं तदुपेक्षणम्। | स्पष्टम्।

417) दोषाणां दर्शनेऽपि स्यात् गुणवत् तेषु भोग्यता।

टि) विषयदोषाणां भगवत्यप्रसक्तावपि संश्लेषदशायां सुखे दत्तेऽपि विश्लेषदशायां दुःखदानरूपो दोषो भगवति दृश्यमानो भक्तं ततो वियोज्य किं चरमपर्व न प्रापयेदित्यत्राह। इत्थं तस्य दोषत्वेन भानेऽपि भक्तानां तादृशदोषाभिलाषपूर्वं भगवति प्रवृत्तेरेव दर्शनात् तस्य न दोषत्वं किंतु गुणवत् स्पृहणीयत्वमुपादेयत्व

418) अहो लोकविपर्यस्ता प्रक्रिया खलु माधवे। | ...

टि) लोके दोषो हेयः गुणः उपादेय इति दृष्टं, भगवति दोषस्याप्युपादेयत्वं कथमिति, लोकविलक्षणमित्यत्राह। भगवन्निष्ठत्वं हि गुणस्योपादेयत्वे प्रयोजकं, तद्दोषस्याप्यस्तीति, भगवति दोषदर्शनान्न निवृत्तिसंभवः॥

419) गुणेषूपादेयताहेतुर्यः स दोषेष्वपीक्ष्यते। | स्पष्टम्।

420) निर्घृणो हरिरित्युक्त्वा मरुत्पुत्रं प्रणतः पुरा।

घृणावानिति वादो हि विजज्ञे मुनीश्वरे।

टि) भगवद्विषये दोषोऽस्तीत्यापातप्रतीतिमात्रम्। पुत्र्या आर्तौ सत्यामपि अनागतस्य भगवतो विषये निर्घृण इति व कुमुदाक्षायावदं न हस्तेन पिदध्ये किल घृणावानिति वदन्तो पुत्री। पुत्र्या इयमुक्तिः सहृदयैव, कृपैव मामेवम-वादयदिति उक्तयास्नेह... तयोः पुत्र्या प्रकाशनात्॥

421) घृणावानिति वादः स कृपामूलक इष्यते।

स्नेहोपकारस्मृत्योर्हि तत्र स्थापनमीक्ष्यते।

स वादो हार्दपर्वेति नीतो वर्ण्यं भवत्यतः॥ | स्पष्टम्।

422) निर्घृणत्वेन शङ्किता युद्धदशायां तदीरितम्।

तस्यामपि हि वक्तुः स्वगतत्वमुदीरितम्॥

टि) स्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः। सद्वृत्तो निरनुक्रोशः शङ्के मद्भाग्यसंक्षयात् इति सीतयानिर्घृणत्वशङ्कावसरेऽपि तदुक्तेर्भाग्यक्षयः स्वगतत्वेनहेतु

423) प्रत्यावर्त्येत्तां गुणदोषभूतो योगो वियोगश्च परस्य पुंसः। | ...

... प्रत्यावर्त्य ... उपाय सीम्नि॥

लयानाम् ॥१९॥ श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ॥२०॥ तीव्र-
संवेगानामासन्नः ॥२१॥ मृदुमध्याधिमात्रत्वात् ततोऽपि विशेषः ॥२२॥ ईश्वर-
प्रणिधानाद्वा ॥२३॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥
॥२४॥ तत्र निरतिशयं सर्वज्ञबीजम् ॥२५॥ (स एष) पूर्वेषामपि गुरुः काले-
नानवच्छेदात् ॥२६॥ तस्य वाचकः प्रणवः ॥२७॥ तज्जपस्तदर्थभावनम् ॥
॥२८॥ ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ॥२९॥ व्याधिस्त्यान-
संशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वा-
नि चित्तविक्षेपास्तेऽन्तरायाः ॥३०॥ दुःखदौर्मनस्याङ्गमेजयत्वश्वास-
प्रश्वासा विक्षेपसहभुवः ॥३१॥ तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥३२॥ मैत्रीक-
रुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसाद-
नम् ॥३३॥ प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥३४॥ विषयवती वा प्रवृत्ति-
रुत्पन्ना मनसः स्थितिनिबन्धनी ॥३५॥ विशोका वा ज्योतिष्मती ॥३६॥
वीतरागविषयं वा चित्तम् ॥३७॥ स्वप्ननिद्राज्ञानालम्बनं वा ॥३८॥ यथा-
भिमतध्यानाद्वा ॥३९॥ परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥४०॥
क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता-
समापत्तिः ॥४१॥ तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का ॥४२॥
स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥४३॥ एतयैव
सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥४४॥ सूक्ष्मविषयत्वं चा-
लिङ्गपर्यवसानम् ॥४५॥ ता एव सबीजः समाधिः ॥४६॥ निर्विचारवैशा-
रद्येऽध्यात्मप्रसादः ॥४७॥ ऋतंभरा तत्र प्रज्ञा ॥४८॥ श्रुतानुमानप्रज्ञा-
भ्यामन्यविषया विशेषार्थत्वात् ॥४९॥ तज्जः संस्कारोऽन्यसंस्कार-

टि) भागवतसंश्लेषविश्लेषरूपं गुणदोषोभयमपि तत्र पुरुषार्थान्वय... पुरुषार्थ काष्ठाभेदस्य अन्यस्य विनाशकम्। तथाहि – संश्लेषः स्वसमये स्वसम्मुखत्वम् पुरुषार्थवैराग्यमारभ्य प्रपुरुषार्थान्वयं नाशयति। तथा भगवतदास्यमत्र तो दिव्यसूरिः भगवन्तं विशेषयितुं भगवतः सौन्दर्यशीलादि निरूपयन् भगवदनुभवलग्न इति अन्यार्थं भगवद्गुणे प्रस्तुतेऽपि दृष्टिपिताप हरिभगवानन्यतो निवर्त्य वशीकरोतीति संश्लेषस्य पुरुषार्थकाष्ठाविनाशकत्वं स्पष्टम्। विश्लेषदशायां मनः सदा भगवत्प्रवणे भवतीति विश्लेषस्य तत्र पुरुषार्थान्वयविरोधित्वम्। विश्लेषः भागवतदास्य परानपि ततो निवर्त्य भगवदाह्वाने प्रवर्तयतीति तस्य पुरुषार्थकाष्ठाभञ्जकत्वम्। इत्थमुभयोरुभयभञ्जकत्वम्

४२४) नित्यशत्रुर्हि भगवत्सौन्दर्यमुपपादितम्॥

टि) अत्र पुरुषार्थान्वयभञ्जकत्वं प्रासङ्गिकम्, पुरुषार्थकाष्ठाभञ्जकत्वमेव प्रधानप्रकारम्, तत्र प्रमाणम् "गच्छता मातुलकुलं भरतेन तदाऽनघः। शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः" इति। अत्र भागवतभक्तकैङ्कर्यनिष्ठं शत्रुघ्नं प्रति श्रीरामसौन्दर्यमन्यतो वियोज्य स्वसन्निकर्षकत्वात् शत्रुरित्युच्यते

४२५) एवं प्राप्यस्य निष्कर्षं प्रापकस्याप्युक्तमम्।

टि) आचार्यकैङ्कर्यस्य प्राप्यत्वेन निष्कर्षे तदानुगुण्येनाचार्य एवोपायो युक्तः॥

४२६) प्राप्यप्रापकयोरैक्यमन्यथा दुर्घटं भवेत्।

टि) यथा प्रपत्तिपर्वणि भगवानेव प्राप्यः प्रापकश्च तथा चरमपर्वणि अपि युक्तम्, चरमपर्वणि भगवत एव प्रापकत्व स्वीकारे तु प्राप्यप्रापकयोरैक्यं भज्येत॥

४२७) हस्तग्रहणात् कार्यसाधनं हरिसेवनम्।
चरणग्रहणात् कार्यसाधनं गुरुसेवनम्॥

टि) भगवदाश्रयणं हस्तग्रहणेन कार्यसाधनवत्, आचार्यसमाश्रयणं चरणग्रहणेन कार्यसाधनवत्। पूर्वत्र हस्त उन्मोचयितुमपि शक्यः, चरणग्रहणं तु नातिक्रमणीयम्

४२८) उपकारक आचार्य उभयोर्न्यादिदोषेण।

टि) अतः परमाचार्यवैभवं तदुपपाद्यते। शेषशेषिणोः संयोजकोऽयमाचार्य उभयोरभिमतवस्तुसंयोजकत्वादुभयोरुपकारकः।

४२९) शेषवस्तु ददातीशे चेतने शेषिणं तथा। स्पष्टम्

टि) स एष्यनन्तरादौ कृतेऽपि कस्यापि जीवस्यालाभात् शेषत्वं भगवते जीवदानात् भगवज्ञानाभावादात्मलाभाय जीवाय तत्संबन्धं ज्ञापयित्वा तस्य दानात्

४३०) आचार्यस्तु स्पृहां धत्ते स्वयं सर्वेश्वरोऽपि सः। उभयोपकारकः

टि) लक्ष्मीनाथसमारम्भामिति गुरुपरम्परायां द्वयोपदेशृतयान्वयात् आचार्यकृत्यं स्वोपयोगित्य श्रीतोपदेशानात् अभयप्रदानात् लोकोपदेशात् चाभय...

४३१) अतो हि गुरुमालायामन्वितः सोऽभवद्धरिः। दर्शितमत्स्यावतारपदे

अत एव च गीतादेरुपदेशमपि ज्यायात्॥ स्पष्टम्

४३२) विश्रुतया... सप्तशेषं दातीयो यद्यदुर्लभाः।
तदेवाचार्यसिद्धीति कृती स्यात् प्रत्युपक्रिया।

टि) उभयविभूतिः तन्नाथो... शिष्याधीनक्वचित आचार्यस्य सदृशोपकारस्तदैवस्यात् यद्यन्यविभूतिद्वयमन्यो विभूतिमान् तस्मै दीयेत तद्वसंभवि तयो...

प्रतिबन्धी ॥५०॥ तस्यापि निरोधे निर्बीजः समाधिः ॥५१॥ इति प्रथमः पादः ॥
तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥१॥ समाधिभावनार्थः क्लेश-
तनूकरणार्थश्च ॥२॥ अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः ॥३॥ अ-
विद्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥४॥ अनित्याशुचि-
दुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥५॥ दृग्दर्शनशक्त्यो-
रेकात्मतेवास्मिता ॥६॥ सुखानुशयी रागः ॥७॥ दुःखानुशयी द्वेषः ॥८॥ स्व-
रसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ॥९॥ ते प्रतिप्रसवहेयाः सूक्ष्माः ॥
॥१०॥ ध्यानहेयास्तद्वृत्तयः ॥११॥ क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥
॥१२॥ सति मूले तद्विपाको जात्यायुर्भोगाः ॥१३॥ ते ह्लादपरितापफलाः पुण्या-
पुण्यहेतुत्वात् ॥१४॥ परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च
दुःखमेव सर्वं विवेकिनः ॥१५॥ हेयं दुःखमनागतम् ॥१६॥ द्रष्टृदृश्ययोः सं-
योगो हेयहेतुः ॥१७॥ प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगाप-
वर्गार्थं दृश्यम् ॥१८॥ विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥
॥१९॥ द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥२०॥ तदर्थ एव दृश्य-
स्यात्मा ॥२१॥ कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥२२॥ स्वस्वा-
मिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥२३॥ तस्य हेतुरविद्या ॥२४॥ तदभा-
वात् संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥२५॥ विवेकख्यातिरविप्लवा-
हानोपायः ॥२६॥ तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥२७॥ योगाङ्गानुष्ठानादशु-
द्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ॥२८॥ यमनियमासनप्राणायामप्र-
त्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥२९॥ अहिंसासत्यास्तेयब्र-
ह्मचर्यापरिग्रहा यमाः ॥३०॥ जातिदेशकालसमयानवच्छिन्नाः सा-

४३३) ईश्वराश्रयणं तावत् सामान्यं बन्धमोक्षयोः।
आचार्याश्रयणं तावत् मोक्षस्यैकस्य कारणम्॥

टि) ईश्वरः कर्मानुगुणं संसारयितुं कारुण्यानुगुणं मोचयितुं च समर्थः खलु इति तत्सम्बन्धः उभयसाधारणः। शिष्यो जीवने च्छुः करुणावानाचार्य इति तत्सम्बन्धो मोक्षैकहेतुः॥

४३४-४३५) गुरूणां भगवल्लाभो लाभो भगवता गुरोः।
४३६) आचार्यादपि चात्यर्थमुपकारक ईश्वरः।
कारणं तत्र विज्ञेयम् प्रकार्यं पि गौरवम्॥

टि) भगवल्लाभ आचार्येण, आचार्यलाभो भगवतेति किं द्वावपि समाविति अत्राह आचार्योपकृतभगवदपेक्षया भगवदुपकृताचार्यस्य श्रेष्ठता। आचार्यप्रदो भगवानेव उपकारकतमः। अनेनाचार्यस्यैवोत्कर्षः फलितः॥

४३७) रक्षिते गुरुसम्बन्धे ज्ञानभक्तिविरक्तयः।
सुसंपादाः स्युः, एतस्मिन् च्युते ताभिः फलं नहि॥

टि) उत्तारक उपकारकाचार्यभावोऽभिमन्यतमदीय इति तथाभूतः स संबन्धः स्वदुर्बुद्ध्या विनाशितश्चेत् असत्योऽपि ज्ञानभक्तिविरक्तयः आचार्यानुग्रहात् परस्तात् संपादाः, तस्मिन् स्वदुर्बुद्ध्या विनाशिते तु सन्तोऽपि ते गुणाः व्यर्थाः भगवदङ्गीकाराहेतुत्वात्॥

४३८) स्थिते मङ्गलसूत्रेऽन्यभूषाः स्युश्चारिणोचिताः।
तस्मिन् प्रनष्टे भूषाभिर् वध्यं केवलं भवेत्॥

टि) न केवलं व्यर्था इत्येव, किंतु अवद्यावहा अपीत्याह॥

४३९) कमलस्य विकासकारकोऽरविरेतत् सलिलात् परिच्युतम्।
गलपूयेत यथा तथा हरिर्गुरुसङ्गच्युतमात्मनः पदम्॥

टि) आचार्यसम्बन्धे सत्येव ईश्वरः खलु हि स्वरूपविकासकः, आचार्यसम्बन्धे नष्टेऽपि निरुपाधिकगुणवतः स्वरूपमीश्वरो विकासयेदित्यत्राह। "नारायणोऽपि विकृतिं याति गुरोः प्रच्युतस्य दुर्बुद्धेः। कमलं जलादपेतं शोषयति रविर्न तोषयति" इत्येतदिह भाव्यम्॥

४४०) दुर्लभो भगवत्सङ्गो गुरुसम्बन्धविप्लवे।

टि) आचार्यसम्बन्धे नष्टेऽपि उपनिषत्तो भगवत्सम्बन्धः किंतु जीवनहेतुर्न स्यादित्यत्राह। भगवत्सम्बन्धोऽनादिसिद्धोऽपि आचार्यप्रबोधनात् प्राक् असत्कल्पः। आचार्यप्रबोधनोत्तरं कार्यकर इति आचार्यसम्बन्धाधीनः स आचार्यसम्बन्धे नष्टे कार्यकरो न भवति॥

४४१) भगवद्गुरुसम्बन्धौ पर्याप्तौ द्वाविमौ न किम्।
मध्ये भागवतानां च सम्बन्धः किमपेक्षितः।
४४२) इति चेदुच्यते वृक्षया उपघ्ने योजनं प्रति।
दण्डे काष्ठं यथैव गुरुयोगे स काङ्क्ष्यते॥

टि) आत्मोज्जीवनहेतुभगवत्सम्बन्ध[illegible]सम्बन्धः।

र्वभौमा महाव्रतम् ॥३१॥ शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि-
नियमाः ॥३२॥ वितर्कबाधने प्रतिपक्षभावनम् ॥३३॥ वितर्का हिंसाद-
यः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुः-
खाज्ञानानन्तफला इति प्रतिपक्षभावनम् ॥३४॥ अहिंसाप्रतिष्ठा-
यां तत्सन्निधौ वैरत्यागः ॥३५॥ सत्यप्रतिष्ठायां क्रियाफलाश्रयत्व-
म् ॥३६॥ अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥३७॥ ब्रह्मचर्यप्र-
तिष्ठायां वीर्यलाभः ॥३८॥ अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः ॥३९॥
शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ॥४०॥ सत्त्वशुद्धिसौमनस्यैकाग्र्ये-
न्द्रियजयात्मदर्शनयोग्यतानि च ॥४१॥ सन्तोषादनुत्तमः सुखलाभः
॥४२॥ कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥४३॥ स्वाध्यायादिष्टदेव-
तासंप्रयोगः ॥४४॥ समाधिसिद्धिरीश्वरप्रणिधानात् ॥४५॥ स्थिरसुख-
मासनम् ॥४६॥ प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥४७॥ ततो द्व-
न्द्वानभिघातः ॥४८॥ तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणाया-
मः ॥४९॥ बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दी-
र्घसूक्ष्मः ॥५०॥ बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥५१॥ ततः क्षीयते प्र-
काशावरणम् ॥५२॥ धारणासु च योग्यता मनसः ॥५३॥ स्वविषया-
संप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥५४॥ ततः परमा
वश्यतेन्द्रियाणाम् ॥५५॥ ॥इति द्वितीयः पादः॥
देशबन्धश्चित्तस्य धारणा ॥१॥ तत्र प्रत्ययैकतानता ध्यानम् ॥२॥
तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥३॥ त्रयमेकत्र
संयमः ॥४॥ तज्जयात्प्रज्ञालोकः ॥५॥ तस्य भूमिषु विनियोगः ॥६॥

तेन स्थापितो भगवत्सम्बन्धः इत्यु भौ किं न पश्यामो? मध्यम पदे

भूतो भगवत् सम्बन्धः किमर्थ इत्यत्र संक्षेपतः आचार्यसम्बन्धाभिमान इत्या [illegible]

४४३) स्वाभिमानत ईशस्याभिमानं त्यक्त्वा पोहतम् ।
आचार्यस्याभिमानेन विना नान्या गतिर्मता ।
इति श्री कलिनिर्हस्तूर इत्यत्र मुहुर्मुहुः ॥

टि) अनादिकालादहमेव मम निर्वाहक इति स्वाभिमानेन ईशाभिमानं हनततो ऽस्याचार्याभिमान गतिरिति कलि [illegible]

४४४) स्वस्वातन्त्र्यभिया भक्तिः प्रत्यूतिं प्रतिपद्यते ।

४४५) हरिस्वातन्त्र्यभीत्या तु प्रपत्तिरपि तादृशी ।

४४६) गुरौ च स्वगतः सङ्ग आहंकारिक इत्यतः ।
मत्वा दानस्वर्णनाङ्गुलीभूषणधारणम् ।

४४७) तस्मादाचार्यहस्तस्याऽभिमानः केवलं गतिः ॥

टि) इत्यमाचार्याभिमानान्या गतिर्नेति कुत उच्यते? किं शास्त्रविहिता भक्तिप्रपत्तय उपायान सन्तीत्यत्राह। भगवत्प्राप्तिसाधनत्वेन विहिता स्वयत्नसाध्या भक्तिः भगवदेकपारतन्त्र्यविरोधि स्वस्वातन्त्र्यजनिकेति भयात् अस्योपायभावत्यूता जाता। स्वपरतन्त्र्यानुगुणा महाविश्वासगर्भा प्रपत्तिः संसारेऽपि मोक्षे न सम्र्थस्वतन्त्रो ईश्वरः स्वस्वातन्त्र्यात् पुनरपि कर्मानुगुणं संसारयेत् ततः किं कुर्यामिति महाभयादस्योपायोऽभवन्ती च्युता जाता। आचार्यस्योपाय तेन स्वीकारमपि अहंकारगर्भत्वात् स्वस्वरूपानपाकर कान्तदान स्वामा स्वर्णेन अङ्गुलीयकं निर्माय धारणवत्। अत एवामनुणायत्वे निर्हेतुकं स्वमङ्गी कृतवतो महोपकारकस्याचार्यस्याऽस्मदीयोऽयमित्यभिमान एवोत्तारकः॥

४४८) करस्थं वस्तु सन्त्यज्य निधेरन्वेषणं न सत् ।

टि) करस्थ अनवद्यतिसुलभमाचार्यमुपेक्ष्य भूनिहित धनवदतिदुर्लभस्य भगवतो रक्षकत्वेनावलम्बनं न साधु। सुलभं स्वगुरुं त्यक्त्वा दुर्लभं य उपासते। लब्धं त्यक्त्वा धनं मूढो गुप्तमन्वेषते क्षितौ इत्यत्र वचनमत्र प्रमाणम्

४४९) पिपासाऽवसरे हस्तगे श्यं तोयं करस्थितम् ।
जीमूतादिवासरिद्वारिकूपतोयेक्षणं कथम्? ॥

टि) सत्यां पिपासायां पानार्हे करपात्रस्थमुदकमुपेक्ष्य मेघापिधनदीतटाकूपजलपिपासावत् आचार्यमपेक्ष्य परत्वस्य व्यूहस्य विभवस्याचार्यान्तर्यामिणो वापेक्षणम्। अतस्तान् कुर्यात् ॥

४५०) सामगानश्रुतिस्थानमस्तं नादश्रुतिस्थलम् ।
नागपर्यङ्कमुत्सृज्यावतारः (क्रन्दन) स्थलमेव च ।
अभ्यर्चकमगरस्थानं प्राप्तानस्थानमित्यमी ।
पञ्चापि भगवद्देशा गुरुरेवेति धीर्वरम् ॥

टि) नित्यमुक्तसामगानश्रवणस्थले परमपदे, असुरराक्षसपीडितब्रह्माद्यार्तिनादश्रवणस्थले क्षीराब्धिः ततः क्रन्दनरूपातस्थले, स्वाभिमतसिद्धिपर्यन्तमाक्रन्द्यान्तरिभ्यतिरूपमवस्थाने अवतारस्थले, हृदयकमलेऽवस्थायाभिमताले स्वसौन्दर्यमभो जकस्थले च सर्वमाचार्य एवेति प्रतिपद्येत। येनैव करुणा यस्य न्यासविद्या प्रदीयते। तस्यैव कुर्वेदुग्धाब्धि द्वारकाः सर्व एव सः॥

४५१) एतस्य प्रतिकूलाः स्युः [illegible] द्वारकाः ।

त्रयमन्तरङ्गं पूर्वेभ्यः ॥७॥ तदपि बहिरङ्गं निर्बीजस्य ॥८॥ व्युत्थाननिरोध-
संस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥९॥ त-
स्य प्रशान्तवाहिता संस्कारात् ॥१०॥ सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य
समाधिपरिणामः ॥११॥ ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणा-
मः ॥१२॥ एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥१३॥
शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥१४॥ क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥१५॥
परिणामत्रयसंयमादतीतानागतज्ञानम् ॥१६॥ शब्दार्थप्रत्ययानामितरेतरा-
ध्यासात् संकरस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम् ॥१७॥ संस्कारसाक्षा-
त्करणात् पूर्वजातिज्ञानम् ॥१८॥ प्रत्ययस्य परचित्तज्ञानम् ॥१९॥ न च तत् सा-
लम्बनं तस्याविषयीभूतत्वात् ॥२०॥ कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे
चक्षुःप्रकाशासंप्रयोगेऽन्तर्धानम् ॥२१॥ सोपक्रमं निरुपक्रमं च कर्म
तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा ॥२२॥ मैत्र्यादिषु बलानि ॥२३॥ ब-
लेषु हस्तिबलादीनि ॥२४॥ प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृ-
ष्टज्ञानम् ॥२५॥ भुवनज्ञानं सूर्ये संयमात् ॥२६॥ चन्द्रे ताराव्यूहज्ञानम्
॥२७॥ ध्रुवे तद्गतिज्ञानम् ॥२८॥ नाभिचक्रे कायव्यूहज्ञानम् ॥२९॥ कण्ठकूपे
क्षुत्पिपासानिवृत्तिः ॥३०॥ कूर्मनाड्यां स्थैर्यम् ॥३१॥ मूर्धज्योतिषि सिद्ध-
दर्शनम् ॥३२॥ प्रातिभाद्वा सर्वम् ॥३३॥ हृदये चित्तसंवित् ॥३४॥ सत्त्वपुरुषयो-
रत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थात् स्वार्थसंयमात् पुरुष-
ज्ञानम् ॥३५॥ ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते ॥३६॥ ते
समाधावुपसर्गा व्युत्थाने सिद्धयः ॥३७॥ बन्धकारणशैथिल्यात् प्रचार-
संवेदनाच्च चित्तस्य परशरीरावेशः ॥३८॥ उदानजयात् जलपङ्ककण्टका-

अनुकूला गुरोर्वेद्या उपेक्ष्या भागवद्द्विषः (पराः)।

टि॰ आचार्यपरतन्त्रस्य परत्रादिप्रावण्यं सर्वतन्त्र कुर्वतोऽस्य आत्मापहारेण स्वतन्त्रा देवतान्तरपराश्च प्रतिकूलाः, आचार्यपरतन्त्रा अनुकूलाः, परस्परं गुणि आचार्यपारतन्त्र्ये प्रावण्यहीनाः प्रथमपर्वणि भगवत्पारतन्त्र्ये प्रवणाः उदासी[ना उपेक्ष्याः]

४५२) उपायाङ्गं परेषां स्यात् स्वानां वानुष्ठितिस्तथा।
अधिकारिण एतस्योपेयाङ्गमुभयं तु तत्॥

टि॰ स्वस्नानं तदनुरूपानुष्ठानं आचार्याभिमाननिष्ठेतरेषामधिकारिणां उपायस्याधिकारिसापेक्षत्वात् उपेयसिद्धिपर्यन्तमुपायाधिकाराद् अतस्ते उपयुज्यमानं सत् उपायाङ्गं भवति। अस्य विषये आचार्याभिमानस्यैवोपायत्वात् उपायाधिकारशेषतया कुत्राप्यनपेक्षणादिदमुभयमाचार्यमुखोल्लासरूपेणोपेयशेषं भवति। उपेयमिति पाठे आचार्याभिमानादिदं द्वयमुपेयकोटि

४५३) स्वात्मनाश्च परेषां च प्रणाशं द्विधातीत्यतः।   [निषिद्धविषयः]
निषिद्धानुष्ठितिस्त्याज्या स्यादेतस्याधिकारिणः॥

४५४) त्रिविधोपचारेणाप्यन्वया नाशः आत्मनः।
स्वानादराच्च स्वानुष्ठास्वीकाराच्च परात्मनाम्॥

टि॰ अनेन निषिद्धानुष्ठानं स्वपरनाशकत्वात् त्याज्यं, तस्यतत्त्वं चेत्थम्, भगवद्भागवताचार्याणामभिमतविषयभूतेन स्वेन निषिद्धानुष्ठानं तत्त्रित्यानिष्टत्वात् तत्त्रितयापचाररूपं भवतीति तया विधया स्वस्य नाशकं भवति। परनाशकं च द्विधा भवति, परमपर्वपर्यन्तमागतोऽपि भागवतोऽयं नामः निषिद्धमनुतिष्ठतीति परैरनादरणात्, तत्त्वविदयं निर्दोषत्वबुद्ध्या ह्येवमनुतिष्ठति, अतोऽस्माभिस्तदनुकरणे को दोषः इति मत्वा परैः स्वानुष्ठितनिषिद्धानुकरणाच्च। तत्र भागवतवैभवानभिज्ञा अनादर्तारः। हिताहितज्ञा अनुकर्तारः इति विवेकः। अनुकर्तृणां नाशस्य युक्तत्वेऽपि अनादर्तॄणां नाशः कथं उच्यते दृष्टानादरो हि लोके गण्यते इति चेत्, राजपुत्रे दोषे सति राज्ञा हि स शिक्षणीयः, स्वपुत्रानादर्तारो राज्ञा हि निग्रह्यन्ते, तथाऽस्य दोषसत्त्वेऽपि ईश्वरेणैव स सुधारणीयः, तदनादर्तॄणां तु विनाश एव फलेत्। "अपि चेत् सुदुराचार" इति आसक्तविषयभगवतोऽत्र एतद्विषये किमु वाच्यम्।

= ४५५) तः ४५८ पर्यन्तं विहितभोगनिषेधस्य निरूपणम्

४५५) निषिद्धभोगवल्लोकविरुद्धं न भवत्यथ।
नचापि नरकप्राप्तिहेतुर्विहित (भोग) सेवनम्॥
अथापि तु परित्याज्यमीदृशस्याधिकारिणः।
स्वस्वरूपविरुद्धत्वात् तथा वेदान्तरोक्ततः।
शिष्टगर्हास्पदत्वाच्च प्राप्यस्य मतिवन्धनात्॥

टि॰ इत्थं परदारादिभोगस्य शास्त्रनिषिद्धत्वात् स्वपरनाशकत्वे युक्तेऽपि शास्त्रविहितस्य स्वदारभोगस्य को दोष इति चेत्, विशिष्टे वेषु विषयिणा शास्त्रेण विहितत्वाद् शास्त्रनिषिद्धपरदारभोगवन्न लोकविरुद्धः, नापि नरकप्रतिमानिरूपणे दुःखरूपनरकहेतुः। अथापि अनन्यभोग्यत्वरूपस्वरूपविरुद्धत्वात् [illegible] वेदान्ते [illegible]
[illegible] विरुद्धत्वात्, [illegible]

दिग्घसङ्ग उत्क्रान्तिश्च ॥३९॥ समानजयात् ज्वलनम् ॥४०॥ श्रोत्राकाश-
योः सम्बन्धसंयमाद्दिव्यं श्रोत्रम् ॥४१॥ कायाकाशयोः सम्बन्धसंयमात् लघु-
तूलसमापत्तेश्चाकाशगमनम् ॥४२॥ बहिरकल्पिता वृत्तिर्महाविदेहा त-
तः प्रकाशावरणक्षयः ॥४३॥ स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूत-
जयः ॥४४॥ ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ॥४५॥
रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् ॥४६॥ ग्रहणस्वरूपास्मिता-
न्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥४७॥ ततो मनोजवित्वं विकरणभावः प्र-
धानजयश्च ॥४८॥ सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठा-
तृत्वं सर्वज्ञातृत्वं च ॥४९॥ तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥५०॥ स्था-
न्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥५१॥ क्षणतत्क्रमयोः
संयमाद्विवेकजं ज्ञानम् ॥५२॥ जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्य-
योस्ततः प्रतिपत्तिः ॥५३॥ तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति
विवेकजं ज्ञानम् ॥५४॥ सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति ॥५५॥

॥ इति तृतीयः पादः ॥

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः ॥१॥ जात्यन्तरपरिणामः प्रकृ-
त्यापूरात् ॥२॥ निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकव-
त् ॥३॥ निर्माणचित्तान्यस्मितामात्रात् ॥४॥ प्रवृत्तिभेदे प्रयोजकं चित्त-
मेकमनेकेषाम् ॥५॥ तत्र ध्यानजमनाशयम् ॥६॥ कर्माशुक्लाकृष्णं
योगिनस्त्रिविधमितरेषाम् ॥७॥ ततस्तद्विपाकानुगुणानामेवाभिव्य-
क्तिर्वासनानाम् ॥८॥ जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसं-
स्कारयोरेकरूपत्वात् ॥९॥ तासामनादित्वं चाशिषो नित्यत्वात् ॥१०॥

प्राप्तिं न जि रूपयुद्ध विषयभोगादि [illegible] आरम्भाने [illegible]
यत्नेन [illegible] निन्दितत्वात् अप्राप्तविषयविरक्तिमभिनन्द्य तं आचार्यस्य मु-
खेनोक्तस्वरूपस्य प्रतिबन्धकत्वात् सुरुषा[illegible], इत्यर्थवर्णनया करणात्
अनेनाधिकारिणा निहितस्तदा भोग: परित्याज्य:॥
(४५७) भोग्यताबुद्धिरेकेण (हाकेन) धर्मबुद्ध्यापि सेवने।
अनन्योपायतारूपं स्वरूपं शि[illegible]भवेत्॥
टि) अनन्योपायतास्वरूपभञ्जिकां भोग्यताबुद्धिं त्यक्त्वा उपासकमहर्षि-
भिरिव पितॄणामुदकप्रदानोत्पत्त्यर्थं ऋतुगमने भ्रूणहत्यादिदोषा-
प्रसङ्गार्थं धर्मबुद्ध्या स्वदारभोगे प्रवृत्तावपि सिद्धधर्मनिष्ठस्यास्य
भगवान् एव उपायस्य अनन्योपायत्वस्वरूपनाशकत्वात् न भोगे प्रवृत्तिर्युक्ता। तथा
भोग्यताबुद्ध्या प्रवृत्तावनन्योपायत्वस्वरूपनाश: धर्मबुद्ध्या प्रवृत्तावनन्यो-
४५८) क्षेत्राणि मित्राणीत्यस्मिन् श्लोके धात्रा निर्दि[illegible] | पायत्वस्वरूपनाश:
उक्तया अवस्थया भाव्यं स्वरूपप्रच्युतिं प्रति॥ तो|
टि) स्वरूपहानिभयेन त्यागमात्रं न पर्याप्तम्, किन्तु प्राप्तविषयप्रावण्येन
[illegible] भोग्यवस्तुषु प्रातिकूल्यधीरपि स्वरूपाविनाशाय भवेदिति [illegible]
[illegible] "क्षेत्राणि मित्राणि धनानि नाथ पुत्राश्च दारा: पशवो गृहाणि।
त्वत्पादपद्मप्रवणात्मवृत्तेर्भवन्ति सर्वे प्रतिकूलरूपा:॥" इति [illegible]
४५९) प्रावण्यं प्राप्यभूमौ च त्याज्यभूमौ जिहासनम्।
अनुष्ठितेरलाभे सत्यात्मधारणदौर्बल्यकी।
आवश्यकानि निर्दिष्टचतु:साधनसेविषु॥ स्था२४
टि) उपायचतुष्टयम्: भक्ति: प्रपत्ति: आचार्यविषये स्वगतस्वीकारपर-
४५९) आचार्ये स्वगतस्वीकृत्यात्मोपायप्रमाणता॥ | गतस्वीकारौ च॥
प[illegible] दाहादिति (अन्यथा स्यादिति) श्रीमद्व्यससूक्त्या विनिश्चयतात्
टि) भक्तिसारेण (मा० [illegible] ९-८१) भागवतस्य (आचार्यस्य) सामु-
पायणमहत्कारणभूततया अवश्यावहत्वेऽपि अक्षुण्णफलाव्यभिचारित्वादत्यर्थं
पायइत्युक्तम्। तत् अत्र स्वगतस्वीकारे प्रमाणम्। "करुणा यो ऽभिमन्येत
[illegible]को वा यो ऽभिमन्यते। तावुभौ परमां सिद्धिं नियमादुपगच्छत:" इत्याचार्य-
विषये उभयविधस्वीकारयो: फलाविनाभाव: भरद्वाजसंहितायामुक्त:॥
४६०) "नन्नवेर् तो[illegible]" "मारायु" इति गाथाद्वयं तथा।
"सात्विकमत्तारिव" शास्त्रवत् मिति गाथाद्वयं तथा।
पञ्चम[illegible] इत्यादि: स्तोत्रे त्वय: श्लोक एव च।
आचार्याभिमानरूपस्योपायस्य स्यात् प्रयापकम्॥
टि) नान्मुखार तिरुमोलि १०/१० गाथायां गोप्या विष्णुचित्तं स्वं देवगुप्तनारे
[illegible] तथा निश्चयो प्रकटयेति, मान्नुकन्नितरुवं दादिसन्धे। ४
भक्तिसारेण भगवदाश्रितानां विजयेत तदीयाश्रितानां तप इत्युक्तत्वा-
त्[illegible] पञ्च[illegible] पूर्वाचार्यैर्वैष्णवसंग-
[illegible] यति तीर्थो: [illegible] तानि [illegible]
४६१) अन्योपाया[illegible]

[illegible]॥
पारवश्य भगवद्ग्रह[illegible]

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ॥११॥
अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् ॥१२॥ ते व्यक्त-
सूक्ष्मा गुणात्मानः ॥१३॥ परिणामैकत्वाद्वस्तुतत्त्वम् ॥१४॥ व-
स्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः ॥१५॥ न चैकचि-
त्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ॥१६॥ तदुपरागापे-
क्षित्वात् चित्तस्य वस्तु ज्ञाताज्ञातम् ॥१७॥ सदा ज्ञाताश्चित्त-
वृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् ॥१८॥ न तत् स्वाभासं
दृश्यत्वात् ॥१९॥ एकसमये चोभयानवधारणम् ॥२०॥ चित्तान्त-
रदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च ॥२१॥ चितेरप्र-
तिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् ॥२२॥ द्रष्टृदृश्यो-
परक्तं चित्तं सर्वार्थम् ॥२३॥ तदसंख्येयवासनाभिश्चित्रमपि
परार्थं संहत्यकारित्वात् ॥२४॥ विशेषदर्शिन आत्मभावभा-
वनाविनिवृत्तिः ॥२५॥ तदा विवेकनिम्नं कैवल्यप्राग्भारं चि-
त्तम् ॥२६॥ तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥२७॥ हान-
मेषां क्लेशवदुक्तम् ॥२८॥ प्रसंख्या[illegible]ऽप्यकु[illegible]दस्य सर्वथा
विवेकख्यातेर्धर्ममेघः समाधिः ॥२९॥ ततः क्लेशकर्मनिवृत्तिः
॥३०॥ तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्प-
म् ॥३१॥ ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम् ॥३२॥
क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥३३॥ पुरुषा-
र्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चि-
तिशक्तिरिति [illegible]

(१) अथ मा[illegible]चार्याभिमान: अज्ञ प्रपत्तिवदुपायाद्गु सन्नपि [illegible] [illegible] [illegible] स्तथा । सदा[illegible]चार्येण सन्दृष्टा तेऽपि यान्ति परमं पदम् ॥ इति केवलं [illegible]साधनमपि भवति ॥

(४६१) प्रपत्तिभक्त्यधिकारस्य [illegible] [illegible] स्य स्वभ्यसौ । आचार्याभिमानोऽधिक:

(४६३) आदावसौ प्रकुर्वितं स्वरूपं कुर्यात् तत: पुष्पितमादधीत । तत: परस्तात् फलितं च कुर्यादित्थं समास्ते गुरुदिव्यशास्त्रम् ॥

इति काञ्चीप्रतिवादिभयङ्कर [illegible] प्रणीता श्रीवचनभूषणरत्नमाला सम्पूर्णा ।

(८) अथ मा[illegible]चार्याभिमान: — [illegible] [illegible] [illegible] श्रीवचनभूषणमात्मस्वरूपं [illegible] सम्पादनेन फलकुर्वीत, तत: पुष्पितं [illegible] भगवत्प्रावण्यवर्धनेन फलान्वययोग्यतारूप पुष्पवन्तं कुर्यात्। तत: परमपदनि:श्रेयसप्रापणेन फलितं कुर्यात् । तदेव सदाचार्याभिमान एवोद्धारक इत्युक्तं भवति । द्वय खण्ड [illegible] पर्वाइथं प्रकृति

१ श्रीवचनभूषणे संप्रतिपन्ना अर्था: — (क) उपोद्घात: सू. १-४ (ख) पुरुषकार [illegible] तद्गुण, तत्कृत्य, तत्पुरस्कारावश्यकता - ५-७, ८-१३, १५-१८, १५१-१५९) (ग) प्रपन्नस्य कर्म पुरुषकार विनाश्यम् - २६७, (घ) उपाय: स्वीकार काले पुरुषकारस्सापेक्ष: - २६८ (ङ) उपायवैभवम् - ५, ६१ [illegible] ७, १९-२२ (च) प्रपत्ते विषयनियमातिरिक्त नियमराहित्यम् २३-४० (छ) अवतारमहिमा ३४-४०, १७१-१७४ (ज) उपायोपेयनिष्ठा प्र- [illegible] करणम् - ८०-[illegible] आत्मगुणेषु प्रधानमाश्रम [illegible] भगवत्प्राप्ति - ९६-९९) [illegible] विषयभोग भगवद्भोग [illegible] [illegible] प्रापणहेतून प्राप्तेदोषदर्शने १०६-११२) (ट) अहङ्कार विषयकामनाभ्यामात्मनाश: - १२०-१२४ (ठ) केवल नास्तिक: स्व- [illegible] नास्तिक: १२७-१२८ (ड) प्रपन्नदिनचर्या २४३) (ढ) मङ्गलाशासनसमर्थनम् - २४४-२५८ (ण) अनुकूलसहवासो [illegible] दान प्रतिकूलसहवासत्यागनि- रूपणम् २५९-२७३ (त) प्रपन्नवस्तव्यादि निरूपणम् - २७४) (थ) कैङ्कर्यं यथाशास्त्रं [illegible] [illegible] निरपराधं स्वसंप्रदायेन च कर्तव्यं कार्यम् २७५-२८७) (द) कैङ्कर्यपु- [illegible] चतस्रष्वपि दशासु स्वरूपम् [illegible] चिन्तनीयम् - २८८-२९४ (ध) जीव- [illegible] [illegible] निरूपणम् २९५-२९९ (न) नि- [illegible] निरूपणम् - ३०० - ३०७ (प) आचार्यविषये [illegible] निरूपणम् - ३०८- [illegible] (फ) [illegible] [illegible] आचार्य: मान्य: - ३१५-३२० (ब) शिष्यस्य लक्ष- [illegible] - [illegible] - ३२५ (भ) शिष्याचार्यव्यवहार निरूपणम् - ३२६-३४२ (म) [illegible] निरूपणम् - ३४३-३६५ (य) प्रपन्नस्य स्वदोषानुसन्धानं [illegible] [illegible] गुणानुसन्धानमभयहेतु: - ३६६-४०६) (र) उपायोपेयचर- [illegible] आचार्यनिष्ठाया निरूपणम्, तत्र भरं परित्यज्याचार्यस्यायणी- [illegible] आचार्येणात्मीयभरन्यासेन शिष्यभरन्यासो भाव्य: - ४०७- [illegible] (ल) आचार्यमहिमा - ४२७-४४२ (व) आचार्याभिमान एवोद्धारक: - ४२३-४४०, ४४८-४६३ (श) आचार्याभिमान निष्ठस्य त्याज्योपादेये - ४५१-४५९ [illegible] [illegible] विप्रतिपन्नार्था: — (क) प्रपन्नत्रैविध्यम् - ४१-५० (ख) स्वरक्षणा- [illegible] [illegible] स्वगतस्वीकारानपेक्षणम् ५१, ५२ (ग) प्रपत्तेरनुपायत्वम् - ५४-७९, १३६-१३९ [illegible] [illegible] विहितभगवत्याग: - १०१-१०५, ४५५-४५७ [illegible] परगतस्वीकारोपायत्वं च १४२-१५० (ङ) प्रप- [illegible] [illegible] [illegible] ११५-१३५, १३६-१४१) भागवतापचारस्य कृ- [illegible] २६३-२६[illegible] [illegible]

[illegible]

२) भिन्न[illegible] तरस्य भावाः - (क) प्रपन्नस्य [illegible]
निषिद्धविपरीतानुष्ठानसंभवस्य प्रशमनीयता च
५१-५३, ९०-९५, ११३-११४, २६९-२७२)
(ख) प्रपन्नस्योत्तरकाले भोगावेलायां भगवदै[illegible]
विप्रतीपं स्वशेषत्वपारतन्त्र्ये रक्षिणा, देहाभिनि-
वर्तयिषा, इत्यादय इच्छा अस्य कार्यः भगवत्साध्यहि-
तस्य प्रतीक्षणं कार्यम् (स्तेन स्वस्य हिते साधनमार्ग
कम् १६०-१७९)
३) प्रपन्नो विषयदर्शनमात्रेण भ्रियेत - १५-१[illegible]



श्रीः ।

वैशेषिकंदर्शनम् ।

(अर्थात् वैशेषिकसूत्रपाठः)

पूज्यपादभगवत्कणादमुनिकृतम् ।

PUBLISHED AND SOLD BY
H. D. GUPTA & SONS,
PROPRIETORS,
THE CHOWKHAMBA SANSKRIT
BOOK DEPOT.
BENARES CITY:
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press.
BENARES.

1912.



श्रीः ॥

वैशेषिकदर्शनम् ।

श्रीगणेशाय नमः ।

अथातो धर्मं व्याख्यास्यास्यामः ॥ १ ॥ यतो ऽभ्युदयनिः श्रेयससिद्धिः स धर्मः ॥ २ ॥ तद्वचना-दाम्नायस्य प्रामाण्यम् ॥ ३ ॥ धर्मविशेषप्र सूताद्द्र-व्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां सा-धर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् ॥ ४ ॥ पृ-थिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि ॥ ५ ॥ रूपरसगन्धस्पर्शाः सङ्ख्याः परिमा णानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषौ प्रयत्नाश्च गुणाः ॥ ६ ॥ उत्क्षेपण-मवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि॥७॥ सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः ॥ ८ ॥ द्रव्यगुणयोः सजा-तीयारम्भकत्वं साधर्म्यम् ॥ ९ ॥ द्रव्याणि द्रव्या-न्तरमारभन्ते गुणाश्च गुणान्तरम् ॥ १० ॥ कर्म कर्म-साध्यं न विद्यते ॥ ११ ॥ न द्रव्यं कार्यं कारणं च भवति ॥ १२ ॥ उभयथा गुणाः ॥ १३ ॥ कार्यवि-रोधि कर्म ॥ १४ ॥ क्रियागुणवत् समवायिकारण-

मिति द्रव्यलक्षणम् ॥ १५ ॥ द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्॥१६॥ एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम् ॥ १७ ॥ द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् ॥ १८ ॥ तथा गुणः ॥ १९ ॥ संयोगविभागवेगानां कर्म समानम् ॥ २० ॥ न द्रव्याणां कर्म ॥ २१ ॥ व्यतिरेकात् ॥ २२ ॥ द्रव्याणां द्रव्यं कार्य्यं सामान्यम् ॥ २३ ॥ गुणवैधर्म्यान्न कर्मणां कर्म ॥ २४ ॥ द्वित्वप्रभृतयः संख्याः पृथक्त्वसंयोगविभागाश्च ॥ २५ ॥ असमवायात् सामान्यकार्यं कर्म न विद्यते ॥ २६ ॥ संयोगनां द्रव्यम्॥२७॥ रूपाणां रूपम् ॥ २८ ॥ गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् ॥ २९ ॥ संयोगविभागाश्च कर्मणाम् ॥३०॥ कारणसामान्ये द्रव्यकर्मणां कर्माकारण मुक्तम्॥३१॥

इति प्रथमाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

कारणाभावात् कार्य्याभावः ॥ १ ॥ न तु कार्य्याभावात् कारणाभावः ॥ २ ॥ सामान्यं विशेष इति बुद्ध्यपेक्षम् ॥ ३ ॥ भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव ॥ ४ ॥ द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च ॥ ५ ॥ अन्यत्रान्त्येभ्यो विशेषेभ्यः ॥ ६ ॥ सदिति यतो द्रव्यगुणकर्मसु सा सत्ता

॥ ७ ॥ द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता ॥ ८ ॥ गुण-कर्मसु च भावान्न कर्म न गुणः ॥ ९ ॥ सामान्य-विशेषाभावेन च ॥ १० ॥ अनेकद्रव्यवत्त्वेन द्रव्यत्व-मुक्तम् ॥ ११ ॥ सामान्यविशेषाभावेन च ॥ १२ ॥ तथा गुणेषु भावाद्गुणत्वमुक्तम् ॥ १३ ॥ सामान्य विशेषाभावेन च ॥१४॥ कर्मसु भावात् कर्मत्वमुक्तम् ॥ १५ ॥ सातान्यविशेषाभावेन च ॥ १६॥ सदिति लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्चैको भावः ॥ १७ ॥

इति प्रथमाध्यायस्य द्वितीयमाह्निकम् ॥

—:o:—

रूपरसगन्धस्पर्शवती पृथिवी ॥ १ ॥ रूपरस-स्पर्शवत्य आपो द्रवाः स्निग्धाः ॥ २ ॥ तेजो रूपस्पर्शवत् ॥ ३ ॥ स्पर्शवान् वायुः ॥ ४ ॥ तआकाशे न विद्यन्ते ॥ ५ ॥ सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगाद् द्रवत्वमद्भिः सामाभ्यम् ॥ ६ ॥ त्रपुसीसलोहरजत सुवर्णानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम् ॥ ७ ॥ विषाणी ककुद्मान् प्रान्ते वालधिः सास्नावान् इति गोत्वे दृष्टं लिङ्गम् ॥ ८ ॥ स्पर्शश्च वायोः ॥ ९ ॥ न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः ॥ १० ॥ अद्र-व्यवत्त्वेन द्रव्यम् ॥ ११ ॥ क्रियावत्त्वाद् गुणवत्त्वा-च्च ॥ १२ ॥ अद्रव्यत्वेन नित्यत्वमुक्तम् ॥ १३ ॥वा योर्वायुसंमूर्छनं नानात्वलिङ्गम् ॥ १४ ॥ वायुसन्नि-

कर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥ १५ ॥ सामान्यतो दृष्टाच्चाविशेषः ॥ १६ ॥ तस्मादागमिकम् ॥ १७ ॥ संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम् ॥ १८ ॥ प्रत्यक्षप्रवृत्तत्वात् संज्ञाकर्मणः ॥ १९ ॥ निष्क्रमणं प्रवेशनमित्यकाशस्य लिङ्गम् ॥ २० ॥ तदलिङ्गमेकद्रव्यत्वात् कर्मणः ॥ २१ ॥ कारणान्तरानुक्लृप्तिवैधर्म्याच्च ॥ २२ ॥ संयोगादभावः कर्मणः ॥ २३ ॥ कारणगुणपूर्वकः कार्य्यगुणो दृष्टः ॥ २४ ॥ कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः ॥ २५ ॥ परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः ॥ २६ ॥ परिशेषाल्लिङ्गमाकाशस्य ॥ २७ ॥ द्रव्यत्वानित्यत्वे वायुना व्याख्याते ॥ २८ ॥ तत्त्वम्भावेन ॥ २९ ॥ शब्दलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च ॥ ३० ॥ तदनुविधानादेकपृथक्त्वंचेति ॥ ३१ ॥

इति द्वितीयाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

पुष्पवस्त्रयोः सति सन्निकर्षे गुणान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् ॥ १ ॥ व्यवस्थितः पृथिव्यां गन्धः ॥ २ ॥ एतेनोष्णता व्याख्याता ॥ ३ ॥ तेजस उष्णता ॥ ४ ॥ अप्सु शीतता ॥ ५ ॥ अपरस्मिन्नपरं युगपत् चिरं क्षिप्रमिति काललिङ्गानि ॥ ६ ॥ द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ ७ ॥ तत्त्वम्भा-

वेन ॥ ८ ॥ नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति ॥ ९ ॥ इत इदमिति यतस्तद्दिश्यं लिङ्गम् ॥१०॥ द्रव्यत्वनित्यत्वे वायुना व्याख्याते॥११॥ तत्त्वम्भावेन ॥१२॥ कार्य्यविशेषेण नानात्वम्॥१३॥ आदित्य संयोगाद्भूतपूर्वाद्भविष्यतो भूताच्च प्राची ॥ १४ ॥ तथा दक्षिणा प्रतीची उदीची च ॥१५ ॥ एतेन दिगन्तरालानि व्याख्यातानि ॥ १६ ॥ सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः॥१७॥ दृष्टञ्च दृष्टवत् ॥ १८ ॥ यथादृष्टमयथादृष्टत्वाच्च॥१९॥ विद्याऽविद्यातश्च संशयः ॥ २० ॥ श्रोत्रग्रहणो योऽर्थः स शब्दः ॥ २१ ॥ तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्य उभयथा दृष्टत्वात् ॥ २२ ॥ एकद्रव्यत्वान्न द्रव्यम् ॥ २३ ॥ नापि कर्माऽचाक्षुषत्वात् ॥ २४ ॥ गुणस्य सतोऽपवर्गः कर्मभिःसाधर्म्यम् ॥ २५ ॥ सतो लिङ्गाभावात् ॥ २६ ॥ नित्यवैधर्म्यात् ॥२७॥ अनित्यश्चायं कारणतः ॥ २८ ॥ न चासिद्धं विकारात् ॥ २९ ॥ अभिव्यक्तौ दोषात् ॥ ३० ॥ संयोगाद्विभागाच्च शब्दाच्च शब्दनिष्पत्तिः ॥ ३१ ॥ लिङ्गाच्चानित्यः शब्दः ॥ ३२ ॥ द्वयोस्तु प्रवृत्त्योरभावात् ॥ ३३ ॥ प्रथमाशब्दात् ॥ ३४ ॥ सम्प्रतिपत्तिभावाच्च ॥ ३५ ॥ सन्दिग्धाः सति बहुत्वे ॥ ३६ ॥ संख्याभावः सामान्यतः ॥ ३७ ॥

इति द्वितीयाध्यायस्य द्वितीयमाह्निकम् ॥

प्रसिद्धा इन्द्रियार्थाः ॥ १ ॥ इन्द्रियार्थप्रसिद्धि-रिन्द्रियार्थेभ्यो ऽर्थान्तरस्य हेतुः ॥ २ ॥ सो ऽनप-देशः ॥ ३ ॥ कारणाज्ञानात् ॥ ४ ॥ कार्य्येषु ज्ञानात् ॥ ५ ॥ अज्ञानाच्च ॥ ६ ॥ अन्यदेव हेतुरित्यन-पदेशः ॥ ७ ॥ अर्थान्तरं ह्यर्थान्तरस्याऽनपदेशः ॥ ८ ॥ संयोगिसमवाय्येकार्थसमवायिविरोधि च॥९॥ कार्यं कार्यान्तरस्य ॥ १० ॥ विरोध्यभूतं भूतस्य ॥ ११ ॥ भूतमभूतस्य ॥ १२ ॥ भूतो भूतस्य॥१३॥ प्रसिद्धिपूर्वकत्वादपदेशस्य ॥ १४ ॥ अप्रसिद्धोऽनप-देशोऽसन् सन्दिग्धश्चानपदेशः ॥ १५ ॥ यस्माद्वि-षाणी तस्मादश्वः ॥ १६ ॥ यस्माद्विषाणी तस्मा-द्गौरिति-चानैकान्तिकस्योदाहरणम् ॥ १७ ॥ आत्मे-न्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत् ॥ १८ ॥ प्र-वृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम्॥१९॥

इति तृतीयाध्यायस्य प्रथमाह्निकम् ॥

—:०:—

आत्मेन्द्रियार्थसन्निकर्षेज्ञानस्य भावोऽभावश्च म-नसो लिङ्गम् ॥ १ ॥ तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ २ ॥ प्रयत्नायौगपद्याज्ज्ञानायौगपद्या-च्चैकम् ॥ ३ ॥ प्राणाऽपाननिमेषोन्मेषजीवनमनोग-तोन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि ॥ ४ ॥ तस्य द्रव्यत्वनित्यत्वे वायुना व्या-

ख्याते ॥ ५ ॥ यज्ञदत्त इति सन्निकर्षेप्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥६॥ सामान्यतो दृष्टाच्चाविशेषः ॥ ७ ॥ तस्मादागमिकः ॥ ८ ॥ अहमिति शब्दस्य व्यतिरेकान्नागमिकम् ॥ ९ ॥ यदि दृष्टमन्वक्षमहं देवदत्तोऽहं यज्ञदत्त इति ॥ १० ॥ दृष्ट्यात्मनि लिङ्गे एक एव दृढत्वात् प्रत्यक्षवत् प्रत्ययः ॥ ११ ॥ देवदत्तोगच्छतियज्ञदत्तोगच्छतीत्युपचाराच्छरीरेप्रत्ययः ॥ १२ ॥ सन्दिग्धास्तूपचाराः ॥१३॥ अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्यक्षः ॥१४॥ देवदत्ते गच्छतीत्युपचारादभिमानात्तावच्छरीरप्रत्यक्षोऽहङ्कारः ॥ १५ ॥ सन्दिग्धस्तूपचारः ॥ १६ ॥ न तु शरीरविशेषाद् यज्ञदत्तविष्णुमित्रयोर्ज्ञानाविषयः ॥ १७ ॥ अहमिति मुख्ययोग्याभ्यां शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेर्नागमिकः ॥ १८ ॥ सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यम् ॥ १९ ॥ व्यवस्थातो नाना ॥ २० ॥ शास्त्रसामर्थ्याच्च ॥२१॥

इति तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥

—:०:—

सदकारणवन्नित्यम् ॥ १ ॥ तस्यकार्य्यंलिङ्गम् ॥ २ ॥ कारणाभावात् कार्य्याभावः ॥ ३ ॥ अनित्य इति विशेषतः प्रतिषेधभावः ॥ ४ ॥ अविद्या ॥ ५ ॥ महत्यनेकद्रव्यवत्त्वात् रूपाच्चोपलब्धिः ॥६॥

सत्यपि द्रव्यत्वे महत्त्वे रूपसंस्काराभावाद्वायोरनुप-
लब्धिः ॥ ७ ॥ अनेकद्रव्यसमवायात् रूपविशेषाच्च
रूपोपलब्धिः ॥ ८ ॥ तेन रसगन्धस्पर्शेषु ज्ञानं व्या-
ख्यातम् ॥९॥ तस्याभावादव्यभिचारः ॥ १० ॥ स-
ङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वा-
ऽपरत्वे कर्म च रूपद्रव्यसमवायात् चाक्षुषाणि॥११॥
अरूपिष्वचाक्षुषाणि ॥ १२ ॥ एतेन गुणत्वे भावे
च सर्वेन्द्रियं ज्ञानं व्याख्यातम् ॥ १३ ॥

इति चतुर्थाध्यायस्य प्रथममाह्निकम् ॥

—:o:—

तत्पुनः पृथिव्यादिकार्य्यद्रव्यं त्रिविधं शरीरेन्द्रि
यविषयसंज्ञकम् ॥ १ ॥ प्रत्यक्षाऽप्रत्यक्षाणां संयोग-
स्याप्रत्यक्षत्वात् पञ्चात्मकं न विद्यते ॥ २ ॥ गुणा-
न्तराप्रादुर्भावाच्च न त्र्यात्मकम् ॥ ३ ॥ अणुसंयोग-
स्त्वप्रतिषिद्धः ॥ ४ ॥ तत्र शरीरं द्विविधं योनिजम-
योनिजं च ॥ ५ ॥ अनियतदिग्देशपूर्वकत्वात् ॥ ६ ॥
धर्मविशेषाच्च ॥ ७ ॥ समाख्याभावाच्च ॥ ८ ॥ संज्ञा-
या आदित्वात् ॥ ९ ॥ सन्त्ययोनिजाः ॥ १० ॥
वेदलिङ्गाच्च ॥ ११ ॥

इति चतुर्थाध्यायस्य द्वितीयमाह्निकम् ॥

आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म ॥ १ ॥ तथा हस्तसंयोगाच्च मुसले कर्म ॥ २ ॥ अभिघातजे मुसलादौ कर्मणि व्यतिरेकादकारणं हस्तसंयोगः ॥ ३॥ तथात्मसंयोगो हस्तकर्मणि ॥ ४ ॥ अभिघातान्मुसलसंयोगाद्धस्ते कर्म ॥ ५ ॥ आत्मकर्म हस्तसंयोगाच्च ॥ ६ ॥ संयोगाभावे गुरुत्वात् पतनम् ॥ ७ ॥ नोदनविशेषाभावान्नोर्ध्वं न तिर्यग्गमनम् ॥ ८ ॥ प्रयत्नविशेषान्नोदनविशेषः ॥ ९ ॥ नोदनविशेषादुदसनविशेषः ॥ १० ॥ हस्तकर्मणा दारककर्म व्याख्यातम् ॥ ११ ॥ तथा दग्धस्य विस्फोटने ॥ १२ ॥ यत्नाभावे प्रसुप्तस्य चलनम् ॥ १३ ॥ तृणे कर्म वायुसंयोगात् ॥ १४ ॥ मणिगमनं सूच्यभिसर्पणमदृष्टकारणम् ॥ १५ ॥ इषावयुगपत् संयोगविशेषाः कर्मान्यत्वे हेतुः ॥ १६ ॥ नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारा दुत्तरं तथोत्तरमुत्तरं च ॥१७॥ संस्काराभावे गुरुत्वात् पतनम् ॥ १८ ॥

इति पञ्चमाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म ॥ १ ॥ तद्विशेषेणादृष्टकारितम् ॥ २ ॥ अपां संयोगाभावे गुरुत्वात् पतनम् ॥ ३ ॥ द्रवत्वात् स्यन्दनम् ॥ ४ ॥ नाड्यो वायुसंयोगादारोहणम् ॥ ५ ॥

नोदनापीडनात् संयुक्तसंयोगाच्च ॥ ६ ॥ वृक्षाभिसर्पणमित्यदृष्टकारितम् ॥ ७ ॥ अपां सङ्घातो विलयनं च तेजःसंयोगात् ॥ ८ ॥ तत्रविस्फूर्जथुर्लिङ्गम् ॥ ९ ॥ वैदिकं च ॥ १० ॥ अपां संयोगाद्विभागाच्च स्तनयित्नोः ॥ ११ ॥ पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम् ॥ १२ ॥ अग्नेरूर्द्ध्वज्वलनं वायोस्तिर्यग्गमनमणूनां मनसश्चाद्यं कर्मादृष्टकारितम् ॥ १३ ॥ हस्तकर्मणा मनसः कर्म व्याख्यातम् ॥ १४ ॥ आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे ॥ १५ ॥ तदनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः संयोगः ॥ १६ ॥ अपसर्पणमुपसर्पणमशितपीतसंयोगाःकार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि ॥ १७ ॥ तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः ॥ १८ ॥ द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भावस्तमः ॥ १९ ॥ तेजसो द्रव्यान्तरेणावरणाच्च ॥ २० ॥ दिक्कालावाकाशं च क्रियावद्वैधर्म्यान्निष्क्रियाणि ॥ २१ ॥ एतेन कर्माणि गुणाश्च व्याख्याताः ॥ २२ ॥ निष्क्रियाणां समवायः कर्मभ्यो निषिद्धः ॥ २३ ॥ कारणं त्वसमवायिनो गुणाः ॥ २४ ॥ गुणैर्दिग् व्याख्याता ॥ २५ ॥ कारणेन कालः ॥ २६ ॥

इति पञ्चमाध्यायस्य द्वितीयमाह्निकम् ।

बुद्धिपूर्वा वाक्यकृतिर्वेदे ॥ १ ॥ ब्राह्मणे संज्ञाकर्म सिद्धिलिङ्गम् ॥ २ ॥ बुद्धिपूर्वो ददाति ॥ ३ ॥ तथा प्रतिग्रहः ॥ ४ ॥ आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात् ॥ ५ ॥ तद्दुष्टभोजनेन विद्यते ॥ ६ ॥ दुष्टं हिंसायाम् ॥ ७ ॥ तस्य समभिव्याहारतो दोषः ॥ ८ ॥ तद्दुष्टे न विद्यते ॥ ९ पुनर्विशिष्टे प्रवृत्तिः ॥ १० ॥ समे हीने वा प्रवृत्तिः ॥ ११ ॥ एतेन हीनसमविशिष्टधार्मिकेभ्यः परस्वादानं व्याख्यातम् ॥ १२ ॥ तथा विरुद्धानां त्यागः ॥ १३ ॥ हीने परे त्यागः ॥ १४ ॥ समे आत्मत्यागः परत्यागो वा ॥ १५ ॥ विशिष्टे आत्मत्याग इति ॥ १६ ॥

इति षष्ठाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

दृष्टादृष्टप्रयोजनानां दृष्टाभावे प्रयोजनमभ्युदयाय ॥ १ ॥ अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासवानप्रस्थयज्ञदानप्रोक्षणदिङ्नक्षत्रमन्त्रकालनियमाश्चादृष्टाय ॥ २ ॥ चातुराश्रम्यमुपधा अनुपधाश्च ॥ ३ ॥ भावदोष उपधाऽदोषोऽनुपधा ॥ ४ ॥ यदिष्टरूपरसगन्धस्पर्शं प्रोक्षितमभ्युक्षितं च तच्छुचि ॥ ५ ॥ अशुचीति शुचिप्रतिषेधः ॥ ६ ॥ अर्थान्तरं च ॥ ७ ॥ अयतस्य शुचि भोजनादभ्युदयो न विद्यते नियमाभावाद् विद्यते वा ऽर्थान्तरत्वाद् यमस्य ॥ ८ ॥ असति

चाभावात् ॥ ९ ॥ सुखाद्रागः ॥ १० ॥ तन्मयत्वाच्च ॥ ११ ॥ अदृष्टाच्च ॥ १२ ॥ जातिविशेषाच्च ॥ १३ ॥ इच्छाद्वेषपूर्विका धर्माऽधर्मप्रवृत्तिः ॥ १४ ॥ तत्संयोगो विभागः ॥ १५ ॥ आत्मकर्मसु मोक्षो व्याख्यातः ॥ १६ ॥

इति षष्ठाध्यायस्य द्वितीयमाह्निकम् ॥

—:०:—

उक्ता गुणाः ॥ १ ॥ पृथिव्यादिरूपरसगन्धस्पर्शा द्रव्यनित्यत्वादनित्याश्च ॥ २ ॥ एतेन नित्येषु नित्यत्वमुक्तम् ॥ ३ ॥ अप्सु तेजसि वायौ च नित्या द्रव्यनित्यत्वात् ॥ ४ ॥ अनित्येष्वनित्या द्रव्यानित्यत्वात् ॥ ५ ॥ कारणगुणपूर्वकाः पृथिव्यां पाकजाः ॥ ६ ॥ एकद्रव्यत्वात् ॥ ७ ॥ अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते ॥८॥ कारणबहुत्वाच्च ॥ ९ ॥ अतो विपरीतमणु ॥ १० ॥ अणु महदिति तस्मिन् विशेषभावात् विशेषाभावाच्च ॥ ११ ॥ एककालत्वात् ॥ १२ ॥ दृष्टान्ताच्च ॥ १३ ॥ अणुत्वमहत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्यातः ॥ १४ ॥ कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः ॥ १५ ॥ अणुत्वमहत्त्वाभ्यां कर्मगुणाश्च व्याख्याताः ॥ १६ ॥ एतेन दीर्घत्वह्रस्वत्वे व्याख्याते ॥ १७ ॥ अनित्ये ऽनित्यम् ॥ १८ ॥ नित्ये नित्यम् ॥ १९ ॥ नित्यं परिमण्डलम् ॥ २० ॥ अविद्या च विद्या

लिङ्गम् ॥ २१ ॥ विभवान्महानाकाशस्तथा चात्मा ॥ २२ ॥ तदभावादणुं मनः ॥ २३ ॥ गुणैर्दिग्व्याख्याता ॥ २४ ॥ कारणे कालः ॥ २५ ॥

इति सप्तमाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वम्॥१॥ तथा पृथक्त्वम् ॥२॥ एकत्वैकपृथक्त्वयोरेकत्वैकपृथक्त्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ ३ ॥ निःसंख्यत्वात् कर्मगुणानां सर्वैकत्वं न विद्यते ॥ ४ ॥ भ्रान्तं तत् ॥ ५ ॥ एकत्वाभावाद्भक्तिस्तु न विद्यते ॥ ६ ॥ कार्य्यकारणयोरेकत्वैकपृथक्त्वाभावादेकत्वैकपृथक्त्वं न विद्यते ॥ ७ ॥ एतदनित्ययोर्व्याख्यातम् ॥ ८ ॥ अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः ॥ ९ ॥ एतेन विभागो व्याख्यातः ॥ १० ॥ संयोग विभागयोः संयोगविभागाभावो ऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ ११ ॥ कर्मभिः कर्माणि गुणैर्गुणा अणुत्वमहत्त्वाभ्यामिति ॥ १२ ॥ युतसिद्ध्यभावात् कार्य्यकारणयोः संयोगविभागौ न विद्यते ॥ १३ ॥ गुणत्वात् ॥ १४ ॥ गुणोऽपि विभाव्यते ॥ १५ ॥ निष्क्रियत्वात् ॥ १६ ॥ असति नास्तीति च प्रयोगात् ॥ १७ ॥ शब्दार्थावसम्बन्धौ ॥ १८ ॥ संयोगिनो दण्डात् समवायिनो विशेषाच्च

॥ १९ ॥ सामयिकः शब्दादर्थप्रत्ययः ॥ २० ॥ एकदिक्कालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च॥२१॥ कारणपरत्वात् कारणापरत्वाच्च ॥ २२ ॥परत्वापरत्वयोः परत्वापरत्वाभावो ऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ २३ ॥ कर्मभिः कर्माणि ॥ २४ ॥ गुणैर्गुणाः ॥ २५ ॥ इहेदमिति यतः कार्य्य कारणयोः समवायः ॥ २६ ॥ द्रव्यत्वगुणत्वप्रतिषेधोभावेनव्याख्यातः ॥ २७ ॥ तत्त्वमभावेन ॥ २८ ॥

इति सप्तमाध्यायस्य द्वितीयमाह्निकम् ॥

—:०:—

द्रव्येषु ज्ञानं व्याख्यातम् ॥ १ ॥ तत्रात्मा मनश्चाप्रत्यक्षे ॥ २॥ ज्ञाननिर्देशे ज्ञाननिष्पत्तिविधिरुक्तः ॥ ३ ॥ गुणकर्मसु सन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणम् ॥ ४ ॥ सामान्यविशेषेषु सामान्यविशेषाभावात्तदेव ज्ञानम् ॥ ५ ॥ सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु ॥ ६ ॥ द्रव्ये द्रव्यगुणकर्मापेक्षम् ॥ ७ ॥ गुणकर्मसु गुणकर्माभावाद्गुणकर्मापेक्षं न विद्यते॥८॥ समवायिनः श्वैत्याच्छ्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते एते कार्यकारणभूते ॥९॥ द्रव्येष्वनितरेतरकारणाः॥१०॥ कारणायौगपद्यात् कारणक्रमाच्च घटपटादिबुद्धीनां क्रमो न हेतुफलभावात् ॥ ११ ॥

इति अष्टमाध्यायस्य प्रथममाह्निकम् ॥

अयमेष त्वया कृतं भोजयैनमिति बुद्ध्यपेक्षम् ॥ १ ॥ दृष्टेषु भावाददृष्टेष्वभावात् ॥ २ ॥ अर्थ इति द्रव्यगुणकर्मसु ॥३॥ द्रव्येषु पञ्चात्मकत्वं प्रतिषिद्धम् ॥ ४ ॥ भूयस्त्वाद्गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः ॥ ५ ॥ तथापस्तेजो वायुश्च रसरूपस्पर्शाविशेषात् ॥ ६ ॥

इति अष्टमाध्यायस्य द्वितीयमाह्निकम् ॥

—:०:—

क्रियागुणव्यपदेशाभावात् प्रागसत् ॥१॥सदसत् ॥ २ ॥ असतः क्रियागुणव्यपदेशाभावादर्थान्तरम् ॥ ३ ॥ सच्चासत् ॥४॥ यच्चान्यदसदतस्तदसत् ॥५॥ असदिति भूतप्रत्यक्षाभावात् भूतस्मृतेर्विरोधिप्रत्यक्षवत् ॥ ६ ॥ तथाऽभावे भावप्रत्यक्षत्वाच्च ॥ ७ ॥एतेनाघटोऽगौरधर्मश्च व्याख्यातः ॥ ८ ॥ अभूतं नास्तीत्यनर्थान्तरम् ॥ ९ ॥ नास्ति घटो गेहे इति सतो घटस्य गेहसंसर्गप्रतिषेधः ॥ १० ॥ आत्मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षम् ॥ ११॥ तथा द्रव्यान्तरेषु प्रत्यक्षम् ॥ १२ ॥ असमाहितान्तःकरणा उपसंहृतसमाधयस्तेषां च ॥ १३ ॥ तत्समवायात् कर्मगुणेषु ॥ १४ ॥ आत्मसमवायादात्मगुणेषु ॥ १५ ॥

इति नवमाध्यायस्य प्रथममाह्निकम् ॥

अस्येदं कार्यं कारणं संयोगि विरोधिसमवायि चेति लैङ्गिकम् ॥ १ ॥ अस्येदं कार्यकारणसम्बन्धश्चावयवाद्भवति ॥ २ एतेन शाब्दं व्याख्यातम् ॥३॥ हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम् ॥४॥ अस्येदमिति बुद्ध्यपेक्षितत्वात् ॥ ५ ॥ आत्मनः संयोगविशेषात् संस्काराच्च स्मृतिः ॥ ६ ॥ तथा स्वप्नः ॥ ७ ॥स्वप्नान्तिकम् ॥८॥ धर्माच्च ॥ ९ ॥ इन्द्रियदोषात् संस्कारदोषाच्चाविद्या ॥ १० ॥ तद्दुष्टज्ञानम् ॥ ११ ॥ अदुष्टं विद्या ॥ १२ ॥ आर्षं सिद्धदर्शनं च धर्मेभ्यः ॥ १३ ॥

इति नवमाध्यायस्य द्वितीयमाह्निकम् ॥

—:०:—

इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः ॥ १ ॥ संशयनिर्णयान्तराभावाश्च ज्ञानान्तरत्वे हेतुः ॥ २ ॥ तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्याम् ॥ ३ ॥ अभूदित्यपि ॥ ४ ॥ सति च कार्यादर्शनात् ॥ ५ ॥ एकार्थसमवायिकारणान्तरेषु दृष्टत्वात् ॥ ६ ॥ एकदेशे इत्येकस्मिन् शिरः पृष्ठमुदरं मर्माणि तद्विशेषस्तद्विशेषेभ्यः ॥ ७ ॥

इति दशमाध्यायस्य प्रथममाह्निकम् ॥

—:०:—

कारणमिति द्रव्ये कार्य्यसमवायात् ॥ १ ॥ सं-

योगाद्वा ॥ २ ॥ कारणे समवायात् कर्माणि ॥ ३ ॥ तथा रूपे कारणैकार्थसमवायाच्च ॥ ४ ॥ कारणसमवायात् संयोगः पटस्य ॥ ५ ॥ कारणाकारणसमवायाच्च ॥ ६ ॥ संयुक्तसमवायादग्नेर्वैशेषिकम् ॥ ७ ॥ दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय ॥ ८ ॥ तद्वचनादाम्नायस्य प्रामाण्यमिति ॥ ९ ॥

इति दशमाध्यायस्य द्वितीयमाह्निकम्।

समाप्तं च वैशेषिकदर्शनम् ॥

शुभमस्तु।





सूचीपत्रम् ।

पत्रादिप्रेषणस्थानम्—हरिदासगुप्तः—बनारस



